॥ श्रीगणेशायनमः ॥

* ॐ नमोभगवतेवासुदेवाय *

श्रीमन्महर्षिवेदव्यासप्रणीतम्

स्कन्दपुराणम्

तस्येदं तृतीयं ब्रह्मखण्डम्प्रारभ्यते

प्रथमोऽध्यायः

तत्राऽऽदौ सेतुमाहात्म्यवर्णनम्

शुक्लाम्बरधरं विष्णुं शशिवर्णञ्चतुर्भुजम् । प्रसन्नवदनंध्यायेत्सर्वविघ्नोपशान्तये
नैमिषारण्यनिलये ऋषयः शौनकादयः । अष्टाङ्गयोगनिरताब्रह्मज्ञानैकतत्पराः ॥ २ ॥
मुमुक्षवोहमहात्मानो निर्ममाब्रह्मवादिनः । धर्मज्ञाअनसूयाश्च सत्यव्रतपरायणाः ॥ ३
जितेन्द्रियाजितक्रोधाः सर्वभूतदयालवः । भक्त्यापरमयाविष्णुमर्चयन्तः सनातनम् ॥
तपस्तेपुर्महापुण्ये नैमिषे मुक्तिदायिनि । एकदातेमहात्मानः समाजञ्चक्रुरुत्तमम् ॥ ५
कथयन्तोमहापुण्याःकथाःपापप्रणाशिनीः । भुक्तिमुक्तेरुपायञ्च जिज्ञासन्तःपरस्परम्
षड्विंशतिसहस्राणामृषीणाम्भावितात्मनाम् ।
तेषां शिष्यप्रशिष्याणां सङ्ख्यां कर्तुं न शक्यते ॥ ७ ॥

अत्रान्तरेमहाविद्वान्व्यासशिष्योमहामुनिः । अगमन्नैमिषारण्यंसूतःपौराणिकोत्तमः
तमागतंमुनिर्दृष्ट्वा ज्वलन्तमिवपावकम् । अर्घ्याद्यैःपूजयामासुर्मुनयः शौनकादयः ॥
सुखोपविष्टं तं सूतमासने परमेशुभे । पप्रच्छुः परमंगुह्यं लोकानुग्रहकाङ्क्षया ॥१०॥
सूतधर्मार्थतत्त्वज्ञसवागतंमुनिपुङ्गव । श्रुतवांस्त्वंपुराणानिव्यासात्सत्यवतीसुतात्
अतः सर्वपुराणानामर्थज्ञोसिमहामुने । कानिक्षेत्राणिपुण्याणिकानितीर्थानिभूतले ॥
कथंवालप्स्यतेमुक्तिर्जीवानाम्भवसागरात् । कथंहरेहरौवापि नृणांभक्तिःप्रजायते ॥
केनसिद्ध्येतचफलं कर्मणस्त्रिविधात्मनः । एतच्चाऽन्यच्चतत्सर्वं कृपया वद सूतज!॥
ब्रूयुःस्निग्धायशिष्याय गुरवोगुह्यमप्युत । इतिपृष्टस्तदा सूतो नैमिषारण्यवासिभिः
वक्तुं प्रचक्रमे नत्वा व्यासं स्वगुरुमादितः ।

श्रीसूत उवाच

सम्यक्पृष्टमिदं विप्रा! युष्माभिर्जगतो हितम् ॥ १६ ॥
रहस्यमेतद्युष्माकं वक्ष्यामिश्रृणुतादरात् । मयानोक्तमिदंपूर्वं कस्याऽपि मुनिपुङ्गवाः!
मनोनियम्यविप्रेन्द्राः श्रृणुध्वंभक्तिःपूर्वकम् । अस्तिरामेश्वरं नामरामसेतुपवित्रितम्
क्षेत्राणामपिसर्वेषां तीर्थानामपिचोत्तमम् । दृष्टमात्रेणतत्सेतुं मुक्तिः संसारसागरात्
हरे हरौ च भक्तिः स्यात्तथा पुण्यसमृद्धिता ।
कर्मणस्त्रिविधस्यापि सिद्धिः स्यान्नाऽत्र संशयः ॥ २० ॥
योनरोजन्ममध्येतु सेतुंभक्त्याऽवलोकयेत् । तस्यपुण्यफलंवक्ष्येश्रृणुध्वंमुनिपुङ्गवाः
मातृतः पितृतश्चैव द्विकोटिकुलसंयुतः । निर्विश्यशम्भुनाकल्पं ततोमोक्षत्वमश्नुते
गण्यन्ते पांसवोभूमेर्गण्यन्तेदिवितारकाः ।सेतुदर्शनजं पुण्यं शेषेणाऽपि न गण्यते
समस्तदेवतारूपः सेतुबन्ध प्रकीर्तितः । तद्दर्शनवतः पुंसो कःपुण्यंगणितुं क्षमः ॥
सेतुंदृष्ट्वानरोविप्राः सर्वयागकरः स्मृतः । स्नानश्चसर्वतीर्थेषु तपोतऽप्यतच्चाखिलम् ॥
सेतुंगच्छेतियोब्रूयाद्द्वयंकम्वापिनरंद्विजाः। सोऽपितत्फलमाप्नोतिकिमन्यैर्बहुभाषणैः
सेतुस्नानकरोमर्त्यः सप्तकोटिकुलान्वितः । सम्प्राप्यविष्णुभवनं तत्रैव परिमुच्यते॥
सेतुंरामेश्वरंलिङ्गं गन्धमादनपर्वतम् । चिन्तयन्मनुजः सत्यं सर्वपापैः प्रमुच्यते ॥

मातृतः पितृतश्चैव लक्षकोटिकुलान्वितः । कल्पत्रयंशम्भुपदे स्थित्वातत्रैवमुच्यते ॥
मूषावस्थांवसाकूपं तथावैतरणीं नदीम् । श्वभक्षंमूत्रपानञ्च सेतुस्नायीनपश्यति ॥
तप्तशूलन्तप्तशिलां पुरीषह्रदमेवच । तथाशोणितकूपञ्च सेतुस्नायी न पश्यति ॥३१॥
शल्मल्यारोहणंरक्तभोजनंकृमिभोजनम् । स्वमांसभोजनंचैव वह्निज्वालाप्रवेशनम ॥
शिलावृष्टिंवह्निवृष्टिं नरकं कालसूत्रकम् । क्षारोदकंचोष्णतोयं नेयात्सेत्ववलोककः
सेतुस्नायीनरोविप्राः पञ्चपातकवानपि । मातृतःपितृतश्चैव शतकोटिकुलान्वितः
कल्पत्रयंविष्णुपदे स्थित्वा तत्रैवमुच्यते । अधःशिरःशोषणं च नरकंक्षारसेवनम्॥
पाषाणयन्त्रपीडाञ्च मरुत्प्रपतनं तथा । पुरीषलेपनञ्चैव तथा क्रकचदारणम ॥ ३६॥
पुरीषभोजनंरेतः पानंसन्धिषुदाहनम् । अङ्गारशय्याभ्रमणं तथामुसलमर्द्दनम् ॥ ३७॥
एतानि नरकाण्यद्धा सेतुस्नायी न पश्यति ।
सेतुस्नानं करिष्येऽहमिति बुद्ध्या विचिन्तनम ॥ ३८ ॥
गच्छेच्छतपदंयस्तु समहापातकोऽपिसन् । बहूनांकाष्ठयन्त्राणांकर्षणं शस्त्रभेदनम्
पतनोत्पतनं चैव गदादण्डनिपीडनम् । गजदन्तैश्च हननं नानाभुजगदंशनम ॥ ४०
धूमपानंपाशबन्धं नानाशूलनिपीडनम् । मुखेच नासिकायांचक्षारोदकनिषेचनम् ॥
क्षाराम्बुपाननरकं तप्तायः सूचिभक्षणम् । एतानि नरकाण्यद्धा नयाति गतपातकः
क्षाराम्बुपूर्णरन्ध्राणां प्रवेशंमेहभोजनम् । स्नायुच्छेदंस्नायुदाहमस्थिभेदनमेव च ॥
श्लेष्मादनंपित्तपानं महातिक्तनिषेवणम् । अत्युष्णतैलपानञ्च पानंक्षारोदकस्य च
कापायोदकपानञ्च तप्तपाषाण भोजनम् । अत्युष्णसिकतास्नानं तथादशनमर्दनम् ॥
तप्तायःशयनञ्चैवसन्तप्ताम्बुनिषेचनम् । सूचिप्रक्षेपणञ्चैव नेत्रयोर्मुखसन्धिषु ॥ ४६ ॥
शिश्नेसवृषणेचैव ह्ययोभारस्यबन्धनम् । वृक्षाग्रात्पतनं चैव दुर्गन्धिपरिपूरिते ॥४७
तीक्ष्णधाराऽस्त्रशय्याञ्च रेतः पानादिकं तथा ।
इत्यादिनरकान्घोरान्सेतुस्नायी न पश्यति ॥ ४८ ॥
सेतुसैकतमध्येयःशेतेतत्पांसुकण्ठितः । यावन्तःपांसवोलग्नास्तस्याङ्गेविप्रसत्तमा !
तावतांब्रह्महत्यानांनाशःस्यान्नाऽत्रसंशयः।सेतुमध्यस्थवातेनयस्याङ्गंस्पृश्यतेऽखिलम्

सुरापानायुतं तस्य तत्क्षणादेव नश्यति । वर्तन्तेयस्यकेशास्तु वपनात्सेतुमध्यतः ॥
गुरुतल्पायुतंतस्यतत्क्षणादेवनश्यति । यस्याऽस्थिसेतुमध्येतु स्थापितंपुत्रपौत्रकैः
स्वर्णस्तेयायुतं तस्य तत्क्षणादेव नश्यति ॥ ५२ ॥
स्मृत्वा यं सेतुमध्ये तु स्नानं कुर्याद् द्विजोत्तमाः ।
महापातकिसंसर्गाद्दोषस्तस्य लयं व्रजेत् ॥ ५३ ॥
मार्गभेदी स्वार्थपाकी यतिब्राह्मणदूषकः । अन्त्याशीवेदविक्रीतापञ्चैतेब्रह्मघातकाः॥
ब्राह्मणान्यः समाहूय दास्यामीति धनादिकम् ।
पश्चान्नास्तीति यो ब्रूते ब्रह्महा सोऽपिकीर्तितः ॥ ५५ ॥
परिज्ञायततोधर्मांस्तस्मैयोद्वेषमाचरेत् । अवजानातिवा विप्राब्रह्महासोऽपि कीर्तितः
जलपानार्थमायान्तं गोवृन्दं तु जलाशये । निवारयतियोविप्राब्रह्महा सोऽपिकीर्तितः
सेतुमेत्यतु ते सर्वे मुच्यन्ते दोषसञ्चये । ब्रह्मघातकतुल्या ये सन्तिचान्येद्विजोत्तमाः
तेसर्वेसेतुमागत्य मुच्यन्तेनाऽत्रसंशयः । औपासनपरित्यागी देवताऽन्नस्यभोजकः
सुरापयोषित्संसर्गी गणिकान्नाशनस्तथा । गणान्नभोजकश्चैव पतितान्नरतश्चयः ॥
एते सुरापिनः प्रोक्ताः सर्वकर्मबहिष्कृताः । सेतुस्नानेनमुच्यन्ते तेसर्वेहतकिल्बिषाः ॥
सुरापतुल्यायेचान्ये मुच्यन्ते सेतुमज्जनात् । कन्दमूलफलानाञ्च कस्तूरीपट्टवाससाम्
पयश्चन्दनकर्पूरक्रमुकाणान्तथैव च । मध्वाज्यताम्रस्यकांस्यानांरुद्राक्षाणान्तथैवच
चोरकास्तु परिज्ञेया सुवर्णस्तेयिनस्सदा । ते सेतुक्षेत्रमागत्य मुच्यन्तेनाऽत्रसंशयः
अन्येचस्तेयिनःसर्वेसेतुस्नानेनवैद्विजाः । मुच्यन्तेसर्वपापिभ्योनाऽत्रकार्याविचारणा
भगिनीं पुत्रभार्याञ्च तथैवचरजस्वलाम् । भ्रातृभार्याम्मित्रभार्यां मद्यपाञ्चपरस्त्रियम्
हीनस्त्रियञ्चविश्वस्तां योऽभिगच्छतिरागतः । गुरुतल्पीसविज्ञेयः सर्वकर्मबहिष्कृतः
एतेचान्येचयेसन्ति गुरुतल्पगतुल्यकाः । ते सर्वेऽत्र विमुच्यन्ते सेतुस्नानेनवैद्विजाः
एतेसंसर्गिणोविप्रा येचान्येसन्तिपापिनः । सेतुस्नानेन महता तेऽपि मोक्षमवाप्नुयुः
यागंविनादेवलोके घृताचीमेनकादिभिः । सम्भोगकामिनोविप्राः स्नातुंसेतावघापहे ॥
अनिषेव्यरविंवह्निमनुपास्यपरान्सुरान् । शुभकामीजनः सेतौकुर्यात्स्नानंसभक्तिकम्

तिलान्भूमिंसुवर्णञ्च धान्यंतण्डुलमेवच । अदत्त्वेच्छन्तियेस्वर्गंस्नातुं सेतौतुतेद्विजाः
उपवासैर्व्रतैः कृत्स्नैरसंताप्यनिजान्तनुम् ।
स्वर्गाऽभिलाषिणः पुंसः स्नातुं सेतौ विमुक्तिदे ॥ ७३ ॥
सेतुस्नानंमोक्षदं च मनःशुद्धिप्रदं तथा । जपाद्धोमात्तथादानाद्यागाच्च तपसोऽपि च
सेतुस्नानंविशिष्टंहि पुराणेपरिपठ्यते । अकामनाकृतंस्नानं सेतौ पापविनाशने ॥७५
अपुनर्भवदंप्रोक्तं सत्यमुक्तं द्विजोत्तमाः । यः सम्पदं समुद्दिश्य स्नातिसेतौ नरोमुदा
स सम्पदमवाप्नोति विपुलां द्विजपुङ्गवाः ।
शुद्ध्यर्थं स्नाति चेत्सेतौ तदा शुद्धिमवाऽप्नुयात् ॥ ७७ ॥
रत्यर्थंयदिचस्नायादप्सरोभिर्नरोदिवि । तदारतिमवाप्नोति स्वर्गलोकेपरीजनैः ॥
मुक्त्यर्थंयदिचस्नायात्सेतौमुक्तिप्रदायिनि । तदामुक्तिमवाप्नोतिपुनरावृत्तिवर्जिताम्
सेतुस्नानेनधर्मः स्यात्सेतुस्नानादघक्षयः । सेतुस्नानंद्विजश्रेष्ठाः सर्वकामफलप्रदम्
सर्वव्रताधिकंपुण्यं सर्वयज्ञोत्तरंस्मृतम् । सर्वयोगाधिकंप्रोक्तं सर्वतीर्थाधिकंस्मृतम्
इन्द्रादिलोकभोगेषु रागोयेषां प्रवर्त्तते । स्नातव्यंतैर्द्विजश्रेष्ठाः सेतौ रामकृतेसकृत्
ब्रह्मलोकेचवैकुण्ठे कैलासमपिशिवालये । रन्तुमिच्छाभवेद्येषांतेसेतौस्नान्तुसादरम्
आयुरारोग्यसम्पत्तिमतिरूपगुणाढ्यताम् । चतुर्णामपिवेदानांसाङ्गानाम्पारगामिनाम्
सर्वशास्त्राधिगन्तृत्वं सर्वमन्त्रेष्वभिज्ञताम् ।
समुद्दिश्य तु यः स्नायात्सेतौ सर्वार्थसिद्धिदे ॥ ८५ ॥
तत्तत्सिद्धिमवाप्नोति सत्यं स्यान्नाऽत्र संशयः ।
दारिद्र्यान्नरकाद्ये च बिभ्यन्ति मनुजा भुवि ॥ ८६ ॥
स्नानङ्कुर्वन्तुते सर्वे रामसेतौविमुक्तिदे । श्रद्धयासहितोमर्त्यः श्रद्धया रहितोऽपिवा
इहलोकेपरत्रापि सेतुस्नायीनदुःखभाक् । सेतुस्नानेनसर्वेषां नश्यते पापसञ्चयः॥८८
वर्द्धतेधर्मराशिश्च शुक्लपक्षेयथाशशी । यथारत्नानिवर्द्धन्ते समुद्रेविविधान्यपि ॥ ८६॥
तथापुण्यानिवर्द्धन्ते सेतुस्नानेनवैद्विजाः । कामधेनुर्यथालोके सर्वान्कामान्प्रयच्छति
चिन्तामणिर्यथादद्यात्पुरुषाणांमनोरथान् । यथाऽमरतरुर्दद्यात्पुरुषाणामभीप्सितम्

सेतुस्नानंतथानॄणांसर्वाभीष्टान्प्रदास्यति । अशक्तःसेतुयात्रायांदारिद्र्येणचमानवः
याचयित्वाधनंशिष्टात् सेतौस्नानंसमाचरेत् । सेतुस्नानंसमंपुण्यं तत्रदातासमश्नुते
तथाऽप्रतिगृहीताऽपि प्राप्नोत्यविकलं फलम् ।
सेतुयात्रां समुद्दिश्य गृह्णीयाद् ब्राह्मणाद्धनम् ॥ ६४ ॥
क्षत्रियादपिगृह्णीयान्नदद्यब्राह्मणायदि । वैश्याद्वाप्रतिगृह्णीयान्नप्रयच्छन्तिचेन्नृपाः ६५
शूद्रान्नप्रतिगृह्णीयात्कथञ्चिदपिमानवः । यःसेतुंगच्छतः पुंसो धनं वाधान्यमेववा ॥
दत्त्वावस्त्रादिकंवाऽपि प्रवर्तयतिमानवः । सोऽश्वमेधादियज्ञानांफलमाप्नोत्यनुत्तमम्
चतुर्णामपि वेदानां पारायणफलं लभेत् । तुलापुरुषमुख्यस्य दानस्य फलमश्नुते ॥
ब्रह्महत्यादिपापानां नाशःस्यान्नाऽत्रसंशयः । बहुनाकिंप्रलापेन सर्वान्कामान्समश्नुते
एवं प्रतिगृहीताऽपि तत्तुल्यफलमश्नुते । याचतः सेतुयात्रार्थं न प्रतिग्रहकल्मषम् ॥
सेतुंगच्छधनन्तेहं दास्यामीतिप्रलोभ्ययः । पश्चाऽन्नास्तीतिचब्रूयात्तमाहुर्ब्रह्मघातकम्
गमिष्येसेतुमितिवै योगृहीत्वाधनंनरः । नयातिसेतुंलोभेन तमाहुर्ब्रह्मघातकम् ॥१०२
लोभेन सेतुयात्रार्थं सम्पन्नोऽपिदरिद्रवत् । मानवोयदियाचेत तमाहुःस्तेयिनम्बुधाः
येनकेनाऽप्युपायेन सेतुङ्गच्छेन्नरोमुदा । अशक्तोदक्षिणांदत्त्वा गमयेद्वाद्विजोत्तमम् ॥
याचित्वायज्ञकरणे यथादोषोनविद्यते । याचित्वासेतुयात्रायां तथा दोषो न विद्यते
याचित्वाऽप्यन्यतो द्रव्यं सेतुस्नाने प्रवर्तयेत्
ज्ञानेन मोक्षमभियान्ति कृतेयुगे तु त्रेतायुगे यजनमेव विमुक्तिदायि ।
श्रेष्ठं तथाऽन्ययुगयोरपि दानमाहुः सर्वत्रसेत्वभिषवो हि वरो नराणाम्॥
इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मखण्डे
सेतुमाहात्म्येश्रीसेतुमाहात्म्यकीर्तनंनाम प्रथमोऽध्यायः ॥ १ ॥

द्वितीयोऽध्यायः

श्रीरामेणसेतुबन्धनसहितंतत्रत्यतीर्थवर्णनम्

ऋषय ऊचुः

कथं सूतमहाभाग! रामेणाऽक्लिष्टकर्मणा। सेतुर्बद्धोनदीनाथे ह्यगाधे वरुणालये ॥ १॥
सेतौ च कतितीर्थानि गन्धमादनपर्वते । एतन्नः श्रद्दधानानां ब्रूहि पौराणिकोत्तम!

श्रीसूत उवाच

रामेणहियथासेतु निबद्धो वरुणालये । तदहंसम्प्रवक्ष्यामि युष्माकं मुनिपुङ्गवाः !॥३
आज्ञयाहिपितूरामो न्यवसद्दण्डकानने । सीतालक्ष्मणसंयुक्तः पञ्चवट्यांसमाहितः
तस्मिन्निवसतस्तस्य राघवस्यमहात्मनः । रावणेनहृताभार्या मारीचच्छद्मनाद्विजाः
मार्गमाणोवनेभार्यां रामोदशरथात्मजः । पम्पातीरेजगामाऽसौ शोकमोहसमन्वितः
दृष्टवान्वानरं तत्र कञ्चिद्दशरथात्मजः । वानरेणाऽथपृष्टोऽयं कोभवानिति राघवः ॥७
आदितः स्वस्यवृत्तान्तं तस्मैप्रोवाचतत्त्वतः । अथराघवसम्पृष्टो वानरःकोभवानिति॥
सोऽपिविज्ञापयामास राघवायमहात्मने । अहं सुग्रीवसचिवो हनूमान्नाम वानरः ॥
तेन च प्रेरितोऽभ्यागां युवाभ्यां सख्यमिच्छता ।
आगच्छतन्तद्भद्रम्वां सुग्रीवान्तिकमाऽऽशु वै ॥ १० ॥
तथाऽस्त्विति स रामोऽपि तेन साकं मुनीश्वराः !।
सुग्रीवान्तिकमागत्य सख्यञ्चक्रेऽग्निसाक्षिकः ॥ ११ ॥
प्रतिजज्ञेऽथरामोऽपितस्मैबालिवधम्प्रति । सुग्रीवश्चापि वैदेह्याः पुनरानयनं द्विजाः
इत्येवंसमयंकृत्वा विश्वस्यचपरस्परम् । मुदा परमयायुक्तौ नरेश्वरकपीश्वरौ ॥ १३॥
आसा ते ब्राह्मणश्रेष्ठा ! ऋष्यमूकगिरौतथा । सुग्रीवप्रत्ययार्थञ्चदुन्दुभेःकायमाशु वै
पादाङ्गुष्ठेन चिक्षेप राघवोबहुयोजनम् । सप्ततालाविनिर्भिन्ना राघवेणमहात्मना ॥
ततःप्रीतमनावीरः सुग्रीवोराममब्रवीत् । इन्द्रादिदेवताभ्योऽपि नाऽस्तिराघवतेभयम्

भवान्मित्रंमयालब्धं यस्मादतिपराक्रमः । अहं लङ्केश्वरंहत्वा भार्यामानयिताऽस्मिते
ततः सुग्रीवसहितो रामचन्द्रो महाबलः ।
सलक्ष्मणो ययौ तूर्णं किष्किन्धाम्बालिपालिताम् ॥ १८ ॥
ततोजगर्जसुग्रीवो बाल्यागमनकङ्क्षया । अमृष्यमाणोबालीचगर्जितंस्वाऽनुजस्यवै
अन्तःपुराद्विनिष्क्रम्य युयुधेऽवरजेन सः । बालिमुष्टिप्रहारेण ताडितोभृशविह्वलः ॥
सुग्रीवोनिर्गतस्तूर्णं यत्ररामोमहाबलः । ततोरामोमहाबाहुस्सुग्रीवस्यशिरोधरे ॥२१
लतामाबद्ध्यचिह्नन्तु युद्धायाऽचोदयत्तदा । गर्जितेनसमाहूय सुग्रीवोबालिनंपुनः ॥
रामप्रेरणयातेन बाहुयुद्धमथाऽकरोत् । ततोबालिनमाजघ्नेशरेणैकेनराघवः ॥ २३ ॥
हतेबालिनिसुग्रीवः किष्किन्धाम्प्रत्यपद्यत । ततोवर्षास्वतीतासुसुग्रीवोवानराधिपः
सीतामानयितुं तूर्णं वानराणांमहाचमूम् । समादायसमागच्छदन्तिकंनृपपुत्रयोः ॥
प्रस्थापयामास कपीन् सीतान्वेषणकङ्क्षया ।
विदितायान्तु वैदेह्यां लङ्कायां वायुसूनूना ॥ २६ ॥
दत्तेचूडामणौचाऽपि राघवोहर्षशोकवान् । सुग्रीवेणानुजेनाऽपि वायुपुत्रेणधीमता
तथान्यैःकपिभिश्चैवजाम्बवन्नलमुख्यकैः । अन्वीयमानोरामोसौमुहूर्त्तेभिजितिद्विजाः
विलङ्घ्यविविधान्देशान्महेन्द्रंपर्वतंययौ । चक्रतीर्थन्ततोगत्वा निवासमकरोत्तदा ॥
तत्रैवतुसधर्मात्मा समागच्छद्विभीषणः । भ्रातावैराक्षसेन्द्रस्य चतुर्भिःसचिवैः सह
प्रतिजग्राह रामस्तं स्वागतेन महामनाः ।
सुग्रीवस्य तु शङ्काऽभूत्प्रणिधिः स्यादयन्त्विवति ॥ ३१ ॥
राघवस्तस्यचेष्टाभिः सम्यक्सुचरितैर्हितैः । अदुष्टमेनंदृष्ट्वैव ततएनमपूजयत् ॥ ३२ ॥
सर्वराक्षसराज्येतमभ्यषिञ्चद्विभीषणम् । चक्रेचमन्त्रिप्रवरं सद्रशंरविसूनुना ॥ ३३॥
चक्रतीर्थंसमासाद्य निवसद्रघुनन्दनः । चिन्तयन्राघवः श्रीमान्सुग्रीवादीनभाषत ॥
मध्येवानरमुख्यानां प्राप्तकालमिदंवचः । उपायः को नुभवतामेतत्सागरलङ्घने ॥ ३५॥
इयञ्चमहतीसेना सागरश्चापिदुस्तरः । अम्भोराशिरयंनीलश्चञ्चलोर्म्मिसमाकुलः ॥
उद्यन्मत्स्योमहानक्रशङ्खशुक्तिसमाकुलः । क्वचिदौर्वानलाक्रान्तः फेनवानतिभीषणः ॥

प्रकृष्टपवनाकृष्टनीलमेघसमन्वितः । प्रलयाम्भोधरारावः सारवाननिलोद्धतः ॥ ३८ ॥
कथंसागरमक्षोभ्यन्तरामोवरुणालयम् । सैन्यैः परिवृताःसर्वे वानराणांमहौजसाम्
उपायैरधिगच्छामो यथानदनदीपतिम् । कथं तरामः सहसा ससैन्या वरुणालयम्॥
शतयोजनमायातं मनसाऽपिदुरासदम् । अतोनुविघ्ना बहवः कथं प्राप्या च मैथिली
कष्टात्कष्टतरंप्राप्ता वयमद्यनिराश्रयाः । महाजले महावाते समुद्रे हि निराश्रये ॥४२॥
उपायंकंविधास्यामस्तरणार्थंवनौकसाम । राज्याद्भ्रष्टावनंप्राप्ताहृतासीतामृतःपिता
इतोऽपि दुःसहंदुःखं यत्सागरविलङ्घनम् ।
धिग्धिग्गर्जितमम्भोधे धिग्धिक्नां वारिराशिताम् ॥ ४४ ॥
कथंतद्वचनंमिथ्या महर्षेः कुम्भजन्मनः । हत्वा त्वंरावणंपापं पवित्रे गन्धमादने ॥४५
पापोपशमनायाऽऽशु गच्छस्वेति यदीरितम् ।

श्रीसूत उवाच

इति रामवचः श्रुत्वा सुग्रीवप्रमुखास्तदा ॥ ४६ ॥
ऊचुःप्राञ्जलयःसर्वे राघवं तं महाबलम । नौभिरेनं तरिष्यामः प्लवैश्चविविधैरपि ॥
मध्येवानरकोटीनां ततोवाच विभीषणः । समुद्रं राघवो राजा शरणं गन्तु मर्हति ॥
खनितः सागरैरेष समुद्रो वरुणालयः । कर्तुमर्हतिरामस्य तज्ज्ञातेः कार्यमम्बुधिः ॥
विभीषणेनैव मुक्तो राक्षसेनविपश्चिता । सान्त्वयन्राघवः सर्वान्वानरानिदमब्रवीत्
शतयोजनविस्तारमशक्ताः सर्ववानराः । ततुं प्लवोडुपैरेनं समुद्रमतिभीषणम् ॥ ५१॥
नावो न सन्तिसेनाया बहवो वानरपुङ्गवाः । वणिजामुपघातञ्च कथमस्मद्विधश्चरेत्
विस्तीर्णश्चैवनः सैन्यं हन्याच्छिद्रेषुवापरः । प्लवोडुपप्रातारोऽतो नैवाऽत्र मम रोचते
विभीषणोक्तमेवेदं मोदद्ममवानराः । अहं त्विमञ्जलनिधिमुपास्ये मार्गसिद्धये ५४
नोचेद्दर्शयितामार्गं धक्ष्याम्येन महं तदा । महास्त्रैरप्रतिहतैरत्यग्निपवनोज्ज्वलैः ॥५५
इत्युक्त्वासहसौमित्रिरुपस्पृश्याथराघवः । प्रतिशिष्येजलनिधिं विधिवत्कुशसंस्तरे
तदा रामः कुशास्तीर्णे तीरे नदनदीपतेः । संविवेशमहाबाहुर्वेद्यामिव हुताशनः ॥५७
शेषभोगनिभम्बाहुमुपधायरघूद्वहः । दक्षिणोदक्षिणम्बाहुमुपास्ते मकरालयम् ॥ ५८

तस्यरामस्यसुप्तस्यकुशास्तीर्णेमहीतले। नियमादप्रमत्तस्य निशास्तिस्रोऽतिचक्रमुः
सत्रिरात्रोषितस्तत्र नयज्ञोधर्मतत्परः। उपास्तेतस्मदारामः सागरंमार्गसिद्धये ॥ ६०
न च दर्शयते मन्दस्तदा रामस्य सागरः। प्रयतेनाऽपिरामेण यथार्हमपि पूजितः ॥
तथापि सागरोरामं नदर्शयतिचाऽऽत्मनः। समुद्राय ततः क्रुद्धो रामोरक्तान्तलोचनः॥
समीपवर्तिनश्चेदं लक्ष्मणंप्रत्यभाषत। अद्यमद्बाणनिर्भिन्नैर्मकरैर्वरुणालयम ॥ ६३ ॥
निरुद्धतोयंसौमित्रे! करिष्यामिक्षणादहम्। सशङ्खशुक्ति जालं हि समीनमकरं शनैः
अद्य बाणैरमोघास्त्रैर्वारिधिंपरिशोषये। क्षमया हि समायुक्तं मामयं मकरालयः ॥
असमर्थंविजानाति धिक्क्षमामीदृशेजने। नदर्शयतिसाम्नामे सागरोरूपमात्मनः

चापमानय सौमित्रे! शरांश्चाऽऽशीविषोपमान।
सागरं शोषयिष्यामि पद्भ्यां यान्तु प्लवङ्गमाः ॥ ६७ ॥

एनं लङ्घितमर्यादं सहस्रोर्मिसमाकुलम्। निर्मर्यादंकरिष्यामि सायकैर्वरुणालयम् ॥
महार्णवंक्षोभयिष्ये महादानवसङ्कुलम्। महामकरनक्राढ्यं महावीचिसमाकुलम् ॥
एवमुक्त्वाधनुष्पाणिः क्रोधपर्याकुलेक्षणः। रामोबभूवदुर्धर्षस्त्रिपुरघ्नोयथाशिवः ॥७०
आकृष्यचापकोपेन कम्पयित्वाशरैर्जगत्। मुमोचविशिखानुग्रांस्त्रिपुरेषुयथाभवः ॥
दीप्तबाणाश्च येघोरा भासयन्तो दिशोदश। प्राविशन्वारिधेस्तोयं दृप्तदानवसङ्कुलम
समुद्रस्तुततोभीतो वेपमानःकृताञ्जलिः। अनन्यशरणोविप्राःपातालात्स्वयमुत्थितः
शरणं राघवम्भेजे कैवल्यपदकारणम्। तुष्टावराघवंविप्रो भूत्वाशब्दैर्मनोरमैः ॥ ७४॥

समुद्र उवाच

नमामि ते राघव! पादपङ्कजं सीतापते! सौख्यदपादसेविनाम्!।
नमामि ते गौतमदारमोक्षदं श्रीपादरेणुं सुरवृन्दसेव्यम् ॥ ७५ ॥
सुन्दप्रियादेहविदारिणे नमो नमोऽस्तु ते कौशिकयागरक्षिणे!।
नमो महादेवशरासभेदिने नमो नमो राक्षससङ्घनाशिने ॥ ७६ ॥

रामरामनमस्यामि भक्तानामिष्टदायिनम्। अवतीर्णंरघुकुले देवकार्यचिकीर्षया ॥७७
नारायणमनाद्यन्तं मोक्षदंशिवमच्युतम। रामराममहाबाहो रक्ष मां शरणागतम् ॥

कोपंसंहरराजेन्द्र क्षमस्वकरुणालय!। भूमिर्वातोवियच्चापो ज्योतींषिचरघूद्वह ॥
यत्स्वभावानिसृष्टानि ब्रह्मणापरमेष्ठिना। वर्तन्तेतत्स्वभावानि स्वभावोमेह्यगाधता
विकारस्तुभवेद्गाधएतत्सत्यंवदाम्यहम्। लोभात्कामाद्भयाद्वापि रागाद्वापिरघूद्वह ॥
न वंशजंगुणंहातुमुत्सहेऽहं कथञ्चन। तत्करिष्ये च साहाय्यं सेनायास्तरणेतव ८२

इत्युक्तवन्तञ्जलधिं रामो वादीन्नदीपतिम्।
ससैन्योऽहङ्गमिष्यामि लङ्कां रावणपालिताम् ॥ ८३ ॥

तच्छोषमुपयाहित्वं तरणार्थं ममाधुना। इत्युक्तस्तं पुनः प्राह राघवंवरुणालयः ॥८४
शृणुष्वावहितोराम श्रुत्वाकर्तव्यमाचर। यद्याज्ञयातेशोष्यामि ससैन्यस्ययियासतः
अन्येप्याज्ञापयिष्यन्ति मामेवं धनुषोबलात्। उपायमन्यंवक्ष्यामि तरणार्थंबलस्यते

अस्ति ह्यत्र नलो नाम वानरः शिल्पिसम्मतः।
त्वष्टुः काकुत्स्थ तनयो बलवान्विश्वकर्मणः ॥ ८७ ॥

सयत्काष्ठंतृणंवाऽपि शिलांवाक्षेप्स्यतेमयि। सर्वंतद्धारयिष्यामिसतेसेतुर्भविष्यति
सेतुनातेनगच्छत्वं लङ्कांरावणपालिताम्। उक्त्वेत्यन्तर्हितेतस्मिन् रामोनलमुवाचह
कुरुसेतुंसमुद्रेत्वं शक्तोह्यसिमहामते!। तदाऽब्रवीन्नलोवाक्यं रामं धर्मभृताम्वरम् ९०
अहंसेतुंविधास्यामि ह्ययाधेवरुणालये। पित्रादत्तवरश्चाहं सामर्थ्येचापितत्समः ॥
मातुर्ममवरोदत्तो मन्दरेविश्वकर्मणा। शिल्पकर्मणिमत्तुल्यो भवितातेसुतस्त्विति ॥
पुत्रोऽहमौरसस्तस्य तुल्योवैविश्वकर्मणा। अद्यैवकामम्बध्नन्तु सेतुम्वानरपुङ्गवाः
ततोरामविसृष्टास्ते वानराबलवत्तराः। पर्वतान् गिरिशृङ्गाणि लतातृणमहीरुहान् ॥
समाजह्रुर्महाकाया गरुडानिलरंहसः। नलश्चक्रेमहासेतुं मध्येनदनदीपतेः ॥ ९५ ॥
दशयोजनविस्तीर्णं शतयोजनमायतम्। जानकीरमणोरामस्सेतुमेवमकारयत् ॥९६॥
नलेनवानरेन्द्रेण विश्वकर्मसुतेनवै। तमेवंसेतुमासाद्य रामचन्द्रेणकारितम् ॥ ९७ ॥
सर्वपातकिनोमर्त्या मुच्यन्तेसर्वपातकैः। व्रतदानतपोहोमैर्नतथातुष्यतेशिवः॥ ९८ ॥
सेतुमज्जनमात्रेण यथातुष्यतिशङ्करः। नतुल्यंविद्यतेतेजो यथासौरेणतेजसा ॥ ९९ ॥
सेतुस्नानेन च तथा न तुल्यं विद्यते क्वचित्। तत्सेतुमूलंलङ्काया यत्ररामोयियासया

वानरैस्सेतुमारेभे पुण्यं पापप्रणाशनम् । तद्दर्भशयनंनाम्ना पश्चाल्लोकेषुविश्रुतम् १०१
एवमुक्तं मया विप्रास्समुद्रेसेतुबन्धनम् । अत्रतीर्थान्यनेकानि सन्तिपुण्यान्यनेकशः
नसङ्ख्यान्नामधेयम्वाशेषोगणयितुंक्षमः । किन्त्वहंप्रब्रवीम्यद्यतत्रतीर्थानिकानिचित्
चतुर्विंशतितीर्थानि सन्तिसेतौप्रधानतः । प्रथमञ्चक्रतीर्थंस्याद्वेतालवरदन्ततः १०४

ततः पापविनाशाख्यं तीर्थं लोकेषु विश्रुतम् ।
ततस्सीतासरः पुण्यं ततो मङ्गलतीर्थकम् १०५ ॥

ततस्सकलपापघ्नी नाम्नाचाऽमृतवापिका । ब्रह्मकुण्डं ततस्तीर्थं ततः कुण्डं हनूमतः
आगस्त्यंहिततस्तीर्थं रामतीर्थमतः परम् । ततोलक्ष्मणतीर्थंस्याज्जटातीर्थमतःपरम्
ततोलक्ष्म्याः परन्तीर्थमग्नितीर्थमतः परम । चक्रतीर्थन्ततः पुण्यं शिवतीर्थमतःपरम्
ततश्शङ्खाभिधन्तीर्थं ततोयामुनतीर्थकम । गङ्गातीर्थन्ततः पश्चाद्गयातीर्थमनन्तरम् ॥

ततः स्यात्कोटितीर्थाख्यं साध्यानाममृतं ततः ।
मनसाख्यन्ततस्तीर्थं धनुष्कोटिस्ततः परम् ॥ ११० ॥

प्रधानतीर्थान्येतानि महापापहराणि च । कथितानिद्विजश्रेष्ठास्सेतुमध्यगतानि वै॥
यथा सेतुश्चबद्धोऽभूद्रामेणजलधौमहान् । कथितन्तच्चविप्रेन्द्राः पुण्यं पापहरन्तथा ॥

तच्छ्रुत्वा च पठित्वा च मुच्यते मानवो भुवि ॥ ११३ ॥
अध्यायमेनम्पठते मनुष्यः शृणोति वा भक्तियुतो द्विजेन्द्राः ।
सोऽनन्तमाप्नोति जयम्परत्र पुनर्भवक्लेशमसौ न गच्छेत् ॥ ११४ ॥

इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मखण्डे
सेतुमाहात्म्येरामेणसेतुबन्धनसहितंतत्रत्यतीर्थवर्णनंनामद्वितीयोऽध्यायः ॥ २ ॥

तृतीयोऽध्यायः

चतुर्विंशतितीर्थमाहात्म्यवर्णनम्

ऋषय ऊचुः

चतुर्विंशति तीर्थानियान्युक्तानित्वया मुने !। तेषां प्रधानतीर्थानांसेतौपापविनाशने
आदिमस्यतुतीर्थस्यचक्रतीर्थमितिप्रथा । कथंसमागतासूतवदास्माकंहिपृच्छताम् ॥

श्रीसूत उवाच

चतुर्विंशतितीर्थानां प्रधानानांद्विजोत्तमाः । यदुक्तमादिमन्तीर्थं सर्वलोकेषुविश्रुतम्
स्मरणात्तस्यतीर्थस्य गर्भवासोनविद्यते । विलयंयान्तिपापानि लक्षजन्मकृतान्यपि

तस्मिंस्तीर्थे सकृत्स्नानात्स्मरणात्कीर्तनादपि ।
लोके ततोऽधिकन्तीर्थं तत्तुल्यं वा द्विजोत्तमाः !॥ ५ ॥

नविद्यतेमुनिश्रेष्ठाः सत्यमुक्तमिदम्मया । गङ्गासरस्वतीरेवा पम्पागोदावरीनदी ॥६
कालिन्दीचैवकावेरी नर्मदामणिकर्णिका । अन्यानियानितीर्थानि नद्यःपुण्यामहीतले

अस्य तीर्थस्य विप्रेन्द्राः कोट्यंशेनाऽपि नो समाः ।
धर्मतीर्थमितिप्राहुस्तत्तीर्थं हि पुराविदः ॥ ८ ॥

यथासमागतातस्य चक्रतीर्थमितिप्रथा । तदिदानींप्रवक्ष्यामि शृणुध्वंमुनिपुङ्गवाः
सेतुमूलंहियत्प्रोक्तं तद्दर्भशयनंमतम् । तत्रैव चक्रतीर्थन्तु महापातकमर्द्दनम् ॥ १० ॥
पुराहिगालवोनाम मुनिर्विष्णुपरायणः । दक्षिणाम्भोनिधेस्तीरे हालास्याद्विदूरतः
फुल्लग्रामसमीपे च तथाक्षीरसरोऽन्तिके । धर्मपुष्करिणीतीरे सोऽतप्यतमहत्तपः ॥
युगानामयुतंब्रह्म गृणन्विप्रास्सनातनम् । दयायुक्तोनिराहारस्सत्यवान्विजितेन्द्रियः
आत्मवत्सर्वभूतानि पश्यन्विषयनिस्पृहः । सर्वभूतहितो दान्तः सर्वद्वन्द्वविवर्जितः॥

वर्षाणि कतिचित्सोऽयं जीर्णपर्णाशनोऽभवत् ।
किञ्चित्कालं जलाहारो वायुभक्षः कियत्समाः ॥ १५ ॥

एवं पञ्चसहस्राणि वर्षाणि स महामुनिः । अतप्यत तपो घोरं देवैरपिसुदुष्करम् ॥
ततःपञ्चसहस्राणि वर्षाणिमुनिपुङ्गवः । निराहारोनिरालोकोनिरुच्छ्वासोनिरास्पदः
वर्षास्वासारसहनं हेमन्तेषुजलेशयः । ग्रीष्मेपञ्चाऽग्निमध्यस्थो विष्णुध्यानपरायणः
जपन्नष्टाक्षरं मन्त्रं ध्यायन्हृदिजनार्दनम् । ततापं सुमहातेजा गालवोमुनिपुङ्गवः ॥
एवंत्वयुतवर्षाणि समतीतानि वै मुनेः । अथतत्तपसातुष्टो भगवान कमलापतिः ॥
प्रत्यक्षतामगात्तस्य शङ्खचक्रगदाधरः । विकचाम्बुजपत्राक्षः सूर्यकोटिसमप्रभः ॥
विनतानन्दनाऽऽरूढश्छत्रचामरशोभितः । हारकेयूरमुकुटकटकादिविभूषितः ॥ २२॥
विष्वक्सेनसुनन्दादिकिङ्करैःपरिवारितः । वीणावेणुमृदङ्गादिवादकैर्नारदादिभिः ॥
उपगीयमानविभवःपीताम्बरविराजितः । लक्ष्मीविराजितोरस्कोर्नीलमेघसमच्छविः
धुनानः पद्ममेकेन पाणिना मधुसूदनः । सनकादि महायोगिसेवितः पार्श्वयोर्द्वयोः ॥
मन्दस्मितेनसकलं मोहयन्भुवनत्रयम् । स्वभासाभासयन्सर्वान्दिशोदश च भूसुराः
कण्ठलग्नेनमणिना कौस्तुभेन च शोभितः । सुवर्णवेत्रहस्तैश्च सौविदल्लैरनेकशः

अनन्यदुर्लभाऽचिन्त्यगीयमाननिजाद्भुतः ।
सुभक्तसुलभोदेवो लक्ष्मीकान्तो हरिस्स्वयम् ॥ २८ ॥

सन्निधत्तेपुरस्तस्य गालवस्य महामुनेः । आविर्भूतं तदादृष्ट्वा श्रीवत्साङ्कितवक्षसम्
पीताम्बरधरं देवं तुष्टिं प्राप महामुनिः । भक्त्या परमया युक्तस्तुष्टावजगदीश्वरम् ॥

गालव उवाच

नमो देवादिदेवाय शङ्खचक्रगदाभृते । नमो नित्याय शुद्धाय सच्चिदानन्दरूपिणे ॥
नमोभक्तार्तिहन्त्रे ते हव्यकव्यस्वरूपिणे । नमस्त्रिमूर्तयेतुभ्यं सृष्टिस्थित्यन्तकारिणे

नमः परेशाय नमो विभूम्ने नमोऽस्तुलक्ष्मीपतये विधात्रे ।
नमोस्तस्तु सूर्येन्दु विलोचनाय नमो विरञ्च्याद्यभिवन्दिताय ॥ ३३ ॥
यो नामजात्यादिविकल्पहीनस्समस्तदोषैरपि वर्जितो यः ।
समस्तसंसारभयापहारिणे तस्मै नमोदैत्यविनाशनाय ॥ ३४ ॥
वेदान्तवेद्याय रमेश्वराय वैकुण्ठवासाय विधातृपित्रे ।

नमोनमस्सद्यजनार्तिहारिणे नारायणायाऽमितविक्रमाय ॥ ३५ ॥

नमस्तुभ्यं भगवते वासुदेवायशार्ङ्गिणे । भूयोभूयोनमस्तुभ्यं शेषपर्यङ्कशायिने ॥३६

इति स्तुत्वा हरिं विप्रास्तूष्णीमास्ते स गालवः ।
श्रुत्वा स्तुतिं श्रुतिसुखां हरिस्तस्य महात्मनः ॥ ३७ ॥

अवापपरमन्तोषं शङ्खचक्रगदाधरः । अथाऽऽलिङ्ग्यमुनिंशौरिश्चतुर्भिर्बाहुभिस्तदा ॥
बभाषेप्रीतिसंयुक्तो वरंवैव्रियतामिति । तुष्टोऽस्मितपसातेद्यस्तोत्रेणापिचगालव !

नमस्कारेण च प्रीतो वरदोऽहं तवाऽऽगतः ।

गालव उवाच

नारायण ! रमानाथ ! पीताम्बर जगन्मय !॥ ४० ॥

जनार्द्दनजगद्धामन्गोविन्दनरकान्तकम् । त्वद्दर्शनात्कृतार्थोस्मिसर्वस्मादधिकस्तथा
त्वांनपश्यन्त्यधर्मिष्ठा यतस्त्वं धर्मपालकः । यन्नवेत्तिभवोब्रह्मा यन्नवेत्तित्रयीयथा ॥
तंवेद्मिपरमात्मानं किमस्मादधिकम्वरम् । योगिनोयन्नपश्यन्ति यन्नपश्यन्तिकर्मठाः
तंपश्यामिपरमात्मानंकिमस्मादधिकम्वरम् । एतेनचकृतार्थोऽस्मि जनार्दनजगत्पते!
यन्नामस्मृतिमात्रेण महापातकिनोऽपि च । मुक्तिंप्राप्यन्तिमुनयस्तंपश्यामिजनार्दनम्

त्वत्पादपद्मयुगले निश्चला भक्तिरस्तु मे ।

हरिरुवाच

मयि भक्तिर्दृढा तेऽस्तु निष्कामागालवाऽधुना ॥ ४६ ॥

शृणुचाप्यवरंवाक्यमुच्यमानं मया मुने !। मदर्थंकर्मकुर्वाणो मद्ध्यानोमत्परायणः
एतत्प्रारब्धदेहान्तेमत्स्वरूपमवाप्स्यसि । अस्मिन्नेवाऽऽश्रमेवासं कुरुष्वमुनिपुङ्गव!

धर्मपुष्करिणी चेयं पुण्यपापविनाशिनी ।
अस्यास्तीरे तपः कुर्वंस्तपः सिद्धिमवाप्नुयात् ॥ ४६ ॥

धर्मः पुरा समागत्य दक्षिणस्योदधेस्तटे । तपस्तेपे महादेवं चिन्तयन्मनसा तदा॥
स्नानार्थमेकतीर्थञ्च चक्रेधर्मोमहामुने !। धर्मपुष्करिणीतेन प्रसिद्धातत्कृतायतः ॥ ५१
त्वयायथातपस्तप्तमिदानींमुनिसत्तम !। तथा तप्तंतपस्तेन धर्मेण हरसेविना ॥ ५२॥

तपसा तस्य तुष्टस्सञ्छूलपाणिर्महेश्वरः ।
प्रादुरासीत्स्वया दीप्त्या दिशो दश विभासयन् ॥ ५३ ॥
अथाऽऽश्रममनुप्राप्तं महादेवं कृपानिधिम् । धर्मः परमसन्तुष्टस्तुष्टाव परमेश्वरम् ॥

धर्म उवाच

प्रणमामि जगन्नाथमीशानं प्रणवात्मकम् । समस्तदेवतारूपमादिमध्यान्तवर्जितम् ।
ऊर्ध्वरेतंविरूपाक्षं विश्वरूपंनमाम्यहम् । समस्तजगदाधारमनन्तमजमव्ययम् ॥ ५६॥
यमानमन्तियोगीन्द्रास्तंवन्देपुष्टिवर्धनम् । नमोलोकाऽधिनाथाय वञ्चते परिवञ्चते ॥
नमोऽस्तुनीलकण्ठाय पशूनाम्पतयेनमः । नमः कल्मषनाशाय नमोमीढुष्टमायच ॥५८
नमोरुद्रायदेवाय कद्रुद्रायप्रचेतसे । नमः पिनाकहस्ताय शूलहस्ताय ते नमः ॥ ५६ ॥
नमश्चैतन्यरूपाय पुष्टीनाम्पतयेनमः । नमः पञ्चास्यदेवाय क्षेत्राणाम्पतयेनमः ॥ ६० ॥
इतिस्तुतोमहादेवश्शङ्करो लोकशङ्करः । धर्मस्य परमां तुष्टिमापन्नस्तमुवाचवै ॥६१॥

महेश्वर उवाच

प्रीतोऽस्म्यनेन स्तोत्रेण तवधर्ममहामते ! वरं मत्तो वृणीष्वत्वं माविलम्बंकुरुष्ववै
ईश्वरेणैवमुक्तस्तु धर्मोदेवमथाब्रवीत् । वाहनन्तेभविष्यामि सदाऽहंपार्वतीपते !॥६३
अयमेववरोमह्यं दातव्यस्त्रिपुरान्तक ! तवोद्वहनमात्रेण कृतार्थोहम्भवामिभो ॥ ६४॥
इत्थं धर्मेण कथितो देवो धर्ममथाऽब्रवीत् ।

ईश्वर उवाच

वाहनं भव मे धर्म ! सर्वदा लोकपूजितः ॥ ६५ ॥
ममचोद्वहनेशक्तिरमोघातेभविष्यति । त्वत्सेविनांसदाभक्तिर्भयिस्यान्नाऽत्रसंशयः ॥
इत्युक्ते शङ्करेणाऽथ धर्मोऽपिवृषरूपधृक् । उवाहपरमेशानं तदाप्रभृति गालव !॥६७
महादेवस्तमारुह्य धर्मं वै वृषरूपिणम् । शोभमानोभृशं धर्ममुवाचपरमामृतम् ॥ ६८॥

ईश्वर उवाच

त्वयाकृतंहियत्तीर्थं दक्षिणस्योदधेस्तटे । धर्मपुष्करिणीत्येषालोकेख्याताभविष्यति
अस्यास्तीरे जपो होमो दानं स्वाध्यायमेव च ।

अन्ये च धर्मनिवहाः क्रियमाणा नरैर्मुदा ।
अनन्तफलदाज्ञेया नात्रकार्याविचारणा । इतिदत्त्वावरंतस्मै धर्मतीर्थाय शङ्करः ॥
आरुह्यवृषभंधर्मं कैलासंपर्वतंययौ । धर्मपुष्करिणीतीरे गालवत्वमतोधुना ॥ ७२ ॥
शरीरपातपर्यन्तं तपः कुर्वन् समाहितः । वसत्वंमुनिशार्दूल पश्चान्मामाप्स्यसेध्रुवम्
यदातेजायतेभीतिस्तदातान्नाशयाम्यहम् । ममाऽऽयुधेन चक्रेण प्रेरितेनमयाक्षणात्
इत्युक्त्वा भगवान्विष्णुस्तत्रैवाऽन्तरधीयत ।

श्रीसूत उवाच

तस्मिन्नन्तर्हिते विष्णौ गालवो मुनिपुङ्गवः ॥ ७१ ॥
धर्मपुष्करिणीतीरे विष्णुध्यानपरायणः । त्रिकालमर्चयन्विष्णुं शालग्रामेविमुक्तिदे
उवासमतिमान्धीरो विरक्तोविजितेन्द्रियः । कदाचिन्माघमासेतु शुक्लपक्षेहरेर्दिने
उपोष्यजागरंकृत्वा रात्रौविष्णुमपूजयत् । स्नात्वापरेद्युर्द्वादश्यां धर्मपुष्करिणीजले
सन्ध्यावन्दनपूर्वाणि नित्यकर्माणिचाऽकरोत् । ततःपूजांविधातुंसहरेस्समुपचक्रमे
तुलस्यादीनिपुष्पाणिसमाहृत्यचगालवः । विधायपूजांकृष्णस्यस्तोत्रमेतदुदीरयन्

गालव उवाच

सहस्रशिरसंविष्णुं मत्स्यरूपधरंहरिम् । नमस्यामिहृषीकेशं कूर्मवाराहरूपिणम्
नारसिंहंवामनाख्यं जामदग्न्यञ्चराघवम् । बलभद्रञ्चकृष्णञ्च कल्किविष्णुंनमाम्यहम्
वासुदेवमनाधारं प्रणतार्तिविनाशनम् । आधारं सर्वभूतानां प्रणमामि जनार्दनम् ॥
सर्वज्ञंसर्वकर्तारं सच्चिदानन्दविग्रहम् । अप्रतर्क्यमनिर्देश्यं प्रणतोऽस्मिजनार्दनम्
एवंस्तुवन्महायोगी गालवोमुनिपुङ्गवः । धर्मपुष्करिणीतीरे तस्थौध्यानपरायणः
एतस्मिन्नन्तरेकश्चिद्राक्षसोगालवंमुनिम् । आययौभक्षितुंघोरःक्षुधयापीडितोभृशम्
गालवंतरसासोऽयं राक्षसोजगृहेतदा । गृहीतस्तरसातेन गालवो नैर्ऋतेन सः ॥
प्रचुक्रोशदयाम्भोधिमापन्नानांपरायणम् । नारायणंचक्रपाणिं रक्षरक्षेतिवैमुहुः ॥
परेशपरमानन्द शरणागतपालक ! त्राहिमांकरुणासिन्धो रक्षोवशमुपागतम् ॥८६॥
लक्ष्मीकान्तहरेविष्णो वैकुण्ठ गरुडध्वज ! मां रक्षरक्षसाक्रान्तं ग्राहाकान्तंगजंयथा

दामोदरजगन्नाथ! हिरण्यासुरमर्द्दन। प्रह्लादमिवमांरक्षराक्षसेनाऽतिपीडितम् ॥ ६१॥

इत्येवं स्तुवतस्तस्य गालवस्य द्विजोत्तमाः !।

स्वभक्तस्य भयं ज्ञात्वा चक्रपाणिर्वृषाकपिः ॥ ६२ ॥

स्वचक्रं प्रेषयामास भक्तरक्षणकारणात्। प्रेरितं विष्णुचक्रंतद्द विष्णुनाप्रभविष्णुना आजगामाथवेगेन धर्मपुष्करिणीतटम्। अनन्तादित्यसंकाशमनन्ताग्निसमप्रभम् ॥ महाज्वालंमहानादं महासुरविमर्दनम्। दृष्ट्वा सुदर्शनंविष्णो राक्षसोऽथ प्रदुद्रुवे ॥६५ द्रवमाणस्यतस्याऽऽशुराक्षसस्यसुदर्शनम्। शिरश्चकर्तसहसाज्वालामालादुरासदम् ततस्तुगालवो दृष्ट्वा राक्षसम्पतितम्भुवि। मुदापरमयायुक्तस्तुष्टाव च सुदर्शनम् ॥

गालव उवाच

विष्णुचक्र! नमस्तेऽस्तुविश्वरक्षणदीक्षित !। नारायणकराम्भोजभूषणायणमोस्तुते युद्धेष्वसुरसंहारकुशलायमहारव। सुदर्शन! नमस्तुभ्यं भक्तानामार्तिनाशिने ॥ ६६ ॥ रक्षमांभयसम्विग्नं सर्वस्मादपिकल्मषात्। स्वामिन्सुदर्शनविभोधर्मतीर्थेसदाभवान् संनिधेहिहितायत्वं जगतोमुक्तिकाङ्क्षिणः। गालवेनैव मुक्तंतद्विष्णुचक्रंमुनीश्वराः

तं प्राह गालवमुनिं प्रीणयन्निव सौहृदात्।

सुदर्शन उवाच

गालवैतन्महापुण्यं धर्मतीर्थमनुत्तमम् ॥ १०२ ॥

अस्मिन्वसामि सततं लोकानां हितकाम्यया।

त्वत्पीडां परिचिन्त्याऽहं राक्षसेन दुरात्मना ॥ १०३ ॥

प्रेरितोविष्णुनाविप्रास्त्वरयासमुपागतः। त्वत्पीडकोऽपिनिहतो मयायंराक्षसाधमः

मोचितस्त्वं भयादस्मात्त्वं हि भक्तो हरेःसदा।

पुष्करिण्यामहं त्वस्यां धर्मस्य मुनिपुङ्गव ॥ १०५ !॥

सततंलोकरक्षार्थं संनिधानं करोमिवै। अस्यांमत्संनिधानात्ते तथान्येषामपिद्विज ॥ इतःपरंनपीडास्याद्भूतराक्षससम्भवा। धर्मपुष्करिणीह्येषा सर्वपापविनाशिनी ॥ देवीपत्तनपर्यन्ता कृताधर्मेणवैपुरा। अत्र सर्वत्र वत्स्यामि सर्वदा मुनिपुङ्गव !॥१०८॥

अस्यामत्संनिधानात्स्याच्चक्रतीर्थमितिप्रथा। स्नानंयेत्रप्रकुर्वन्तिचक्रतीर्थेविमुक्तिदे तेषांपुत्राश्चपौत्राश्च वंशजाः सर्वएवहि। विधूतपापायास्यन्ति तद्विष्णोःपरमंपदम् पितॄनुद्दिश्यपिण्डानांदातारोयेऽत्रगालव !। स्वर्गंप्रयान्तितेसर्वे पितरश्चापितर्प्पिताः इत्युक्त्वाविष्णुचक्रंतद्गालवस्यापिपश्यतः। अन्येषामपिविप्राणांपश्यतांसहसाद्विजाः

धर्मपुष्करिणीं तां तु प्राविशत्पापनाशिनीम्।

सूत उवाच

धर्मतीर्थस्य विप्रेन्द्राश्चक्रतीर्थमिति प्रथा ॥ ११३ ॥

प्राप्तायथातत्कथितंयुष्माकंहिमयामुदा। चक्रतीर्थसमन्तीर्थंनभूतंनभविष्यति ॥११४ अत्रस्नातानरा विप्र! मोक्षभाजोनसंशयः। कीर्तयेदिममध्यायं शृणुयाद्वासमाहितः चक्रतीर्थाभिषेकस्य प्राप्नोतिफलमुत्तमम्। इहलोके सुखम्प्राप्य परत्राऽपिसुखंलभेत्

यो धर्मतीर्थं च तथैव गालवं कुर्वाणमत्युग्रसमाधियोगम्।

सुदर्शनं राक्षसनाशनं च स्मरेत्सकृद्वा न स पापभाग्जनः ॥ ११७ ॥

इति श्रीस्कान्देमहापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मखण्डे सेतुमाहात्म्ये धर्मतीर्थस्यचक्रतीर्थप्रथावर्णनंनाम तृतीयोऽध्यायः ॥ ३ ॥

चतुर्थोऽध्यायः

दुर्द्दमगन्धर्वपापमोचनवर्णनम्

ऋषय ऊचुः

भगवान्! राक्षसः कोऽसौ सूत! पौराणिकोत्तम !।

विष्णुभक्तं महात्मानं यो गालवमबाधत ॥ १ ॥

श्रीसूत उवाच

वक्ष्यामिराक्षसंक्रूरं तंविप्राःशृणुताऽऽदरात्। यथासराक्षसोजातोमुनीनांशापवैभवात्

पुरा कैलासशिखरे हालास्येशिवमन्दिरे । चतुर्विंशतिसाहस्रा मुनयोब्रह्मवादिनः ॥

वसिष्ठाऽत्रिमुखाःसर्वे शिवभक्तामहौजसः ।

भस्मोद्धूलितसर्वाङ्गास्त्रिपुण्ड्राङ्कितमस्तकाः ॥ ४ ॥

रुद्राक्षमालाभरणाः पञ्चाक्षरजपे रताः । हालास्यनाथं भूतेशंचन्द्रचूडमुमापतिम् ॥
उपासाञ्चक्रिरेमुक्त्यैमधुरापुरवासिनः । कदाचित्तत्रगन्धर्वो विश्वावसुसुतोबली ॥
दुर्द्दमोनामविप्रेन्द्रा विटगोष्ठीपरायणः । ललनाशतसंयुक्तो विवस्त्रः सलिलाशये ॥
चिक्रीडसविवस्त्राभिः साकंयुवतिभिर्मुदा । हालास्यनाथंतीर्थंतद्वसिष्ठोमुनिभिःसह
माध्यन्दिनंकर्तुमनाययौशङ्करमन्दिरात् । तानृषीनवलोक्याऽथ रामास्ताभयकातराः
वासांस्याच्छादयामासुर्दुर्द्दमोनतुसाहसी । ततोवसिष्ठःकुपितः शशापैनंगतत्रपम् ॥

वसिष्ठ उवाच

यस्माद्दुर्दमगन्धर्व!दृष्ट्वास्माँल्लज्जयात्वया । वासोनाच्छादितंशीघ्रंयाहिराक्षसतांततः

इत्युक्त्वाःता स्त्रियः प्राह वसिष्ठो मुनिपुङ्गवः ।

यस्मादाच्छादितं वस्त्रं दृष्ट्वाऽस्माँल्ललनोत्तमाः ॥ १२ ॥

ततो न युष्माञ्छप्स्यामि गच्छध्वं त्रिदिवं ततः ।

एवमुक्ता वसिष्ठेन रामाः प्राञ्जलयस्तदा ॥ १३ ॥

प्रणिपत्यवसिष्ठं तं भक्तिनम्रेणचेतसा । मुनिमण्डलमध्ये तं वसिष्ठमिदमब्रुवन् ॥१४

रामा ऊचुः

भगवन्सर्वधर्मज्ञ! चतुराननन्दन !। दयासिन्धोऽवलोक्याऽस्मान्न कोपं कर्तुमर्हसि॥
पतिरेवहिनारीणां भूषणंपरमुच्यते । पतिहीना पियानारी शतपुत्राऽपिसामुने !॥१६
विधवेत्युच्यतेलोके तत्स्त्रीणांमरणंस्मृतम् । तत्प्रसादंकुरूमुनेपतावस्माकमादरात्

एकोऽपराधः क्षन्तव्यो मुनिभिस्तत्त्वदर्शिभिः ।

क्षमांकुरुदयासिन्धो ! युष्मच्छिष्येऽत्र दुर्दमे ॥ १८ ॥

वसिष्ठः प्रार्थितस्त्वेवं दुर्दमस्याङ्गनाजनैः । प्रोवाचवचनंभूयः प्रसन्नः सद्विजोत्तमः ॥
नमेस्याद्वचनंमिथ्या कदाचिदपिसुभ्रुवः !। उपायस्वः प्रवक्ष्यामि शृणुध्वं श्रद्धयासह

षोडशाब्दावधिः शापो भर्तुर्वोभविताध्रुवम् । षोडशाब्दावधौचैषदुर्दमोराक्षसाकृतिः
यदृच्छयाचक्रतीर्थं गमिष्यतिसुराङ्गनाः । आस्तेतत्रमहायोगी गालवोविष्णुतत्परः ॥
भक्ष्यार्थंतंमुनिंसोऽयं राक्षसोऽभिगमिष्यति । ततोगालवरक्षार्थं प्रेरितंचक्रमुत्तमम्
विष्णुनास्यशिरोरामा हरिष्यतिनसंशयः । ततः स्वरूपमासाद्य शापान्मुक्तःसुदुर्दमः
पतिर्वस्त्रिदिवंभूयो गन्तास्त्यत्रनसंशयः । ततस्त्रिदिवमासाऽद्य दुर्दमोऽयंपतिर्हिवः॥

रमयिष्यति सुन्दर्यो युष्मान्सुन्दरवेषभृत् ।

श्रीसूत उवाच

इत्युक्त्वा तु वसिष्ठस्ता दुर्दमस्य वराङ्गनाः ॥ २६ ॥

स्वाश्रमंप्रययौतूर्णं हालास्येश्वरभक्तिमान् । अथरामास्तमालिङ्ग्यदुर्द्दमंपतिमातुराः
रुरुदुःशोकसंविग्ना दुःखसागरमध्यगाः । प्रपश्यन्तीषु तास्वेवदुर्दमोराक्षसोऽभवत्
महादंष्ट्रोमहाकायो रक्तश्मश्रुशिरोरुहः । तं दृष्ट्वाभयसंविग्ना जग्मूरामास्त्रिविष्टपम् ॥
ततोराक्षसवेषोऽयं दुर्दमोभैरवाकृतिः । भक्षयन्प्राणिनः सर्वान्देशाद्देशंवनाद्वनम् ॥
भ्रमन्ननिलवेगोऽसौ धर्मतीर्थंततो ययौ । एवं षोडशवर्षाणि भ्रमतोऽस्य ययुस्तदा
ततस्तुषोडशाब्दान्तेराक्षसोऽयं मुनीश्वराः । भक्षितुंगालवमुनिंधर्मतीर्थनिवासिनम्
उपाद्रवद्वायुवेगः सचाऽस्तौषीज्जनार्दनम् । गालवेन स्तुतोविष्णुस्तदाचक्रमचोदयत्
रक्षितुंगालवमुनिंराक्षसेनप्रपीडितम् । अथागत्यहरेश्चक्रं राक्षसस्यशिरोऽहरत् ॥ ३४
ततोऽयंराक्षसंदेहं त्यक्त्वादिव्यकलेवरः । विमानवरमारुह्य दुर्दमः पुष्पवर्षितः ॥ ३५
प्राञ्जलिःप्रणतोभूत्वा ववन्देतं सुदर्शनम् । तुष्टावश्रुतिरम्याभिरश्रुभिर्वाग्भिरादरात्॥

दुर्दम उवाच

सुदर्शननमस्तेऽस्तु विष्णुहस्तैकभूषण !। नमस्तेसुर संहर्त्रे सहस्रादित्यतेजसे ॥३७
कृपालेशेनभवतस्त्यक्त्वाऽहं राक्षसींतनुम् । स्वरूपमभजंविष्णोश्चक्रायुधनमोस्तुते
अनुजानीहिमांगन्तुं त्रिदिवंविष्णुवल्लभ । भार्यामेपरिशोचन्ति विरहातुरचेतसः ॥
त्वन्मनस्कोभविष्यामि यावज्जीवंयथाह्यहम् । तथाकृपांकुरुष्वत्वंमयिचक्रनमोस्तुते
एवंस्तुतंविष्णुचक्रं दुर्दमेनसभक्तिकम् । अनुजग्राहसहसातथास्त्वितिमुनीश्वराः ॥

चक्रायुधाभ्यनुज्ञातो दुर्दमो गालवंमुनिम् । प्रणम्यतेनाऽनुज्ञातो गन्धर्वस्त्रिदिवं ययौ
दुर्दमेतुगतेस्वर्गं गालवोमुनिपुङ्गवः । सचक्रंप्रार्थयामास विष्णवायुधमनुत्तमम् ॥
चक्रायुध! नमामित्वां महासुरविमर्द्दन !। देवीपत्तनपर्यन्तं धर्मतीर्थे ह्यनुत्तमे ॥ ४४॥
सन्निधानंकुरुष्वत्वंसर्वपापविनाशनम् । त्वत्सन्निधानात्सर्वेषांस्नातानांपापिनामिह

पापनाशं कुरुष्व त्वं मोक्षं च कुरु शाश्वतम् ।
चक्रतीर्थमिति ख्यातिं लोकेऽस्य परिकल्पय ॥ ४६ ॥

त्वत्सन्निधानादत्रत्यमुनीनांभयनाशनम् । इतःपरं भवत्वार्य! चक्रायुध!नमोऽस्तुते॥
भूतप्रेतपिशाचेभ्यो भयंमाभवतुप्रभो !। इतिसंप्रार्थितंचक्रं गालवेन मुनीश्वराः ॥४८॥

तथैवाऽस्त्विति सम्भाष्य तस्मिंस्तीर्थे तिरोहितम् ।

श्रीसूत उवाच

एवं वः कथितो विप्रा ! राक्षसस्य भवो मया ॥ ४९ ॥
माहात्म्यं चक्रतीर्थस्य कथितं च मलापहम् ।
यच्छ्रुत्वा सर्वपापेभ्यो मुच्यते मानवो भुवि ॥ ५० ॥

ऋषय ऊचुः

व्यासशिष्यमहाप्राज्ञ!सूत! पौराणिकोत्तम !। आरभ्यदर्भशयनमादेवीपत्तनावधि ॥५१
बहुव्यायामसंयुक्तं चक्रतीर्थमनुत्तमम् । ययौविच्छिन्नतांमध्ये कथंकथयसाम्प्रतम् ॥

एनं मनसि तिष्ठन्तं संशयं छेत्तुमर्हसि ।

श्रीसूत उवाच

पुरा हि पर्वताः सर्वे जातपक्षा मनोजवाः ॥ ५३ ॥

पर्यन्तपर्वतैःसार्द्धं चेरुराकाशमार्गगाः । नगरेषु च राष्ट्रेषुग्रामेषु च वनेषु च ॥ ५४ ॥
आप्लुत्याप्लुत्यतिष्ठन्तिपर्वताःसर्वतोभुवि । आक्रम्याक्रम्यतिष्ठन्तियत्रयत्रमहीधराः
तत्रतत्रनरागावस्तथान्येप्राणिसञ्चयाः । मरणंसहसा प्रापुः पीड्यमानामहीधरैः ॥
ब्राह्मणादिषुवर्णेषु नष्टेषुसमनन्तरम् । यज्ञाद्यभावात्सहसा देवता व्यसनं ययुः ॥५७॥
ततोइन्द्रोमहाक्रुद्धो वज्रमादायवेगवान् । चिच्छेदसहसापक्षान् पर्वतानांतरस्विनाम्

छिद्यमानच्छदाःसर्वेवासवेनमहीधराः । अनन्यशरणा भूत्वा समुद्रंप्राविशन्भयात् ॥
अचलेषु च सर्वेषु पतत्सुलवणार्णवे । निपेतुरर्णवभ्रान्त्या चक्रतीर्थेऽपि केचन ॥
पतितैःपर्वतैस्तैस्तु मध्यतः पूरितोदरम् । चक्रतीर्थं महापुण्यं मध्येविच्छेदमाययौ
यदृच्छयामहाशैलाः पार्श्वयोस्तत्रनापतन् । अतोवैदर्भशयने तथा देवीपुरेऽपि च ॥
विच्छिन्नमध्यंतद्द्वेधा विभक्तमिवदृश्यते । मध्यतःपतितैःशैलैश्चक्रतीर्थंस्थलीकृतम्

श्रीसूत उवाच

युष्माकमेवं कथितं मुनीन्द्रा ! यन्मध्यतस्तीर्थमिदं स्थलीकृतम् ।
यथा महीध्रास्सहसा विडौजसा विभिन्नपक्षा इह पेतुरुन्नताः ॥ ६४ ॥

इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मखण्डे
सेतुमाहात्म्येदुर्द्दमगन्धर्वशापविमोक्षणंनामचतुर्थोऽध्यायः ॥ ४ ॥

पञ्चमोऽध्यायः

चक्रतीर्थप्रशंसायामलम्बुसाविधूमशापविमोचनम्

श्रीसूत उवाच

प्रस्तुत्यचक्रतीर्थंतु पुण्यंपापविनाशनम् । पुनरप्यद्भुतंकिञ्चित्प्रब्रवीमिमुनीश्वराः!॥
विधूमनामा हि वसुर्देवस्त्रीचाप्यलम्बुसा । ब्रह्मशापान्महाघोरात्पुराप्राप्तौ मनुष्यताम्

चक्रतीर्थे महापुण्ये स्नात्वा शापाद्विमोचितौ ।

ऋषय ऊचुः

सूत! सूत महाप्राज्ञ! पुराणार्थविशारद! ॥ ३ ॥

प्राज्ञत्वाद्व्यासशिष्यत्वादज्ञानं ते न किञ्चन । ब्रह्मकेनापराधेन सहालम्बुसयावसुम्
पुराविधूमनामानं शप्तवांश्चतुराननः । ब्रह्मशापेनघोरेणकयोस्तौ पुत्रतां गतौ ॥५॥

शापस्यान्तःकथमभूद्ब्रह्मणाशप्तयोस्तयोः । एतन्नःश्रद्दधानानां विस्तराद्वक्तुमर्हसि

श्रीसूत उवाच

पुराहिभगवान्ब्रह्मास्वयंभूश्चतुराननः । सावित्र्या च सरस्वत्यापार्श्वयोःप्रविराजितः
सनातनेन मुनिनासनकेन च धीमता । सनत्कुमारनाम्ना च नारदेन महात्मना ॥ ८॥
सनन्दनादिभिश्चाऽन्यैःसेव्यमानोमुनीश्वरैः । सुपर्ववृन्दजुष्टेन स्तूयमानोविडौजसा
आदित्यादिग्रहैश्चैव स्तूयमानपदाम्बुजः । सिद्धैःसाध्यैर्मरुद्भिश्च किन्नरैश्चसमावृतः
गणैःकिम्पुरुषाणाञ्च वसुभिश्चाष्टभिर्वृतः । उर्वशीप्रमुखानाञ्च स्ववेश्यानांमनोरमम्
नृत्यं वादित्रसहितं वीक्षमाणोमुहुर्मुहुः । गोष्ठीं चक्रेसभामध्ये सत्यलोकेकदाचन ॥
मेघगर्जितगम्भीरो जनानानन्दयन्मुहुः । वीणावेणुमृदङ्गानां ध्वनिस्तत्रव्यसर्पत ॥
गङ्गातरङ्गमालानां शीकरस्पर्शशीतलः । पवमानःसुखस्पर्शो मन्दंमन्दंववौतदा ॥
पर्यायेणतदासर्वा ननृतुर्देवयोषितः । नृत्यश्रमेणखिन्नासु वेश्यास्वन्यासुसादरम् ॥
अलम्बुसादेवनारी रूपयौवनशालिनी । मदयन्तीजनान् सर्वान् सभामध्येननर्तवै ॥

तस्मिन्नवसरे तस्या नृत्यन्त्याः संसदि द्विजाः ।
वस्त्रमाभ्यन्तरं वायुर्लीलया समुदक्षिपत् ॥ १७ ॥

तत्क्षिप्ते वसने स्पष्ट मूरुमूलमदृश्यत । तथाभूतान्तु तां दृष्ट्वा सर्वे ब्रह्मादयो ह्रिया ॥
सभामध्येसमासीना निमीलितदृशोऽभवन् । विधूमनामातुवसुःकामबाणप्रपीडितः
तामेवब्रह्मभवने दृष्ट्वानिलहृतांशुकाम् । हर्षसम्फुल्लनयनो हृष्टरोमाततोऽभवत् ॥ २० ॥
अलम्बुसायांतस्यांतु जातकामंविलोक्यतम । वसुं विधूमनामानं शशाप चतुराननः
यस्मात्त्वमीदृशंकार्यं विधूमकृतवानसि । तस्माद्विमर्त्यलोकेत्वं मानुषत्वमवाप्स्यसि
इयंचदेवयोषित्ते तत्र भार्या भविष्यति । एवं स ब्रह्मणाशप्तो विधूमः खिन्नमानसः॥

प्रसादयामास वसुर्ब्रह्माणं प्रणिपत्य तु ।

विधूम उवाच

अस्य शापस्य घोरस्य भगवन्भक्तवत्सल !॥ २४ ॥

नाहमर्होऽस्मि देवेश रक्ष मां करुणानिधे !। एवंप्रसादितस्तेन भारतीपतिरव्ययः॥

कृपया परयायुक्तो विधूमं प्राहसान्त्वयन् ।

ब्रह्मोवाच

त्वयि शापोऽप्य यं दत्तो नचाऽसत्यं ब्रवीम्यहम् ॥ २६॥

ततोविधिंकरुणयामिशापस्यास्यतवाधुना । मर्त्यभावंसमापन्नः सहालम्बुसयाऽनया
तत्रभूत्वामहाराजः शासयित्वाचिरंमहीम् । पुत्रमप्रतिमंत्वस्यांजनयित्वामहीपतिम्

अभिषिच्य च राज्ये तं राज्यरक्षाविचक्षणम् ॥ २८॥

एतच्छापस्यशान्त्यर्थं दक्षिणस्योदधेस्तटे । फुल्लग्रामसमीपस्थे चक्रतीर्थे महत्तरे॥
अनयाभार्ययासार्द्धं यदास्नानंकरिष्यसि । तदात्वंमानुषंभावं जीर्णत्वचमिवोरगः ॥
विसृज्यभार्ययासार्द्धंस्वंलोकंप्रतिपत्स्यसे । चक्रतीर्थेविनास्नानं न नश्येच्छापईदृशः
इतिब्रह्मवचःश्रुत्वा विधूमोनातिहृष्टवान् । स्ववेश्म प्राविशत्तूर्णमामन्त्र्यचतुराननम् ॥

चिन्तयामास तत्राऽसौ मर्त्यतां यास्यतो मम ।
को वा पिता भवेद् भूमौ का वा माता भविष्यति ॥ ३२ ॥

बहुंधेत्थंसमालोच्यविधूमोनिश्चिकाय सः । कौशाम्बीनगरे राजा शतानीकइतिश्रुतः

अस्ति वीरो महाभागो भार्या चाऽपि पतिव्रता ।
तस्य विष्णुमती नाम विष्णोः श्रीरिव वल्लभा ॥ ३५ ॥

तमेवपितरंकृत्वा मातरञ्चविधायताम् । सम्भविष्यामिभूलोके स्वकर्मपरिपाकतः ॥
ततःसमालयवन्तं च पुष्पदन्तं बलोत्कटम् । त्रीनाहूयात्मनोभृत्यान्वृत्तमेतन्न्यवेदयत्
भृत्याःशृणुतभद्रंवोब्रह्मशापान्महाभयात् । जनिष्यामिशतानीकाद्विष्णुमत्यामहंसुतः
इतिश्रुत्वावचोभृत्यास्तस्यप्राणाबहिश्चराः । वाष्पपूर्णमुखाःसर्वे विधूमंवाक्यमब्रुवन्

भृत्या ऊचुः

त्वद्वियोगंवयंसर्वे त्रयोऽपिन सहामहे । तस्मान्मानुषभावंत्वमस्माभिःसहयास्यसि
शतानीकस्यराजर्षेर्मन्त्रीयोऽयंयुगन्धरः । सेनानीर्विप्रतीकश्च योऽयंप्राग्रसरो रणे ४१
नर्मकर्मसुहृद्विप्रो वल्लभाख्योमहांश्चयः । तेषांपुत्रास्त्रयोऽप्येते भविष्यामो न संशयः
शतानीकस्यराजर्षेः पुत्रभावंगतस्य ते । शुश्रूषांसम्विधास्यामस्तेषुतेषु च कर्मसु ॥

तानेवं वादिनः सोऽयं विधूमो वाक्यमब्रवीत् ।

विधूम उवाच

जानेऽहं भवतां स्नेहं तादृशं मय्यनुत्तमम् ॥ ४४ ॥

तथापिकथयाम्यद्य तच्छृणुध्वं हि तं वचः । ब्रह्मशापेनघोरेण स्वेनदुष्कर्मणाकृतम्
कुत्सितंमानुषंभावमहमेकोनुवर्तये । विहितं न हि युष्माकमेतच्छापानुवर्तनम् ॥
जुगुप्सितेतोमानुष्ये माकुरुध्वमनोधुना । अत'शापावधिर्यावन्मद्वियोगोविषह्यताम्
इत्युक्तवन्तं ते सर्वे माल्यवत्प्रमुखास्तदा । ऊचुःप्रणम्य शिरसा प्रार्थयन्तं पुनः पुनः
रक्षित्वाकृपयाह्यस्मान्माकुरुष्वच साहसम् । परित्यजसिनःसर्वान्भक्तानद्यनिरागसः

त्वद्वियोगान्महाघोरान्मानुष्यमपि कुत्सितम् ।
बहुमन्यामहे देव ! तस्मान्नस्त्राहि साम्प्रतम् ॥ ५० ॥
एवं सयाचमानांस्त्रीनन्वमन्यत भृत्यकान् ।
तैस्त्रिभिः सहितः सोऽयं कौशाम्बीं गन्तुमैच्छत ॥ ५१ ॥

एतस्मिन्नेवकाले तु सोमवंशविवर्द्धनः । अर्जुनाभिजने जातो जनमेजयसम्भवः ॥
शतानीकोमहीपालः पृथिवीमन्वपालयत् । बुद्धिमान्नीतिमान्वाग्मी प्रजापालनतत्परः
चतुरङ्गबलोपेतो विक्रमैकधनोयुवा । सकौशाम्बींमहाराजोनगरीमध्युवास वै ॥
तस्यमन्त्ररहस्यज्ञो मन्त्रीजातोयुगन्धरः । सेनानीर्विप्रतीकश्च तस्यप्राग्रसरोरणे ॥

नर्मकर्मसुतस्याऽऽसीद्वल्लभाख्यः सखा द्विजः ।
तस्य विष्णुमती नाम विष्णोः श्रीरिव वल्लभा ॥ ५६ ॥

ससर्वगुणसम्पन्नः शतानीकोमहामतिः । पुत्रमात्मसमं तस्यां भार्यायांनान्वविन्दत
आत्मानमसुतंज्ञात्वा सभृशं पर्यतप्यत । सयुगन्धरमाहूय मन्त्रिणं मन्त्रवित्तमम् ॥
पुत्रलाभःकथंमेस्यादितिकार्यममन्त्रयत् । युगन्धरोमहीपालं पुत्रालाभेन पीडितम् ॥

हर्षयन्वचसा स्वेन वाक्यमेतदभाषत ।

युगन्धर उवाच

अस्ति शाण्डिलयनामा तु महर्षिः सत्यवाक्शुचिः ॥ ६० ॥

शत्रुमित्रसमोदान्तस्तपःस्वाध्यायतत्परः । तमेव मुनिमासाद्य ज्वलन्तमिवपावकम्
पुत्रमात्मसमंराजन्प्रार्थयेथाविनीतवत् । कृपावान्समहर्षिस्तु पुत्रं ते दास्यति ध्रुवम्
इतितद्वचनं श्रुत्वा हर्षसम्फुल्ललोचनः । मन्त्रिणातेनसंयुक्तस्तस्यागादाश्रमंमुनेः ॥
तमाश्रमेसमासीनं प्रणनाममहीपतिः । शाण्डिलयस्तुमहातेजा राजानंप्राप्तमाश्रमम्

दृष्ट्वा पाद्यादिभिः पूज्य स्वागतं व्याजहार सः ।

शाण्डिलय उवाच

शतानीक! किमर्थं त्वमाश्रमं प्राप्तवान्मम ॥ ६५ ॥

यत्कर्तव्यमिदानींते तद्वदस्वकरोम्यहम् । मुनिमेवंवदन्तं तं प्रत्यवादीद्युगन्धरः ॥
भगवन्नेष वै राजा पुत्रालाभेनकर्शितः । भवन्तं शरणं प्राप्तः साम्प्रतं पुत्रकारणात् ॥
अस्यापुत्रत्वजंदुःखं त्वमपाकर्तु मर्हसि । इतितस्यवचःश्रुत्वाशाण्डिल्योमुनिसत्तमः
पुत्रलाभवरंतस्मै प्रतिजज्ञेनृपायवै । सराज्ञोवरदःश्रीमान्कौशाम्बीमेत्यसादरः ॥
पुत्रेष्ट्यांपुत्रकामस्य याजकोऽभून्महामुनिः । ततोमुनिप्रसादेन राजादशरथोपमः ॥
यज्वाराममिवप्राप सहस्रानीकमात्मजम् । एवंविधूमःसञ्जज्ञेशतानीकान्नृपोत्तमात् ॥
अत्रान्तरेमन्त्रिवरस्सेनानीस्तुमहीपतेः । द्विजोनर्मवयस्याश्च पुत्रान्प्रापुःकुलोचितान्
पुत्रोयुगंधरस्यासीन्माल्यवान्नामभृत्यकः । यौगन्धरायणोनाम्नामन्त्रशास्त्रेषुकोविदः
विप्रतीकस्यतनयः पुष्पदन्तोबभूवह । रुमण्वानितिविख्यातः परसैन्यविमर्दनः ॥
वल्लभस्यतदाजज्ञे तनयोवैबलोत्कटः । वसन्तकइतिख्यातो नर्मकर्मसुकोविदः ॥
अथ ते ववृधुः सर्वे राजपुत्रपुरोगमाः । पञ्चहायनतांतेषु यातेषु तदनन्तरम् ॥ ७६ ॥
अलम्बुसापिस्वर्वेश्या भूपतेःकृतवर्मणः । अयोध्यायांमहापुर्यां कन्याजातामृगावती
एवंविधूममुख्यास्ते जज्ञिरेक्षितिमण्डले । अत्रान्तरेमहासत्त्वो दुष्टःसानुचरोबली ॥
अहिदंष्ट्रइतिख्यातो महादैत्यबलोत्कटः । युक्तस्थूलशिरोनाम्ना सहायेनदुरात्मना॥
रुरोध देवनगरंबबाधेविबुधानपि । वर्तमानेदिवि महासमरेसुररक्षसाम् ॥ ८० ॥
आनिनायशतानीकं सहायार्थंपुरन्दरः । सयौवराज्ये तनयं विधायविधिनानृपः॥
प्रतस्थेरथमास्थाय युद्धायदितिजैः सह । नीतो मातलिनाऽभ्येत्य सादरंसधनुर्धरः

विधायप्रेक्षकान्देवाञ्जघानदितिजान्रणे । अथ दैत्याधिपःसोऽपि निहतःसमरेदिवि
ततःशक्रस्यवचसा परेतं नृपपुङ्गवम् । रथमारोप्य सहसा कौशाम्बीमातलिर्ययौ ॥
नीत्वामहीतलमसौ तत्सुतायन्यवेदयत् । ततःसहस्रानीकोऽपि विलप्यबहुदुःखितः
मन्त्रिभिःसहसम्भूय प्रेतकार्यंन्यवर्तयत् । मृतंज्ञात्वापतिंराज्ञी सहैवाऽनुममार च ॥
महिष्यासहसम्प्राप्ते भूपालेकीर्तिशेषताम् । भेजेराज्यंशतानीकतनयोमन्त्रिणांगिरा
युगन्धरेविप्रतीकेवल्लभे च मृतेस्मति । यौगन्धरायणमुखास्तत्पुत्राःसर्वएवहि ॥
शतानीकसुतस्यास्यतत्तत्कार्यमकुर्वत । एवं स पालयामासमहींराजसुतोबली ॥८६॥

याते काले महेन्द्रेण सनन्दनमहोत्सवे ।
निमन्त्रितस्तत्कथितां भाविनीमशृणोत्कथाम् ॥ ९० ॥

स्वर्योषिद्ब्रह्मणःशापादयोध्यायामलम्बुसा । जातामृगावतीकन्या भूपतेःकृतवर्मणः
विधूमनामा च वसुस्त्वंनाकललनाम्पुरा । तामेवब्रह्मसदने दृष्ट्वाऽनिलहृतांशुकाम् ॥
तदैवमदनाक्रान्तः शापान्मर्त्यत्वमागतः । सैवतेदयिताराजन् भाविनी न चिरात्सखे
यदात्वमात्मनःपुत्रं राज्येसंस्थाप्यभूपते । मृगावत्यास्त्रियासार्द्धंदक्षिणस्योदधेस्तटे
चक्रतीर्थेमहापुण्ये फुल्लग्रामसीपतः । स्नानं करिष्यसि तदा शापान्मुक्तोभविष्यसि
इतिप्रोवाचभगवान् सत्यलोकेपितामहः । इतीन्द्रवचनंश्रुत्वा सहस्रानीकभूपतिः ॥

तदुद्वाहकृतोत्साहः समामन्त्र्य शचीपतिम् ।
कौशाम्बींप्रस्थितोहृष्टः सतिलोत्तमया पथि ॥ ९७ ॥
स्मरन्किमपि तां कान्तां भाषमाणामनन्यधीः ।
ध्यायन्च्छतक्रतुवचो नालुलोके महीपतिः ॥ ९८ ॥

साशशापनृपं तुभ्रनादरतिरस्कृता । आहूयमानोऽपि मया सहस्रानीकभूपते !॥ ९९
मृगयावतींहृदाध्यायन्किमर्थंमामुपेक्षसे । सौभाग्यमत्तामानिन्योनसहन्तेवधीरणाम्
मामवज्ञाययांराजन् हृदाध्यायसिसाम्प्रतम् । तयाचतुर्दशसमावियुक्तस्त्वंभविष्यसि
इतिशप्तवतींराजा तामुवाचतिलोत्तमाम् । तामेवयदिलभ्येयं तनुजांकृतवर्मणः ॥
चतुर्दशसमादुःखं सहिष्येतद्वियोगजम् । इत्युक्त्वा तद्गतमनां नृपःप्रायान्निजांपुरीम्

ततःकालेनतनया भूपतेःकृतवर्मणः । तमाससाददयिता सर्वस्वंपुष्पधन्वनः ॥ १०४॥
मृगावतींसमासाद्य विलासतरुवल्लरीम् । विभ्रमाम्भोधिलहरीं ननन्दमदनद्युतिः ॥
सातस्माद्गर्भमाधत्त भवानीवेन्दुशेखरात् । पाण्डिम्नाशशिलेखेवपीयूषक्षालिताबभौ
सुन्दरीदौहृदव्यक्तेरथपौरन्दरींदिक् । रराज राजमहिषी रजनीकरगर्भिणी ॥ १०७
सादौहृदवशाद्राज्ञी यंयंकाममकामयत् । सुदुर्लभमपिप्रेम्णा तत्तत्सर्वं समाहरत् ॥
पत्यौसमीहितकरे साकदाचिन्मृगावती । स्वेच्छयावैमतिंचक्रे रक्तवापीनिमज्जने
अभिलाषंसविज्ञाय मृगावत्यामहीपतिः । कौसुम्भसलिलैःपूर्णां क्षणाद्वापीमकारयत्
तस्मिन्रक्तजलेराज्ञीस्नानंसादरमातनोत् । ततस्तांरक्ततोयार्द्रां फुल्लकिंशुकसन्निभाम्
राजस्त्रीमामिषधिया सुपर्णकुलसम्भवः । महारविन्दकःपक्षी मुग्धां दग्धविधेर्वशात्
नीत्वाविहायसादूरं सतामचलसन्निभः । तत्याजमोहविवशामुदयाचलकन्दरे ॥ ११३
लब्धसञ्ज्ञाशनैःकम्पविलोलतनुवल्लरी । दृग्भ्यामुत्पलतुल्याभ्यां मुहुरश्रूण्यवर्तयत्

हा नाथ! मन्दभाग्याऽहं त्वद्वियोगेन पीडिता ।
का गतिः क नु गच्छामि द्रक्ष्यामि त्वन्मुखं कदा ॥ ११५ ॥
इत्युक्त्वा गजसिंहानां पुरोऽभूद्वधकाङ्क्षिणी ।
सा सर्वकेसरिगजैस्त्यक्ता न निधनं गता ॥ ११६ ॥

आपत्कालेनृणांनूनं मरणं नैवलभ्यते । अतिदीनं समाकर्ण्य तस्याःक्रन्दितमुन्मुखाः

मृगा निष्पन्दगतयो न तृणान्यप्यभक्षयन् ।
ततस्तांकरुणासिन्धुर्मुनिपुत्रस्तथा स्थिताम् ॥ ११८ ॥

रुदतींकृपयाराज्ञीं समानीयस्वमाश्रमम् । न्यवेदयच्चतांराज्ञीं गुरवे जमदग्नये ॥११९॥
जमदग्निस्तुधर्मात्मा तामाश्वासयदन्तिके । तथाजानीहिमांभद्रे कृतवर्मा यथा तव
एवमास्वासितातत्र कृपयाजमदग्निना । चक्रे तत्रैव सा वासमाश्रमेमुनिसङ्कुले ॥१२१
ततस्स्वल्पेनकालेन विशाखमिवपार्वती । असूततनयंबाला शौर्यधैर्यगुणान्वितम्
सूतिकागृहकृत्यानियानिकार्याणिबन्धुभिः । चक्रिरेमातृवत्तानिमृगावत्यामुनिस्त्रियः
तंसुजातंनृपसुतं काऽपि वागशरीरिणी । उदयाचलजातत्वाच्चकारोदयनाभिधम् ॥

आश्रमेसमुनीन्द्रेण कृतचूडादिकव्रतः । जग्राहसकलाविद्या जमदग्नेर्महामुनेः ॥१२५॥

युवा नृपसुतः सोऽयं कदाचिन्मृगयापरः ।
अपश्यदेकं भुजगं व्याधेन दृढसंयतम् ॥ १२६ ॥

उवाचसकृपायुक्तो व्याध!मुञ्च भुजङ्गमम् । किंकरिष्यस्यनेनत्वं नैनंहिंसितुमर्हसि ॥
तमुवाचततोव्याधः सर्पेणानेनपूरुष !। धनधान्यादिकंलप्स्ये ग्रामेषुनगरेषु च ॥ १२८
अतोऽहं जीविकामेतं नैवमोक्ष्येकथञ्चन । इत्युक्त्वा पेटिकायान्तं बबन्धशबराधमः
बद्धमालोक्यभुजगं शबरायधनार्थिने । अमोचयत्स्वजननीदत्तंदत्त्वासकङ्कणम् ॥
मोचितस्तेनसर्पोऽसौनरोभूत्वाकृताञ्जलिः । स्तवं कृत्वाचसहसा तं पातालंनिनायवै
किन्नराख्येननागेन धृतराष्ट्रसुतेन सः । पातालंप्राविशत्तत्र न्यवसत्पूजितस्सुखम् ॥
धृतराष्ट्रस्यतनयां भगिनींकिन्नरस्य च । ललिताख्यांगुणोपेतां प्रियांभेजेनृपात्मजः
सातस्माज्जनयामास पुत्रमप्रतिमौजसम् । ततःसाललिताप्राह त्वरितोदयनं प्रति

ललितोवाच

अहं विद्याधरीपूर्वं सुकर्णीनामनामतः । शापात्सर्पत्वमाप्ताऽस्मि शापान्तोगर्भ एषमे
ततोऽमुंप्रतिगृह्णीष्व पुत्रमप्रतिमौजसम् । ताम्बूलींस्रजमम्लानां वीणांघोषवतीमपि
तथेतिप्रतिजग्राह तत्सर्वंनृपनन्दनः । पश्यतां सर्वसर्पाणां साप्यगच्छद्विहायसम् ॥

ततः सोऽपि गृहीत्वा तु वीणां मालां च पुत्रकम् ।
दुःखितामात्मजननीं द्रष्टुकामस्त्वरान्वितः ॥ १३८ ॥

श्वशुरादीननुज्ञाप्य सहसा स्वाश्रमं ययौ । जननींशोकसन्तप्तामाश्वस्तां जमदग्निना॥
समेत्यतोषयामास वृत्तंचास्यैन्यवेदयत् । तदाप्रहृष्टहृदया सा बभूव मृगावती ॥१४०
अत्रान्तरेसशबरः कौशाम्ब्यांवणिजं ययौ । सहस्रानीकनामाङ्कं विक्रेतुंमणिकङ्कणम्
राजमुद्रांसमालोक्य कङ्कणेसवणिग्वरः । शबरेणसमं गत्वासर्वं राज्ञेन्यवेदयत् ॥
ततः सहस्रानीकोऽयंतत्प्राप्यमणिकङ्कणम् । मृगावतीविप्रयोगविषाग्निपरिपीडितः
तद्बाहुसङ्गपीयूषशीकरासारशीतलम् । कङ्कणंहृदयेन्यस्य विललापसुदुःखितः ॥
उवाच च कथं लब्धं कङ्कणंशबरत्वया । सचैव मुक्तस्तत्प्राप्तिक्रमंतस्मैन्यवेदयत् ॥

शबरस्य वचः श्रुत्वा सहस्रानीकभूपतिः ।
प्रतस्थे मन्त्रिभिः सार्द्धं प्रियालोकनकौतुकी ॥ १४६ ॥

यत्रेन्दुभास्करमुखा लभन्तेसहसोदयम् । तमेव गिरिमुद्दिश्य सहसासोऽभ्यगच्छत

किञ्चिन्मार्गं समुल्लङ्घ्य तस्थौ विश्रान्तसैनिकः ।
तस्मिन्विनिद्रेदयिता सङ्गमध्यानतत्परे ॥ १४८ ॥

वसन्तको विचित्रास्तु कथयामास वै कथाः । तत्कथाश्रवणेनैव तांराज्ञींसनिनायवै
ततःकालेनककुभं प्राप्यजम्भारिपालिताम् । जमदग्न्याऽऽश्रमं गत्वानिर्वैरहरिकुञ्जरम्
तपस्यन्तं मुनिंदृष्ट्वा शिरसाप्रणनामसः । आशीर्वादेनसमुनिः प्रतिजग्राह तं नृपम् ॥
विधिवत्पूजयामास पाद्यार्घ्याचमनायकैः । उवाच च महीपालं धर्मार्थसहितं वचः
नरनाथमृगावत्यां जातोयं तनयस्तव । यशोनिधिर्महातेजा रामचन्द्रइवाऽपरः ॥
भविष्यतिदिशांजेता सिंहसंहननोऽप्ययम् । पौत्रएषमहाभाग !तथा ह्युदयनात्मजः
इयंमृगावतीभार्या पातिव्रत्यपरायणा । तदेतांस्त्रीन्महाराज प्रतिगृह्णीष्वमाचिरम् ॥

उक्त्वैवं मुनिना दत्तां तां गृहीत्वा महीपतिः ।
प्रियासहायःस्वपुरीं प्रतस्थे मन्त्रिभिर्वृतः ॥ १५६ ॥

ततःप्रविश्यकौशाम्बीं नगरीं सनृपोत्तमः । स्मरञ्छक्रस्यवचनं मानुषंजन्मकुत्सयन्
महीमुदयनायैव ददौ पुत्रायधीमते । तस्मिन्नुदयनेपुत्रे राज्यपालनदक्षिणे ॥ १५८
राज्यभारंविनिक्षिप्य सशापविनिवृत्तये । वसन्तकरुमण्वद्भ्यां मृगावत्याच भार्यया
यौगन्धरायणेनाऽपि मन्त्रिपुत्रेणसंयुतः । चक्रतीर्थे महापुण्येदक्षिणस्योदधेस्तटे ॥
स्नानंकर्तुंययौतूर्णं सर्वतीर्थोत्तमोत्तमे । वाहनैर्वातरंहोभिरचिराल्लवणोदधिम् ॥
सम्प्राप्यचक्रतीर्थं च स्नानंचक्रुर्यथाविधि । तेषु च स्नातमात्रेषु स्वंरूपप्रतिपेदिरे ॥
दिव्यम्बरधराः सर्वे दिव्यमाल्यानुलेपनाः । विमानानिमहार्हाणि समारुह्यविभूषिताः
तत्तीर्थंबहुमन्वानाः स्वशापच्छेदकारणम् । पश्यतांसर्वलोकानांस्वर्गलोकंययुस्तदा
तदाप्रभृतितेसर्वे ज्ञात्वातत्तीर्थवैभवम् । पावनेचक्रतीर्थेऽस्मिन् स्नानं कुर्वन्तिसर्वदा
एवं प्रभावंतत्तीर्थं ये समागत्यमानवाः । स्नानंसकृच्च कुर्वन्ति ते सर्वेस्वर्गवासिनः ॥

एवम्वःकथितंविप्रा विधूमचरितंमहम् । यःपठेदिममध्यायं श्रृणुयाद्वासमाहितः ॥
यं यं कामयते कामं तं सर्वं शीघ्रमाप्नुयात् ।

इतिश्रीस्कान्देमहापुराणे एकाशीतिसाहस्र्यांसंहितायां तृतीयेब्रह्मखण्डे
सेतुमाहात्म्ये चक्रतीर्थप्रशंसायामलम्बुसाविधूमशापविमोचनंनाम
पञ्चमोऽध्यायः ॥ ५ ॥

षष्ठोऽध्यायः

देवीमहिषासुरयुद्धवर्णनम्

ऋषय ऊचुः

द्वैपायनविनेय! त्वं सूत पौराणिकोत्तम !। देवीपत्तनपर्यन्तं चक्रतीर्थमनुत्तमम् ॥१ ॥
इत्यब्रवीःपुरास्माकमतःपृच्छामिकिञ्चन । देवीपुरंहितत्कुत्र यदन्तंचक्रतीर्थकम् ॥
देवीपत्तनमित्याख्या कथंतस्याभवत्तथा । श्रीरामसेतुमूले च स्नातानाम्पापिनामपि
कीदृशंवाभवेत्पुण्यं चक्रतीर्थेतथैव च । एतच्चान्यान्विशेषांश्चब्रूहि पौराणिकोत्तम!

श्रीसूत उवाच

सर्वमेतत्प्रवक्ष्यामि श्रृणुध्वंमुनिपुङ्गवाः । पठतांश्रृण्वतांचैतदाख्यानंपापनाशनम् ॥
यत्रपाषाणनवकं स्थापयित्वारघूद्वहः । बबन्धप्रथमंसेतुं समुद्रेमैथिलीपतिः ॥ ६ ॥
देवीपुरंतु तत्रैव यदन्तं चक्रतीर्थकम् । देवीपत्तनमित्याख्या यथातस्यसमागता ॥
तद्ब्रवीमिमुनिश्रेष्ठाः ! श्रृणुध्वंश्रद्धयासह । पुरादेवासुरेयुद्धे देवैर्नाशितपुत्रिणी ॥
दितिः प्रोवाच तनयामात्मनः शोकमोहिता ।

दितिरुवाच

याहि पुत्रि! तपः कर्तुं तपोवनमनुत्तमम् ॥ ९ ॥
पुत्रार्थंतपसुश्रोणि नियतानियतेन्द्रिय । इन्द्रादयो नशिष्येरन्येन पुत्रेण वै सुराः॥१०
उदितातनया चैवं जनन्यातामप्रणम्य च । स्वीकृत्यमाहिषंरूपं वनंपञ्चाग्निमध्यगा ॥

तपोतप्यतसाघोरं तेनलोकाश्चकम्पिरे । तस्यांतपःप्रकुर्वन्त्यांत्रिलोक्यासीद्भयातुरा
इन्द्रादयःसुरगणामोहमापुर्द्विजोत्तमाः । सुपार्श्वस्तपसातस्यामुनिःक्षुब्धोऽवदत्तुताम्

सुपार्श्व उवाच

परितुष्टोऽस्मिसुश्रोणि! पुत्रस्तवभविष्यति । मुखेनमहिषाकारो वपुषानररूपवान् ॥
महिषोनामपुत्रस्तेभविष्यत्यतिवीर्यवान् । पीडयिष्यतियःस्वर्गंदेवेन्द्रंचससैनिकम्
सुपार्श्वस्त्वेवमुक्त्वा तां विनिवार्य तपस्तथा ।
आगच्छदात्मनो लोकमनुनीय तपस्विनीम् ॥ १६ ॥
अथजज्ञेस महिषो यथोक्तंब्रह्मणापुरा । व्यवर्द्धतमहावीर्यः पर्वणीवमहोदधिः ॥ १७॥
ततः पुत्रो विप्रचित्तेर्विद्युन्माल्यसुराग्रणीः ।
अन्येऽप्यसुरवर्यास्ते सन्ति ये भूतले द्विजाः !॥ १८ ॥
ते सर्वेमहिषस्याऽस्य श्रुत्वादत्तंवरम्मुदा । समागम्यमुनिश्रेष्ठाः! प्रावदन्महिषासुरम्
स्वर्गाधिपत्यमस्माकंपूर्वमासीन्महामते !। देवैर्विष्णुं समाश्रित्यराज्यंनोहृतमोजसा
तद्राज्यमानयबलादस्माकंमहिषासुर । वीर्यं प्रकटयस्वाऽद्य प्रभावमपिचाऽऽत्मनः ॥
अतुल्यबलवीर्यस्त्वं ब्रह्मदत्तवरोद्धतः । पुलोमजापतिं युद्धे जहिदेवगणैः सह ॥ २२॥
दनुजैरेवमुक्तोऽसौ योद्धुकामोऽमरैःसह । महावीर्योऽथ महिषः प्रययावमरावतीम्
देवानामसुराणाञ्च सम्वत्सरशतंरणम् । पुराबभूवविप्रेन्द्रास्तुमुलंरोमहर्षणम् ॥ २४॥
देवबृन्दंततोभीत्या पुरस्कृत्यपुरन्दरम् । कान्दिशीकमभूद्विप्रा ब्रह्माणञ्च ययौ तदा ॥
ब्रह्मातानमरान्सर्वान्समादाययययौ पुनः । नारायणशिवौयत्र वर्तेतेविश्वपालकौ ॥
तत्रगत्वानमस्कृत्य स्तुत्वास्तोत्रैरनेकशः । ब्रह्मा निवेदयामास महिषासुरचेष्टितम्
सुराणामसुरैः पीडां देवयोः शम्भुकृष्णयोः । इन्द्राग्नियमसूर्येन्दुकुबेरवरुणादिकान्
निराकृत्याधिकारेषु तेषांतिष्ठत्ययंस्वयम् । अन्येषांदेववृन्दानामधिकारेऽपि तिष्ठति
निरस्तंदेववृन्दंतत् स्वर्लोकादवनीतले । मनुष्यवद्विचरते महिषासुरबाधितम् ॥
एतज्ज्ञापयितुंदेवौ युवयोरहमागतः । सार्द्धंदेवगणैरत्र रक्षतन्तान् समागतान् ॥ ३१
ब्रह्मणोवचनंश्रुत्वा रमेश्वरमहेश्वरौ । कोपात्करालवदनौदुष्प्रेक्ष्यौ तौ बभूवतुः ॥३२

अत्यन्तकोपज्वलितान्मुखाद्विष्णोरथ द्विजाः ।।
निश्चक्राम महत्तेजः शम्भोः स्रष्टुस्तथैव च ॥ ३३ ॥
अपरेषां सुराणाञ्च देहादिन्द्रशरीरतः। तेजः समुदभूत्क्रूरं तदेकं समजायत ॥ ३४ ॥
तेषां तुतेजसांराशिर्ज्वलत्पर्वतसन्निभः। ददृशेदेववृन्दैस्तैर्ज्वालाव्याप्तदिगन्तरम् ॥
तेजसांसमुदायोऽसौ नारीकाचिदभूत्तदा। शिवतेजोमुखमभूद्विष्णुतेजोभुजा द्विजाः
ब्रह्मतेजस्तुचरणौ मध्यमैन्द्रेणतेजसा। यमस्यतेजसाकेशाः कुचौ चन्द्रस्यतेजसा ॥
जङ्घोरूकल्पितौविप्रा वरुणस्यतु तेजसा। नितम्बंपृथिवीतेजःपादाङ्गुल्योऽर्कतेजसा
कराङ्गुल्योवसूनाञ्च तेजसाकल्पितास्तथा। कुबेरतेजसाविप्रा नासिका परिकल्पिता
नवप्रजापतीनाञ्च तेजसा दन्तपङ्क्तयः। चक्षुर्द्वयंसमजनि हव्यवाहन तेजसा ॥ ४०॥
उभेसन्ध्येभ्रुवौजाते श्रवणेवायुतेजसा। इतरेषां च देवानां तेजोभिरतिदारुणैः ॥
कृतासावयवानारी दुर्गापरमभास्वरा । बभूवदुर्धर्षतरा सर्वैरपिसुरासुरैः ॥ ४२ ॥
सर्ववृन्दारकानीकतेजःसङ्घसमुद्भवाम्। तां दृष्ट्वाप्रीतिमापुस्ते देवामहिषबाधिताः ॥
ततो रुद्रादयो देवा विनिष्कृष्यायुधाऽऽत्निजात्।
आयुधानि ददुस्तस्यै शूलादीनि द्विजोत्तमाः ।॥ ४४ ॥
भूषणानिददुस्तस्यैवस्त्रमाल्यानिचन्दनम्। साऽपिदेवीतदावस्त्रैर्भूषणैश्चन्दनादिभिः
कुसुमैरायुधैर्हारैर्भूषितापरिचारकैः। साट्टहासं प्रमुञ्चन्तीभैरवीभैरवस्वना ॥ ४६ ॥
ननाद कम्पयन्तीव रोदसीदेवसेविता। देव्याभैरवनादेन चचाल सकलं जगत् ॥४७॥
सिंहवाहनमारूढां देवींताममरास्तदा । मुनयः सिद्धगन्धर्वास्तुष्टुवुर्जयशब्दतः ॥
अतिभीषणनादेन देव्याःक्षुब्धं जगत्त्रयम्। दृष्ट्वादेवारयोदैत्या समंतस्थुरुदायुधाः ॥
महिषोऽपि महाक्रोधात्समुद्यतमहायुधः। तंशब्दमवलक्ष्याथ ययावसुरसम्वृतः ॥५०
व्यलोकयत्ततो देवीं तेजोव्याप्तजगत्त्रयीम्।
सायुधानन्तबाह्वाढ्यां नादकम्पितभूतलाम् ॥ ५१ ॥
क्षोभिताशेषशेषादिमहानागपरम्पराम् । विलोक्यदेवीमसुराः समनह्यन्नुदायुधाः ॥
ततोदेव्यातयासार्द्धमसुराणामभूद्रणम्। अस्त्रैःशस्त्रैःशरैश्चक्रैर्गदाभिर्मुसलैरपि ॥ ५३

गजाश्वरथपादातैरसङ्ख्येयैर्महाबलः। महिषोयुयुधेतत्र देव्यासाकमरिन्दमः ॥ ५४
लक्षकोटिसहस्राणिप्रधानासुरयूथपाः। एकैकस्य तु सेनायास्तेषांसङ्ख्या नविद्यते
ते सर्वे युगपद्देवीं शस्त्रैरावव्रुरोजसा । सापिदेवीततोभीम दैत्यमुक्तास्त्रसञ्चयम् ॥
बिभेदलीलयाबाणैः स्वकार्मुकविनिःसृतैः। ससर्जदैत्यकायेषु बाणपूगान्यनेकशः
देव्याश्रयबलाद्देवा निर्भयादैत्ययूथपैः। युयुधुःसंयुगे शस्त्रैरस्त्रैरप्यायुधान्तरैः ॥५८
ततोदेवाबलोत्सिक्ता देवीशक्त्युपबृंहिताः। निःशेषमसुरान्सर्वानायुधैर्निरमूलयन्
स्वसैन्ये तु क्षयंयातेसंक्षुब्धोमहिषासुरः। चापमादायवेगेन विकृष्य च महास्वनम्
संधायमुमुचेबाणान्देवसैन्येषु भूसुराः । इन्द्रे तु दशसाहस्रं यमेपञ्चसहस्रकम् ॥६१॥
वरुणेचाऽष्टसाहस्रं कुबेरेषट्सहस्रकम्। सूर्येचन्द्रे च वह्नौ च वायौवसुषुचाश्विनोः
अन्येष्वपि च देवेषु महिषो दानवेश्वरः। प्रत्येकमयुतं बाणान्मुमुचेबलिनांवरः ॥६३
पलायन्ते ततो देवा महिषासुरमर्द्दिताः। देवीं शरणमाजग्मुस्त्राहित्राहीतिवादिनः ॥
ततो देवीगणान्स्वस्य भूतवेतालकादिकान्।
यूयं नाशयत क्षिप्रमासुरं बलमित्यगात् ॥ ६५ ॥
अहं तु महिषं युद्धे योधयामि बलोद्धतम्। ततो देव्यागणैः सर्वमासुरं क्षतमाशु वै॥
ततःसैन्येक्षयंनीते गणैर्देवीप्रचोदितैः।योद्धुकामःसमहिषो गणैस्साकंव्यतिष्ठतः ॥
अत्रान्तरेमहानादः सुचक्षुश्चमहाहनुः। महाचण्डोमहाभक्षोमहोदरमहोत्कटौ ॥ ६८ ॥
पञ्चास्यःपादचूडश्च बहुनेत्रःप्रबाहुकः । एकाक्षस्त्वेकपादश्च बहुपादोऽप्यपादकः ॥
एतेचान्ये च बहवोमहिषासुरमन्त्रिणः । योद्धुकामारणेदेव्याः पुरतस्त्ववतस्थिरे॥
सिंहवाहनमारुह्य ततो देवी मनोजवम् । प्रलयाम्बुदनिर्घोषश्चापमादाय भैरवम् ॥
विस्फोट्यमुमुचेबाणान्वज्रवेगसमान्युधि। दशलक्षगजैश्चापि शतलक्षैश्चवाजिभिः
शतलक्षैरथैश्चाऽपि लक्षायुतपदातिभिः । युक्तोमहाहनुर्दैत्यो देव्यायुद्धेनिपातितः ॥
सैन्ये च तस्यनिहते देव्याबाणैर्द्विजोत्तमाः। लक्षकोटिसहस्राणिप्रधानासुरनायकाः
महिषस्यहिविद्यन्ते महाबलपराक्रमाः। एकैकस्य प्रधानस्य चतुरङ्गबलं तथा ॥७५॥
महाहनोर्यथाविप्रास्तथैवाऽस्तिमहद्बलम्। तत्सर्वंनिहतंदेव्या शरैः काञ्चनपुङ्खितैः

यामम‍ात्रेण विप्रेन्द्रास्तदद्भुतमिवाऽभवत् ॥ ७७ ॥

इतिश्रीस्कान्देमहापुराणएकाशीतिसाहस्र्यां संहितायांतृतीयेब्रह्मखण्डे सेतुमाहात्म्येचक्रतीर्थप्रशंसायांदेवीपुराभिधानकथनेदेवीमहिषासुर-युद्धोनाम षष्ठोऽध्यायः ॥ ६ ॥

सप्तमोऽध्यायः

चक्रतीर्थप्रशंसायां देवीपुराभिधानकथने महिषासुरसंहारवर्णनम्

श्रीसूत उवाच

स्वसैन्यमवलोक्याऽथ महिषोदानवेश्वरः । हतंदेव्यामहाक्रोधाच्चण्डकोपमथाब्रवीत्

महिष उवाच

चण्डकोप ! महावीर्य ! युद्धयस्वैनां दुरात्मिकाम् ।
तथाऽस्त्विवति स चोक्त्वाऽथ चण्डकोपः प्रतापवान् ॥ २ ॥

अवाकिरद्बाणवर्षैर्देवींसमरमूर्द्धनि । बाणजालानितस्याऽऽशु चण्डकोपस्य लीलया

छित्त्वा जघान शस्त्रेण चण्डकोपस्य साऽम्बिका ।
चकर्त वाजिनोप्यस्य सारथिं च ध्वजं धनुः ॥ ४ ॥

उन्ममाथ रथञ्चापि तम्बाणैर्हृद्यताडयत् । सभग्नधन्वाविरथो हताश्वोहतसारथिः॥
चण्डकोपस्ततोदेवींखड्गचर्मधरोऽभ्यगात् । खड्गेनसिंहमाजघ्ने देव्यावाहम्महासुर
देवीमपिभुजेसव्ये खड्गेनप्रजघानसः । खड्गोदेव्याभुजेसव्ये व्यशीर्यतसहस्रधा ॥७
ततःशूलेनमहता चण्डकोपंतदाऽम्बिका । जघानहृदयेसोऽपिपपात च ममार च ॥८॥
चण्डकोपेहतेतस्मिन्महावीर्ये महाबले । चित्रभानुर्गजाऽऽरूढो देवीं तामभ्यधावत
दिव्यांशक्तिससर्जाऽथ महाघण्टारवाकुलाम् । न्यवारयतहुङ्कारैर्देवीशक्तिंनिराकुलाम्
ततःशूलेनसादेवीचित्रभानुं व्यदारयत् । मृते तस्मिंस्ततोयुद्धे करालोद्धुतमभ्यगा

करमुष्टिप्रहारेण सोऽपिदेव्यानिपातितः । ततो देवीमदोन्मत्तं गदया व्यसुमातनोत्
वाष्कलिम्पट्टिशेनाऽपि चक्रेणाऽपि तथाऽन्तिकम् ।
प्राहिणोद्यमलोकाय दुर्गादेवी द्विजोत्तमाः ! ॥ १३ ॥

एवमन्यान्महाकायान्मन्त्रिणोमहिषस्यच । शूलेनपोथयित्वाऽथप्राहिणोद्यमसादनम्
आत्मसैन्येहतेत्वेवं दुर्गयामहिषासुरः । माहिषेणस्वरूपेण गणान्देव्याअभर्त्सयत्

तुण्डेन निजघानैकान् खुराघातैस्तथाऽपरान् ।
निश्वासवायुभिश्चाऽन्यान्पातयामास रोषितः ॥ १६ ॥

देव्याभूतगणंत्वेवं निहत्य महिषासुरः । सिंहं मारयितुं देव्याश्चुक्रोध च ननाद च
ततः सिद्धोऽभवत्क्रुद्धो महावीर्यो महाबलः । खुराभिघातनिर्भिन्नमहीतलमहीधरः
महिषासुरमायान्तंनखैरेनंव्यदारयत् । चण्डिकाऽपिततःक्रुद्धावधेतस्याऽकरोन्मतिम्

बबन्ध पाशैर्महिषं चण्डिका कोपमूर्च्छिता ।
मोचयित्वा ततः पाशांस्त्यक्तमाहिषवेषवान् ॥ २० ॥

सिंहवेषोऽभवद्दैत्यो महाबलपराक्रमः । देवीतस्यशिरोयावच्छेत्तुं बुद्धिमधारयत्
तावत्स पुरुषोभूत्वा खड्गपाणिरदृश्यत । अथतंपुरुषंदेवी खड्गहस्तं शरोत्करैः ॥
जघानतीक्ष्णधाराग्रैः परमर्मविदारणैः । ततः सपुरुषोविप्रा गजोऽभूद्धस्तदन्तवान्
दुर्गायावाहनं सिंहं करेण विचकर्ष च । ततः सिंहः करं तस्य विचकर्तनखाङ्कुरैः
भूयोमहासुरोजातो माहिषंवेषमाश्रितः । ततः क्रुद्धा भद्रकाली महत्पानमसेवत ॥
ततःपानवशान्मत्ताजहासाऽरुणलोचना । महिषःसोऽपिगर्वेणशृङ्गाभ्यांपर्वतोत्करान्
चण्डिकाम्प्रतिचिक्षेप साचतानच्छिनच्छरैः । ततोदेवीजगन्मातामहिषासुरमब्रवीत्

देव्युवाच

कुरुगर्वंक्षणम्मूढ मधुयावत्पिबाम्यहम् । निवृत्तमधुपानाऽहं त्वान्नयिष्ये यमक्षयम्
हतेत्वयिदुराधर्षे मयादैवतकण्टके । स्वंस्वंस्थानंप्रपद्यन्तां सिद्धाःसाध्यामरुद्गणाः
उक्त्वैवंताडयामास मुष्टिनामहिषासुरम् । ताडितोऽयं ततोदेव्यामहिषोभृशविह्वलः
दक्षिणस्योदधेस्तीरे प्रादुद्रावत्वरान्वितः । अनुदुद्रावतं देवी सिंहमाऽऽरुह्यवाहनम्

अनुद्रुतस्ततोदेव्या महिषोदानवेश्वरः । धर्मपुष्करिणीतोये दशयोजनमायते ॥ ३२॥
प्रविश्यान्तर्हितस्तस्थौ दुर्गाताडनविह्वलः । ततोदुर्गासमासाद्यधर्मपुष्करिणीतटम्
न ददर्शाऽसुरंतत्र महिषं चण्डिका तदा । अशरीराततोवाणी दुर्गादेवीमभाषत ३४
भद्रकालि! महादेवि! महिषो दानवस्त्वया । ताडितोमुष्टिनाभद्रे धर्मपुष्करिणीजले
अस्मिन्नन्तर्हितःशेते भयार्तोमारयस्वतम् । येनकेनाप्युपायेन चैनं प्राणैर्वियोजय ॥
एवंवाचाऽशरीरिण्या कथिताचण्डिका तदा । प्राहस्ववाहनंसिंहमसुरेन्द्रवधोद्यता
मृगेन्द्रसिंहविक्रान्त! महाबलपराक्रम !। धर्मपुष्करिणीतोयं निःशेषंपीयतांत्वया ॥
देव्यैवमुक्तःपञ्चास्यो धर्मपुष्करिणीजलम् । निःशेषंचपपौविप्रा यथापांसुर्भवेत्तथा
निरगान्महिषोदीनस्ततस्तस्माज्जलाशयात् । आयान्तमसुरं देवी पादेनाक्रम्यमूर्द्धनि
कण्ठंशूलेनतीक्ष्णेन पीडयामासकोपिता । ततोदेव्यसिमादायचकर्ताऽस्यशिरोमहत्
एवं समहिषोविप्राः स भृत्यबलवाहनः । दुर्गयानिहतोभूमौ पपात च ममार च ॥
ततोदेवाःसगन्धर्वाः सिद्धाश्चपरमर्षयः । स्तुत्वा देवींततः स्तोत्रैस्तुष्टांजहृषिरेतदा
अनुज्ञातास्ततोदेव्या देवाजग्मुर्यथागतम् । ततो देवी जगन्माता स्वनाम्नापुरमुत्तमम्
दक्षिणस्यसमुद्रस्य तीरेचक्रेतदोत्तरे । ततो देव्यनुशिष्टास्ते देवाःशक्रपुरोगमाः
पूरयामासुरमृतैर्धर्मपुष्करिणीं तदा । ततो ह्यमृततीर्थाख्यां लेभेतत्तीर्थमुत्तमम् ४६
ततो देवीवरमदात्स्वपुरस्य मुदान्विता । नीरोगश्च पशव्यश्च पुरमेतद्भवत्विति ॥ ४७

दद्दौ तीर्थाय च वरं स्नातानामत्र वै नृणाम् ।
यथाभिलाषं सिद्धिः स्यादित्युक्त्वा सा दिवं ययौ ॥४८ ॥

श्रीसूत उवाच

यत्स्वनाम्नाचकारेदं देवीपुरमनुत्तमम् । देवीपत्तनमित्युक्तं तेनदेव्याः पुरोत्तमम् ॥
देवीपत्तनमारभ्य सुमुहूर्ते दिनेद्विजाः । विघ्नेश्वरं प्रणम्यादौ तिलकस्वामिनं तथा
महादेवाभ्यनुज्ञातोरामचन्द्रोऽतिधार्मिकः । स्थापयित्वास्वहस्तेनपाषाणनवकम्मुदा
सेतुमारब्धवान्विप्रा यावल्लङ्कामतन्द्रितः । सिंहासनंसमारुह्य रामोनलकृतंशुभम्

वानरैःकारयामास सेतुमब्धौ नलादिभिः ।

पर्वताञ्छाखिनोवृक्षान दृषदः काष्ठसञ्चयान् ॥ ५३ ॥
तृणानि च समाजह्रुर्वानरा वनमध्यतः ॥ ५४ ॥

नलस्तानि समादायचक्रेसेतुं महोदधौ । पञ्चभिर्दिवसैः सेतुर्यावल्लङ्कासमीपतः ॥
दशयोजनविस्तीर्णश्शतयोजनमायतः । कृतः सेतुर्नलेनाऽब्धौ पुण्यः पापविनाशनः
देवीपुरस्यनिकटे नवपाषाणरूपके । सेतुमूले नरः स्नायात्स्वपापपरिशुद्धये ॥ ५७॥
चक्रतीर्थेतथास्नायाद्भजेत्सेत्वधिपंहरिम्। वीपत्तनमारभ्य यत्कृतंसेतुबन्धनम् ॥

तत्सेतुमूलं विप्रेन्द्रा यथार्थम्परिकल्पितम् ।
सेतोस्तु पश्चिमाकोटिर्दर्भशय्या प्रकीर्तिता ॥ ५९ ॥

देवीपुरीचप्राक्कोटिरुभयंसेतुमूलकम् । उभयं पुण्यमाख्यातम्पवित्रम्पापनाशनम् ॥
यत्सेतुमूलंगच्छन्ति येनमार्गेणयेनराः । तत्तन्मार्गगतास्तेतेतस्मिंस्तस्मिन्विमुक्तिदे
स्नात्वादौसेतुमूलेतु चक्रतीर्थे तथैव च । सङ्कल्पपूर्वकम्पश्चाद्गच्छेयुःसेतुबन्धनम् ॥
देवीपुरे तथादर्भशय्यायामपिभूसुराः !। चक्रतीर्थेशिवेस्नानं पुण्यम्पापविनाशनम् ॥

स्मरणादुभयस्याऽपि चक्रतीर्थस्य वै द्विजाः !।
भस्मीभवन्ति पापानि लक्षजन्मकृतान्यपि ॥ ६४ ॥

जन्माऽपिविलयंयायान्मुक्तिश्चापिकरेस्थिता । चक्रतीर्थसमन्तीर्थंनभूतंनभविष्यति

भूलोके यानि तीर्थानि गङ्गादीनि द्विजोत्तमाः !।
चक्रतीर्थस्यतान्यद्धा कलां नार्हन्ति षोडशीम ॥ ६६ ॥

आदौ तु नवपाषाणमध्येऽब्धौस्नानमाचरेत् । क्षेत्रपिण्डंततःकुर्याच्चक्रतीर्थेतथैव च
सेतुनाथं हरिं सेवेत्स्वपापपरिशुद्धये । एवं हि दर्भशय्यायां कुर्युस्तन्मार्गतो गताः
आरूढंरामचन्द्रेण यो नमस्कुरुतेजनः । सिंहासनं नलकृतं नतस्यनरकाद्भयम् ॥ ६९॥
सेतुमादौ नमस्कुर्याद्रामंध्यायन्हृदामुदा । रघुवीरपदन्यासपवित्रीकृतपांसवे ॥
दशकण्ठशिरश्छेदहेतवे सेतवे नमः । केतवे रामचन्द्रस्य मोक्षमार्गैकहेतवे ॥ ७१ ॥
सीतायामानसाम्भोजभानवे सेतवे नमः । साष्टाङ्गम्प्रणिपत्यादौमन्त्रेणानेनवै द्विजाः

ततो वेतालवरदं तीर्थं गच्छेन्महाबलम् ।

योऽध्यायमेनम्पठते मनुष्यः शृणोति वाभक्तियुतोद्विजेन्द्राः !।
स्वर्गादयस्तस्य न दुर्लभाः स्युः कैवल्यमप्यस्य करस्थमेव ॥ ७४ ॥
इतिश्रीस्कान्देमहापुराणएकाशीतिसाहस्रयांसंहितायां तृतीयेब्रह्मखण्डे सेतुमाहात्म्येचक्रतीर्थप्रशंसायांदेवीपुराभिधानकथने महिषासुर-संहारोनाम सप्तमोऽध्यायः ॥ ७ ॥

अष्टमोऽध्यायः

वेतालवरदतीर्थप्रशंसायां सुदर्शनवेतालत्वप्राप्तिवर्णनम्

ऋषय ऊचुः

भगवन्सूतसर्वज्ञ कृष्णद्वैपायनप्रिय !। त्वन्मुखाद्वै कथाःश्रुत्वा श्रोत्रैकामृतवर्षिणीः तृप्तिर्नजायतेऽस्माकंत्वद्वचोमृतपायिनाम् । अतः शुश्रूषमाणानाम्भूयोब्रूहिकथाःशुभाः वेतालवरदंनाम चक्रतीर्थस्यदक्षिणे । तीर्थमस्तिमहापुण्यमित्यवादीद्भवान्पुरा ॥ ३॥ वेतालवरदाभिख्यातीर्थस्यास्यागताकथम् । किम्प्रभावञ्च तत्तीर्थमेतन्नोवक्तुमर्हसि

श्रीसूत उवाच

साधुपृष्टं हियुष्माभिरतिगुह्यंमुनीश्वराः !। शृणुध्वंमनसासार्द्धं ब्रवीम्यत्यद्भुतांकथाम् पामराअपिमोदन्ते यांवैश्रुत्वाकथांशुभाम । कथाचेयंमहापुण्या पुरा कैलासपर्वते ॥

केलिकालेषु पार्वत्यै शम्भुना कथिता द्विजाः ।
ताम्ब्रवीमि कथामेनामत्यद्भुततरां हि वः ॥ ७ ॥

पुरा हि गालवोनाम महर्षिः सत्यवाक्शुचिः । चिन्तयानः परम्ब्रह्मतपस्तेपेनिजाश्रमे तस्यकन्यामहाभागा रूपयौवनशालिनी । नाम्नाकान्तिमतीबाला व्यचरत्पितुरन्तिके आहरन्तीचपुष्पाणिबल्यर्थं तस्य वै मुनेः । वेदिसम्मार्जनादीनि समिदाहरणानि च

कुर्वन्तीपितरंबाला सम्यक्परिचचार ह । कदाचित्सातुबल्यर्थं पुष्पाण्याहर्तुमुद्यता तस्मिन्वने कान्तिमती सुदूरमगमत्तदा । तत्र पुष्पाणि रम्याणि समाहृत्यचपेटके तूर्णं निववृतेबाला पितृशुश्रूषणे रता । निवर्तमानां तां कन्यां विद्याधरकुमारकौ ॥ सुदर्शनसुकर्णाख्यौविमानस्थौददर्शतुः । तां दृष्ट्वागालवसुतां रूपयौवनशालिनीम् कामस्यपत्नींललितां रतिं मूर्तिमतीमिव । सुदर्शनाभिधोज्येष्ठो विद्याधरकुमारकः हर्षसम्फुल्लनयनश्चकमे काममोहितः । पूर्णचन्द्राननां तां वै वीक्षमाणो मुहुर्मुहुः तयारिरंसुकामोऽसौ विमानाग्राद्वातरत् । तामुपेत्यमुनेः कन्यामित्युवाचसुदर्शनः

सुदर्शन उवाच

काऽसिभद्रे सुता कस्य रूपयौवनशालिनी । रूपमप्रतिमं ह्येतदाह्लादयति मे मनः ॥ त्वांदृष्ट्वारतिसंकाशांबाधतेमांमनोभवः । सुकण्ठनामधेयस्य विद्याधरपतेरहम् ॥ आत्मजो रूपसम्पन्नो नाम्ना चैव सुदर्शनः । प्रतिगृह्णीष्वमां भद्रे रक्षमां करुणादृशा

भर्तारं मां समासाद्य सर्वान्भोगानवाप्स्यसि ।
इत्याकर्ण्य वचस्तस्य विद्याधरसुतस्य सा ॥ २१ ॥

तदा कान्तिमतीवाक्यंधर्मयुक्तमभाषत । सुदर्शनमहाभाग! विद्याधरपतेःसुत !॥ २२ आत्मजांमांविजानीहिगालवस्यमहात्मनः । कन्याचाहमनूढाऽस्मिपितृशुश्रूषणेरता बल्यर्थंहिपितुश्चाऽहंपुष्पाण्याहर्तुमागता । आहरन्त्याश्चपुष्पाणियामएकोन्यवर्तत मद्विलम्बेनसमुनिर्देवतार्चनतत्परः । कोपं विधास्यतेनूनं तपस्वी मुनिपुङ्गवः ॥२५॥

तच्छीघ्रमद्य गच्छामि पुष्पाण्यप्याहृतानि मे ।
कन्याश्चापितुराधीना न स्वतन्त्राः कदाचन ॥ २६ ॥

यदिमामिच्छसिभवान्पितरम्ममयाचय । इतिविद्याधरसुतमुक्त्वाकान्तिमतीतदा पितुराशङ्कितातूर्णमाश्रमंगन्तुमुद्यता । गच्छन्तीं तां समालोक्य विद्याधरकुमारकः तूर्णंजग्राहकेशेषु धावित्वामदनार्दितः । अभ्येत्यनिजकेशेषु गृह्णन्तन्तं विलोक्यसा ॥ उच्चैश्चक्रन्दसहसा कुररीवमुनेःसुता । अस्माद्विद्याधरसुताज्जनक! त्राहि मां विभो॥ बलाद्गृह्णातिदुष्टात्माविद्याधरसुतोऽयमाम् । इत्थमुच्चैःप्रचुक्रोशस्वाश्रमान्नातिदूरतः

तदाक्रन्दितमाकर्ण्य गन्धमादनवासिनः । मुनयस्तु पुरस्कृत्य गालवम्मुनिपुङ्गवम् ॥
किमेतदितिविज्ञातुं तं देशंतूर्णमाययुः । तं देशं तु समागत्य सर्वे ते ऋषिपुङ्गवाः !
विद्याधरगृहीतां तां ददृशुर्मुनिकन्यकाम् । विद्याधरसुतंचान्यमन्तिकेसमुपस्थितम्
एतद्दृष्ट्वामहायोगीगालवो मुनिपुङ्गवः । गतःकोपवशंकिञ्चिद्दुरात्मानं शशाप तम् ॥
कृतवानीदृशंकार्यं यत्त्वंविद्याधराधम । तद्याहि मानुषींयोनिं स्वस्यदुष्कर्मणःफलम्
सम्प्राप्यमानुषंजन्म बहुदुःखसमाकुलम् । अचिरेण तु कालेन तस्मिन्नेव तु जन्मनि
मनुष्यैरपिनिन्द्यं तद्वेतालत्वम्प्रयास्यसि । मांसानिशोणितंचैव सर्वदाभक्षयिष्यसि

वेताला राक्षसप्राया बलाद् गृह्णन्ति योषितः ।
तस्मात्त्वम्मानुषो भूत्वा वेतालत्वमवाप्स्यसि ॥ ३६ ॥

तवदुष्कर्मणोयोसावनुमन्ताकनिष्ठकः । सुकर्णइतिविख्यातोभवितासोऽपि मानुषः

किन्तु साक्षान्न कृतवान्यतोऽसावीदृशीं क्रियाम् ।
तन्मानुषत्वमेवाऽस्य वेतालत्वन्तु नो भवेत् ॥ ४१ ॥
विज्ञप्तिकौतुकाभिख्यं यदा विद्याधराधिपम् ।
द्रक्ष्यतेऽसौ कनिष्ठस्ते तदा शापाद्विमोक्ष्यते ॥ ४२ ॥

ईदृशस्यतुयःकर्तामहापापस्यकर्मणः । स त्वंसम्प्राप्यमानुष्यं तस्मिन्नेव तु जन्मनि

वेतालजन्म सम्प्राप्य चिरं लोके चरिष्यसि ।
इत्युक्त्वा गालवः कन्यां गृहीत्वा मुनिभिः सह ॥ ४४ ॥

विद्याधरसुतौशप्त्वा स्वाश्रमम्प्रतिनिर्ययौ । ततस्तस्मिन्महाभागे निर्यातेमुनिपुङ्गवे
सुदर्शनसुकर्णाख्यौ विद्याधरपतेःसुतौ । मुनिशापेनदुःखार्तौचिन्तयामासतुर्भृशम्

कर्तव्यन्तौ विनिश्चित्य सुदर्शनसुकर्णकौ
गोविन्दस्वामिनामनं यमुनातटवासिनम् ॥ ४७ ॥

ब्राह्मणंशीलसम्पन्नं पितृत्वेसमरोचयत् । परित्यज्यस्वकंरूपमजायेतां तदात्मजौ ॥
विजयाशोकदत्ताख्यौतस्यपुत्रौबभूवतुः । सुतोविजयदत्ताख्यो ज्येष्ठोजज्ञेसुदर्शनः ॥
अशोकदत्तनामातु सुकर्णस्तु कनिष्ठकः । विजयाशोकदत्तौतु क्रमाद्यौवनमापतुः ॥

एतस्मिन्नेवकालेतु यमुनायास्तटेशुभे । अनावृष्ट्यातुदुर्भिक्षमभूद्द्वादशवार्षिकम् ॥
गोविन्दस्वामिनामातु ब्राह्मणोवेदपारगः । दुर्भिक्षोपहतांदृष्ट्वा तदानींसनिजांपुरीम्
प्रययौकाशीनगरं सपुत्रः सहभार्यया । सप्रयागंसमासाद्य पुण्यंदृष्ट्वामहावटम् ॥ ५३ ॥
कपालमालाभरणं सोऽपश्यद्यतिनंपुरः । गोविन्दस्वामिनामातु नमश्चक्रेसतंमुनिम्
सपुत्रस्यसभार्यस्य सोवादीदाशिषोमुनिः । इदं च वचनंप्राह गोविन्दस्वामिनंप्रति
ज्येष्ठेनाऽनेनपुत्रेण साम्प्रतंब्राह्मणोत्तम !। क्षिप्रंविजयदत्तेन वियोगस्तेभविष्यति ॥

इति तस्य वचः श्रुत्वा गोविन्दस्वामिनामतः ।
सूर्ये चाऽस्तं गते तत्र सान्ध्यं कर्मसमाप्य च ॥ ५७ ॥

सभार्यःससुतोविप्रः सुदूराध्वसमाकुलः । उवासतस्यांशर्वर्यां शून्येवैदेवतालये ॥
तदात्वशोकदत्तश्च ब्राह्मणौ च समाकुलौ । वस्त्रेणास्तीर्यपृथिवींरात्रौनिद्रांसमापतुः
ततोविजयदत्तस्तु दूरमार्गविलङ्घनात् । बभूवात्यन्तमलसोभृशंशीतज्वरार्दितः ॥

गोविन्दस्वामिना पित्रा शीतबाधानिवृत्तये ।
गाढमालिङ्ग्यमानोऽपि शीतबाधां न सोऽत्यजत् ॥ ६१ ॥

बाधतेत्यर्थमधुना तात! मां शीतलोज्वरः । एतद्बाधानिवृत्त्यर्थं वह्निमानयमाचिरम्॥
इतिपुत्रवचःश्रुत्वा सर्वत्राऽग्निंगवेषयन् । अलब्धवह्निः प्रोवाच पुनरभ्येत्यपुत्रकम् ॥
नवह्निंपुत्र! विन्दामि मार्गमाणोऽपिसर्वशः । रात्रिमध्येतुसम्प्राप्ते द्वारेषु पिहितेषु च
निद्रापरवशाःपौरा नैवदास्यन्तिपावकम् । इत्थं विजयदत्तोसावुक्तः पित्राज्वरातुरः
ययाचे वह्निमेवाऽसौ पितरं दीनयागिरा । शीतज्वरसमुद्भूतशीतबाधाप्रपीडितम्
हिमशीकरवान्वायुर्द्विगुणंबाधतेऽद्यमाम् । वह्निर्नलब्धइतिवैमिथ्यैवोक्तंपितस्त्वया
दूरादेषपुरोभागे ज्वालामालासमाकुलः । शिखाभिर्लेलिहानोऽभ्रं दृश्यते पश्यपावकः
तं वह्निमानयक्षिप्रं तात! शीतनिवृत्तये । इत्युक्तवन्तन्तं पुत्रं सपिताप्रत्यभाषत ॥६६
नानृतं वच्मिपुत्राद्य सत्यमेवब्रवीम्यहम् । वह्निमान्योयमुद्देशो दूरादेव विलोक्यते ॥
पितृकाननदेशं तं पुत्रजानीहिसाम्प्रतम् । यद्येषोऽभ्रंलिहज्वालःपुरस्ताज्ज्वलतेऽनलः
पुत्रवित्रासजनकं तंजानीहिचितानलम् । अमङ्गलोनसेव्योऽयंचिताग्निःस्पर्शदूषितः

तस्यचायुःक्षयंयाति सेवतेयश्चितानलम् । तस्मात्तवायुर्हानिर्माभूयादितिमयासुत!
अमङ्गलस्तथास्पृश्यो नाऽऽनीतोयं चितानलः । इत्युक्तवन्तं पितरंसदीनःप्रत्यभाषत
अयंशावानलोवास्यादध्वरानलएववा । सर्वथानीयतामेष नोचेन्मेमरणंभवेत् ॥ ७५ ॥
पुत्रस्नेहाभिभूतोऽथ समाहर्तुं चितानलम् ।
गोविन्दस्वामिनामा तु श्मशानं शीघ्रमभ्यगात् ॥ ७६ ॥
गोविन्दस्वामिनिगतेसमाहर्तुंचितानलम् । तूर्णंविजयदत्तोऽपितदागच्छन्तमन्वयात्
संप्राप्य तापनिकटं विकीर्णास्थिचितानलम् ।
आलिङ्गन्निवसोद्वेगं शनैर्निर्वृतिमाप्तवान् ॥ ७८ ॥
अथावादीत्सपितरन्तदिदंपरिवर्तुलम । अतिदीप्तं विभात्यग्नौ किंरक्ताम्बुजसन्निभम्
इतितस्यवचःश्रुत्वा पुत्रस्य ब्राह्मणोत्तमः । निपुणन्तं निरूप्यैतद्वचनं पुनरब्रवीत् ॥

गोविन्दस्वाम्युवाच

एतत्कपालमनलज्वालावलयवर्तुलम् । वसाकीकसमांसाढ्यमेतद्रक्ताम्बुजोपमम् ॥
द्विजस्यसूनु श्रुत्वेतिकाष्ठाग्रेणजघानतत् । येनतत्स्फुटनोद्गीर्णवसासिक्तमुखोऽभवत्
कपालघट्टनाद्रक्तं यत्संसक्तंमुखेतदा । जिह्वयालेलिहानोऽसौ मुहुस्तद्रक्तमास्वदत् ॥
आस्वाद्यैवंसमादाय तत्कपालंसमाकुलः । पीत्वावसांमहाकायो बभूवाऽतिभयङ्करः
सद्योवेतालतांप्राप तीक्ष्णदंष्ट्रस्तदानिशि । तस्याऽट्टहास घोषेण दिनश्चप्रदिशस्तदा
द्यौरन्तरिक्षंभूमिश्च स्फुटिताइवसर्वशः । तस्मिन्वेगात्समाकृष्य पितरं हन्तुमुद्यतः
माकृथाःसाहसमिति प्रादुरासीद्वचोदिवि । सदिव्यांगिरमकर्ण्यवेतालोऽतिभयङ्करः
पितरन्तंपरित्यज्य महावेगसमन्वितः । तूर्णमाकाशमाविश्य प्रययावस्खलद्गतिः ॥
सगत्वादूरमध्वानं वेतालैःसहसङ्गतः । तमागतंसमालोक्य वेतालास्सर्वएवते ॥
कपालस्फोटनादेष वेतालत्वंयदाप्तवान् । कपालस्फोटनामानमाह्वयंचक्रिरेततः ॥
ततःकपालस्फोटोऽसौ वेतालैःसर्वतोवृतः । नरास्थिभूषणाख्यस्यसद्योवेतालभूपतेः
अन्तिकंसहसाप्राप महाबलसमन्वितः । नरास्थिभूषणश्चैनं सेनापतिमकल्पयत् ॥
तं कदाचित्तु गन्धर्वश्चित्रसेनाभिधो बली ।

नरास्थिभूषणं सङ्ख्ये न्यवधीत्सोऽपि संस्थितः ॥ ६३ ॥
नरास्थिभूषणेतस्मिन्गन्धर्वेणहतेयुधि । तदाकपालस्फोटोऽसौ तत्पदंसमवाप्तवान्
विद्याधरेन्द्रस्य सुतः सुदर्शनो मनुष्यतां वै प्रथमं स गत्वा ।
वेतालतां प्राप्य महर्षिशापात्क्रमाच्च वेतालपतिर्बभूव ॥ ६५ ॥
इतिश्रीस्कान्देमहापुराणेएकाशीतिसाहस्र्यांसंहितायां तृतीयेब्रह्मखण्डे
श्रीवेतालवरदतीर्थप्रशंसायांसुदर्शनवेतालत्वप्राप्तिवर्णनं-
नामाऽष्टमोऽध्यायः ॥ ८ ॥

नवमोऽध्यायः

सुदर्शनसुकर्णशापमोक्षणवर्णनम्

सूत उवाच

ततःसविप्रःप्रत्यूषे पुत्रशोकेनपीडितः । अशोकदत्तसंयुक्तो भार्यया विललापह ॥ १
विलपन्तं समालोक्य गोविन्दस्वामिनं द्विजाः ।
वणिक्समुद्रदत्ताख्यः समानिन्ये निजं गृहम् ॥ २ ॥
समानीयसमाश्वास्य दयायुक्तोवणिग्वरः । स्वधनानांहिसर्वेषां रक्षितारमकल्पयत्
स्मरन्महायतिवचः पुत्रदर्शनलालसः । स तस्यैववणिजोगेहे पुत्रभार्यासमन्वितः ॥
अशोकदत्तनामातु द्वितीयोविप्रनन्दनः । शस्त्रेचैवतथाशास्त्रे बभूवाऽतिविचक्षणः
तथाऽन्यास्वपि विद्यासु नास्ति तत्सदृशो भुवि ।
कृतविद्यो द्विजसुतः प्रख्यातो नगरेऽभवत् ॥ ६ ॥
अत्रान्तरेनरपतिं प्रतापमुकुटाभिधम् । काशिदेशाधिपंमल्लः कश्चिदभ्याययौबली ॥
प्रतापमुकुटोराजा मल्लस्याऽस्यजयाय सः । बलिनंद्विजपुत्रन्तमाह्वयामासभृत्यकैः ॥
तमागतंसमालोक्य प्रतापमुकुटोऽब्रवीत् । अशोकदत्तसहसा मल्लमेनंबलोत्कटम् ॥९

दुर्जयश्चहि सङ्ग्रामे त्वं वै बलवताम्वरः । दाक्षिणात्यमहामल्लपतावस्मिञ्जितेत्वया
यदिष्टंतवत्सर्वं दास्याम्यहमसंशयः । इतितस्यवचःश्रुत्वा बलवान्द्विजनन्दनः ॥
दाक्षिणात्यं महामल्लनृपतिं समताडयत् । ताडितो द्विजपुत्रेण मल्लः स बलिनाबला
सद्योविवर्तनयनःपरासुर्न्यपतद्भुवि । द्विजपुत्रस्य तत्कर्म देवैरपि सुदुष्करम् ॥ १३॥
प्रतापमुकुटो दृष्ट्वा प्रसन्नहृदयोऽभवत् । दत्त्वा बहुधनान् ग्रामान् समीपेस्थापयत्तदा
सकदाचिन्महाराजः सहितो द्विजसूनुना । सन्ध्यायां विजनेदेशे चचार तुरगेण वै॥

द्विजसूनुसखस्तत्र दीनां वाणीमथाऽशृणोत् ।
राजन्नल्पापराधोऽहं शत्रुप्रेरणयाऽसकृत् ॥ १६ ॥

दण्डपालेननिहितः शूले निर्घृणचेतसा । दीनमद्यचतुर्थं मे शूलस्थस्यैव जीवतः ॥

प्राणाः सुखेन निर्यान्ति नहि दुष्कृतकर्मणाम् ।
भृशं माम्बाधते तृष्णा तां निवारय भूपते !॥ १८ ॥

इतिदीनांसमाकर्ण्य वाचंराजाद्विजात्मजम् । अशोकदत्तनामानं धैर्यवन्तमभाषत ॥
अस्मैनिरपराधाय शूलप्रोतायजन्तवे । तृष्णार्दितायदातव्यं द्विजसूनो! त्वयाजलम् ॥
इत्यादिष्टो नरेन्द्रेण सहसा द्विजनन्दनः । जलपूर्णं समादाय कलशं वेगवान्ययौ ॥
तच्छमशानंसमासाद्य भूतवेतालसङ्कुलम् । शूलप्रोतायवैतस्मै जलंदातुंसमुत्सुकः ॥

ददर्शाऽधः स्थितां नारीं नवयौवनशालिनीम् ।
उदैक्षत महाकान्ति मूर्तामिव रतिं द्विजः ॥ २३ ॥

तामालोक्यततःप्राहधैर्यवान्द्विजनन्दनः । काऽसिभद्रेवरारोहे श्मशानेविजनेस्थिता

अस्याधस्तात्किमर्थं त्वं शूलप्रोतस्य तिष्ठसि ।
इति तस्य वचः श्रुत्वा सा प्राह रुचिरानना ॥ २५ ॥

पुरुषोवल्लभोऽयंमे शूलेराज्ञासमर्पितः । धनंयथातिकृपणः पश्यन् प्राणान्नमुञ्चति ॥ २६
आसन्नमरणंचैनमनुयातुमिहस्थिता । तृषितोयाचतेवारी मामयंव्यथते मुहुः ॥ २७॥
शूलप्रोतोद्धतग्रीवं मुमूर्षुं प्राणनायकम् । नाऽस्मिपाययितुंशक्ता जलमेनमधःस्थिता
अशोकदत्तस्तच्छ्रुत्वा करुणावरुणालयः । तत्कालसदृशंवाक्यं तां वधूमब्रवीत्तदा ॥

अशोकदत्त उवाच

'मातर्मत्स्कन्धमारुह्य देह्यस्मैशीतलंजलम् । सातथेतितमाभाष्य तरुणीत्वरयान्विता
आनम्रवपुषस्तस्य स्कन्धंपद्भ्यां रुरोह वै । द्विजसूनुर्ददर्शाथ शोणितं नूतनं पतत्
किमेतदितिसोऽपश्यदुन्नम्यसहसामुखम् । भक्ष्यमाणंतयातत्सविज्ञायद्विजनन्दनः
अशोकदत्तो जग्राहतस्याः पादंसनूपुरम् । ततोऽगान्नूपुरन्त्यक्त्वाबद्धरत्नंविहायतम्
प्रत्युप्तानेकरत्नाढ्यं तदादायचनूपुरम् । अशोकदत्तःप्रययौ तच्छमशानन्नृपान्तिकम्
श्मशानवृत्तंतत्सर्वं स नृपायनिवेद्य वै । महर्घ्यं रत्नप्रत्युप्तं नूपुरञ्च ददौ तदा ॥३५ ॥
ज्ञात्वातद्वीरचरितं वीरैरन्यैः सुदुष्करम् । ददौ मदनलेखाख्यां सुतांतस्मैमहीपतिः
कदाचिदथतद्दिव्यं नूपुरं वीक्ष्य भूपतिः । अस्य नूपुरवर्यस्य तुल्यं वै नूपुरान्तरम्
कुतोवालभ्यतइति सादरं समचिन्तयत् । अशोकदत्तस्तुतदाविज्ञाय नृपकाङ्क्षितम्
नूपुरान्तरसिद्ध्यर्थं चिन्तयामास चेतसा । श्मशाने नूपुरमिदं यतः प्राप्तं मयापुरा

तां नूपुरान्तरप्राप्त्यै कुत्र द्रक्ष्यामि साम्प्रतम् ।
इत्थं वितर्क्य बहुधा निश्चिकाय महामतिः ॥ ४० ॥

विक्रेष्यामि महामांसं समेत्यपितृकाननम् । तत्र राक्षसवेताल पिशाचादिषुसर्वशः

मन्त्रैराहूयमानेषु साप्याऽऽयास्यति राक्षसी ।
तामागताम्बलाद् गृह्य तद् ग्रहीष्यामि नूपुरम् ॥ ४२ ॥

राक्षसानांसहस्रं वा पिशाचानांतथायुतम् । वेतालानांतथाकोटिर्नलक्ष्याबलिनोमम
इतिनिश्चित्यमनसा श्मशानंसहसाययौ । विक्रीणानोमहामांसं मन्त्रैराहूयराक्षसान्
गृहाणेत्युच्चयावाचा चचारश्रावयन्दिशः । विक्रीयतेमहामांसं गृह्यतां गृह्यतामिति ॥
तत्रराक्षसवेतालाः कङ्कालाश्चपिशाचकाः । अन्येचभूतनिवहाः समाजग्मुः प्रहर्षिताः
भक्षयिष्यामहे सर्वे मांसमिष्टतमन्त्विति । तत्रागच्छत्सुसर्वेषु रक्षःकन्यासमावृता

आययौ राक्षसी साऽपि मांसभक्षणलालसा ।
गवेषयंस्तदाविप्रस्तां समुद्वीक्ष्य राक्षसीम् ॥ ४८ ॥

सेयंदृष्टापुरेत्येष प्रत्यभिज्ञानमाप्तवान् । तामाहद्विजपुत्रोऽन्यद्देहि मे नूपुरन्त्विति ॥

सातस्य वचनं श्रुत्वा प्रीतावाक्यमथाब्रवीत् । ममैव चत्वयानीतं पुरावीरेन्द्रनूपुरम्
गृहाणरत्नरुचिरं द्वितीयमपिनूपुरम् । इत्युक्त्वानूपुरंतस्मैस्वसुताञ्च ददौप्रियाम्

विद्युत्केश्या तदा दत्तां प्रियाविद्युत्प्रभाभिधाम् ।
विप्रः सम्प्राप्य मुमुदे रूपयौवनशालिनीम् ॥५२॥

विद्युत्केशीतुजामात्रे हेमाब्जमपिसाददौ । विद्युत्प्रभां नूपुरञ्च हेमाब्जमपिलभ्यसः
श्वश्रूमाभाष्यसहसा पुनः प्रायान्नृपान्तिकम् । ततःप्रतापमुकुटो नूपुरप्राप्तिनन्दितः
शौर्यधैर्यसमायुक्तंप्रशशंसद्विजात्मजम् । अथविद्युत्प्रभांविप्रःसोऽब्रवीद्रहसिप्रियाम्
मात्रातत्रकुतोलब्धमेतद्धेमाम्बुजं प्रिये । एतत्तुल्यानिचान्यानि यतः प्राप्स्येवरानने ॥
द्विजात्मजंततः प्राह पतिंविद्युत्प्रभारहः । प्रभो! कपालविस्फोटनाम्नोवेतालभूपतेः

अस्ति दिव्यं सरः किञ्चिद्धेमाम्बुजपरिष्कृतम् ।
तव श्वश्रा जलक्रीडां वितन्वन्त्येदमाहृतम् ॥ ५८ ॥

इतिश्रुत्वा वचस्तत्र मांनयेतिजगादसः । ततः सासहसाविप्रं निन्येतत्काञ्चनंसरः

ततः स हेमपद्मानामाजिहीर्षुर्द्विजात्मजः ।
तद्विघ्नकारिणः सर्वान्वेतालादींस्ततोऽवधीत् ॥ ६० ॥

स्वयंकपालविस्फोटं निहताशेषसैनिकम् । ददर्शवेतालपतिं तञ्चहन्तुं प्रचक्रमे ॥
अत्रान्तरेमहातेजा नाम्नाविज्ञप्तिकौतुकः । विद्याधरपतिः प्राप्य विमानेनैनमब्रवीत्
अशोकदत्तविपेन्द्र! साहसंमाकृथाइति । तदाकर्ण्यद्विजसुतो विमानवरसंस्थितम्॥
ददर्शप्रभयायुक्तं विद्याधरपतिंदिवि । तस्यदर्शनमात्रेण शापान्मुक्तोद्विजात्मजः ॥
सन्त्यज्य मानुषंरूपं दिव्यरूपमवाप्तवान् । विमानवरमाऽऽरूढं दिव्याभरणभूषितम्
शापान्मुक्तंसुकर्णन्तं प्राहविज्ञप्तिकौतुकः । अयं सुकर्णतेभ्राता गालवस्यमहामुनेः ॥
शापाद्वेतालतांप्राप तत्कन्यास्पर्शपातकी । त्वंचशप्तः पुरातेन तत्पापस्याऽनुमोदकः

तवाऽयमल्पपापस्य शापो मद्दर्शनावधिः ।
कल्पितस्तेनमुनिना शापान्तो नाऽस्य कल्पितः ॥ ६८ ॥

तदेहि मुक्तशापोऽसि सुकर्णस्वर्गमारुह । ततः सुकर्णस्तम्प्राह विद्याधरकुलाधिपम्

विद्याधरपते! भ्रात्रा विनाज्येष्ठेनसाम्प्रतम् । सर्वभोगयुतं स्वर्गं नैवं गन्तुंसमुत्सहे
शापस्यान्तोयथाभूयान्ममभ्रातुस्तथा वद । तमुवाच महातेजास्तदा विज्ञप्तिकौतुकः
दुर्निवारमिमंशापमन्यःकोवानिवारयेत् । किन्तुगुह्यतमं किञ्चित्तववक्ष्यामिसाम्प्रतम्
ब्रह्मणासनकादिभ्यो मुनिभ्यः कथितं पुरा । सर्वतीर्थाश्रयेपुण्येदक्षिणस्योदधेस्तटे
चक्रतीर्थसमीपे तु तीर्थमस्तिमहत्तरम् । महापातकसङ्घाश्च यस्य दर्शनमात्रतः ॥७४
नश्यन्तितत्क्षणादेव नजानेस्नानजम्फलम् । तत्रगत्वातवज्येष्ठो यदि स्नायान्महत्तरे
वेतालत्वं त्यजेन्नूनं तदागालवशापजम् । सुकर्णस्तद्वचःश्रुत्वा भ्रात्रावेतालरूपिणा
सहितः सहसाप्रायाद्दक्षिणस्योदधेस्तटम् । दक्षिणंचक्रतीर्थाख्यादुत्तरंगन्धमादनात्
ब्रह्मणासनकादिभ्यः कथितं तीर्थमभ्यगात् । तत्तीर्थकूलमासाद्यभ्रातरं चेदमब्रवीत्
भ्रातर्गालवशापस्य घोरस्यास्यनिवृत्तये । तीर्थेस्मिन्नचिरात्स्नाहिसर्वतीर्थोत्तमोत्तमे
तस्मिन्नवसरेविप्रास्तस्यतीर्थस्यशीकराः । न्यपतंस्तस्यगात्रेषुवायुना वै समाहृताः
स तच्छीकरसंस्पर्शात्त्यक्त्वा वेतालतां तदा । तदैवमानुषं भावंद्विजपुत्रत्वमाप्तवान्
ततः सङ्कल्प्यसहसातस्मिंस्तीर्थोत्तमोत्तमे । मनुष्यत्वनिवृत्त्यर्थंनिममज्जद्विजात्मजः
उत्तिष्ठन्नेवसहसा दिव्यंरूपमवाप्तवान् । विमानवरमारूढो देवस्त्रीपरिवारितः ॥
सर्वाभरणसंयुक्तः सहभ्रात्रासुदर्शनः । श्लाघमानश्च तत्तीर्थं नमस्कृत्य पुनः पुनः ॥
विज्ञप्तिकौतुकञ्चापि पुरस्कृत्य दिवं ययौ । तदा प्रभृति तत्तीर्थं वेतालवरदाभिधम्
वेतालत्वंविनष्टंयच्छीकरस्पर्शमात्रतः । य इदं तीर्थमासाद्य चक्रतीर्थस्य दक्षिणे ॥
स्नानं कदाचित्कुर्वन्ति जीवन्मुक्ताभवन्तिते । एतत्तीर्थसमंपुण्यं न भूतंन भविष्यति

घोरां वेतालतां त्यक्त्वा दिव्यतां स यदाप्तवान् ॥ ८८ ॥

अत्र सङ्कल्प्यचस्नात्वा वेतालवरदे शुभे । पितृभ्यःपिण्डदानञ्च कुर्याद्वैनियमान्वितः
एवं वःकथितंविप्रास्तस्यतीर्थस्यवैभवम् । वेतालवरदाभिख्यायथाचास्यसमागताः

यः पठेदिममध्यायं शृणुयाद्वा स मुच्यते ॥ ९१ ॥

इतिश्रीस्कान्देमहापुराणएकाशीतिसाहस्र्यांसंहितायां तृतीयेब्रह्मखण्डे
वेतालवरदतीर्थप्रशंसनवर्णनंनामनवमोऽध्यायः ॥ ९

दशमोऽध्यायः

गन्धमादनप्रशंसायांपापविनाशप्रभावकथनम्

श्रीसूत उवाच

वेतालवरदेतीर्थे नरःस्नात्वाद्विजोत्तमाः !। ततः शनैःशनैर्गच्छेद्गन्धमादनपर्वतम् ॥ १
योऽम्बुधौसेतुरूपेण वर्तते गन्धमादनः । समार्गोब्रह्मलोकस्य विश्वकर्त्राविनिर्मितः
लक्षकोटिसहस्राणि सरांसिसरितस्तथा । समुद्राश्चमहापुण्यावनान्यप्याश्रमाणिच
पुण्यानिक्षेत्रजातानि वेदारण्यादिकानि च । मुनयश्चवशिष्ठाद्याः सिद्धचारणकिन्नराः
लक्ष्म्यासह धरण्या च भगवान्मधुसूदनः । सावित्र्या च सरस्वत्या सहैव चतुराननः
हेरम्बःषण्मुखश्चैव देवाश्चेन्द्रपुरोगमाः । आदित्यादिग्रहाश्चैव तथाऽष्टौ वसवो द्विजाः
पितरो लोकपालाश्च तथाऽन्येदेवतागणाः । महापातकसङ्घानां नाशने लोकपावने ॥
दिवानिशंवसन्त्यत्र पर्वतेगन्धमादने । अत्र गौरी सदा तुष्टा हरेण सह वर्तते ॥ ८॥
अत्रकिन्नरकान्तानां क्रीडाजागर्तिनित्यशः । तस्यदर्शनमात्रेणबुद्धिसौख्यंनृणांभवेत्
तन्मूर्द्धनिकृतावासाः सिद्धचारणयोषितः । पूजयन्तितत्सदाकालं शङ्करंगिरिजापतिम्
कोटयोब्रह्महत्यानामगम्यागमकोटयः । अङ्गलग्नैर्विनश्यन्ति गन्धमादनमारुतैः ॥
असावुल्लोलकल्लोले तिष्ठन्मध्येमहाम्बुधौ । आसीन्मुनिगणैःसेव्यः पुरावैगन्धमादनः
ततो नलेनसेतौ तु बद्धेतन्मध्यगोचरः । रामाज्ञयाऽखिलैः सेव्यो बभूव मनुजैरपि
सेतुरूपं गिरिंतं तु प्रार्थयेद्गन्धमादनम् । क्षमाधर ! महापुण्य ! सर्वदेवनमस्कृत !॥
विष्णवादयोऽपियं देवास्सेवन्तेश्रद्धयासह । तं भवन्तमहंपद्भ्यामाक्रमामि नगोत्तम!
क्षमस्व पादघातम्मे दयया पापचेतसः । त्वन्मूर्द्धनिकृतावासं शङ्करं दर्शयस्व मे १६
प्रार्थयित्वा नरस्त्वेवं सेतुरूपं नगोत्तमे !। ततो मृदुपदं गच्छेत्पावनं गन्धमादनम्॥
अब्धौ तत्र नरस्स्नात्वा पर्वते गन्धमादने । पिण्डदानंततःकुर्यादपिसर्षपमात्रकम् ॥
तृप्तिंप्रयान्तिपितरस्तस्ययावद्युगक्षयः । शमीदलसमानान्वादद्यात्पिण्डान्पितॄन्प्रति

स्वर्गस्थामोक्षमायान्तिस्वर्गंनरकवासिनः । ततस्तस्योपरिमहातीर्थंलोकेषुविश्रुतम्
सर्वतीर्थोत्तमंपुण्यं नाम्नापापविनाशनम् । अस्तिपुण्यतमंविप्राः! पवित्रे गन्धमादने॥
यस्यसंस्मरणादेव गर्भवासो न विद्यते । तत्प्राप्य तु नरस्स्नायात्स्वदेहमलनाशनम्
तत्र स्नानान्नरो यान्ति वैकुण्ठं नाऽत्र संशयः ।

ऋषय ऊचुः

सूतपापविनाशाख्यतीर्थस्यब्रूहिवैभवम् । व्यासेन बोधितस्त्वंहि वेत्सिसर्वंमहामुने!

श्रीसूत उवाच

ब्रह्माश्रमपदेवृत्तां पार्श्वेहिमवतःशुभे । वक्ष्यामिब्राह्मणश्रेष्ठा! युष्माकंतु कथां शुभाम्
अस्याऽऽश्रमपदं पुण्यं ब्रह्माश्रमपदेशुभे । नानावृक्षगणाकीर्णं पार्श्वे हिमवतः शुभे ॥
बहुगुल्मलताकीर्णं मृगद्विपनिषेवितम् । सिद्धचारणसङ्घुष्टं रम्यं पुष्पितकाननम्
यतिभिर्बहुभिःकीर्णं तापसैरुपशोभितम् ।
ब्राह्मणैश्च महाभागैः सूर्यज्वलनसन्निभैः ॥ २७ ॥
नियमव्रतसम्पन्नैः समाकीर्णंतपस्विभिः । दीक्षितैर्यागहेतोश्च यताहारैःकृतात्मभिः
वेदाध्ययनसम्पन्नैर्वैदिकैः परिवेष्टितम् । वर्णिभिश्चगृहस्थैश्च वानप्रस्थैश्च भिक्षुभिः
स्वाश्रमाचारनिरतैः सुवर्णोक्तविधायिभिः ।
बालखिल्यैश्च मुनिभिः सम्प्राप्तैश्च मरीचिभिः ॥ ३० ॥
तत्राऽऽश्रमेपुराकश्चिच्छूद्रोदृढमतिर्द्विजाः । साहसीब्राह्मणाभ्याशमाजगाममुदान्वितः
आगतोह्याश्रमपदं पूजितश्चतपस्विभिः । नाम्नादृढमतिःशूद्रः साष्टाङ्गं प्रणनाम वै ॥
तान्सदृष्ट्वामुनिगणान्देवकल्पान्महौजसः । कुर्वतो विविधान्यज्ञान्संप्रहृष्यत शूद्रकः
अथाऽस्यबुद्धिरभवत्तपःकर्तुमनुत्तमम् । ततोऽब्रवीत्कुलपतिं मुनिमागत्यतापसम् ॥

दृढमतिरुवाच

तपोधन!नमस्तेऽस्तु रक्ष मां करुणानिधे । तव प्रसादादिच्छामि धर्मंचर्तुं द्विजर्षभ!
तस्मादभिगतं मां त्वं यागेदीक्षयसुव्रत !। ब्रह्मन्नवरवर्णोऽहं शूद्रोजात्याऽस्मिसत्तम
शुश्रूषां कर्तुमिच्छामि प्रपन्नाय प्रसीद मे । एवमुक्ते तु शूद्रेण तमाह ब्राह्मणस्तदा ॥

कुलपतिरुवाच

यागे दीक्षयितुं शक्यो न शूद्रो हीनजन्मभाक् ।
श्रूयतां यदि ते बुद्धिः शुश्रूषानिरतो भव ॥ ३८ ॥
उपदेशो न कर्तव्यो जातिहीनस्य कर्हिचित् ।
उपदेशे महान्दोष उपाध्यायस्य विद्यते ॥ ३९ ॥

नाऽध्यापयेद् बुधःशूद्रंतथानैव च याजयेत् । न पाठयेत्तथाशूद्रं शास्त्रंव्याकरणादिकम्
काव्यं वा नाटकं वापि तथाऽलङ्कारमेवच । पुराणमितिहासंच शूद्रं नैव तु पाठयेत्
यदिचोपदिशेद्विप्रः शूद्रस्यैतानिकर्हिचित् । त्यजेयुर्ब्राह्मणाविप्रंतंग्रामाद्ब्रह्मसङ्कुलात्
शूद्राय चोपदेष्टारं द्विजं चण्डालवत्त्यजेत् । शूद्रं चाक्षरसंयुक्तं दूरतःपरिवर्जयेत् ॥४३
अतःशुश्रूषभद्रन्ते ब्राह्मणाञ्छ्रद्धयासह । शूद्रस्य द्विजशुश्रूषा मन्वादिभिरुदीरिता ॥
नहि नैसर्गिकं कर्म परित्यक्तुंत्वमर्हसि । एवमुक्तस्तुमुनिना स शूद्रोऽचिन्तयत्तदा
किं कर्तव्यं मयात्वद्य व्रतेश्रद्धाहिमेपुरा । यथास्यान्ममविज्ञानं यतिष्येऽहं तथाऽद्यवै
इतिनिश्चित्यमनसा शूद्रोदृढमतिस्तदा । गत्वाऽऽश्रमपदाद्दूरं कृतवानुटजंशुभम् ॥
तत्र वै देवतागारं पुण्यान्यायतनानिच । पुष्पारामादिकंचापि तटाकखननादिकम् ॥
श्रद्धयाकारयामास तपःसिद्ध्यर्थमात्मनः । अभिषेकांश्च नियमानुपवासादिकानपि
बलिंचकृत्वाहुत्वाच देवतान्यभ्यपूजयत् । सङ्कल्पनियमोपेतः फलाहारो जितेन्द्रियः
नित्यंकन्दैश्च मूलैश्च पुष्पैरपि तथाफलैः । अतिथीन्पूजयामास यथावत्समुपागतान्
एवंहिसुमहाकालो व्यतिचक्रामतस्यवै । अथाश्रममगात्तस्य सुमतिर्नामनामतः ॥

द्विजो गर्गकुलोद्भूतः सत्यवादी जितेन्द्रियः ।
स्वागतेन मुनिम्पूज्य तोषयित्वा फलादिकैः ॥ ५३ ॥

कथयन्वै कथाः पुण्याः कुशलं पर्यपृच्छत । इत्थं स प्रणिपाताद्यैरुपचारैस्तुपूजितः
आशीर्भिरभिनन्द्यैनं प्रतिगृह्यचसत्क्रियाम् । तमापृच्छ्यप्रहृष्टात्मा स्वाश्रमंपुनराययौ
एवंदिनेदिनेविप्रः शूद्रेऽस्मिन्पक्षपातवान् । आगच्छदाश्रमंतस्य द्रष्टुं तं शूद्रयोनिजम्
बहुकालं द्विजस्याभूत्संसर्गःशूद्रयोनिना । स्नेहस्य वशमापन्नः शूद्रोक्तं नाऽतिचक्रमे

अथाऽऽगतंद्विजंशूद्रः प्राहस्नेहवशीकृतम् । हव्यकव्यविधानं मेकृत्स्नंब्रूहिमुनीश्वर!
पितृकार्यविधानार्थं देवकार्यार्थमेव च । मन्त्रानुपदिशत्वं मे महालयविधिं तथा ॥
अष्टकाश्राद्धकृत्यंच वैदिकं यच्चकिञ्चन । सर्वमेतद्रहस्यम्मे ब्रूहि त्वं गुरुर्मतः ॥ ६०॥
एवमुक्तः सशूद्रेण सर्वमेतदुपादिशत् । कारयामास तस्य यं पितृकार्यादिकं तथा ॥
पितृकार्यैकृतेतेन विसृष्टःसद्विजोगतः । अथ दीर्घेण कालेनपोषितःशूद्रयोनिना ॥६२
त्यक्तोविप्रगणैःसोऽयं पञ्चत्वमगमद्द्विजः । वैवस्वतभटैर्नीत्वा पातितोनरकेष्वपि

कल्पकोटिसहस्राणि कल्पकोटिशतानि च ।
भुक्त्वा क्रमेण नरकांस्तदन्ते स्थावरोऽभवत् ॥ ६४ ॥

गर्दभस्तुततोजज्ञे विड्वराहस्ततःपरम् । जज्ञेऽथसारमेयोऽसौ पश्चाद्वायसतां गतः
अथचण्डालतां प्राप शूद्रयोनिमगात्ततः । गतवान्वैश्यतांपश्चात्क्षत्त्रियस्तदनन्तरम् ॥
प्रबलैर्वध्यमानोऽसौ ब्राह्मणोवैतदाऽभवत् । उपनीतः सपित्रातु वर्षेगर्भाऽष्टमेद्विजः
वर्तमानःपितुर्गेहे स्वाचाराभ्यासतत्परः । गच्छन्कदाचिद्गहने गृहीतोब्रह्मरक्षसा ॥
रुदन्भ्रमन्स्खलन्मूढः प्रहसन्विलपन्नसौ । शश्वद्धाहेतिचवदन्वैदिकंकर्मसोऽत्यजत्
दृष्ट्वासुतंतथा भूतं पितादुःखेन पीडितः । सुतमादाय च स्नेहादगस्त्यं शरणंययौ ॥

भक्त्या मुनिं प्रणम्याऽसौ पिता तस्य सुतस्य वै ।
तस्मै निवेदयामास स्वपुत्रस्य विचेष्टितम् ॥ ७१ ॥

अब्रवीच्च तदा विप्रः कुम्भजं मुनिपुङ्गवम् । एष मे तनयो ब्रह्मन् !गृहीतो ब्रह्मरक्षसा
सुखं नभजतेब्रह्मन् ! रक्ष तंकरुणादृशा । नाऽस्ति मे तनयोऽप्यन्यः पितृणामृणमुक्तये
अस्यपीडाविनाशार्थमुपायंब्रूहिकुम्भज । त्वत्समस्त्रिषु लोकेषु तपःशीलो न विद्यते
अग्रणीःशिवभक्तानामुक्तस्त्वंहिमहर्षिभिः । त्वांविनास्यपरित्राणं न मेपुत्रस्यविद्यते

पित्रे कृपां कुरुष्व त्वं दयाशीला हि साधवः ।

श्रीसूत उवाच

एवमुक्तस्तदा तेन कुम्भजो ध्यानमास्थितः ॥ ७६ ॥
ध्यात्वा तु सुचिरं कालमब्रवीद् ब्राह्मणं ततः ।

अगस्त्य उवाच

पूर्वजन्मनि ते पुत्रो ब्राह्मणोऽयं महामते ॥ ७७ ॥
सुमतिर्नामविप्रोऽयं मतिं शूद्राय वै ददौ । कर्माणिवैदिकान्येष सर्वाण्युपदिदेश वै
अतोऽयंनरकान्भुक्त्वा कल्पकोटिसहस्रकम् । जातोभुवितदन्तेषुस्थावरादिषुयोनिषु
इदानीं ब्राह्मणोजातः कर्मशेषेण ते सुतः । यमेन प्रेषितेनाऽत्र गृहीतो ब्रह्मरक्षसा ॥
क्रूरेण पातकेनाद्धा पूर्वजन्मकृतेन वै । उपायं ते प्रवक्ष्यामि ब्रह्मरक्षो विनाशने ॥८१॥
शृणुष्व श्रद्धयायुक्तः समाधाय च मानसम् ।
दक्षिणाम्भोनिधौ विप्र ! सेतुरूपो महागिरिः ॥ ८२ ॥
वर्ततेदैवतैः सेव्यः पावनोगन्धमादनः । तस्योपरिमहातीर्थं नाम्ना पापविनाशनम् ॥
अस्तिपुण्यं प्रसिद्धञ्च महापातकनाशनम् । भूतप्रेतपिशाचानां वेतालब्रह्मरक्षसाम् ॥
महताञ्चैव रोगाणां तीर्थंतन्नाशकं स्मृतम् । सुतमादायगच्छत्वंतत्तीर्थसेतुमध्यगम्
प्रयतः स्नापयसुतं तीर्थेपाप विनाशने । स्नानेन त्रिदिनं तत्र ब्रह्मरक्षोविनश्यति
नैवोपायान्तरंतस्य विनाशेविद्यतेभुवि । तस्माच्छीघ्रंप्रयाहित्वं रामसेतुंविमुक्तिदम्
तत्रपापविनाशाख्यतीर्थे स्नापयतंसुतम् । माविलम्बं कुरुष्वात्र त्वरयायाहिवैद्रिव ॥
इत्युक्तः स द्विजोऽगस्त्यं प्रणम्य भुवि दण्डवत् ।
अनुज्ञातश्च तेनाऽसौ प्रययौगन्धमादनम् ॥ ८६ ॥
सुतेनसार्कंविप्रेन्द्रो गत्वापापविनाशनम् । सङ्कल्पपूर्वतंस्नाप्य दिनत्रयमसौ सुतम्
सस्नौस्वयञ्चविप्रेन्द्राः पितापापविनाशने । अथ तस्यसुतस्तत्र विमुक्तो ब्रह्मरक्षसा
समजायतनीरोगःस्वस्थःसुन्दररूपधृक् । सर्वसम्पत्समृद्धोऽसौभुक्त्वाभोगाननेकशः
देहान्तेप्रययौमुक्तिं स्नानात्पापविनाशने । पितापितत्रस्नानेन देहान्तेमुक्तिमाप्तवान्
तेनोपदिष्टोयःशूद्रःसभुक्तवानरकानक्रमात् । अनेकेषुजनित्वाच कुत्सितेष्वपियोनिषु
गृध्रजन्माऽभवत्पश्चाद्गन्धमादनपर्वते । सकदाचिज्जलं पातुं तीर्थे पापविनाशने ॥
समागतःपपौतोयंसिषिचेचात्मनस्तनुम् । तदैव दिव्यदेहः सन्सर्वाऽऽभरणभूषितः
दिव्यमाल्याम्बरधरो रक्तचन्दनरूषितः । दिव्यंविमानमारुह्य शोभितश्छत्रचामरैः ॥

उत्तमस्त्रीपरिवृतः प्रययावमरालयम् । एवं प्रभावमेतद्धै तीर्थंपापविनाशनम् ॥ ९८ ॥
स्वर्गदं मोक्षदं पुण्यं प्रायश्चित्तकरन्तथा । ब्रह्मविष्णुमहेशानैः सेवितं सुरसेवितम्
पापानां नाशनाद्विप्राः पापनाशाभिधं हि तत् ।
श्रेयोऽर्थी पुरुषस्तस्मात्स्नायात्पापविनाशने ॥ १०० ॥
इत्थं रहस्यं कथितं मुनीन्द्रास्तद्वैभवं पापविनाशनस्य ।
यत्राऽभिषेकात्सहसा विमुक्तो द्विजश्च शूद्रश्च विनिन्द्यकृत्यौ ॥ १०१ ॥
श्रीस्कन्देमहापुराण एकाशीतिसाहस्र्यां संहितायां तृतीयेब्रह्मखण्डे
सेतुमाहात्म्येगन्धमादनप्रशंसायां पापविनाशप्रभावकथनन्नाम
दशमोऽध्यायः ॥ १० ॥

एकादशोऽध्यायः

सीतासरःप्रशंसायामिन्द्रब्रह्महत्याविमोक्षणवर्णनम्

श्रीसूत उवाच

पापनाशेनरः स्नात्वा सर्वपापनिवर्हणे । ततः सीतासरोगच्छेत्स्नातुं नियमपूर्वकम्
यानि कानि च पुण्यनि ब्रह्माण्डान्तर्गतानि वै ।
तानि गङ्गादितीर्थानि स्वपापपरिशुद्धये ॥ २ ॥
सीतासरसिवर्तन्ते महापातकनाशने । क्षेत्राण्यपि महार्हाणिकाश्यादीनिदिवानिशम्
सीतासरोऽत्रसेवन्तेस्वस्वकलमषशान्तये । तस्याःसरसिसङ्गीतगुणेनाहृष्यब्राह्मणाः
पञ्चाननोऽपिवसते पञ्चपातकनाशनः । तदेतत्तीर्थमागत्य स्नात्वा वै श्रद्धया सह ॥
पुरन्दरः पुरा विप्रा ! मुमुचे ब्रह्महत्यया ।
ऋषय ऊचुः

ब्रह्महत्या कथमभूद्वासवस्य पुरा मुने ! ६ ॥
सीतासरसि स स्नायात्कथं मुक्तोऽभवत्तया ।

श्रीसूत उवाच

कपालाभरणो नाम राक्षसोऽभूत्पुरा द्विजाः !॥ ७ ॥
अवध्यः सर्वदेवानां सोभवद्ब्रह्मणोवरात् । शवभक्षणनामातुतस्यासीन्मन्त्रिसत्तमः
अक्षौहिणीशतंतस्य हयैभरथसङ्कुलम् । अस्तितस्यपुरश्चाऽपि वैजयन्तमितिश्रुतम्
वसत्यस्मिन्पुरेसोऽयं कपालाभरणोबली । शवभक्षंसमाहूय बभाषेमन्त्रिणं द्विजा!
शवभक्षमहावीर्य! मन्त्रशास्त्रेषु कोविद !। वयं देवपुरीं गत्वा विनिर्जित्यसुरान्रणे
शक्रस्य भवने रम्ये स्थास्यामस्सैनिकैः सह ।
रमामो नन्दने तस्य रम्भाद्याप्सरसां गणैः ॥ १२ ॥
कपालभरणस्येदं निशम्यवचनंतदा । शवभक्षोऽब्रवीद्विप्रावचस्तत्र तथाऽस्त्विति
ततः कपालाभरणः पुत्रंदुर्मेधसम्बली । प्रतिष्ठाप्य पुरेशूरं सेनया परिवारितः ॥
युयुत्सुरमरैःसाकं प्रययावमरावतीम् । गजाश्वरथपादातैरूद्धतैरेणुसञ्चयैः ॥
शोषयञ्जलधीन्सिन्धूंश्चूर्णयन्पर्वतानपि । निस्साणध्वनिना विप्रा नादयन्रोदसीतथा
अश्वानां हेषितरवैर्गजानामपिबृंहितैः । रथनेमिस्वनैरुग्रैः सिंहनादैः पदातिनाम् ॥
श्रोत्राणिदिग्गजानाञ्च वितन्वन्बधिराणिसः । अगमद्देवनगरीं युयुत्सुरमरैः सह ॥
ततइन्द्रादयोदेवाः सेनाकलकलध्वनिम् । श्रुत्वाभिनिर्य्ययुःपुर्यायुद्धाभिमनसोद्विजाः
ततो युद्धं समभवद्देवानां राक्षसैः सह । अदृष्टपूर्वं जगति तथैवाऽश्रुतपूर्वकम् ॥ २०
ततइन्द्रादयोदेवा राक्षसाञ्जघ्नुराहवे । राक्षसाश्चसुराञ्जघ्नुः समरे विजिगीषवः ॥२१
द्वन्द्वयुद्धंचसमभूदन्योन्यंसुररक्षसाम् । कपालाभरणेनाऽऽजौ युयुधे बलवृत्रहा ॥२२
यमेनशवभक्षश्च वरुणेन च कैशिकः । कुबेरोरुधिराक्षेण युयुधे ब्राह्मणोत्तमाः ॥ २३॥
मांसप्रियोमद्यसेवी क्रूरदृष्टिर्भयावहः । चत्वारएतेविक्रान्ताः कपालाभरणानुजाः ॥
अश्विभ्यामग्निवायुभ्यां युद्धेयुयुधिरेमिथः । ततोयमोमहावीर्यः कालदण्डेनवेगवान्
शवभक्षन्निहत्याजावनयद्यमसादनम् । तस्यचाक्षौहिणीस्त्रिशन्निजघ्नेसमरेयमः ॥

वरुणःकैशिकस्याजौ प्रासेनप्राहरच्छिरः । कुबेरोरुधिराक्षस्यकुन्तेनाभ्यहरच्छिरः
अश्विभ्यामग्निवायुभ्यां कपालाभरणानुजाः । निहताः समरेविप्राःप्रययुर्यमसादनम्
अक्षौहिणीशतञ्चाऽपि देवेन्द्रेण मृधेद्विजाः । यामार्द्धेन हतं युद्धे प्रययौ यमसादनम्
ततःकपालाभरणः प्रेक्ष्य सेनां निजां हताम् ।
चापमादाय निशिताञ्छरांश्चाऽपि महाजवान् ॥ ३० ॥
अभ्ययात्समरे शक्रं तिष्ठतिष्ठेतिचाब्रवीत् । ततःशक्रस्यशिरसि व्यधमच्छरपञ्चकैः॥
तानप्राप्तान्प्रचिच्छेद शरैर्युद्धेसवृत्रहा । ततः शूलंसमादाय कपालाभरणो मृधे ॥३२
देवेन्द्राय प्रचिक्षेप तं शतया निजघान सः ।
ततः कपालाभरणः शतहस्तायतां गदाम् ॥ ३३ ॥
आयसींपञ्चसाहस्रतुलाभारेणनिर्मिताम् । आददेसमरेशक्रं वक्षोदेशे जघान च ॥ ३४
ततःसम्मूर्च्छितःशक्रो रथोपस्थ उपाविशत् ।
मृतसञ्जीवनीं विद्यां जपित्वाऽथ बृहस्पतिः ॥ ३५ ॥
पुलोमजापतिं युद्धे समजीवयदद्भुतम् । ऐरावतं तदारुह्य कपालाभरणान्तिकम् ॥३६
आजगामशचीभर्ता प्राहर्तुंकुलिशेनतम् । एकप्रहारेण तदामहेन्द्रः पाकशासनः ॥ ३७
कपालाभरणं युद्धे वज्रेणसरथाश्वकम् । स चापंसध्वजं चैव सतूणीरं सवर्मकम् ॥
चूर्णयामासकुपितस्तिलशःकणशस्तथा । हतेतस्मिन्महावीरे कपालाभरणेरणे ॥
सुखंसर्वस्यलोकस्य बभूवचिरदुःखिनः । राक्षसस्यवधोत्पन्ना ब्रह्महत्यापुरन्दरम्
अन्वधावत्तदा भीमा नादयन्ती दिशो दश ।

ऋषय ऊचुः

न विप्रो राक्षसः सूत कपालाभरणो मुने !॥ ४१ ॥
तत्कथं ब्रह्महत्येन्द्रं तद्वधात्समुपाद्रवत् ।

श्रीसूत उवाच

वक्ष्यामि परमंगुह्यं मुनीन्द्राः परमाद्भुतम् ॥ ४२ ॥
शृणुतश्रद्धयायूयं समाधायस्वमानसम् । पुराविन्ध्यप्रदेशेषु त्रिवक्रो नाम राक्षसः ॥

तस्य भार्या गुणोपेता सौन्दर्यगुणशालिनी ।

सुशीला नाम सुश्रोणी सर्वलक्षणलक्षिता ॥ ४४ ॥

साकदाचिन्मनोज्ञाङ्गासुवेषाचारुहासिनी । विन्ध्यपादवनोद्देशेविचचारविलासिनी
तस्मिन्वनेशुचिर्नामवर्ततेस्ममहामुनिः । तपःसमाधिसंयुक्तो वेदाध्ययनतत्परः ॥
तस्याऽऽश्रमसमीपंतु सायर्यौवरवर्णिनी । तांदृष्ट्वासमुनिर्धैर्यं मुमोचाऽनङ्गपीडितः॥

तामासाद्य वरारोहां बभाषे मुनिसत्तमः ।

शुचिरुवाच

ललने ! स्वागतं तेऽस्तु कस्य भार्या शुचिस्मिते !॥ ४८ ॥

किमागमनकृत्यंते वनेस्मिन्नतिभीषणे । श्रान्तासित्वंवरारोहे वसाऽस्मिन्नुटजेमम
तथोक्तासातुश्रोणी तंमुनिप्रत्यभाषत । त्रिवक्ररक्षोभार्याऽहं सुशीलानामतोमुने ॥
पुष्पोपचयकामेन वनमेतत्समागता । अपुत्राऽहं मुनेभर्त्रा प्रेरिता पुत्रमिच्छता ॥५१॥
शुचिंमुनिंसमाराध्य तस्मात्पुत्रमवाप्नुहि । इतिप्रतिसमादिष्टा पतिनात्वां समागता
पुत्रमुत्पाद्य त्वं मे कृपां कुरुमुने! मयि । तयैवमुक्तः सशुचिः सुशीलां तामभाषत

शुचिरुवाच

त्वां दृष्ट्वाममचप्रीतिः सुशीले! विद्यतेऽधुना । मनोरथमहाम्भोधिं त्वमापूरयमामकम्
इत्युक्त्वासमुनिस्तत्र तयारेमेदिनत्रयम् । तामुवाचमुनिःप्रीतः सुशीलांसुन्दराकृतिम्
तवोदरेमहावीर्यः कपालाभरणाभिधः । भविष्यतिचिरं राज्यं पालयिष्यतिसुन्दरि
सहस्रंवत्सराञ्जीवेत्तपसाप्रीणयन्विधिम् । पुरन्दरंविनाऽन्येभ्योदेवेभ्योनास्यवध्यता
ईदृशस्तेसुतोभूयादिन्द्रतुल्यपराक्रमः । इत्युक्त्वासमुनिर्नारीं काशींशिवपुरं ययौ ॥
सुशीलासाऽपि सुषुवे कपालाभरणं सुतम् । तं जघान मृधेशक्रो वज्रेण मुनिपुङ्गवाः
शुचेर्बीजसमुद्भूतं तमिन्द्रोन्यवधीद्यतः । ततःपुरन्दरःशक्रो जगृहेब्रह्महत्यया ॥
धावतिस्मतदाशक्रःसर्वाँल्लोकान्भयाकुलः । धावन्तमनुधावन्तीब्रह्महत्यातमन्वगात्
अनुद्रुतोऽयंविप्रेन्द्राः शक्रोऽयं ब्रह्महत्यया । पितामहसदः प्राप सन्तप्तहृदयो भृशम्
न्यवेदयद् ब्रह्महत्यां ब्रह्मणेसपुरन्दरः । भगवँल्लोकनाथेयं ब्रह्महत्याऽतिभीषणा ॥६३

बाधते माम्प्रजानाथ! तस्यनाशं ब्रवीहि मे । पुरन्दरेणैवमुक्तो ब्रह्माप्राह दिवस्पतिम्

ब्रह्मोवाच

सीताकुण्डंप्रयाहीन्द्र गन्धमादनपर्वते । सीताकुण्डस्यतीरेत्वमिष्ट्वायागैःसदाशिवम्
तस्मिन्सरसिचस्नायात्सर्वपापहरेशुभे । ततः पूतोभवाञ्छक्र! ब्रह्महत्याविमोचितः
देवलोकंपुनर्यायाः सर्वदुःखविवर्जितः । सर्वपापहरंपुण्यं सीताकुण्डंविमुक्तिदम् ॥
महापातकसङ्घानां नाशकं परमामृतम् । सर्वदुःखप्रशमनं सर्वदारिद्र्यनाशनम् ॥
धनधान्यप्रदंशुद्धं वैकुण्ठादिपदप्रदम् । तस्मात्तत्रकुरुष्वेष्टिं सीतासरसि वृत्रहन् !॥
इत्युक्तःसुरराजोसौ प्रययौगन्धमादनम् । प्राप्यसीतासरोविप्राःस्नात्वेष्ट्वाचतदन्तिके
प्रययौस्वपुरींभूयो ब्रह्महत्याविमोचितः । एवंप्रभावंतत्तीर्थं सीतायाः कुण्डमुत्तमम्
राघवप्रत्ययार्थं हि प्रविश्यहुतवाहनम् । सन्निधौसर्वदेवानां मैथिली जनकात्मजा ॥
विनिर्गतापुनर्वह्नेः स्थितासर्वाङ्गशोभना । निर्ममे लोकरक्षार्थं स्वनाम्नातीर्थमुत्तमम्
तत्रसस्नौस्वयंसीता तेनसीतासरःस्मृतम् । तत्रयोमानवःस्नातिसर्वान्कामाँल्लभेतसः

तस्मिन्नुपस्पृश्य नरो द्विजेन्द्राः ! दत्त्वा च दानानि पृथग्विधानि ।

कृत्वा च यज्ञान्बहुदक्षिणाभिर्लोकम्प्रयायात्परमेश्वरस्य ॥ ७५ ॥

युष्माकमेवं प्रथितम्मुनीन्द्राः ! सीतासरोवैभवमेतदुक्तम् ।

शृण्वन्पठन्वै तदिहैव भोगान्भुक्त्वा परत्राऽपि सुखं लभेत ॥ ७६ ॥

इतिश्रीस्कान्देमहापुराणएकाशीतिसाहस्र्यां संहितायां तृतीयेब्रह्मखण्डे

सीतासरःप्रशंसायामिन्द्रब्रह्महत्याविमोक्षणं

नामैकादशोऽध्यायः ॥ ११ ॥

द्वादशोऽध्यायः

मङ्गलतीर्थप्रशंसायांमनोजवालक्ष्मीविनाशवर्णनम्

श्रीसूत उवाच

सीताकुण्डेमहापुण्ये नरःस्नात्वाद्विजोत्तमाः । ततस्तुमङ्गलंतीर्थमभिगच्छेत्समाहितः
सन्निधत्तेसदायत्र कमलाविष्णुवल्लभा । अलक्ष्मीपरिहारायियस्मिन्सरसि वै सुराः
शतक्रतुमुखाः सर्वे समागच्छन्तिनित्यशः । तदेतत्तीर्थमुद्दिश्य ऋषयोलोकपावनम्
इतिहासं प्रवक्ष्यामि पुण्यंपापविनाशनम् । पुरामनोजवोनाम राजा सोमकुलोद्भवः ॥
पालयामासधर्मेण धरांसागरमेखलाम् । अयष्ट ससुरान्यज्ञैर्ब्राह्मणानन्नसञ्चयैः ॥ ५ ॥
तर्पयामास कव्येन प्रत्यब्दंपितृदेवताः । त्रयीमध्यैष्टसततमपाठीच्छास्त्रमर्थवत् ॥ ६॥
व्यजेष्टशत्रून्वीर्येण प्राणंसीदीशकेशवौ । अरंस्तनीतिशास्त्रेषु तथाऽपाठीन्महामनून्
एवं स धर्मतो राजा पालयामासमेदिनीम् । रक्षतस्तस्यराज्ञोभूद्राज्यंनिहतकण्टकम्
अहङ्कारोऽभवत्तस्य पुत्रसम्पद्विनाशनः । अहङ्कारोभवेद्यत्र तत्रलोभोमदस्तथा ॥ ६॥
कामःक्रोधश्चहिंसाचतथाऽसूयाविमोहिनी । भवन्त्येतानिविप्रेन्द्राःसम्पदांनाशहेतवः
एतानि यत्रविद्यन्ते पुरुषेसविनश्यति । क्षणेन पुत्रपौत्रैश्च सार्द्धंचाखिलसम्पदा ॥
बभूवतस्यासूयाच जनविद्वेषिणी सदा । असूयाकुलचित्तस्य वृथाऽहङ्कारिणस्तथा
लुब्धस्यकामदुष्टस्य मतिरेवं बभूव ह । विप्रग्रामेकरादानं करिष्यामीतिनिश्चितः ॥
अकरोच्च तथाराजा निश्चित्यमनसातदा । धनंधान्यञ्च विप्राणां जहार किललोभतः

शिवविष्णवादिदेवानां वित्तान्यादत्त रागतः ।
शिवविष्णवादिदेवानां विप्राणां च महात्मनाम् ॥ १५ ॥

क्षेत्राण्यपजहारायमहङ्कारावमूढधीः । एवमन्याययुक्तस्य देवद्विजविरोधिनः ॥ १६॥
दुष्कर्मपरिपाकेन क्रूरेणद्विजपुङ्गवाः । पुरंरुरोधवलबान् रणदेशाधिपो रिपुः ॥ १७॥
गोलभोनामविप्रेन्द्राश्चतुरङ्गबलैर्युतः । षाण्मासंयुद्धमभवद्गोलभेन दुरात्मनः ॥ १८ ॥

मनोजवस्यनृपतेरहङ्काररतात्मनः । ततः सगोलभेनाऽऽजौजितोराज्यात्परिच्युतः
वनं सपुत्रदारःसन्प्रपेदेस मनोजवः । गोलभःपालयन्नास्ते मनोजवपुरे चिरम् ॥२०॥
चतुरङ्गबलोपेतस्तमुद्रास्यरणेबला । मनोजवोऽपिविप्रेन्द्राः शोचन्स्त्रीपुत्रसंयुतः ॥

क्षुत्क्षामःप्रस्खलञ्च्छश्वत्प्रविवेश महावनम् ।
झिल्लिकागणसंघुष्टं व्याघ्रश्वापदभीषणम् ॥ २२ ॥

मत्तद्विरदचीकार वराहमहिषाकुलम् । तस्मिन्वनेमहाघोरे क्षुधया परिपीडितः ॥
अयाचताऽन्नंपितरं मनोजवसुतःशिशुः । अम्ब! मेन्नंप्रयच्छत्वं क्षुधामाम्बाधतेभृशम्
एवंस्वजननीञ्चापि प्रार्थयामासबालकः । तन्मातापितरौतत्रश्रुत्वापुत्रस्यभाषितम् ॥
शोकाभिभूतौसहसामोहंसमुपजग्मतुः । भार्यामथाब्रवीद्राजा सुमित्रांनामनामतः ॥
मुह्यमानश्चसमुद्दुःशुष्ककण्ठोष्ठतालुकः । सुमित्रेकिङ्करिष्यामिकुत्रयास्यामिकागतिः
मरिष्यत्यचिरादेष सुतोमेक्षुधयार्दितः । किमर्थंसस्रृजेवेधा दुर्भाग्यंमांवृथाप्रिये !॥
कोवामोचयितादुःखमेतद्दुष्कर्मजं मम । न पूजितो मयाशम्भुर्हरिर्वा पूर्वजन्मसु ॥
तथान्यादेवताःसूर्यविभावसुमुखाःप्रिये । तेन पापेन चाद्याऽहमस्मिजन्मनिशोभने !

अहङ्काराभिभूतोऽस्मि विप्रक्षेत्राण्यपाहरम् ।
शिवविष्णवादिदेवानां वित्तञ्चापहृतंमया ॥ ३१ ॥

एवंदुष्कर्मबाहुल्याद्गोलभेनपराजितः । वनंयातोऽस्मि विजनं त्वया सह सुतेन च ॥
निरन्नोनिर्धनोदुःखी क्षुधितोऽहंपिपासितः । कथमन्नंप्रदास्यामि क्षुधितायसुतायमे
नमयान्नानिदत्तानि ब्राह्मणेभ्यःशुचिस्मिते । नमयापूजितःशम्भुर्विष्णुर्वादेवतान्तरम्
तेनपापेनमेत्वद्य दुःखमेतत्समागतम् । न मयाऽग्नौहुतंपूर्वं नतीर्थमपिसेवितम् ३५
मातृश्राद्धंपितृश्राद्धं मृताहदिवसेतयोः । नैकोद्दिष्टविधानेन पार्वणेनाऽपिवैप्रिये ॥
कृतन्नहिमयाभद्रे भूरिभोजन मेव वा । तेन पापेन मेत्वद्य दुःखमेतत्समागतम् ॥३७॥
चैत्रमासेप्रियेचित्रानक्षत्रेपानकम्मया । पनसानांफलंस्वादु कदलीफलमेववा ॥३८ ॥
तदाछत्रंसदण्डञ्चरम्यंपादुकयोर्द्वयम् । ताम्बूलानि च पुष्पाणि चन्दनंचाऽनुलेपनम्
न दत्तं वेदविद्भ्यस्तु चित्रगुप्तस्य तुष्टये । तेन पापेन मे त्वद्य दुःखमेतत्समागतम्॥

नाऽश्वत्थश्चूतवृक्षो वा न्यग्रोधस्तिन्तिणी तथा ।

पिचुमन्दः कपित्थो वा तथैवाऽऽमलकीतरुः ॥ ४१ ॥

नारिकेलतरुर्वापि स्थापितोऽध्वगशान्तये । तेन पापेन मेत्वद्य दुःखमेतत्समागतम्
सम्मार्जनञ्चनकृतंशिवविष्णवालयेमया । नखानि तं तटाकञ्च न कूपोऽपि ह्रदोऽपिवा
नरोपितं पुष्पवनं तथैव तुलसीवनम् । शिवविष्णवालयौवापि निर्मितौ नमयाप्रिये
तेन पापेन मे त्वद्य दुःखमेतत्समागतम् । नमयापैतृकेमासि पितृनुद्दिश्य शोभने !॥

महालयं कृतं श्राद्धमष्टकाश्राद्धमेव वा ॥ ४५ ॥

नित्यश्राद्धं तथाकाम्यंश्राद्धंनैमित्तिकंप्रिये । नकृताःकृतवश्चापिविधिवद्भूरिदक्षिणाः
मासोपवासोनकृत एकादश्यामुपोषणम् । धनुर्मासेप्युषःकालेशम्भुविष्णवादिदेवताः
सम्पूज्यविधिवद्भद्रे नैवेद्यं न कृतं मया । तेन पापेनमेत्वद्य दुःखमेतत्समागतम् ॥
हरिशङ्करयोर्नाम्नांकीर्तनं न मया कृतम् । उद्धूलनं त्रिपुण्ड्रञ्च जाबालोक्तैश्चसप्तभिः
न धृतंभस्मनाभद्रे रुद्राक्षं न धृतम्मया । जपश्चरुद्रसूक्तानां पञ्चाक्षरजपस्तथा ॥ ५० ॥
तथा पुरुषसूक्तानां जपोऽप्यष्टाक्षरस्य च । नैवाऽकारिमयाभद्रे नैवान्योधर्मसञ्चयः॥
तेन पापेन मे त्वद्य दुःखमेतत्समागतम् । एवं सविलपन्राजाभार्यामाभाष्यखिन्नधीः
मूर्च्छामुपाययौविप्राः पपातचधरातले । सुमित्रापतितंदृष्ट्वाभार्यासापतिमङ्गना ॥
आलिङ्ग्य प्रललापाऽथ सपुत्राभृशदुःखिता । ममनाथ महाराज! सोमान्वयधुरन्धर
मांविहाय क्वयातोऽसिसपुत्रांविजनेवने । अनाथान्त्वामनुगतां सिंहत्रस्तांमृगीमिव
मृतोऽसियदिराजेन्द्र! तर्हित्वामहमप्यरम् । अनुव्रजामिविधवा नस्थास्येक्षणमप्युत
पितरंपश्यपतितंचन्द्रकान्तसुत!क्षितौ । इत्युक्तश्चन्द्रकान्तोऽपि सुतोराज्ञःक्षुधार्दितः
पितरंपरिरभ्याथ निःशब्दंप्ररुरोदसः । एतस्मिन्नन्तरेविप्रा जटावल्कलसंवृतः ॥
भस्मोद्धूलितसर्वाङ्गस्त्रिपुण्ड्राङ्कितमस्तकः । रुद्राक्षमालाभरणःसितयज्ञोपवीतवान्
पराशरोनाममुनिराजगामयदृच्छया । तंशब्दमभिलक्ष्यासौसाधुसज्जनसम्मतः ॥ ६०
ततः सुमित्रा तं दृष्ट्वा पराशरमुपागतम् । ववन्देचरणौतस्य सपुत्रा सा पतिव्रता ॥

ततः पराशरेणेयं सुमित्रा परिसान्त्विता ।

आश्वसिता च मुनिना मा शोचस्वेति भामिनि !॥ ६२ ॥

ततः सुमित्रां पप्रच्छ शक्तिपुत्रो महामुनिः ।

पराशर उवाच

का त्वं सुश्रोणि! कश्चाऽसौ यश्चाऽयं पतितोऽग्रतः ॥ ६३ ॥

अयंशिशुश्च कस्तेस्याद्वदतत्त्वेन मे शुभे । पृष्टैवं मुनिना साध्वी तमुवाच महामुनिम्

सुमित्रोवाच

पतिर्ममाऽयमस्याहंभार्यावैमुनिसत्तम । आवाभ्यांजनितश्चायंचन्द्रकान्ताभिधःसुतः
अयं मनोजवोनाम राजासोमकुलोद्भवः । विक्रमाढ्यस्यतनयःशौर्ये विष्णुसमोबली
सुमित्रानामतस्याऽहं भार्यापतिमनुव्रता । युद्धे विनिर्जितो राजा गोलभेन मनोजवः
राज्याद्भ्रष्टोनिरालम्बो मयापुत्रेण चान्वितः । वनंविवेशब्रह्मर्षे! क्रूरसत्त्वभयानकम्
क्षुधयापीडितः पुत्रोह्यावामन्नमयाचत । निरन्नो विधुरो राजा दृष्ट्वा पुत्रं क्षुधार्दितम्
शोकाकुलमनाब्रह्मन्मूर्च्छितःपतितोभुवि । इतितद्वचनं श्रुत्वा शोकपर्याकुलाक्षरम्

शक्तिपुत्रो मुनिः प्राह सुमित्रां तां पतिव्रताम् ।

मनोजवस्य नृपतेर्भार्यामग्निशिखोपमाम् ॥ ७१ ॥

पराशर उवाच

मनोजवस्यभार्ये ! ते माभीर्भूयात्कथञ्चन । युष्माकमशुभंसत्यमचिरान्नाशमेष्यति
मूर्च्छांविहाय भद्रेते क्षणादुत्थास्यतेपतिः । ततःपराशरोविप्रः पाणिनातन्नराधिपम्
परपर्शमन्त्रंप्रजपन्ध्यात्वादेवं त्रियम्बकम् । ततो मनोजवोराजा करस्पृष्टो महामुनेः
उत्थितः सहसातत्रत्यक्त्वामूर्च्छांतमोमयीम् । ततः पराशरमुनिं प्रणम्यजगतीपतिः

उवाच परमप्रीतः प्राञ्जलिर्विप्रसत्तमम् ।

मनोजव उवाच

पराशरमुने! त्वद्य त्वत्पादाब्जनिषेवणात् ॥ ७६ ॥

मूर्च्छामेविगतासद्यः पातकञ्चैव नाशितम् । त्वद्दर्शनमपुण्यानां नैवसिध्येत्कदाचन
रक्षमां करुणादृष्ट्या चयावितंशत्रुभिःपुरात् । इत्युक्तःसमुनिः प्राहराजानन्तंमोवजम्

पराशर उवाच

उपायन्ते प्रवक्ष्यामि राजञ्छत्रुजयाय वै । रामसेतौ महापुण्ये गन्धमादनपर्वते
विद्यतेमङ्गलंतीर्थं सर्वैश्वर्यप्रदायकम् । सर्वलोकोपकाराय तस्मिन्सरसि राघवः ॥
सन्निधत्ते सदा लक्ष्म्या सीतया राजसत्तम !।
सपुत्रभार्यस्त्वं तत्र गत्वा स्नात्वा सभक्तिकम् ॥ ८१ ॥
क्षेत्रश्राद्धादिकञ्चाऽपि तत्तीरे कुरुभूपते । एवंकृतेत्वयाराजन्नलक्ष्मीः क्लेशकारिणी
वैभवात्तस्य तीर्थस्य नाशं यास्यत्यसंशयम् ।
मङ्गलानि च सर्वाणि प्राप्स्यसे ह्यचिरान्नृप ॥ ८३ ॥
विजित्य शत्रूंश्चरणे पुनर्भूमिं प्रपत्स्यसे । अतस्त्वं भार्ययासार्द्धं पुत्रेणच मनोजव!
गच्छमङ्गलतीर्थं तद्गन्धमादनपर्वते । अहमप्यागमिष्यामि तवाऽनुग्रहकाम्यया
पराशरस्त्वेवमुक्त्वाराजमुख्यैस्त्रिभिः सह । प्रायात्सेतुं समुद्दिश्यस्नातुंमङ्गलतीर्थके
राजादिभिःसह मुनिर्विलङ्घ्य विविधं वनम् । वनप्रदेशदेशांश्च दस्युग्रामाननेकशः
प्रययौ मङ्गलं तीर्थं गन्धमादनपर्वते । तत्र सङ्कल्प्य विधिवत्सस्नौस मुनिपुङ्गवः
तानपिस्नापयामास राजादीन्विधिपूर्वकम् । तत्रश्राद्धञ्च भूपालश्चकारपितृतृप्तये
तत्रमासत्रयंसस्नौ राजा पत्नी सुतस्तथा । ततः पराशरमुनिः सस्नौ नियमपूर्वकम्
एवं मासत्रयं सस्नौ तैः साकम्मुनिपुङ्गवः । मङ्गलाख्यमहापुण्ये सर्वामङ्गलनाशने
ततः पराशरमुनिः सर्वानर्थविनाशम् । रामस्यैकाक्षरं मन्त्रं तदन्ते समुपादिशत्
चत्वारिंशद्दिनं तत्र मन्त्रमेकाक्षरन्नृपः । तत्र तीर्थे जजापासौ मुन्युक्तेनैव वर्त्मना
एवमभ्यसतस्तस्य मन्त्रमेकाक्षरं द्विजाः । मुनिप्रसादात्पुरतो धनुः प्रादुरभूद्दृढम्
अक्षयाविषुधीचापि खड्गौ च कनकत्सरू । एकश्चर्मगदा चैकातथैको मुसलोत्तमः
एकः शङ्खोमहानादो वाजियुक्तोरथस्तथा । ससारथिःपताका च तीर्थादुत्तस्थुरग्रतः
कवचं काञ्चनमयं वैश्वानर समप्रभम् । प्रादुर्बभूव तत्तीर्थात्प्रसादेन मुनेस्तथा ॥६७॥
हारकेयूरमुकुटकटकादिविभूषणम् । तीर्थानाम्प्रवरात्तस्मादुत्थितन्नृपतेः पुरः ॥
दिव्याम्बरसहस्रञ्च तीर्थात्प्रादुरभूत्तदा ।

माला च वैजयन्त्याख्या स्वर्णपङ्कजशोभिता ॥ ९९ ॥
एतत्सर्वंसमालोक्य मुनयेसौऽन्यवेदयत् । ततःपराशरमुनिर्जलमादायतीर्थतः॥ १००
अभ्यषिञ्चन्नरपतिं मन्त्रपूतेनवारिणा । ततोऽभिषिक्तोनृपतिर्मुनिना परिशोभितः ॥
सन्नद्धःकवचीखड्गीचापबाणधरो युवा । हारकेयूरमुकुटकटकादिविभूषितः ॥१०२॥
दिव्याम्बरधरश्चापि वाजियुक्तरथस्थितः । शुशुभेऽतीवनृपतिर्मध्याह्न इव भास्करः॥
तस्मै नृपतयेतत्र ब्रह्माद्यस्त्रं महामुनिः । साङ्गञ्चसरहस्यञ्च सोत्सर्गं सोपसंहृतिम् ॥
उपादिशच्छक्तिपुत्रः सुमित्राजानयेतदा । मनोजवोऽथमुनिना ह्याशीर्वादपुरःसरम्
प्रेरितो रथमास्थाय प्रणम्य मुनिपुङ्गवम् । प्रदक्षिणीकृत्य तदाऽभ्यनुज्ञातो महर्षिणा
सार्द्धं पत्न्या च पुत्रेण प्रययौविजयायसः । सगत्वास्वपुरंराजा प्रदध्मौजलजं तदा
ततः शङ्खरवंश्रुत्वागोलभस्तुससैनिकः। युद्धायनिर्ययौतूर्णं मनोजवनृपेण सः ॥१०८
दिनत्रयं रणं जज्ञेगोलभेन नृपस्य वै । ततश्चतुर्थेदिवसे गोलभन्तु स सैनिकम् ॥
मनोजवोनृपोयुद्धे ब्रह्मास्त्रेणव्यनाशयत् । ततःसपुत्रभार्योऽयं पुरम्प्राप्यनिजं नृपः ॥
पालयन्पृथिवींसर्वां बुभुजेभार्ययासह । तदा प्रभृतिराजाऽसौ नाऽहङ्कारञ्चकार वै ॥
असूयादींस्तथादोषान्वर्जयामासभूपतिः । अहिंसानिरतोदान्तः सदाधर्मपरोऽभवत्
सहस्रं वत्सरानेवं ररक्ष समहीपतिः । ततोविरक्तोराजेन्द्रः पुत्रे राज्यंनिधायतु॥११३
जगाममङ्गलंतीर्थं गन्धमादनपर्वते । तपश्चचारतत्राऽसौ ध्यायन् हृदि सदाशिवम् ॥
ततोऽचिरेणकालेनत्यक्त्वादेहंमनोजवः । शिवलोकंययौराजा तस्यतीर्थस्य वैभवात्
तस्य भार्या सुमित्राऽपि तस्याऽऽलिङ्ग्य तनुं तदा ।
अन्वारुढा चितां विप्राः! प्राप तल्लोकमेव सा ॥ ११६ ॥

श्रीसूत उवाच

एवंप्रभावंतत्तीर्थं श्रीमन्मङ्गलनामकम् । मनोजवोनृपोयत्र स्नात्वा तीर्थेमहत्तरे ॥
शत्रून्विजित्य देहान्ते शिवलोकं ययौ स्त्रिया ।
तस्मात्सर्वप्रयत्नेन सेव्यं मङ्गलतीर्थकम् ॥ ११८ ॥
तीर्थमेतदतिशोभनं शिवम्भुक्तिमुक्तिफलदं नृणां सदा ।

पापराशितृणतूलपावकं सेवत द्विजवरा! विमुक्तये ॥ ११६ ॥

इति श्रीस्कान्देमहापुराणएकाशीतिसाहस्र्यांसंहितायां तृतीयेब्रह्मखण्डे
सेतुमहात्म्येमङ्गलतीर्थप्रशंसायांमनोजवालक्ष्मीविनाशोनाम
द्वादशोऽध्यायः ॥ १२ ॥

त्रयोदशोऽध्यायः

अमृतवापीप्रशंसायामगस्त्यभ्रातृविमुक्तिवर्णनम्

श्रीसूत उवाच

मङ्गलाख्येमहातोर्थे नरःस्नात्वाविकल्मषः । एकान्तरामनाथाख्यं क्षेत्रं गच्छेत्ततःपरम्
तत्ररामोजगन्नाथो जानक्या लक्ष्मणेन च । हनुमत्प्रमुखैश्चापि वानरैःपरिवारितः॥
सन्निधत्तेसदाविप्राः! लोकानुग्रहकाम्यया । विद्यते पुण्यदातत्र नाम्नाह्यमृतवापिका॥
यस्मिन्निमज्जतान्नृणांनजरान्तकजंभयम् । अस्याममृतवाप्यांयःसश्रद्धंस्नातिमानवः
अमृतत्वंभजत्येष शङ्करस्यप्रसादतः । महापातकनाशिन्यामस्यांवाप्यांनिमज्जताम्॥
अमृतत्वं हरो दातुं सन्निधत्ते सदा तटे ।

ऋषय ऊचुः

इयं ह्यमृतवापीति कुतो हेतोर्निगद्यते ॥ ६ ॥
अस्माकमेतद्ब्रूहित्वं कृपयाव्यासशासित !। तथैवामृतनामिन्यावापिकायाश्चवैभवम्
तृप्तिर्नजायतेऽस्माकं त्वद्वचोऽमृतपायिनाम् ।

श्रीसूत उवाच

अस्या अमृतनामत्वं वैभवञ्च मनोहरम् ॥ ८ ॥
प्रवक्ष्यामिविशेषेण शृणुत! द्विजसत्तमाः । पुराहिमवतःपार्श्वे नानामुनिसमाकुले ॥
सिद्धचारणगन्धर्वदेवकिन्नरसेविते । सिंहव्याघ्रवराहेभमहिषादिसमाकुले ॥ १० ॥

तमालतालहिन्तालचम्पकाशोकसन्तते । हंसकोकिलदात्यूहचक्रवाकादिशोभिते ॥
पद्मेन्दीवरकह्लारकुमुदाढ्यसरोवृते । सत्यवाञ्छीलवान्वग्मी वशीकुम्भजसोदरः ॥
आस्ते तपश्चरन्नित्यं मोक्षार्थी शङ्करप्रियः ।
त्रिकालमर्चयञ्छम्भुं वन्यैर्मूलफलादिभिः ॥ १३ ॥
आगतान्स्वाश्रमाभ्याशमतिथीन्वन्यभोजनैः । पूजयन्नर्चयन्नग्निं सन्ध्योपासनतत्परः
गायत्र्यादीन्महामन्त्रान्काले काले जपन्मुदा ।
निद्रां परित्यजन्ब्राह्मे मुहूर्ते विष्णुचिन्तकः ॥ १५ ॥
स्नानंकुर्वन्नुषः काले नमन्सन्ध्याम्प्रसन्नधीः । गायत्रींप्रजपन्विप्राःपूजयन्हरिशङ्करौ
वेदाध्यायीशास्त्रपाठीमध्याह्नेऽतिथिपूजकः । श्रोतापुराणपाठानामग्निकार्येष्वतन्द्रितः
पञ्चयज्ञपरोनित्यंवैश्वदेवबलिप्रदः । प्रत्यब्दं श्राद्धकृत्पित्रोस्तथाऽन्यश्राद्धकृद्द्विजाः!
एवं निनायकालंस नित्यानुष्ठानतत्परः । तस्यैवं वर्तमानस्य तपश्चरत उत्तमम् ॥
सहस्रवर्षाण्यगमञ्छङ्करासक्तचेतसः । तथाऽपिशङ्करोनास्याऽऽययौप्रत्यक्षतांतदा
ततस्त्वगस्त्यभ्राताऽसौ ग्रीष्मे पञ्चाग्निमध्यगः ।
भास्करे दत्तदृष्टिश्च मौनव्रतसमन्वितः ॥ २१ ॥
तिष्ठन्कनिष्ठिकाङ्गुल्या वामपादश्च निश्चलः ।
ऊर्द्ध्वबाहुर्निरालम्बस्तपस्तेपेऽतिदारुणम् ॥ २२ ॥
अथ तस्य प्रसन्नात्मा महादेवो घृणानिधिः ।
प्रादुरासीत्स्वया दीप्त्या दिशो दश विभासयन् ॥ २३ ॥
ततोऽद्राक्षीन्मुनिःशम्भुं साम्बंवृषभसंस्थितम् । दृष्ट्वाप्रणम्यतुष्टावभवानीपतिमीश्वरम्

मुनिरुवाच

नमस्तेपार्वतीनाथ ! नीलकण्ठमहेश्वर ! । शिवरुद्रमहादेव ! नमस्तेशम्भवे विभो !॥
श्रीकण्ठोमापते! शूलिन्भगनेत्रहराऽव्यय । गङ्गाधर! विरूपाक्ष ! नमस्तेरुद्रमन्यवे ॥
अन्तकारे! कामशत्रो! देवदेवजगत्पते !। स्वामिन्पशुपते! शर्व नमस्ते शतधन्विने ॥
दक्षयज्ञविनाशाय स्तायूनाम्पतयेनमः । निचेरवेनमस्तुभ्यं पुष्टानाम्पतये नमः ॥ २८॥

भूयो भूयोनमस्तुभ्यं महादेव! कृपालय !। दुस्तराद्भवसिन्धोर्मांतारयस्व त्रिलोचन!
अगस्त्यसोदरेणैवंस्तुतः शम्भुरभाषत । प्रीणयन्वचसास्वेन कुम्भजस्यानुजम्मुनिम्

ईश्वर उवाच

कुम्भजानुज ! वक्ष्यामि मुक्त्युपायं तवाऽनघ । सेतुमध्ये महातीर्थं गन्धमादनपर्वते
मङ्गलाख्यस्यतीर्थस्य नाऽतिदूरेणवर्तते । तत्रगत्वाकुरुस्नानं ततोमुक्तिमवाप्स्यसि
तत्तीर्थसेवनान्नान्यो मोक्षोपायो लघुस्तव । नहितत्तीर्थवैशिष्यं वक्तुंशक्यंमयापिच
सन्देहोनाऽत्रकर्तव्यस्त्वयाद्यमुनिसत्तम !। तस्मात्तत्रैवगच्छत्वंयदीच्छसिभवक्षयम्
इत्युक्त्वा भगवानीशस्तत्रैवान्तरधीयत । ततो देवस्य वचनादगस्त्यस्य सहोदरः
गत्वा सेतुं समुद्रेतु गन्धमादनपर्वते । ईश्वरेणैवगदितं तीर्थं तच्छीघ्रमासदत् ॥३६॥
तत्रतीर्थे महापुण्ये स्नातानां मुक्तिदायिनि । एकान्तरामनाथाख्यक्षेत्रालङ्करणे शुभे
सस्नौनियमपूर्वंस त्रीणिवर्षाणि वै द्विजः । ततश्चतुर्थवर्षेतु समाधिस्थो महामुनिः
ब्रह्मनाड्यां प्राणवायु' मूर्द्धन्यारोप्ययोगतः । प्राणान्निर्गमयामास ब्रह्मरन्ध्रेण तत्रसः

ततोऽगस्त्यानुजः सोऽयं परित्यज्य कलेवरम् ।
अवाप मुक्तिं परमान्तस्य तीर्थस्य वैभवात् ॥ ४० ॥

विनष्टाशेषदुःखस्य तत्तीर्थस्नानवैभवात् । अमृतत्वमभूद्यस्मादगस्त्यस्यानुजन्मनः
ततोह्यमृतवापीतिप्रथाऽस्याऽऽसीन्मुनीश्वराः । अत्र तीर्थे नरायेतुवर्षत्रयमतन्द्रिताः
स्नानं कुर्वन्ति ते सत्यममृतत्वं प्रयान्ति हि । एवं त्वमृतवापीतिप्रथातद्वैभवन्तथा

युष्माकं कथितं विप्राः! किम्भूयः श्रोतुमिच्छथ ।

ऋषय ऊचुः

एकान्तरामनाथाख्या तस्य क्षेत्रस्य वै मुने !॥ ४४ ॥

कथं समागता सूत! वक्तुमेतत्त्वमर्हसि । अस्माकंमुनिशार्दूल! तच्छुश्रूषाऽतिभूयसी

श्रीसूत उवाच

पुरा दाशरथी रामः ससुग्रीवविभीषणः । लक्ष्मणेन युतो भ्राता मन्त्रज्ञेन हनूमता ॥
वानरैर्बध्यमाने तु सेतावम्बुधिमध्यतः । चिन्तयन्मनसा सीतामेकान्तेसममन्त्रयत्

तेषु मन्त्रयमाणेषु रावणादिवधम्प्रति । उल्लोलतरुकल्लोलो जुघोष जलधिर्भृशम् ॥

अर्णवस्य महाभीमे जृम्भमाणे महाध्वनौ ।
अन्योन्यकथितां वार्तां नाऽशृण्वंस्ते परस्परम् ॥ ४६ ॥

ततः किञ्चिदिवक्रुद्धो भृकुटीकुटिलेक्षणः । भ्रूभङ्गलीलयारामो नियम्यजलधिन्तदा
न्यमन्त्रयत विप्रेन्द्रा राक्षसानां वधम्प्रति । एकान्तेऽमन्त्रयत्तत्र तैःसार्धंराघवो यतः
एकान्तरामनाथाख्यंतत्क्षेत्रमभवद्द्विजाः ।सोऽयं नियमितोवार्धी रामभ्रूभङ्गलीलया
अद्याऽपि निश्चलजलस्तत्प्रदेशेषु दृश्यते । एकान्तरामनाथाख्यं तदेतत्क्षेत्रमुत्तमम् ॥
आगत्याऽमृतवाप्यांश्च स्नात्वानियमपूर्वकम् । रामादीनपिसेवन्तेतेसर्वेमुक्तिमाप्नुयुः

अद्वैतविज्ञानविवेकशून्या विरक्तिहीनाश्च समाधिहीनाः ।
यागाद्यनुष्ठानविवर्जिताश्च स्नात्वाऽत्र यास्यन्त्यमृतंद्विजेन्द्राः ॥ ५५ ॥

इति श्रीस्कान्देमहापुराणएकाशीतिसाहस्रयां संहितायां तृतीयेब्रह्मखण्डे
सेतुमाहात्म्येऽमृतवापीप्रशंसायामगस्त्यभ्रातृविमुक्तिरेकान्त-
रामनाथाख्यक्षेत्रमहत्त्ववर्णनंनाम त्रयोदशोऽध्यायः ॥ १३ ॥

चतुर्दशोऽध्यायः

ब्रह्मकुण्डप्रशंसायांब्रह्मशापविमोक्षणवर्णनम्

श्रीसूत उवाच

स्नात्वा त्वमृतवाप्यां वै सेवित्वैकान्तराघवम् ।
जितेन्द्रियो नरः स्नातुं ब्रह्मकुण्डं ततो व्रजेत् ॥ १ ॥

सेतुमध्ये महातीर्थं गन्धमादनपर्वते । ब्रह्मकुण्डमितिख्यातं सर्वदारिद्र्यभेषजम् ॥
विद्यते ब्रह्महत्यानामयुतायुतनाशनम् । दर्शनं ब्रह्मकुण्डस्य सर्वपापौघनाशनम् ॥

किन्तस्य बहुभिस्तीर्थैः किन्तपोभिः किमध्वरैः ।

महादानैश्च किन्तस्य ब्रह्मकुण्डविलोकिनः ॥ ४ ॥

ब्रह्मकुण्डे सकृत्स्नानं वैकुण्ठप्राप्तिकारणम् । ब्रह्मकुण्डसमुद्भूतं भस्मयेनधृतं द्विजाः
तस्यानुगास्त्रयो देवा ब्रह्मविष्णुमहेश्वराः । ब्रह्मकुण्डसमुद्भूतभस्मनायस्त्रिपुण्ड्रकम्
करोतितस्य कैवल्यंकरस्थंनाऽत्र संशयः । तद्भस्मपरमाणुर्वायोललाटे धृतोऽभवत्

तावतैवाऽस्य मुक्तिः स्यान्नाऽत्र कार्या विचारणा ।

तत्कुण्डभस्मना मर्त्यः कुर्यादुद्धूलनन्तु यः ॥ ८ ॥

तस्य पुण्यफलंवक्तुं शङ्करो वेत्ति वा न वा । ब्रह्मकुण्डसमुद्भूतंभस्मयोनैवधारयेत्
रौरवे नरके सोऽयं पतेदाचन्द्रतारकम् । उद्धूलनं त्रिपुण्ड्रंवा ब्रह्मकुण्डस्थभस्मना
नराधमो न कुर्याद्यः सुखंनास्य कदाचन । ब्रह्मकुण्डसमुद्भूतभस्मनिन्दारतस्तुयः
उत्पत्तौतस्य साङ्कर्यमनुमेयं विपश्चिता । ब्रह्मकुण्डसमुद्भूतं भस्मैतल्लोकपावनम्
अन्यभस्मसमं यस्तु नूनं वा वक्ति मानवः । उत्पत्तौतस्यसाङ्कर्यमनुमेयं विपश्चिता

ब्रह्मकुण्डसमुद्भूतेऽप्यस्मिन्भस्मनि जाग्रति ।

भस्मान्तरेण मनुजो धारयेद्यस्त्रिपुण्ड्रकम् ॥ १४ ॥

उत्पत्तौ तस्य साङ्कर्य मनुमेयं विपश्चिता । कदाचिदपियोमर्त्यो भस्मैतत्तुन धारयेत्
उत्पत्तौ तस्य साङ्कर्यमनुमेयं विपश्चिता । ब्रह्मकुण्डसमुद्भतभस्म दद्याद् द्विजाय यः
चतुरर्णवपर्यन्ता तेनदत्ता वसुन्धरा । सन्देहो नाऽत्र कर्तव्यस्त्रिर्वा शपथयाम्यहम् ॥
सत्यं सत्यंपुनःसत्यमुद्धृत्यभुजमुच्यते । ब्रह्मकुण्डोद्भवं भस्मधारयध्वंद्विजोत्तमाः!
एतद्धि पावनं भस्म ब्रह्मयज्ञसमुद्भवम् । पुरा हि भगवान्ब्रह्मा सर्वलोकपितामहः ॥
सन्निधौ सर्वदेवानां पर्वते गन्धमादने । ईशशापनिवृत्त्यर्थं क्रतून्सर्वान्समातनोत् ॥
विधायविधिवत्सर्वानध्वरान्बहुदक्षिणान् । मुमुचेसहसाब्रह्माशम्भुशापाद्द्विजोत्तमाः
तदेतत्तीर्थमासाद्य स्नानं कुर्वन्तिये नराः । ते महादेवसायुज्यं प्राप्नुवन्ति न संशयः

ऋषय ऊचुः

व्यासशिष्य! महाप्राज्ञ! पुराणार्थविशारद !। चतुर्दशानां लोकानां स्रष्टारञ्चतुराननम्
शम्भुः केनाऽपराधेन शप्तवान्भारतीपतिम् । शापश्च कीदृशस्तस्य पुरा दत्तो हरेणवै

एतत्सर्वम्मुने! ब्रूहि तत्त्वतोऽस्माकदरात् ।

श्रीसूत उवाच

पुरा बभूव कलहो ब्रह्मविष्णवोः परस्परम् ॥ २५ ॥

कश्चिद्धेतुंसमुद्दिश्यस्पर्धयाश्लाघमानयोः । अहंकर्त्तानमत्तोऽन्यःकर्त्ताऽस्तिजगतीतले
एवमाह हरिं ब्रह्मा ब्रह्माणञ्च हरिस्तथा । एवंविवादः सुमहान्प्रावर्त्तत पुरा तयोः ॥
एतस्मिन्नन्तरेविप्राः! कुर्वतोः कलहं मिथः । तयोर्गर्वविनाशाय प्रबोधार्थञ्च देवयोः
मध्येप्रादुरभूल्लिङ्गंस्वयंज्योतिरनामयम् । तौ दृष्ट्वाविस्मितौलिङ्गंब्रह्मविष्णूपरस्परम्
समयञ्चक्रतुर्विप्रा देवानां सन्निधौपुरा । अनाद्यन्तं महालिङ्गं यदेतद्दृश्यते पुरः ॥
अनन्तादित्यसंकाशमनन्ताग्निसमप्रभम् । आवयोरस्यलिङ्गस्य योन्तमादिञ्चपश्यति
सभवेदधिको लोके लोककर्ताचसप्रभुः । अहमूर्ध्वंगमिष्यामि लिङ्गस्यान्तंगवेषयन्
गवेषणाय मूलस्य त्वमधस्ताद्धरे! व्रज । इति तस्य वचः श्रुत्वा तथेत्याह रमापतिः
एवं तौसमयं कृत्वा मार्गणाय विनिर्गतौ । विष्णुर्वराहरूपेण गतोऽधस्ताद्गवेषितुम्

हंसताम्भारतीजानिः स्वीकृत्योपरि निर्ययौ ।

अधोलोकान्विचित्याऽथो विष्णुर्वर्षगणान्बहून् ॥ ३५ ॥

यथास्थानं समागम्य बभाषे देवसन्निधौ ।

विष्णुरुवाच

अहं लिङ्गस्य नाऽद्राक्षमादिमस्येति सत्यवाक् ॥ ३६ ॥

ऊर्ध्वंगवेषयित्वाऽथ ब्रह्माऽप्यागच्छदत्रसः । आगत्यच वचः प्राहच्छद्मना चतुराननः

ब्रह्मोवाच

अहमद्राक्षमस्यान्तंलिङ्गस्येति मृषा पुनः । तयोस्तद्वचनंश्रुत्वा ब्रह्मविष्णवोर्महेश्वरः

मिथ्यावादिनमाहेदं प्रहस्य चतुराननम् ।

ईश्वर उवाच

असत्यं यदवोचस्त्वं चतुरानन! मत्पुरः ॥ ३९ ॥

तस्मात्पूजा न ते भूयाल्लोके सर्वत्र सर्वदा । अथ विष्णुं पुनःप्राह भगवान्परमेश्वरः

यस्मात्सत्यमवोचस्त्वंकमलायाःपतेहरे !। तस्मात्तेमत्समा पूजाभविष्यतिनसंशयः।
ततोब्रह्मा विषण्णःसन् शङ्करंप्रत्यभाषत । स्वामिन्ममापराधन्त्वंक्षमस्वकरुणानिधे!

एकोऽपराधः क्षन्तव्यः स्वामिभिर्जगदीश्वरैः ।
ततो महेश्वरोऽवादीद् ब्रह्माणं परिसान्त्वयन् ॥ ४३ ॥

ईश्वर उवाच

नमिथ्यावचनम्मेस्याद्ब्रह्मन्वक्ष्यामितेशृणु । गच्छत्वं सहसावत्सगन्धमादनपर्वतम्
तत्रक्रतून्कुरुष्व त्वं मिथ्यादोषप्रशान्तये । ततो विधूतपापस्त्वं भविष्यसिनसंशयः
तेन श्रौतेषुतेब्रह्मन्स्मार्तेष्वपि च कर्मसु । पूजाभविष्यति सदा न पूजा प्रतिमासुते
इत्युक्त्वा भगवानीशस्तत्रैवान्तरधीयत । ततो ब्रह्मा ययौ विप्रा गन्धमादनपर्वतम्
ईजे च क्रतुकर्तारं क्रतुभिःपार्वतीपतिम्। अष्टाशीतिसहस्राणि वर्षाणि मुनिपुङ्गवाः!
पौण्डरीकादिभिः सर्वैरध्वरैर्भूरिदक्षिणैः। इन्द्रादिसर्वदेवानांसन्निधावयजच्छिवम्

तेन तुष्टोऽभवच्छम्भुर्वरमस्मै प्रदत्तवान् ।

ईश्वर उवाच

मिथ्योक्तिदोषस्ते नष्टः क्रतैरेतैर्मखैरिह ॥ ५० ॥

चतुरानन ते! पूजा श्रौतस्मार्तेषु कर्मसु । भविष्यत्यमला ब्रह्मन्न पूजा प्रतिमासु ते ॥

यास्यत्यलमिदं तेऽद्य ब्रह्मकुण्डमिति प्रथाम् ।
भविष्यति त्रिलोकेऽस्मिन्पुण्यं पापविनाशनम् ॥ ५२ ॥

ब्रह्मकुण्डाभिधेतीर्थे सकृद्यःस्नानमाचरेत् । मुक्तिद्वारार्गलन्तस्य भिद्यतेतत्क्षणाद्द्विजे
ब्रह्मकुण्डसमुद्भूतं ललाटे भस्म धारयन् । मायाकपाटं निर्भिद्य मुक्तिद्वारंप्रयास्यति
ब्रह्मकुण्डोत्थितं भस्मललाटे योनधारयेत् । स्वपितुर्बीजसम्भूतो नमातरिसुतस्तुसः
ब्रह्मकुण्डसमुद्भूतभस्मधारणतो विधे !। ब्रह्महत्यायुतं नश्येत्सुरापानायुतन्तथा ॥
गुरुतल्पायुतं नश्येत्स्वर्णस्तेयायुतं तथा । तत्संसर्गायुतंनश्येत्सत्यमुक्तं मया विधे!
ब्रह्मकुण्डसमुद्भूतभस्मधारणतेभवात् । भूतप्रेतपिशाचाद्या नश्यन्ति क्षणमात्रतः ॥
इत्युक्त्वा भगवानीशस्तत्रैवान्तरधीयत । यज्ञेष्वथ समाप्तेषु मुनयश्च जितेन्द्रियाः ॥

इन्द्रादिदेवताश्चैव सिद्धचारणकिन्नराः । अन्ये च देवनिवहा गन्धमादनपर्वते ॥

तान्यज्ञांश्च समाश्रित्य स्वयं रुद्रेण सेवितान् ।
निरन्तरमवर्तन्त विदित्वा तस्य वैभवम् ॥ ६१ ॥

यथाविधिततोयज्ञान्समाप्य बहुदक्षिणान् । सत्यलोकमगाद्ब्रह्माशिवाल्लब्धमनोरथः
तदा प्रभृतिदेवाश्च मुनयश्च द्विजोत्तमाः । ब्रह्मकुण्डं समासाद्य चक्रुर्यागान्विधानतः

तस्माद्दिदृक्षवो मर्त्याः कुर्युर्यज्ञानिहैव हि ।

मनुजदेवमुनीश्वरवन्दितं सकलसंसृतिनाशकरं द्विजाः !॥ ६४ ॥
जलजसम्भवकुण्डमिदं शुभं सकलपापहरं सकलार्थदम् ॥ ६५ ॥

इतिश्रीस्कान्देमहापुराणएकाशीतिसाहस्र्यांसंहितायां तृतीयेब्रह्मखण्डे
सेतुमाहात्म्येब्रह्मकुण्डप्रशंसायांब्रह्मशापविमोक्षणंनाम
चतुर्दशोऽध्यायः ॥ १४ ॥

पञ्चदशोऽध्यायः

हनुमत्कुण्डप्रशंसायांधर्मसखशतपुत्रावाप्तिवर्णनम्

श्रीसूत उवाच

ब्रह्मकुण्डेमहापुण्ये स्नानंकृत्वासमाहितः । नरोहनुमतः कुण्डमथगच्छेद्द्विजोत्तमाः
पुराहतेषु रक्षःसुसमाप्ते रणकर्मणि । रामादिषु निवृत्तेषु गन्धमादनपर्वते ॥ २ ॥
सर्वलोकोपकाराय हनूमान्मारुतात्मजः । सर्वतीर्थोत्तमञ्चक्रे स्वनाम्ना तीर्थमुत्तमम्
विदित्वा वैभवं यस्य स्वयं रुद्रेण सेव्यते । तस्य तीर्थस्य सद्दर्शनंभूतंनभविष्यति
यत्रस्नातानरायान्ति शिवलोकं सनातनम् । यस्मिंस्तीर्थेमहापुण्ये महापातकनाशने
सर्वलोकोपकाराय निर्मिते वायुसूनुना । सर्वाणि नरकाण्यासञ्छून्यान्यथचिरायवै

वैभवं तस्य तीर्थस्य शङ्करोवेत्ति वानरा । यत्र धर्मसखो नाम राजा केकयवंशजः ॥

भक्त्या सह पुरा स्नात्वा शतं पुत्रानवाप्तवान् ।

ऋषय ऊचुः

सूत! धर्मसखस्याऽद्य चरितं वक्तुमर्हसि ॥ ८ ॥

हनूमत्कुण्डतीर्थे यो लेभे स्नात्वा शतं सुतान् ।

श्रीसूत उवाच

शृणुध्वमृषयो यूयं चरितं तस्य भूपतेः ॥ ९ ॥

अद्य धर्मसखस्याऽहंप्रवक्ष्यामिसमासतः । राजाधर्मसखोनामविजितारिःसुधार्मिकः बभूव नीतिमान्पूर्वं प्रजापालनतत्परः । तस्य भार्याशतं विप्रा! बभूवपतिदैवतम् ॥ सपालयन्महीं राजा सशैलवनकाननाम् । तासु भार्यासु तनयं नाऽविन्दद्वंशवर्द्धनम् पुत्रार्थं स महीपालो बहून्यत्नानथाकरोत् । अकरोच्च महादानं पुत्रार्थं स महीपतिः अश्वमेधादिभिर्यज्ञैरयजच्च सुरान्प्रति । तुलापुरुषमुख्यानि ददौ दानानि भूरिशः ॥

आमध्यरात्रमन्नानि सर्वेभ्योऽप्यनिवारितम् ।

प्रायच्छद् बहुसूपानि सभ्योपेतानि भूमिपः ॥ १५ ॥

पितृनुद्दिश्य च श्राद्धमकरोद्विधिपूर्वकम् । सन्तानदायिनो मन्त्राञ्जपनियतेन्द्रियः एवमादीन्बहून्धर्मान्पुत्रार्थं कृतवान्नृपः । पुत्रमुद्दिश्य सततं कुर्वन्धर्माननुत्तमान् ॥ राजा दीर्घेण कालेन वृद्धताम्प्रत्यपद्यत । कदाचित्तस्य वृद्धस्य यतमानस्य भूपतेः पुत्रस्सुचन्द्रनामाऽभूज्ज्येष्ठपत्न्यांमनोरमः । जातं पुत्रंजनन्यस्ताः सर्वावैषम्यवर्जिता समं संवर्द्धयामासुः क्षीरादिभिरनुत्तमाः । राज्ञश्चसर्वमातॄणां पौराणाम्मन्त्रिणांतथा मनोनयनसन्तोषजनकोऽयं सुतोऽभवत् । लालनात्सुतरांराजा मुदं लेभे परात्परम्

आन्दोलिकाशयानस्य सूनोस्तस्य कदाचन ।

वृश्चिको कुट्टयेत्पादे पुच्छेनोद्यद्विषाग्निना ॥ २२ ॥

कुट्टनाद्वृश्चिकस्यामावरुदत्तनयो भृशम् । ततस्तन्मातरःसर्वाःप्रारुदञ्छोककातराः परिवार्यात्मजंविप्राः सध्वनिःसङ्कुलोऽभवत् । आर्तध्वनिंसशुश्रावराजाधर्मसखस्तदा

उपविष्टः सभामध्ये सहामात्यपुरोहितः । अथप्रातिष्ठिपद्राजा सौविदल्लंसवेदितुम् अन्तःपुरबहिर्द्वारं सौविदल्लः समेत्यमः । षण्ढवृद्धान्समाहूय वाक्यमेतदभाषत षण्ढाः! किमर्थमधुना रुदन्त्यन्तःपुरस्त्रियः । तत्परिज्ञायतान्तत्र गत्वारोदनकारणम् एतदर्थंहिमांराजा प्रेरयामाससंसदि । इत्युक्तास्तुपरिज्ञाय निदानं रोदनस्यते निर्गम्यान्तःपुरात्तस्मै यथावृत्तंन्यवेदयत् । सषण्ढकवचःश्रुत्वासौविदल्लःसभांगतः राज्ञो निवेदयामास पुत्रं वृश्चिकपीडितम् । ततोधर्मसखोराजाश्रुत्वावृत्तान्तमीदृशम् त्वरमाणःसमुत्थायसामात्यःसपुरोहितः । प्रविश्यान्तःपुरंसार्द्धंमन्त्रिकैर्विषहारिभिः चिकित्सयामाससुतमौषधाद्यैरनेकशः । जातस्वास्थ्यंततःपुत्रं लालयित्वासभूपतिः

मानयित्वा च मन्त्रज्ञान् रत्नकाञ्चनमौक्तिकैः ।

निष्क्रम्याऽन्तःपुराद्राजा भृशं चिन्तासमाकुलः ॥ ३३ ॥

ऋत्विक्पुरोहितामात्यैस्तां सभां समुपाविशत् ।

तत्र धर्मसखो राजा सामासीनो वरासने ॥ ३४ ॥

उवाचेदं वचोयुक्तमृत्विजः सपुरोहितान् ।

धर्मसख उवाच

दुःखायैवैकपुत्रत्वं भवति ब्राह्मणोत्तमाः !॥ ३५ ॥

एकपुत्रत्वतो नृणां वराचैवह्यपुत्रता । नित्यं व्यपाययुक्त्वाद्वरमेवह्यपुत्रता

अहं भार्याशतं विप्रा! उदवोढं विचिन्त्य तु ॥ ३६ ॥

वयश्च समतिक्रान्तं सपत्नीकस्य मे द्विजाः !।

प्राणा मम च भार्याणामस्मिन्पुत्रे व्यवस्थिताः ॥ ३७ ॥

तन्नाशेममभार्याणां सर्वासाञ्च मृतिर्ध्रुवा । ममापि प्राणनाशः स्यादेकपुत्रस्य मारणे अतो मे बहुपुत्रत्वं केनोपायेन वै भवेत् । तमुपायं मम ब्रूत ब्राह्मणा वेदवित्तमाः!॥ एकैकः शतभार्यासु पुत्रोमेस्याद्यथा गुणी । तत्कर्मब्रूत यूयन्तुशास्त्रमालोक्य धर्मतः महता लघुना वापि कर्मणा दुष्करेणवा । फलं यद्यपि तत्साध्यंकरिष्येऽहं नसंशयः युष्माभिरुदितं कर्म करिष्यामि न संशयः । कृतमेवहि तद्वित्त शपेऽहं सुकृतैर्मम

अस्ति चेदीदृशं कर्म येन पुत्रशतम्भवेत् । तत्कर्म कुत्र कर्तव्यं मयेति वदताऽधुना

इति पृष्टास्तदा राज्ञा ऋत्विजः सपुरोहिताः ।

सम्भूय सर्वे राजानमिदमूचुः सुनिश्चितम् ॥ ४४ ॥

ऋत्विज ऊचुः

अस्ति राजन्प्रवक्ष्यामो येन पुत्रशतं तव । भवेद्धर्मेण महता शतभार्यासु केकय
अस्ति कश्चिन्महापुण्यो गन्धमादनपर्वतः । दक्षिणाम्बुधिमध्येयः सेतुरूपेण वर्तते
सिद्धचारणगन्धर्वदेवर्षिगणसङ्कुलः । दर्शनात्स्पर्शनान्नृणाम्महापातकनाशनः ॥ ४७ ॥
तत्रास्ति हनुमत्कुण्डमिति लोकेषु विश्रुतम् । महादुःखप्रशमनं स्वर्गमोक्षफलप्रदम्
नरकक्लेशशमनं तथा दारिद्र्यमोचनम् । पुत्रप्रदमपुत्राणामस्त्रीणां स्त्रीप्रदं नृणाम्

तत्र त्वम्प्रयतः स्नात्वा सर्वाभीष्टप्रदायिनीम् ।

पुत्रीयेष्टिं च तत्तीरे कुरुष्व सुसमाहितः ॥ ५० ॥

तेन तेशतभार्यासु प्रत्येकं तनयो नृप !। एकैकस्तु भवेच्छीघ्रम्मा कुरुष्वात्र संशयम्

तथोक्तो नृपतिर्विप्रैर्ऋत्विग्भिः सपुरोहितः ।

तत्क्षणेनैव ऋत्विग्भिर्भार्याभिश्च पुरोधसा ॥ ५२ ॥

वृतोऽमात्यैश्च भृत्यैश्च यज्ञसम्भारसंयुतः । प्रययौ दक्षिणाम्भोधौगन्धमादनपर्वतम्
हनुमत्कुण्डमासाद्य तत्र सस्नौ ससैनिकः । मासमात्रंसतत्तीरे न्यवसत्स्नानमाचरत्
ततो वसन्ते सम्प्राप्ते चैत्रमासि नृपोत्तमः । इष्टिमारब्धवांस्तत्र पुत्रीयां सपुरोहितः
सम्यक्कर्माणि चक्रुस्ते ऋत्विजःसपुरोधसः । सपत्नीकस्यराजर्षेस्तथा धर्ममखस्यतु
इष्टौतस्यसमाप्तायां हनूमत्कुण्डतीरतः । पुरोहितो हुतोच्छिष्टम्प्राशयद्राजयोषितः
ततोधर्मसखोराजाहनूमत्कुण्डवारिषु । सम्यक् चकारावभृथस्नानम्भार्याशतान्वितः

ऋत्विग्भ्यो दक्षिणाः प्रादादसंख्यातास्तु भूरिशः ।

ग्रामांश्च प्रददौ राजा ब्राह्मणेभ्यो द्विजोत्तमाः ॥ ५६ ॥

सामात्यः सपरिवारः सपत्नीकःसधार्मिकः । राजाततोनिववृते पुरींस्वांप्रतिनन्दितः
ततः कतिपये काले गते दशममासिवै । शतम्भार्याः शतम्पुत्रान् सुषुवुर्गुणवत्तरान्

अथ प्रीतमनाराजा वीरोधर्मसखो महान् । स्नातःशुद्धश्चसङ्कल्प्यजातकर्माऽकरोत्तदा
गोभूतिलहिरण्यादिब्राह्मणेभ्योददौवहु । द्वौपुत्रौ ज्येष्ठभार्यायाः पूर्वजोऽवरजस्तदा
सर्वे ववृधिरे पुत्रा एकाधिकशतंद्विजाः । प्रौढेषु तेषुराजासौ तेभ्यो राज्यंविभज्यतु
दत्त्वा च प्रययौसेतुं सभार्यो गन्धमादनम् । हनुमत्कुण्डमासाद्य तपोऽतप्यतत्तत्तटे

महान् कालो व्यतीयाय राज्ञस्तस्य तपस्यतः ।

राज्ञो धर्मसखस्यास्य ध्यायमानस्य शूलिनम् ॥ ६६ ॥

ततो वहुतिथे काले गते धर्मसखो नृपः । कालधर्मं ययौ तत्र धार्मिकश्शान्तमानसः
पत्न्योऽपि तस्यराजर्षेरनुजग्मुः पतिं तदा । ज्येष्ठपुत्रःसुचन्द्रोपि संस्कृत्यपितरंततः
अकरोच्छ्राद्धपर्यन्तं कर्माणि श्रद्धयासह । राजा सभार्योवैकुण्ठम्मरणादत्र जग्मिवान्
सुचन्द्रमुख्यास्तेसर्वेराजपुत्रामहौजसः । स्वस्वराज्यम्बुभुजिरे भ्रातरस्त्यक्तमत्सराः
एवं वः कथितं विप्रा! हनूमत्कुण्डवैभवम् । राज्ञो धर्मसखस्यापिचरित्रम्परमाद्भुतम्

तत्सर्वकामसिद्ध्यर्थं स्नायात्कुण्डे हनूमतः ॥ ७२ ॥

अध्यायमेनम्पठते मनुष्यः शृणोति वा यः सुसमाहितो द्विजाः! ।

सोऽनन्तमाप्नोति सुखम्परत्र क्रीडेत सार्द्धं दिवि देववृन्दैः ॥ ७३ ॥

इतिश्रीस्कान्देमहापुराणएकाशीतसाहस्र्यां संहितायां तृतीयेब्रह्मखण्डे
सेतुमाहात्म्येहनुमत्कुण्डप्रशंसायांधर्मसखशतपुत्रावाप्तिर्नाम
पञ्चदशोऽध्यायः ॥ १५ ॥

षोडशोऽध्यायः

अगस्त्यतीर्थप्रशंसायांकक्षीवदुद्वाहोद्योगवर्णनम्

श्रीसूत उवाच

कुण्डेहनुमतःस्नात्वास्त्रयंरुद्रेणसेविते । अगस्तितीर्थंविप्रेन्द्रास्ततोगच्छेत्समाहितः
एतद्विनिर्मितं तीर्थं साक्षाद्वै कुम्भयोनिना । प्रवर्त्तमाने कलहे पुरा वै मेरुविन्ध्ययोः
निरुद्धभुवनाभोगो ववृधे विन्ध्यपर्वतः । तदा प्राणिषु सर्वेषु निरुच्छ्वासेषु देवताः
कैलासं पर्वतं गत्वा शम्भवे तद्व्यजिज्ञपन्। तदा सपार्वतीपाणिग्रहणोत्सवकौतुकी

प्रेषयित्वा वशिष्ठादीन् पार्वतीं याचितुम्मुनीन् ।

कुम्भज! त्वं निगृह्णीष्व विन्ध्याद्रिमिति सोऽन्वशात् ॥ ५ ॥

ततः सकुम्भजः प्राह भगवन्तम्पिनाकिनम् । उद्वाहवेषं ते देव न द्रक्ष्येऽहं कथंविभो!
इतिविज्ञापितःशम्भुः पुनःकुम्भजमब्रवीत् । कुम्भजोद्वाहवेषन्ते पार्वत्यासहितोह्यहम्
वेदारण्ये महापुण्येदर्शयिष्याम्यसंशयः । तद्गच्छशीघ्रं विन्ध्याद्रिं निग्रहीतुं मुनीश्वर
एवमुक्तस्ततोऽगस्त्योविन्ध्याद्रिंसनिगृह्यच । पादाक्रमणमात्रेणसमीकुर्वन्महीतलम्
चरित्वादक्षिणान्देशान्गन्धमादनमन्वगात् । सविदित्वामहर्षिस्तु गन्धमादनवैभवम्
तत्र तीर्थम्महापुण्यं स्वनाम्नानिर्ममेमुनिः । लोपामुद्रासखस्तत्र वर्ततेऽद्यापिकुम्भजः
तत्रस्नात्वाचपीत्वाचनभूयोजन्मभाग्भवेत् । इहलोकेत्रिकालेऽपि तत्तीर्थसदृशद्विजाः
तीर्थं न विद्यते पुण्यम्भुक्तिमुक्तिफलप्रदम् । सर्वाभीष्टप्रदं नृणां यत्तीर्थस्नानवैभवात्
सदीर्घतमसः पुत्रः कक्षीवान्नामनामतः । लेभे मनोरमां नाम स्वनयस्य सुताम्प्रियाम्

कक्षीवतः कथा सेयम्पुण्या पापविनाशिनी ।

तां कथां वः प्रवक्ष्यामि तच्छृणुध्वम्मुनीश्वराः !॥ १५ ॥

अस्ति दीर्घतमा नाम मुनिःपरमधार्मिकः । तस्य पुत्रःसमभवत्कक्षीवानिति विश्रुतः
उपनीतः सकक्षीवान्ब्रह्मचारीजितेन्द्रियः । वेदाभ्यासायसगुरोःकुले वासमकल्पयत्

उदङ्कस्य गुरोर्गेहे वसन्दीर्घतमः सुतः ।

सोऽध्यैष्ट चतुरो वेदान् साङ्गाञ्छास्त्राणि षट्तथा ॥ १८ ॥

इतिहासपुराणानि तथोपनिषदोऽपि च । उषित्वा षष्टिवर्षाणिकक्षीवान्गुरुसन्निधौ

प्रयास्यन्स्वगृहं विप्रा ! गुरुवे दक्षिणामदात् ।

उवाच वै गुरुं विद्वान्कक्षीवान् ब्रह्मवित्तमः ॥ २० ॥

कक्षीवानुवाच

अहं गृहम्प्रयास्यामिकुर्वनुज्ञाम्महामुने !। अवलोक्य कृपादृष्ट्या मांरक्षोदङ्कसाम्प्रतम्

उदङ्कस्त्वेवमुदितः कक्षीवन्तमथाब्रवीत् ।

उदङ्क उवाच

अनुजानामि कक्षीवन् ! गच्छ त्वं स्वगृहम्प्रति ॥ २२ ॥

उद्वाहार्थमुपायं ते वत्स! वक्ष्यामितच्छृणु । रामसेतुम्प्रयाहि त्वं गन्धमादनपर्वतम्
तत्राऽगस्त्यकृतं तीर्थं सर्वाभीष्टप्रदायकम् । भुक्तिमुक्तिप्रदं पुंसां सर्वपापनिबर्हणम्
विद्यते स्नाहि तत्र त्वं सर्वमङ्गलसाधने । त्रिवर्षं वस तत्रत्वं नियमाचारसंयुतः
वर्षेषु त्रिषु यातेषु चतुर्थे वत्सरे ततः । निर्गमिष्यति मातङ्गः कश्चित्तीर्थोत्तमात्ततः
चतुर्दन्तो महाकायः शरदभ्रसमच्छविः । तंगजं गिरिसङ्काशं स्नात्वा तत्र समारुह
आरुह्य तं गजंवत्स स्वनयस्य पुरींव्रज । चतुर्दन्तगजस्थं त्वां दृष्ट्वा शक्रमिवापरम्

राजर्षिः स्वनयो धीमान् हर्षव्याकुललोचनः ।

स्वकन्यायाः कृतं दुःखं त्यजेदेव हृदि स्थितम् ॥ २६ ॥

पुरा हि प्रतिजज्ञेसा तस्य पुत्री मनोरमा । चतुर्दन्तम्महाकायं गजं सर्वाङ्गपाण्डुरम्

आरुह्य यः समागच्छेत्समे भर्ता भवेदिति ।

स्वकन्यायाः प्रतिज्ञां तां समाकर्ण्य स भूपतिः ॥ ३१ ॥

दुःखाकुलमना भूत्वा सततम्पर्यचिन्तयत् । स्वनये चिन्तयत्येवं नारदःसमुपागमत्
तमागतम्मुनिं दृष्ट्वा राजर्षिरतिधार्मिकः । प्रत्युद्गम्य मुदायुक्तः पाद्यार्घ्याद्यैरपूजयत्
प्रणम्य नारदंराजा वचनञ्चेदमब्रवीत् । कन्येयम्मम देवर्षे ! प्रतिज्ञामकरोत्पुरा

चतुर्दन्तं महाकायं गजं सर्वाङ्गपाण्डुरम् । आरुह्ययः समागच्छेत्स मे भर्ताभवेदिति
चतुर्दन्तो महाकायो गजः सर्वाङ्गपाण्डुरः । सम्भवेदिन्द्रभवने भूतले नैव विद्यते
इयञ्चदुस्तरामेनाम्प्रतिज्ञां बालिशाऽकरोत् । इयम्प्रतिज्ञातितरांसततम्बाधतेहिमाम्

अनूढा हि पितुः कन्या सर्वदा शोकमावहेत् ।
इति तस्य वचः श्रुत्वा स्वनयं नारदोऽब्रवीत् ॥ ३८ ॥
मा विषी दस्म राजर्षे ! तस्या ईदृग्विधःपतिः ।
भविष्यत्यचिरादेव पृथिव्याम्ब्राह्मणोत्तमः ॥ ३९ ॥

कक्षीवानिति विख्यातोजामातातेभविष्यति । इत्युक्त्वानारदमुनिर्ययावाकाशमार्गतः
स्वनयस्तद्वचः श्रुत्वानारदेनप्रभाषितम् । आकाङ्क्षतेदिवारात्रं तादृग्विधसमागमम्
अतः सौम्यमहाभागकक्षीवन्बालतापस । अगस्त्यतीर्थमद्यत्वंस्नातुंगच्छत्वरान्वितः
सर्वमङ्गलसिद्धिस्ते भविष्यति न संशयः । उदङ्केनैवमुक्तोऽथ कक्षीवान्द्विजपुङ्गवः
अनुज्ञातश्चगुरुणाप्रययौगन्धमादनम् । सम्प्राप्याऽगस्त्यतीर्थञ्चतत्रसस्नौजितेन्द्रियः
क्षेत्रोपवासमकरोद्दिनमेकम्मुनीश्वरः । अपरेद्युः पुनः स्नात्वा पारणामकरोद् द्विजः
रात्रौ तत्रैव सुष्वाप कक्षीवान्धर्मतत्परः । एवं नियमयुक्तस्य तस्य कक्षीवतो मुनेः
एकेन दिवसेनोनं वर्षत्रयमथाऽगमत् । अथ वर्षत्रयस्यान्ते तस्मिन्नेवदिने मुनिः

अन्वास्य पश्चिमां सन्ध्यां सुखं सुष्वाप तत्तटे ।
याममात्रावशिष्टायां विभावर्यां महाध्वनिः ॥ ४८ ॥

उद्भूत्प्रलयाम्भोधिवीचिकोलाहलोपमः । तेन शब्देन महता कक्षीवान्प्रत्यबुध्यत
ततस्तु स्वनयो नाम राजा सानुचरो बली । मृगयाकौतुकी तत्र मथुरापतिराययौ

विनिघ्नन्स गजान् सिंहान् वराहान्महिषान् रुरून् ।
अन्यान्मृगविशेषांश्च स राजा न्यवधीच्छरैः ॥ ५१ ॥

सामात्यो मृगयासक्तोरथवाजिगजैर्युतः । अगस्त्यतीर्थसविधमाससादभटान्वितः
स राजा मृगयाश्रान्तः श्रान्तसैनिकसम्वृतः । तत्तीर्थतीरप्रान्तेषु निषसाद महीपतिः

ततः प्रभाते विमले कक्षीवान्मुनिसत्तमः ।

अगस्त्यतीर्थे स्नात्वाऽसौ सन्ध्याम्पूर्वामुपास्य च ॥ ५४ ॥

तस्य तीरे जपन्मन्त्रांस्तस्थौ नियमसंयुतः । अत्रान्तरे तीर्थवराद्गजएकोविनिर्ययौ
चतुर्दन्तो महाकायःकैलासइवमूर्त्तिमान् । ससमुत्थायतत्तीर्थादगात्कक्षीवदन्तिकम्
तमागतमुदङ्कोक्तलक्षणैरुपलक्षितम् । तदा निरीक्ष्य कक्षीवानारोढुं स्नानमातनोत्
नमस्कृत्य च तत्तीर्थं श्लाघमानो मुहुर्मुहुः । आरुरोहच कक्षीवांश्चतुर्दन्तं महागजम्
आरुह्य तञ्चतुर्दन्तं रजताचलसन्निभम् । स्वनयस्य पुरीमेव कक्षीवान्गन्तुमैच्छत
तमारूढश्चतुर्दन्तश्वेतदन्ताचलोपमम् । सवीक्ष्यनिश्चिकायैनं कक्षीवानिति भूपतिः
प्रसन्नहृदयो राजातस्यान्तिकमुपागमत् । तदाभ्याशमुपागम्यकक्षीवन्तं नृपोऽब्रवीत्

स्वनय उवाच

त्वम्ब्रह्मन्कस्य पुत्रोऽसि नाम किं चवमेवद । गजमेनं समारुह्यकुत्रवागन्तुमिच्छसि

स्वनयेनैवमुक्तस्तु कक्षीवान्वाक्यमब्रवीत् ।

कक्षीवानुवाच

पुत्रोऽहं दीर्घतमसः कक्षीवानिति विश्रुतः ॥ ६३ ॥

स्वनयस्य तु राजर्षेर्गच्छामिनगरम्प्रति । अहमुद्वोढुमिच्छामितस्यकन्याम्मनोरमाम्
चतुर्दन्तगजारूढस्तत्प्रज्ञिाञ्च पूरयन् । स्वनयस्य सुतापाणिं ग्रहीष्यामि नराधिप
तद्भाषितं समाकर्ण्य श्रोत्रपीयूषवर्षिणम् । हर्षसम्फुल्लनयनः स्वनयो वाक्यमब्रवीत्

कक्षीवन्भोः कृतार्थोऽस्मि स एव स्वनयो ह्यहम् ।
उद्वोढुमिच्छसि भवान्यस्य कन्याम्मनोरमाम् ॥ ६७ ॥

स्वागतन्ते मुनिश्रेष्ठ कक्षीवन्बालतापस । मम कन्यां गृहाणत्वं तपोधनमनोरमाम्
तया सह चरन्धर्मान् गार्हस्थ्यम्प्रतिपालय । राज्ञोक्तःसतदोवाचकक्षीवान्धर्मतत्परः

राजानं स्वनयम्प्रीतम्मथुरापुरवासिनम् ।

कक्षीवानुवाच

पिता दीर्घतमा नाम वेदारण्ये मम प्रभो !॥ ७० ॥

आस्ते तपश्चरन्सौम्यो नियमाचारतत्परः । तस्याऽन्तिकम्प्रेषयत्वं विप्रमेकंधरापते!

तथोक्तः सतदा राजास्वनयोहृष्टमानसः । अनेकसेनयासार्द्धम्प्राहिणोत्स्वपुरोधसम्
विप्रं सुदर्शनं नाम वेदारण्यस्थलम्प्रति । सुदर्शनः समादिष्टः स्वनयेन नृपेण सः
महत्या सेनया सार्धम्प्रययौ वेदकाननम् । तत्रोटजे समासीनं तं दीर्घतमसम्मुनिम्
तपश्चरन्तमासीनं ध्यायन्वेदाटवीपतिम् । पुरोहितो ददर्शाथ जपन्तम्मन्त्रमुत्तमम्
प्रणाममकरोत्तस्मै मुकये स सुदर्शनः । उवाच दीर्घतमसम्मुनिम्प्रह्लादयन्निव

सुदर्शन उवाच

कच्चित्ते कुशलम्ब्रह्मन्कच्चित्ते वर्धते तपः । आश्रमे कुशलं कच्चित्कच्चिद्धर्मे सुखं वद
पृष्टः सुदर्शनेनैवं मुनिर्दीर्घतमास्तदा । सुदर्शनमुवाचेदमर्घ्यादिविधिपूर्वकम् ॥

दीर्घतमा उवाच

सर्वत्र कुशलम्ब्रह्मन् सुदर्शन महामते !। मम वेदाटवीनाथ कृपया नाऽशुभं क्वचित्
तवापि कुशलं ब्रह्मन् ! किं सुखागमनं तथा । किं वागमनकार्यन्ते सुदर्शन ममाश्रमे
स्वनयस्य पुरोधास्त्वं खलु वेदविदाम्वरः । तं विहाय महाराजं मधुरापुरवासिनम्
महत्या सेनया सार्धं किमर्थं त्वमिहागतः । इत्युक्तो दीर्घतमसा तदानीं ससुदर्शनः
उवाच तम्महात्मानम्मुनिं ज्वलिततेजसम् । सर्वत्र मे सुखम्ब्रह्मन्भवतः कृपया सदा
भगवन्!स्वनयोराजासाष्टाङ्गंप्रणिपत्यतु । त्वाम्प्राहप्रश्रितंवाक्यम्मन्मुखेनश्शृणुष्वतत्

स्वनय उवाच

कक्षीवांस्ते सुतोब्रह्मन् !गन्धमादनपर्वते । स्नानं कुर्वन्नगस्त्यस्य तीर्थेसम्प्रतिवर्तते
तस्य रूपं तपोधर्ममाचारान्वैदिकांस्तथा । वेदशास्त्रप्रवीणत्वमभिजात्यश्रुतादृशम्
लोकोत्तरमिदं सर्वं विज्ञायतवनन्दने । मनोरमां सुतां तस्मै दातुमिच्छाम्यहम्मुने
मृगयाकौतुकी चाहं गन्धमादनपर्वतम् । आगतो मुनिशार्दूल! वर्त्ते युष्मत्सुतान्तिके
पित्रनुज्ञां विना नाऽहमुद्वहेयं सुतांतव । इति ूते तव सुतः कक्षीवान्मुनिसत्तम
तद्भवान्मत्सुतां तस्मै दातुं मेऽनुग्रहं कुरु । अप्रेषयं समीपं ते सेनया च सुदर्शनम्

सुदर्शन उवाच

इतिमाम्भगवन्राजाप्राहिणोत्तवसन्निधिम् । तद्भवाननुमन्यस्वराज्ञस्तस्यचिकीर्षितम्

श्रीसूत उवाच

इत्युक्त्वा विरराामाथ स्वनयस्य पुरोहितः । ततोदीर्घतमाःप्राहस्वनयस्यपुरोहितम्

दीर्घतमा उवाच

सुदर्शन! भवत्वेवंकथितं स्वनयेन यत् । ममाभीष्टतमं ह्येतत्पाणिग्रहणमङ्गलम्
आगमिष्याम्यहं विप्रगन्धमादनपर्वतम् । इत्युक्त्वासमुनिर्विप्राः स चदीर्घतमामुनिः
वेदाटवीपतिं नत्वा भक्तिप्रवणचेतसा । सुदर्शनेन सहितः सेतुमुद्दिश्य निर्ययौ
षड्भिर्दिनैर्मुनिः पुण्यं प्रययौगन्धमादनम् । अगस्तितीर्थतीरञ्चगत्वादीर्घतमामुनिः
अथ पुत्रं ददर्शाग्रे कक्षीवन्तम्महामुनिः । कक्षीवान्पितरं दृष्ट्वा ववन्दे नाम कीर्तयन्
ततोदीर्घतमायोगीस्वाङ्कमारोप्यतंसुतम् । मूर्ध्न्युपाघ्रायसस्नेहंसस्वजेपुलकाकुलः
कुशलम्परिप्रच्छतद्दादीर्घतमा ऋषिः । सर्वेवेदास्त्वयाऽधीताः कक्षीवन्किमुवत्सक
शास्त्राण्यपाठीः कित्वंवावत्ससर्वंवदस्वमे । इतिपृष्टःस्वपित्रासत्सर्वंनिवृत्तमब्रवीत्

श्रीस्कान्देमहापुराण एकाशीतिसाहस्र्यां संहितायां तृतीयेब्रह्मखण्डे
सेतुमाहात्म्येऽगस्त्यतीर्थप्रशंसायां कक्षीवदुद्वाहोद्योगोनाम
षोडशोऽध्यायः ॥ १६ ॥

सप्तदशोऽध्यायः

कक्षीवद्विवादनिष्पत्तिनिरूपणम्

श्रीसूत उवाच

पुनरित्याह कक्षीवान्पितरन्तं मुनीश्वराः । ततोदङ्केन गुरुणा प्रेषितोऽहमिहाधुना
समागतोऽस्मि तीर्थेऽस्मिन्नागस्त्ये मुनिसत्तम !।
स्वनयस्य सुतोद्वाहसिद्ध्यर्थं गुरुचोदितः ॥ २ ॥
उपायन्तं निगदितमत्र कुर्वन्निवर्तिषम् । वर्षत्रयावसाने मामुद्वाहोपायसंयुतम्

स्वनयोत्रैवतिष्ठन्तमाससादयदृच्छया। सचमामेत्यकन्यान्तेदास्यामीतिवचोऽब्रवीत्
ततोऽस्मदनुरोधेन त्वामाह्वयदयन्नृपः । इतीरयित्वा पितरं कक्षीवान्विररामसः
सुदर्शनोऽथविप्रेन्द्रःपुरोधाः स्वनयस्यसः। प्रययौ राजसविधं स्वनयायनिवेदितुम्
राजाऽनन्तं समासाद्य स्वनयं स सुदर्शनः। प्राप्तं निवेदयामास तं दीर्घतमसम्मुनिम्
ततः सराजास्वनयोमुनिंप्राप्तंपुरोहितात्। श्रुत्वाविनिर्ययौद्रष्टुं सहसापटमण्डपात्
अगस्त्यतीर्थतीरेतं सपुत्रमृषिसत्तमम्। ददर्श राजा स्वनयो ब्रह्माणमिवदेवराट्
ववन्दे दीर्घतमसश्चरणौ लोकमङ्गलौ। उत्थाप्य नृपतिं विप्रास्तदा दीर्घतमा मुनिः
आशिषं प्रयुयोजाथ स्वनयाय नृपायसः। अत्रान्तरे समायात उदङ्कोऽपिमहानृषिः
रामसेतौधनुष्कोटौस्नातुंशिष्यगणैर्वृतः। लक्षसङ्ख्यामुनिगणस्तेनसाकंमुनीश्वराः

उदङ्कोऽगस्त्यतीर्थेऽस्मिन् स्नातुं सम्प्राप्तवान्मुनिः।
उदङ्कमागतं दृष्ट्वा कक्षीवान्प्रणनाम तम्॥ १३॥

अकरोदाशिषं विप्रः शिष्यायाथ गुरुस्तदा। अथ दीर्घतमाविप्रस्तमुदङ्कं महामुनिः
कुशलं परिपप्रच्छ स प्रीतम्मुनिपुङ्गवम्। उभौतौ मुनिशार्दूलौ सर्वलोकेषु विश्रुतौ
कथयामासतुस्तत्र कथाः पापप्रणाशिनीः। अथ राजा ततोदङ्कं प्रणनाममुनीश्वरम्
उदङ्कोऽप्याशिषन्तस्मैप्रायुङ्क्तस्वनयायवै। राजाऽथस्वनयःप्रीतस्तत्रवाक्यमभाषत
मुनिंतंदीर्घतमसं विवाहः क्रियतामिति। तथास्त्वित्यवदत्सोपितदादीर्घतमा मुनिः
श्व एव क्रियतां राजन्सुमुहूर्ते महामते॥ अत्रैव पाणिग्रहणं क्रियतां गन्धमादने॥
तस्मादिहाऽऽनयक्षिप्रंकन्यामन्तःपुरन्तथा। इत्युक्तःस्वनयोराजागत्वास्वपटमण्डपम्
आहूय शतसङ्ख्याकान्वृद्धान्वर्षवरांस्तदा। आनेतुं प्रेषयामास कन्यामन्तःपुरन्तथा॥
ते वर्षवरमुख्यास्तु स्वनयेन प्रचोदिताः। मनोजवान् समारुह्य वाजिनो मथुरां ययुः
गत्वा चान्तःपुरन्तूर्णं वृत्तंसर्वं निवेद्य च। कन्यययाऽन्तःपुरेणापि सहिताः पुनराययुः
ततः परस्मिन्दिवसे शुभे दीर्घतमाऋषिः। गोदानादीनि पुत्रस्य विधिवन्निरवर्तयत्
निर्वृत्तेष्वथ कक्षीवान्गोदानादिषुकर्मसु। उद्वोढुं राजतनयां पित्रा च गुरुणा सह
चतुर्दन्तं महाकायं गजं सर्वाङ्गपाण्डुरम्। आरुह्य हर्षसंयुक्तो द्वितीय इवदेवराट्

मनोरमायाः कन्यायाःपूरयंश्चमनोरथम्। ब्राह्मणैर्बहुसाहस्रैः सहितः स्वस्तिवाचकैः
तोरणालङ्कृतद्वारं राजर्षेः पटमण्डपम्। कृतमङ्गलकृत्योसौ कक्षीवान्मुदितो ययौ
ततः स्वनयकन्या सा कृतमङ्गलभूषणा। चतुर्दन्तम्महाकायं श्वेतदन्तगजस्थितम्
कक्षीवन्तं समायातं दृष्ट्वास्वोद्वाहनोत्सुकम्। प्रतिज्ञामत्कृतेदानीं निर्वृत्तेतिमुदं ययौ
कक्षीवान्दीर्घतमसा तथोदङ्केन संयुतः। पटाकारबहिर्द्वारं क्रमाद्राज्ञः समाययौ॥
स्वनयस्तु ततो दृष्ट्वा कक्षीवन्तं समागतम्। प्रत्युज्जगाम सहितः सुदर्शनपुरोधसा
कक्षीवतोवरस्याथ कन्यकापरिचारिकाः। राजतैःस्वर्णपात्रैश्च चक्रुर्नीराजनाविधिम्
स्वनयेनसमाहूतो ब्राह्मणैःपरिवारितः। प्रविवेशाथलक्ष्मीवान्कक्षीवान्राजमन्दिरम्
ततो वरेण सहितं तन्दीर्घतमसम्मुनिम्। सोदङ्कमनयद्राजा स्वगृहं विनयान्वितः
उदङ्कदीर्घतमसोरर्घ्यञ्च प्रददौ नृपः। अलङ्कृते प्रपामध्ये वस्त्रचामरतोरणैः॥
वरोदीर्घतमाश्चान्येसोदङ्का मुनयस्तदा। न्यषीदन्स्वनयश्चापिसामात्यःसपुरोहितः
ततो दुहितरंकन्यां सुकेशींताम्मनोरमाम्। भूषणालङ्कृतांगात्रे दिव्यवस्त्रधरांशुभाम्
बिम्बोष्ठीं चारुसर्वाङ्गीं पीनोन्नतपयोधराम्। प्रपाया मध्यमनयन्महाजनसमाकुलम्
ततो वरस्यकण्ठेसा मालाञ्चम्पकनिर्मिताम्। निवेशयामासशुभा जनमध्ये मनोरमा
उदङ्कस्ततआगत्य प्रतिष्ठाप्यानलंस्थले। कृत्वाग्निमुखपर्यन्तं लाजाहोमादिकन्तथा
पाणिमग्राहयत्तस्याः कन्यायाश्च वरेणतु। उदङ्कः सर्वकर्माणि कारयामास तत्र वै
वरवध्वोस्तदाविप्राः प्रायुञ्जततदाशिषः। ततःस राजा स्वनयो वरंदीर्घतमोमुनिम्
उदङ्कं वरपक्षीयान्स्वपक्षीयांस्तथाद्विजाः। त्रिलक्षं ब्राह्मणानन्नैर्भोजयामास षड्रसैः
ततः सम्भावयामास ताम्बूलाद्यैरनेकधा। अथामन्त्र्य मुनिश्रेष्ठमुदङ्कः स्वाश्रमं ययौ
अन्ये च ब्रह्मणाः सर्वेस्वदेशान्प्रययुस्तदा। एवंविवाहे निर्वृत्ते कक्षीवद्राजकन्ययोः
प्रविश्यागस्त्यतीर्थं स तिरोधत्त गजोत्तमः। ततोदीर्घतमा विप्रः पुत्रेणस्नुषयासह
अगस्त्यस्यमहातीर्थे स्नानं कृत्वेष्टदायिनि। श्लाघमानश्चतत्तीर्थंसर्वलोकेषुविश्रुतम्
प्रयातुं स्वाश्रमम्पुण्यं वेदारण्यम्मनोदधे। राजानञ्च तमागन्तुमापृच्छन्मुनिसत्तमः
स्वनयोपितदाराजास्वदुहित्रे मुदान्वितः। ददौशतसहस्राणि स्वर्णानिस्त्रीधनन्तदा

गवां सहस्रं प्रददौ दासीनाञ्च सहस्रकम् । ग्रामम्पञ्चशतञ्चापि ददौ दुहितृवत्सलः
दिव्यवस्त्रायुतञ्चाऽपि शतं भूषणपेटिकाः ।
हारमालासहस्रञ्च ददौ दुहितृसौहृदात् ॥ ५२ ॥
एतत्सर्वं समादाय सपुत्रः सस्नुषोमुनिः । राज्ञा च समनुज्ञातः प्रययौ वेदकाननम्
वेदारण्यंसमासाद्य तदादीर्घतमा मुनिः । उवास स सुखं विप्राः पुत्रेण स्नुषया सह
सेवन्वेदाटवीनाथं भुक्तिमुक्तिफलप्रदम् । न्यवसत्सचिरंकालं कक्षीवानपिभार्यया
स्वनयोऽपि स राजर्षिः स्नात्वा कुम्भजनिर्मिते ।
तत्र तीर्थे महापुण्ये सहितः सर्वसैनिकैः ॥ ५६ ॥
अन्तःपुरं समादाय मुदितः स्वपुरंययौ । अगस्त्यतीर्थमाहात्म्यादेवंकक्षीवतोमुनेः
अनन्यसुलभो विप्रा ! विवाहः समजायत ।

श्रीसूत उवाच

इतिहासस्त्वयं पुण्यो वेदसिद्धो मुनीश्वराः !॥ ५८ ॥
धन्यो यशस्य आयुष्यः कीर्तिसौभाग्यवर्द्धनः ।
श्रोतव्यः पठितव्योऽयं सर्वथा मानवैर्द्विजाः ॥ ५६ ॥
पठतां शृण्वतांचेममितिहासंपुरातनम् । नेहामुत्रापिवाक्लेशोदारिद्र्यञ्चापिनोभवेत्
इतिश्रीस्कान्देमहापुराणएकाशीतिसाहस्र्यां संहितायांतृतीयेब्रह्मखण्डे
सेतुमाहात्म्येकक्षीवद्विवादनिष्पत्तिर्नामसप्तदशोऽध्यायः ॥ १७ ॥

अष्टादशोऽध्यायः

रामतीर्थप्रशंसायांधर्मपुत्रमिथ्याकथनदोषशान्तिवर्णनम्

श्रीसूत उवाच

कुम्भसम्भवतीर्थेऽस्मिन्विधायाभिषवन्नरः । रामकुण्डंततःपुण्यं गच्छेत्पापविमुक्तये
रघुनाथसरः पुण्यं द्विजाः! पापहरं तथा । रघुनाथसरस्तीरे कृतो यज्ञोऽल्पदक्षिणः
सम्पूर्णफलदो भूयात्स्वाध्यायोऽपिजपस्तथा । रघुनाथसरस्तीरेमुष्टिमात्रमपिद्विजाः
दत्तञ्चेद्वेदविदुषे तदनन्तगुणं भवेत् । रामतीर्थं समुद्दिश्य वक्ष्यामि मुनिपुङ्गवाः
इतिहासं महापुण्यं सर्वपातकनाशनम् । सुतीक्ष्णनामा विप्रेन्द्रा मुनिर्नियतमानसः
अगस्त्यशिष्योरामस्यचरणाब्जविचिन्तकः । रामचन्द्रसरस्तीरे तपस्तेपेसुदुष्करम्
जपन्नष्टाक्षरं मन्त्रं रामचन्द्राधिदैवतम् । नित्यं स पञ्चसाहस्रं मन्त्रराजमतन्द्रितः
जजापकुर्वन्स्नानञ्च रघुनाथसरो जले । भिक्षाशीनियताहारो जितक्रोधोजितेन्द्रियः
एवं सुतीक्ष्णो विप्रेन्द्राः! बहुकालमवर्तत । ततःकदाचित्समुनी रामंध्यायन्सदाहृदि
तुष्टाव सीतासहितं रामचन्द्रं सभक्तिकम् ।

सुतीक्ष्ण उवाच

नमस्ते जानकीनाथ! नमस्ते हनुमत्प्रिय !॥ १० ॥
नमस्ते कौशिकमुनेर्यागरक्षणदीक्षित । नमस्ते कौशलेयाय विश्वामित्रप्रियाय च
नमस्ते हरकोदण्डभञ्जकाऽमरसेवित !। मारीचान्तक! राजेन्द्र ! ताटकाप्रणनाशन ॥
कबन्धारे! हरे तुभ्यं नमो दशरथात्मज !। जामदग्न्यजिते तुभ्यं खरविध्वंसिने नमः
नमः सुग्रीवनाथाय नमो बालिहरायते । विभीषणभयक्लेशहारिणे मलहारिणे ॥
अहल्यादुःखसंहर्त्रे नमस्ते भरताग्रज ! । अम्भोधिगर्वसंहर्त्रे तस्मिन्सेतुकृते नमः
तारकब्रह्मणे तुभ्यं लक्ष्मणाग्रज ते नमः । रक्षः संहारिणे तुभ्यं नमो रावणमर्द्दिने
कोदण्डधारिणेतुभ्यंसर्वरक्षाविधायिने । इतिस्तुवन्मुनिःसोयंसुतीक्ष्णोराममन्वहम्

निनाय कालमनिशं रामचन्द्रनिषण्णधीः । एवमभ्यसतस्तस्य राममन्त्रं षडक्षरम्
स्तुवतो रामचन्द्रञ्चस्तोत्रेणानेन सुव्रताः । तीर्थे च रघुनाथस्यकुर्वतः स्नानमन्वहम्
अभवन्निश्चला भक्ती रामचन्द्रेऽतिनिर्मला । अभूदद्भुतविज्ञानं प्रत्यगात्मैकलक्षणम्
अनधीतत्रयीज्ञानं तथैवाऽश्रुतवेदनम् । परकायप्रवेशेच सामर्थ्यमभवद्द्विजाः ॥
आकाशगमने शक्ती कलावैदग्ध्यमेवच । अश्रुतानाञ्च शास्त्राणामभिज्ञानंविनागुरुम्
गमनं सर्वलोकेषु प्रतिघातविवर्जितम् । अतीन्द्रियार्थद्रष्टृत्वं देवैः सम्भाषणन्तथा
पिपीलिकादिजन्तूनां वार्ताज्ञानमपिद्विजाः । ब्रह्मविष्णुमहादेवलोकेषुगमनन्तथा
चतुर्दशेषु लोकेषु निर्यत्तगमनन्तथा । एतान्यन्यानिसर्वाणि योगिलभ्यानिसत्तमाः
सुतीक्ष्णस्याऽभवन्विप्रा रामतीर्थनिषेवणात् । एवं प्रभावंतत्तीर्थं महापातकनाशनम्
महासिद्धिकरं पुण्यमपमृत्युविनाशनम् । भुक्तिमुक्तिप्रदं पुंसां नरकक्लेशनाशनम्
रामभक्तिप्रदंनित्यं संसारोच्छेदकारणम् । अस्य तीरे महल्लिङ्गं लोकानुग्रहकाम्यया
रामतीर्थेमहापुण्येस्नात्वातल्लिङ्गदर्शनात् । नराणांमुक्तिरेवस्यात्किमुतान्याविभूतयः
तत्रस्नात्वाशिवंदृष्ट्वाधर्मपुत्रःपुराद्विजाः । अनृतोक्तिसमुद्भूतदोषान्मुक्तोऽभवत्क्षणात्

ऋषय ऊचुः

असत्यमुदितं कस्माद्धर्मपुत्रेण सूतज! । यद्दोषशान्तये सस्नौ रामतीर्थेऽतिपावने

श्रीसूत उवाच

युष्माकमृषयोवक्ष्ये यथोक्तमनृतं रणे । छलेन धर्मपुत्रेण यत्नष्टं रामतीर्थके
अन्योन्यं पाण्डवा विप्रा! धर्मपुत्रादयः पुरा । धृतराष्ट्रस्य पुत्राश्च दुर्योधनमुखास्तदा
महान्तं वैरमासाद्य राज्यार्थं विप्रसत्तमाः । महत्या सेनया सार्द्धं कुरुक्षेत्रे समेत्यच
अयुध्यन्समरे वीराः समरेष्वनिवर्तिनः । युद्धंकृत्वा दशदिनं गाङ्गेयः पतितो भुवि
ततः पञ्चदिनं भूयो धृष्टद्युम्नेन वीर्यवान् । आचार्योयुयुधे द्रोणो महाबलपराक्रमः

अनेकास्त्राणि शास्त्राणि द्रोणाचार्यो महाबली ।
विसृजन्पाण्डवानीकं पीडयामास वीर्यवान् ॥ ३७ ॥

अथदिव्यास्त्रविच्छूरो धृष्टद्युम्नो महाबली । अभिनद्बाणवर्षेण द्रोणसेनामनेकधा

धृष्टद्युम्नन्तदा द्रोणः शरवर्षैरवाकिरत् । पार्थसेना तथा द्रोणबाणवर्षातिपीडिता
दश दिक्षु भयाक्रान्ता विद्रुताद्विजसत्तमाः । ततोऽर्जुनो रणे द्रोणंयुयुधेरथिनांवरः
रणप्रवीणयोस्तत्र विजयद्रोणयोरणे । द्रष्टुं समागतैर्देवैरभूद्व्योमनिरन्तरम्
द्रोणफाल्गुनयोर्विप्रानास्तियुद्धोपमाभुवि । सामर्षयोस्तदाचार्यशिष्ययोरभवद्रणम्
द्रोणफाल्गुनयोर्युद्धं द्रोणफाल्गुनयोरिव । बहुमेनेऽथ मनसा द्रोणोऽर्जुनपराक्रमम्
ततो द्रोणोमहावीर्यं प्रियशिष्यंसफाल्गुनम् । विहायपाञ्चालबलंसमयुध्यतवीर्यवान्
सविंशतिसहस्राणि दशतत्रायुतानिच । द्रोणाचार्योऽवधीराज्ञांयुद्धेसगजवाजिनाम्
धृष्टद्युम्नोथ कुपितो द्रोणमभ्यहनच्छरैः । द्रोणश्च पट्टिशंगृह्य धृष्टद्युम्नम ताडयत्
शरैर्विव्याध तंयुद्धे तीक्ष्णैरग्निशिखोपमैः । पराङ्मुखो भवत्तत्र धृष्टद्युम्नः शराहतः
ततो विरथमागत्य धृष्टद्युम्नंवृकोदरः । स्वंस्यन्दनंसमारोप्य द्रोणाचार्यमथाब्रवीत्
स्वकर्मभिरसन्तुष्टाः शिक्षितास्त्राद्विजाधमाः । नयुद्ध्येच्चरन्यदिक्रूराननश्येरन्नृपारणे
अहिंसाहि परोधर्मो ब्राह्मणानांसदास्मृतः । हिंसयादारपुत्रादीन्रक्षन्तेव्याधजातयः
हिंसित्वमेकपुत्रार्थे युद्धेस्थित्वा बहून्नृपान् । सचापितेसुतोब्रह्मन्हतः शेतेरणाजिरे

तथाऽपि लज्जा ते नास्ति शोकोऽपीह न जायते ।
वचनं त्विति भीमस्य सत्यं श्रुत्वा युधिष्ठिरात् ॥ ५२ ॥

निजायुधंसतत्याजपपातस्यन्दनोपरि । योगवित्प्रायमातस्थेद्रोणाचार्यस्तदाद्विजाः
तदन्तरमपरिज्ञाय द्रोणाचार्यस्य पार्षदः । खड्गपाणिः शिरश्छेत्तुमभ्यधावद्रणाजिरे

वार्यमाणोऽपि पार्थाद्यैस्तच्छिरश्छेत्तुमुद्ययौ ।
योगवित्त्वाद्द्रोणमूर्ध्ना ज्योतिरूर्ध्वं दिवं ययौ ॥ ५१ ॥

दृष्टं कृष्णार्जुनकृपधर्मपुत्रादिभिर्मृधे । द्रोणस्यास्यगतप्राणाच्छरीरादच्छिनच्छिरः
भारद्वाजे हते युद्धे कौरवाः प्राद्रवन्भयात् । जहृषुः पाण्डवाविप्राधृष्टद्युम्नादयस्तदा
सेनांतां विद्रुतान्दृष्ट्वा द्रोणिरूचे सुयोधनम् । एतद्द्रवतिकिंसैन्यं त्यक्तप्रहरणन्नृप
तदा दुर्योधनो राजा स्वयं वक्तुमशक्नुवन् । युद्धे द्रोणवधंवक्तुं कृपाचार्यमचोदयत्

द्रोणयेऽथ कृपाचार्यो वधमूचे गुरोस्तदा ।

कृप उवाच

अश्वत्थामंस्तव पिता ब्रह्मास्त्रेण मृधेरिपून् ॥६० ॥
हत्वा निनाय सदनं यमस्य शतशोबली । दुराधर्षतमं दृष्ट्वा तद्वीर्यं केशवस्तदा
पाण्डवान्प्राह विप्रेन्द्रा ! वाक्यं वाक्यविशारदः ।

केशव उवाच

द्रोणञ्जेतुमुपायोऽस्ति पाण्डवा युधि दुर्जयम् ॥ ६२ ॥
अश्वत्थामा तवसुतो हतोद्रोण! मृधेऽधुना । सत्यवादी वदेदेवंयदिप्रामाणिकोजनः
द्रोणा निवर्ततरणात्तशत्यक्त्वायुधं क्षणात् । अतएनां मृषांवार्तांधर्मराजोऽधुनावदेत्
नान्यथा शक्यतेजेतुंद्रोणोयुद्धविशारदः । धर्माज्जेतुमशक्यश्चेद्धर्मंत्यक्त्वाप्यरिञ्जयेत्
इति केशववाक्यंतच्छ्रुत्वा भीमःपृथासुतः । पितरन्तेसभभ्येत्यमिथ्यावाक्यमभाषत
अश्वत्थामा हतो द्रोण युद्धेऽत्रपतितोधुना । द्रोणचार्योपितद्वाक्यममन्यतयथार्थतः
अविश्वस्य पुनः सोऽथ धर्मजम्प्राप्य चाऽब्रवीत् ।
धर्मात्मज! मृधेसूनुरश्वत्थामा ममाऽधुना ॥ ६८ ॥
हतःकिन्त्वंवदस्वाद्यसत्यवादीभवान्मतः । धर्मपुत्रोसत्यभीरुरासीच्चारिजयोत्सुकः
किंकर्तव्यं मयाद्येति दोलालोलमना अभूत् । सदृष्ट्वाभीमनिहतमश्वत्थामाभिधंगजम्
अश्वत्थामा हतो युद्धेभीमेनाद्य रणेमहान् । इत्थं वचोबभाषेऽसौधर्मपुत्रश्छलोक्तितः
तच्छ्रुत्वा त्वत्पिताशस्त्रं त्यक्त्वा युद्धान्न्यवर्तत । अथ धर्मसुतःप्राहपरवारणइत्यपि
त्यक्तशस्त्रं न गृह्णीयां युद्धेपुनरितिस्मसः । प्रतिजज्ञे तव पितावत्स! द्रोणोबलीपुरा
अतः शस्त्रं न जग्राह प्रतिज्ञाभङ्गकातरः । धृष्टद्युम्नं त दादृष्ट्वापिता ते मृत्युमात्मनः
मत्वा प्रायोपवेशेनरथोपस्थेसयोगवित् । अशयिष्टसमाधिस्थःप्राणानायम्यवाग्यतः
ततो निर्भिद्यमूर्धानंतत्प्राणनिर्ययुःक्षणात् । तदामृतस्यद्रोणस्यवत्सखड्गेनताच्छरः
केशान्गृहीत्वा हस्तेनधृष्टद्युम्नोऽच्छिनद्युधि ।
मावधीरिति पार्थाद्याः प्रोचुः सर्वे च सैनिकाः ॥ ७७ ॥
सवर्निवार्यमाणोऽपि त्वत्तातं पार्षदोऽवधीत् ।

श्रीसूत उवाच

पितरं निहतं श्रुत्वा रुदन्द्रौणिश्चिरन्द्विजाः ॥ ७८ ॥
कोपेन महतातत्र ज्वलन्वाक्यमथाब्रवीत् । अनृतम्प्रोच्य पितरं न्यस्तशस्त्रञ्चकारयः
पितरम्मेद्यतम्पार्थमप्यन्यानथपाण्डवान् । गृहीत्वाकेशपाशंयस्त्यक्तशस्त्रशिरोऽहनत्
छद्मना पार्षदन्तञ्च हनिष्याम्यचिरादहम् । कृष्णेनसह पश्यन्तु पाण्डवामत्पराक्रमम्
इति द्रौणिर्द्विजास्तत्र प्रतिजज्ञे भयङ्करम् । ततोऽस्तङ्गतआदित्येराजानः सर्वएव ते
सेनये निहते द्रोणे प्राविशन्पटमण्डपम् । अष्टादशदिनैरेवं निवृत्तमभवद्रणम्
शल्यं कर्णं तथान्यांश्च दुर्योधनमुखांस्ततः । धार्तराष्ट्रान्निहत्याजौधर्मराजोयुधिष्ठिरः
स्वीयानां च परेषां च मृतानां साम्परायिकम् ।
अकरोद्विधिवद्विप्राः सार्द्धं धौम्यादिभिर्द्विजैः ॥ ८५ ॥
वन्दित्वा धृतराष्ट्रञ्च सर्वे सम्भूय पाण्डवाः । धृतराष्ट्राभ्यनुज्ञाता हतशिष्टजनैर्वृताः
सम्प्राप्य हस्तिनपुरंप्राविशंस्ते स्वमन्दिरम् । ततः कतिपयाहःसुगतेषुकिलनागराः
धौम्यादिमुनिभिः सार्द्धंधर्मजस्यमहात्मनः । राज्याभिषेचनं कर्तुंप्रारभन्तमुनीश्वराः
राज्याभिषेचनेतस्य प्रवृत्ते धर्मजस्य तु । अशरीरा ततोवाणी बभाषे धर्मनन्दनम्
धर्मपुत्र महाभाग रिपूणामपिवत्सल । राज्याभिषेकं माकार्षीर्नार्हस्त्वं राज्यपालने
यतस्त्वंछद्मनाऽऽचार्यमुक्त्वा सत्यं द्विजोत्तमम् । न्यस्तशस्त्रंरणेराजन्नघातयदलज्जकः
अतस्ते पापबाहुल्यं विद्यते धर्मनन्दन !। प्रायश्चित्तमकृत्वाऽस्य राज्यपालनकर्मणि
नार्हता विद्यते यस्मात्प्रायश्चित्तमतश्चर । इत्युक्त्वा विररामाऽथ सातुवागशरीरिणी
ततो धर्मसुतो राजा तद्वाक्यभृशकातरः । मूढोऽहं साहसीक्रूरः पिशुनोलोभमोहितः
तुच्छराज्याभिलाषेण कृतवान्पापमीदृशम् ।
एतत्पापविशुद्ध्यर्थं किं करिष्यामि का गतिः ॥ ९५ ॥
किंवादानंप्रदास्यमि कुत्रयास्यामि वा पुनः । इतिशोकसमाविष्टेतस्मिन्राजनिधर्मजे
कृष्णद्वैपायनो व्यासस्समायातस्तदन्तिकम् ।
ततोऽभिवन्द्य तं व्यासं प्रत्युत्थाय कृताञ्जलिः ॥ ९७ ॥

सम्पूज्याऽर्घ्यादिनाविप्रा भक्तियुक्तेन चेतसा । अदेहवाचायत्प्रोक्तंतत्सर्वमखिलेनमः
व्यासायश्रावयामास दुःखितोधर्मनन्दनः । श्रुत्वातदखिलं वाक्यंधर्मजस्यमहामुनिः
ध्यात्वा तु सुचिरंकालं ततो वक्तुं प्रचक्रमे ।

व्यास उवाच

माऽकार्षीस्त्वं भयं राजन्नुपायं प्रब्रवीमि ते ॥ १०० ॥
अस्य पापस्य शान्त्यर्थं श्रुत्वाऽनुष्ठीयतान्त्वया ।

युधिष्ठिर उवाच

किं तद् ब्रूहि महायोगिन्पाराशर्य! कृपानिधे !॥ १०१ ॥
येन मे पापनाशः स्यादचिरात्तद्वदाऽधुना ।

व्यास उवाच

दक्षिणाम्भोनिधौ सेतौ गन्धमादनपर्वते ॥ १०२ ॥
रामसेतौ महाराज! रामतीर्थमितिश्रुतम् । अस्ति पुण्यं सरःसिद्धंमहापातकनाशनम्
यस्य दर्शनमात्रेण महापातककोटयः । प्रयान्ति विलयं सद्यस्तमःसूर्योदये यथा
रामतीर्थं यदा पश्येत्स्वयं रामेण निर्मितम् । तदैव ब्रह्महत्याया मुच्यते नात्र संशयः
तत्रगत्वामहाराज रामतीर्थे विमुक्तिदे । स्नाहितेपापशुद्धिः स्याद्राज्यरक्षार्हतापि च
दानं कुरुष्व तत्तीरे गोभूमितिलवाससाम् । सुवर्णरजतानाञ्च दानं कुरु युधिष्ठिर
अवश्यमेतत्पापानां शुद्धिस्तेनाऽचिराद्भवेत् ।

श्रीसूत उवाच

व्यासेन धर्मपुत्रोऽयमेवमुक्तो द्विजोत्तमाः !॥ ८ ॥
तत्क्षणेनैव धौम्येन सहितः सानुजस्तदा । सहदेवं प्रतिष्ठाप्य राज्येधर्मात्मजस्तदा
रामसेतुं समुद्दिश्य प्रतस्थे वाहनं विना । दिनैः कतिपयैरेव रामसेतुं जगाम सः
रामतीर्थं समासाद्य धौम्येन सहपाण्डवः । पुरोहितोक्तमार्गेण सङ्कल्प्यविधिपूर्वकम्
सस्नौरामसरस्तीर्थे पुण्येपापविनाशने । स्नात्वाचम्यविशुद्धात्माक्षेत्रपिण्डम्प्रदायच
व्यासोक्ताखिलदानानि प्रददौ स युधिष्ठिरः । मासमेकं निराहारः सस्नौतत्रसधर्मजः

प्रत्यहंचददौ दानंवित्तलोभं विनाद्विजाः । एकमासे गतेत्वेवं कस्मिंश्चिद्दिवसे ततः
आह धर्मात्मजं वाणी पुनरप्यशरीरिणा । राजंस्ते विलयं यातं सर्वपापं युधिष्ठिर!
छलेनाऽसत्यवचनादाचार्यस्य वधेन यः । दोषस्ते समभूत्पूर्वंसोऽपि नष्टः परन्तप
याहिस्वनगरंराजन्गत्वा पालयमेदिनीम् । अभिषेचयचात्मानंराज्यरक्षार्हताऽस्तिते
इत्युक्त्वाविररामाथसापिवागशरीरिणी । ततोधर्मात्मजः प्रीतस्तामुद्दिश्यदिशम्प्रति
नमस्कृत्वाऽशरीरिण्यै तस्यैवाचे सहानुजः । प्रययौ हस्तिनपुरं सुप्रीतेनान्तरात्मना
अभिषिक्तोऽथ राज्येऽसौ पालयामास मेदिनीम् ।
इत्थं धर्मात्मजो विप्रा! रामतीर्थे निमज्जनात् ॥ १२० ॥
गतपापो विशुद्धात्मा योग्योऽभूद्राज्यरक्षगे । एवं वःकथितंचित्रं रामतीर्थस्यवैभवम्
सर्वपापहरं पुण्यंभक्तिमुक्तिप्रदायकम् । यत्रस्नानाद्विमुक्तोऽभून्मिथ्यादोषात्सधर्मजः
पठन्तियेऽध्यायमिमं द्विजोत्तमाः! शृण्वन्ति वा ये मनुजा विपातकाः ।
यास्यन्ति कैलासमनन्यलभ्यं गत्वा न संयान्ति पुनश्च जन्म ॥ १२३ ॥
इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मखण्डे
सेतुमाहात्म्येरामतीर्थप्रशंसायांधर्मपुत्रमिथ्याकथनदोषशान्तिर्नामाऽ-
ष्टादशोऽध्यायः ॥ १८ ॥

एकोनविंशोऽध्यायः

लक्ष्मणतीर्थप्रशंसायांबलभद्रब्रह्महत्याविमोक्षणवर्णनम्

श्रीसूत उवाच

तारकब्रह्मणस्तस्य तीर्थे स्नात्वा द्विजोत्तमाः ।
लक्ष्मणस्य ततस्तीर्थमभिगच्छेत्समाहितः ॥ १ ॥
श्रीलक्ष्मणस्यतीर्थेतु स्नात्वापापैर्विमोचितः । मुक्तिं प्रयातिविमलामपुनर्भवलक्षणाम्

स्नानाल्लक्ष्मणतीर्थे तु दारिद्र्यं नश्यतेऽखिलम् ।
आयुष्मान्गुणवान्विद्वान्पुत्रश्चैवास्य जायते ॥ ३ ॥

कूले लक्ष्मणतीर्थस्य तन्मन्त्रं जपते तुयः । स सर्वशास्त्रवेत्तास्याच्चतुर्वेदविदप्यसौ
तस्यकूलेमहल्लिङ्गं स्थापयामासलक्ष्मणः । तत्रतीर्थेतुयः स्नात्वासेवतेलक्ष्मणेश्वरम्

इह दारिद्र्यरोगाभ्यां संसाराच्च विमुच्यते ।
स्नात्वा लक्ष्मणतीर्थे तु सेवित्वा लक्ष्मणेश्वरम् ॥ ६ ॥
बलभद्रः पुरा विप्रा मुमुचे ब्रह्महत्यया ।

ऋषय ऊचुः

ब्रह्महत्या कथमभूद्रौहिणेयस्य सूतज !॥ ७ ॥
कथं चाऽत्र विनष्टा सा तन्नो ब्रूहि महामुने !।

श्रीसूत उवाच

शेषावतारो भगवान्बलभद्रः पुरा द्विजाः !॥ ८ ॥

कुरूणांपाण्डवानाञ्च युद्धोद्योगंविलोक्यतु । बन्धूनांसवधं सोढुमसमर्थो हलायुधः
विचारमेवमकरोद्बलभद्रो महामतिः । यद्यहं कुरुराजस्य करिष्यामि सहायताम्
कोपःस्यात्पाण्डुपुत्राणांमप्यवार्यःसुदारुणः । उपकारंकरिष्यामि पाण्डवानामहंयदि
दुर्योधनस्यकोपःस्यादितिबुद्ध्वाहलायुधः । तीर्थयात्राछलेनासौमध्यस्थःप्रययौतदा
प्रभासमभिगम्याथस्नात्वासङ्कल्पपूर्वकम् । देवानृषीन्पितृगणांस्तर्पयामासवारिणा
सरस्वतींततः प्रायात्प्रतीच्याभिमुखांहली । पृथूदकं बिन्दुसरो मुक्तिदंब्रह्मतीर्थकम्
गङ्गांचयमुनांसिन्धुं शतद्रुं चसुदर्शनम् । सम्प्राप्यबलभद्रोऽयं स्नात्वातीर्थेषुधर्मतः
प्रपेदे नैमिषारण्यं मुनीन्द्रैरभिसेवितम् । आगतं तंविलोक्याथनैमिषीयास्तपस्विनः
दीर्घसत्रेस्थितोःसम्यङ्नियताधर्मतत्पराः । अभ्युद्गम्ययदुश्रेष्ठंप्रणम्योत्थायचासनात्
अपूजयन्विष्टराद्यैः कन्दमूलफलैस्तदा । आसनं परिगृह्याऽयं पूजितः सपुरःसरः
उच्चासनेस्थितंसूतमनमन्तमनुत्थितम् । अकृताञ्जलिमासीनंव्यासशिष्यंविलोक्यसः

विप्रांश्चाऽऽनमतो दृष्ट्वा विलोक्यात्मानमागतम् ।

चुक्रोध रोहिणीसूनुः सूतं पौराणिकोत्तमम् ॥ २० ॥

मध्येमुनीनांसूतोऽयं कस्मान्निन्द्योनुलोमजः । उच्चासनेसमध्यास्तेनयुक्तमिदमञ्जसा
अवमत्य भृशञ्चास्मान्धर्मसंरक्षकानयम् । आस्तेऽनुत्थायनिर्भीतिर्न च प्रणमतेतथा
पठित्वा यं पुराणानि द्वैपायनसकाशतः । सेतिहासानि सर्वाणिधर्मशास्त्राण्यनेकशः
नमांदृष्ट्वा प्रणमते नैवत्यजति चासनम् । द्वैपायनस्य महतः शिष्याः पैलादयोद्विजाः
एवंविधमधर्मन्ते नैवकुर्युर्यथात्वयम् । तस्मादेनंवधिष्यामि दुरात्मानमचेतनम्
दुष्टानांनिग्रहार्थं हि भूर्लोकमहमागतम् । मयाहतो हि दुष्टात्माशुद्धिमेष्यत्यसंशयम्

इत्युक्त्वा भगवान्रामो मुशली प्रबली हली ।
पाणिस्थेन कुशाग्रेण तच्छिरः प्राच्छिनद्रुषा ॥ २७ ॥

तत्रत्या मुनयःसर्वे हा कष्टमिति चुक्रुशुः । अवादिषुस्तदा रामं मुनयो ब्रह्मवादिनः
रामाधर्मःकृतःकष्टस्त्वया सङ्कर्षणप्रभो !। अस्य सूतस्य चास्माभिर्दत्तंब्रह्मासनं महत्
अक्षयं चायुरस्माभिरस्य दत्तं हलायुध !। भवता जानतैवाद्यकृतो ब्रह्मवधो महान्

योगेश्वरस्य भवतो नास्ति कश्चिन्नियामकः ।
अस्यास्तु ब्रह्महत्याया यत्कर्त्तव्यं विचार्य तत् ॥ ३१ ॥

प्रायश्चित्तं भवानेव लोकसंग्रहणाय तु । कुरुष्व भगवन्राम नाऽन्येन प्रेरितःकुरु

इत्युक्तो भगवान्रामस्तामुवाच मुनीन्प्रति

राम उवाच

प्रायश्चित्तं करिष्यामि पपशोधकमास्तिकाः ॥ ३३ ॥

लोकसंग्रहणार्थाय नान्यकामनयाऽधुना । यादृशो नियमोस्माभिःकर्तव्यःपापशान्तये
तादृशं नियमं त्वद्य भवन्तः प्रब्रुवन्तु नः । भवद्भिरस्य सूतस्य यदायुर्दत्तमक्षयम्

इन्द्रियाणि च सत्त्वं च करिष्ये योगमायया ।

मुनय ऊचुः

पराक्रमस्य तेऽस्त्रस्य मृत्योर्नश्च यथा प्रभो !॥ ३६ ॥
स्यात्सत्यवचनं राम! तद्भवान्कर्तुमर्हति ।

राम उवाच

आत्मा वै पुत्ररूपेण भवतीति श्रुतिस्सदा ॥ ३७ ॥

उद्घोषयतिविप्रेन्द्रास्तस्मादस्यशरीरतः । पुत्रोभवतुदीर्घायुः सत्त्वेन्द्रियबलोर्जितः कथयिष्यतियुष्माकंपुराणादीनिसोन्वहम् । सम्भविष्यतिसर्वज्ञोयोगमायाबलान्मम इत्युक्त्वारौहिणेयस्तान्पुनःप्रश्रितमब्रवीत् । मनोभिलषितंकिंवायुष्माकंकरवाण्यहम् तद्ब्रूतमुनयोयूयं करिष्यामिनसंशयः । अज्ञानान्मत्कृतस्यास्य पापस्यापिनिवर्तकम्

प्रायश्चित्तं भवन्तो मे प्रब्रूत मुनिसत्तमाः ।

मुनय ऊचुः

इल्वलस्यात्मजःकश्चिद्दानवो बल्वलाभिधः ॥ ४२ ॥

स दूषयति नो यागंरामेहाऽऽगत्य पर्वणि । दुष्टन्तद्दानवं पापं जहि लोकैककण्टकम् अनेनपूजाह्यस्माकं कृतास्याद्भवताधुना । अस्थिविण्मूत्ररक्तानिसुरामांसानि च क्रतौ सदाभिवर्षतेस्माकमत्रागत्य सदानवः । अस्मिन्भारतभूभागेयानितीर्थानिसन्ति हि तेषुस्नाह्यब्दमेकंत्वं सर्वेषु सुसमाहितः । तेनते पापशान्तिःस्यान्नात्र कार्याविचारणा

श्रीसूत उवाच

पर्वकाले तु विप्रेन्द्राःसमावृत्ते मुनिक्रतौ । महाभीमोरजोवर्षी झञ्झावातश्चभीषणः प्रादुर्बभूव विप्रेन्द्राः पूयरक्तैश्च वर्षणम् । ततो विष्ठामयावृष्टिर्बल्वलेन कृताप्यभूत् असुरंयज्ञशालायाः शूलपाणिमथक्षणात् । अपश्यद्बलभद्रोऽसौ महाबलपराक्रमम् तमालोक्य महादेहं दग्धाद्रिप्रतिमन्तदा । प्रतप्तताम्रसंकाशं श्मश्रुदंष्ट्रोत्कटाननम् चिन्तयामास मुशलं रामःपरविदारणम् । सीरञ्च दानवहरं गदां दैत्यविदारिणीम् यान्यायुधानितंरामं चिन्तितान्युपतस्थिरे । सीराग्रेण तमाकृष्य बल्वलंखेचरन्तदा मुशलेन निजघ्ने सः कुपितो मूर्ध्निवेगतः । पपात भुवि संक्षुण्णललाटेरक्तमुद्वमन् बल्वलो दीर्णवदनो गिरिर्वज्रहतो यथा । स्तुत्वाथमुनयोरामं प्रोच्चार्य विमलाशिषः अभिषिञ्चञ्छुभैःस्तोयैर्वृत्रशत्रुंयथासुराः । मालान्ददुर्वैजयन्तींश्रीमदम्बुजशोभिताम् माधवाय शुभे वस्त्रेभूषणानि शुभानि च । धारयंस्तानि सर्वाणि रौहिणेयो महाबलः

पुष्पितानोकहोपेतः कैलास इव पर्वतः । अनुज्ञातोऽथमुनिभिःसर्वतीर्थेषु सद्द्विजाः एकमब्दञ्चरन्सस्नौ नियमाचारसंयुतः । ततःसंवत्सरे पूर्णे कालिन्दीभेदनोबलः समाप्ततीर्थयात्रः सन्पुरीं गन्तुं प्रचक्रमे । ततस्तमोमयींछायांपृष्ठतोऽनुगतां कृशाम् अपश्यद्बलदेवोऽयं महानादविराविणीम् । अथवार्तां सशुश्रावसमुद्भूतान्तदाम्बरे रामराम महाबाहो! रौहिणेय! सितप्रभ !। तीर्थाभिगमनेनाद्याऽऽचरितेन त्वयाऽनघ न नष्टाब्रह्महत्या ते निश्शेषं रोहिणीसुत !। इतिवार्तांसमाकर्ण्य चिन्तयामासवैबलः प्रायश्चित्तं मयाचीर्णमेकाब्दं तीर्थसेवया । तथापि ब्रह्महत्यानो न नष्टेतिश्रुतं वचः किंकुर्मइतिसंचिन्त्य नैमिषारण्यमभ्यगात् । तत्र गत्वा मुनीनां तन्न्यवेदयदरिन्दमः यच्छ्रुतं गगने वाक्यं या च दृष्टातमोमयी । न्यवेदयत तत्सर्वं मुनीनां रोहिणीसुतः

तच्छ्रुत्वा मुनयः सर्वे रामं वाक्यमथाब्रुवन् ।

मुनय ऊचुः

यदि राम! न नष्टा ते ब्रह्महत्या तु कृत्स्नशः ॥ ६६ ॥

तर्हिगच्छ महाभाग ! गन्धमादनपर्वतम् । महादुःखप्रशमनं महारोगविनाशनम् ॥ रामसेतौ महापुण्ये गन्धमादनपर्वते । अस्तिलक्ष्मणतीर्थाख्यं सरःपापविनाशनम् स्नानंकुरुष्व तत्रत्वं तल्लिङ्गं च नमस्कुरु । निःशेषंतेननष्टा स्याद्ब्रह्महत्या नसंशयः

श्रीसूत उवाच

एवमुक्तस्तदा रामो गन्धमादनपर्वतम् । गत्वा लक्ष्मणतीर्थं च प्राप्तवान्मुनिपुङ्गवाः स्नात्वासंकल्पपूर्वंतु तत्रतीर्थेहलायुधः । ब्राह्मणेभ्योददौवित्तंधान्यंगाश्च वसुन्धराम् तस्मिन्नवसरे तत्र राममाहाऽशरीरवाक् । निःशेषं रामनष्टा ते ब्रह्महत्याऽधुनात्विह सन्देहो नात्रकर्तव्यः सुखंयाहि पुरींनिजाम् । तच्छ्रुत्वा बलभद्रोऽथतत्तीर्थंप्रशशंस ह ततस्तत्रत्यतीर्थेषु स्नात्वासर्वेषुमाधवः । धनुष्कोटौतथास्नात्वा रामनाथंनिषेव्यच

द्वारकां स्वपुरीं यायान्नष्टपातकसंचयः ।

श्रीसूत उवाच

एवम्वःकथितं विप्राः! श्रीलक्ष्मणसरोऽमलम् ॥ ७५ ॥

पुण्यं पवित्रं पापघ्नं ब्रह्महत्यादिशोधकम् । यःपठेदिममध्यायं श्रृणुयाद्वा समाहितः

स याति मुक्तिं विप्रेन्द्राः ! पुनरावृत्तिवर्जिताम् ॥ ७७ ॥

इति श्रीस्कान्देमहापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मखण्डे सेतुमाहात्म्ये लक्ष्मणतीर्थप्रशंसायांबलभद्रब्रह्महत्याविमोक्षणंनामैकोनविंशोऽध्यायः ॥ १९ ॥

विंशोऽध्यायः

जटातीर्थप्रशंसायांशुकचित्तशुद्धिवर्णनम्

श्रीसूत उवाच

लक्ष्मणस्यमहातीर्थेब्रह्महत्याविनाशने । स्नात्वास्वचित्तशुद्ध्यर्थं जटातीर्थंततोव्रजेत्
जन्ममृत्युजराक्रान्तसंसारातुरचेतसाम् । अज्ञाननाशकं नास्तिजटातीर्थादृते द्विजाः
लोकेमुमुक्षवःकेचिच्चित्तशुद्धिमभीप्सवः । वाचापठन्तिवेदान्तांस्तूष्णीन्नानुभवन्तिते
पूर्वपक्षमहाग्राहेसिद्धान्तझषसङ्कुले । वेदान्ताब्धाविहाऽज्ञानं मुह्यन्ति पतिता द्विजाः
प्रथमं चित्तशुद्ध्यर्थंवेदान्तान्संपठन्ति ये । विवादं ते पठित्वाहिकलहं च वितन्विते
चित्तशुद्धिर्न वेदान्ताद्बहुव्यामोहकारणात् । ततो वयं नवेदान्तान्मुनीन्द्रा बहुमन्महे
चित्तशुद्धिं यदीच्छध्वं लघूपायेन तापसाः । उद्घोषयामि सर्वेषां जटातीर्थंनिषेवत
पुरासर्वोपकारार्थं तीर्थमज्ञाननाशनम् । एतद्धिनिर्मितं साक्षाच्छम्भुना गन्धमादने
निहते रावणे विप्रा जटां रामस्तुधार्मिकः । क्षालयामासयत्तोयेतज्जटातीर्थमुच्यते
वर्षाणां षष्टिसाहस्रं जाह्नवीजलमज्जनम् । गोदावर्यांसकृत्स्नानंसिंहस्थेचवृहस्पतौ
तावत्सहस्रस्नानानि सिंहंदेवगुरौ गते । गोमत्यां लभ्यते वर्षैस्तज्जटातीर्थदर्शनात्
जटातीर्थे मनुष्याणां स्नातानां द्विजपुङ्गवाः !।
अन्तःकरणशुद्धिः स्यात्ततोऽज्ञानं विनश्यति ॥ १२ ॥

अज्ञाननाशे ज्ञानं स्यात्ततो मुक्तिमवाप्स्यति ।
अखण्डसच्चिदानन्दः सम्पूर्णः स्यात्ततः परम् ॥ १३ ॥
अत्राप्युदाहरन्तीममितिहासं पुरातनम् । पितुः पुत्रस्यसम्वादं व्यासस्यचशुकस्यच
पुरा मुनिवरं कृष्णं भावितात्मानमच्युतम् । पारम्पर्यविशेषज्ञं सर्वशास्त्रार्थकोविदम्
प्रणम्य शिरसा व्यासं शुकः पप्रच्छ वै द्विजाः !।

श्रीशुक उवाच

भगवंस्तात सर्वज्ञ ! ब्रूहि गुह्यमनुत्तमम् ॥ १६ ॥
अन्तः करणशुद्धिःस्यात्तथाज्ञानविनाशनम् । ज्ञानोदयश्चयेनस्यादन्तेमुक्तिश्चशाश्वती
तमुपायं वदस्वाद्य स्नेहान्ममहामुने !। वेदान्ताश्चेतिहासाश्च पुराणादीनिकृत्स्नशः
अधीतानि मयात्वत्तःशोधयन्तिनमानसम् । अतो मेचित्तशुद्धिःस्याद्यथातातथावद
इति पृष्टस्तदा व्यासः शुकेन मुनिसत्तमाः । रहस्यं कथयामासयेनाविद्याविनश्यति

व्यास उवाच

शुक! वक्ष्यामितेगुह्यमविद्याग्रन्थिभेदनम् । बुद्धिशुद्धिप्रदं पुंसांजन्मादिभयनाशनम्
रामसेतौ महापुण्ये गन्धमादनपर्वते । विद्यते पापसंहारि जटातीर्थमितिश्रुतम्
जटांस्वांशोधयामासयत्ररामोहरिःस्वयम् । रामोदाशरथिःश्रीमांस्तीर्थायचवरंददौ
स्नान्तियेऽत्रसमागत्यजटातीर्थेऽतिपावने । अन्तःकरणशुद्धिश्चतेषांभूयादितिस्मसः
विना यज्ञं विनाज्ञानं विना जाप्यमुपोषणम् ।
स्नानमात्राज्जटातीर्थे बुद्धि शुद्धिर्भवेन्नृणाम् ॥ २५ ॥
सर्वदानसमं पुण्यं स्नानादत्र भविष्यति । दुर्गाण्यनेन तरति पुण्यलोकान्समश्नुते
महत्त्वमश्नुते स्नानाज्जटातीर्थेशुभोदके । जटातीर्थं विनानान्यदन्तःकरणशुद्धये
विद्यते नियमो वापि जपोवाप्यन्यदेवता । धन्यंयशस्मायुष्यं सर्वलोकेषु विश्रुतम्
पवित्राणां पवित्रं च जटातीर्थंशुकाधुना । सर्वपापप्रशमनं मङ्गलानां च मङ्गलम्
भृगुर्वै वारुणिः पूर्वं वरुणं पितरं शुक !। बुद्धिशुद्धिप्रदोपायमपृच्छत्पावनं शुभम्
प्रोवाच वरुणस्तस्मै बुद्धिशुद्धिप्रदं शुभम् ।

वरुण उवाच

रामसेतौ भृगो! पुण्ये गन्धमादनपर्वते ॥ ३१ ॥
स्नानमात्राज्जटातीर्थे बुद्धिशुद्धिर्भवेद्ध्रुवम् । सपितुर्वचनात्सद्यो भृगुर्वैवरुणात्मजः
गत्वास्नात्वा जटातीर्थे बुद्धिशुद्धिमवाप्तवान् ।
विनष्टाऽज्ञानसन्तानस्तयाशुद्ध्या तदा भृगुः ॥ ३३ ॥
उत्पन्नाद्वैतविज्ञानः स्वपितुर्वरुणादयम् । अखण्डसच्चिदानन्दपूर्णकारोभवच्छुकः
शङ्करांशोऽपिदुर्वासाजटातीर्थेऽभिषेकतः । मनश्शुद्धिमवाप्याशुब्रह्मानन्दमयोऽभवत्
दत्तात्रेयोऽपि विष्ण्वंशस्तीर्थेऽस्मिन्नभिषेचनात् ।
शुद्धान्तःकरणो भूत्वा ब्रह्माकारोऽभवच्छुक ॥ ३६ ॥
इच्छेदज्ञाननाशं यः स स्नायात्तु जटाभिधे । तीर्थेशुद्धतमे पुण्ये सर्वपापविनाशने
जटातीर्थेमतस्त्वं च शुक गच्छमहामते । मनः शुद्धिप्रदे तस्मिन्स्नानंच कुरुपुण्यदे
पित्रैवमुक्तोव्यासेन शुकः पुत्रस्तदा द्विजाः । रामसेतुं महापुण्यं गन्धमादनपर्वतम्
अगमत्स्नातुकामः सञ्जटातीर्थे विशुद्धिदे । स्नात्वासंकल्पपूर्वंचजटातीर्थेशुकोमुनिः
मनः शुद्धिमनुप्राप्य तेन चाऽज्ञाननाशने । स स्वरूपसमापन्नः परमानन्दरूपकम्
येचाप्यन्येमनःशुद्धिकामाःसन्तिद्विजोत्तमाः । जटातीर्थेतुतेसर्वेस्नान्तुभक्तिपुरःसरम्
अहो जनाजटातीर्थे कामधेनुसमेशुभे । विद्यमानेऽपि किन्तुच्छे रमते यत्र मोहिताः
भुक्तिकामोलभेद्भुक्तिंमुक्तिकामस्तुतांलभेत् । स्नानमात्राज्जटातीर्थेसत्यमुक्तंमयाद्विजाः
वेदानुवचनात्पुण्याद्यज्ञाद्दानात्तपोव्रतात् ।
उपवासाज्जपाद्योगान्मनः शुद्धिर्नृणां भवेत् ॥ ४५ ॥
विनाप्येतानि विप्रेन्द्राजटातीर्थेतिपावने । स्नानमात्रान्मनःशुद्धिर्ब्राह्मणानांध्रुवंभवेत्
जटातीर्थस्यमाहात्म्यं मयावक्तु न शक्यते । शङ्करोवेत्तितत्तीर्थहरिर्वेत्तिविधिस्तथा
जटातीर्थसमंतीर्थ न भूतं न भविष्यति । जटातीर्थस्यतीरे यः क्षेत्रपिण्डंसमाचरेत्
गयाश्राद्धसमं पुण्यं तस्यस्यान्नात्रसंशयः । जटातीर्थेनरः स्नात्वानपापेनविलिप्यते
दारिद्र्य न समाप्नोति नैयाच्च नरकार्णवम् ।

श्रीसूत उवाच

एवं वः कथितं विप्रा जटातीर्थस्य वैभवम् ॥ ५० ॥
यत्रव्याससुतो योगी स्नात्वा पापविमोचने । अत्राप्तवान्मनःशुद्धिमद्वैतज्ञानसाधनम्
यस्त्विमं पठतेऽध्यायं शृणुते वा समाहितः । सविधूयेहपापानि लभतेवैष्णवंपदम्
इति श्रीस्कान्देमहापुराणएकाशीतिसाहस्र्यांसंहितायां तृतीयेब्रह्मखण्डे
सेतुमाहात्म्येजटातीर्थप्रशंसायांशुकचित्तशुद्धिर्नामविंशोऽध्यायः ॥ २० ॥

एकविंशोऽध्यायः

लक्ष्मीतीर्थप्रशंसायांधर्मपुत्रनिरतिशयसम्पदावाप्तिवर्णनम्

श्रीसूत उवाच

जटातीर्थाभिधेतीर्थे सर्वपातकनाशने । स्नानंकृत्वाविशुद्धात्मालक्ष्मीतीर्थंततोव्रजेत्
यं यं कामंसमुद्दिश्यलक्ष्मीतीर्थेद्विजोत्तमाः । स्नानंसमाचरेन्मर्त्यस्तंतंकामंसमश्नुते
महादारिद्र्यशमनं महाधान्यसमृद्धिदम् । महादुःखप्रशमनं महासम्पद्विवर्धनम्
अत्र स्नात्वा धर्मपुत्रो महदैश्वर्यमाप्तवान् । इन्द्रप्रस्थे वसन्पूर्वं श्रीकृष्णेन प्रचोदितः

ऋषय ऊचुः

यथैश्वर्यं धर्मपुत्रो लक्ष्मीतीर्थे निमज्जनात् । आप्तवान्कृष्णवचनात्तन्नो ब्रूहिमहामुने

श्रीसूत उवाच

इन्द्रप्रस्थे पुरा विप्रा धृतराष्ट्रेण चोदिताः । न्यवसन्पाण्डवाः पञ्चमहाबलपराक्रमाः
इन्द्रप्रस्थं ययौ कृष्णः कदाचित्तान्निरीक्षितुम् ।
तमागतमभिप्रेक्ष्य पाण्डवास्ते समुत्सुकाः ॥ ७ ॥
स्वगृहं प्रापयामासुर्मुदापरमयायुताः । कञ्चित्कालमसौकृष्णस्तत्रावात्सीत्पुरोत्तमे
कदाचित्कृष्णमाहूय पूजयित्वा युधिष्ठिरः । पप्रच्छ पुण्डरीकाक्षं वासुदेवंजगत्पतिम्

युधिष्ठिर उवाच

कृष्ण! कृष्ण! महाप्राज्ञ! येन धर्मेण मानवाः । लभन्ते महदैश्वर्यं तन्नो ब्रूहि महामते
इत्युक्तो धर्मपुत्रेण कृष्णः प्राह युधिष्ठिरम् ।

श्रीकृष्ण उवाच

धर्मपुत्र! महाभाग! गन्धमादनपर्वते ॥ ११ ॥
लक्ष्मीतीर्थमितिख्यातमस्त्यैश्वर्यैककारणम् ।
तत्र स्नानं कुरुष्वत्वमैश्वर्यं ते भविष्यति ॥ १२ ॥
तत्र स्नानेन वर्धन्ते धनधान्यसमृद्धयः । सर्वे सपत्ना नश्यन्ति क्षेत्रमेषांविवर्द्धते
तीर्थेसस्नुः पुरादेवा लक्ष्मीनामनि पुण्यदे । अलभन्सर्वमैश्वर्यं तेन पुण्येनधर्मज
असुरांश्चमहावीर्यान्समरेजघ्नुरञ्जसा । महालक्ष्मीश्च धर्मश्चतत्तीर्थस्नायिनांनृणाम्
भविष्यत्यचिरादेव संशयं मा कृथा इह । तपोभिः क्रतुभिर्दानैराशीर्वादैश्चपाण्डव
ऐश्वर्यंप्राप्यते यद्वल्लक्ष्मीतीर्थनिमज्जनात । सर्वपापानिनश्यन्तिविघ्नायान्तिलयंसदा
व्याधयश्च विनश्यन्ति लक्ष्मीतीर्थनिषेवणात् ।
श्रेयः सुविपुलं लोके लभ्यते नात्रसंशयः ॥ १८ ॥
स्नानमात्रेणवैलक्ष्म्यास्तीर्थेस्मिन्धर्मनन्दन !। रम्भामप्सरसांश्रेष्ठांलब्धवान्नलकूबरः
स्नात्वाऽत्रतीर्थेपुण्ये तु कुबेरोनरवाहनः । समहापद्ममुख्यानान्निधीनान्नायकोऽभवत्
तस्मात्त्वमपि राजेन्द्र लक्ष्मीतीर्थेशुभप्रदे । स्नात्वा वृकोदरमुखैरनुजैरपि संवृतः
लप्स्यसे महतीं लक्ष्मीं जेष्यसे च रिपूनपि । सन्देहोनात्रकर्तव्यः पैतृस्वस्रेयधर्मज!
इत्युक्तो धर्मपुत्रोऽयं कृष्णेनाद्भुतदर्शनः । सानुजः प्रययौ शीघ्रं गन्धमादनपर्वतम्
लक्ष्मीतीर्थं ततो गत्वा महदैश्वर्यकारणम् ।
सस्नौ युधिष्ठिरस्तत्र सानुजो नियमान्वितः ॥ २४ ॥
लक्ष्मीतीर्थस्यतोये ससर्वपातकनाशने । सानुजोमासमेकन्तुसस्नौनियमपूर्वकम्
गोभूतिलहिरण्यादीन्ब्राह्मणेभ्योददौबहून् । सानुजोधर्मपुत्रोऽसाविन्द्रप्रस्थंययौततः
राजसूयक्रतुंकर्तुं ततऐच्छद्युधिष्ठिरः । कृष्णं समाह्वयामास यियक्षुर्धर्मनन्दनः ॥२७॥

कृष्णोधर्मजदूतेन समाहूतः ससम्भ्रमः । चतुर्भिरश्वैः संयुक्तं रथमारुह्य वेगिनम्
सत्यभामासहचर इन्द्रप्रस्थं समाययौ । तमागतं समालोक्य प्रमोदाद्धर्मनन्दनः
न्यवेदयत्सकृष्णाय राजसूयोद्यमन्तदा । अन्वमन्यत कृष्णोपि तथैव क्रियतामिति
वाक्यं च युक्तिसंयुक्तं धर्मपुत्रमभाषत । पैतृस्वस्रेय धर्मात्मञ्छृणु पथ्यंवचोमम
दुष्करो राजसूयोऽयं सर्वैरपि महीश्वरैः । अनेकशतपादातिरथकुञ्जरवाजिमान्
महामतिरिमं यज्ञं कर्तुमर्हति नेतरः । दिशो दश विजेतव्याः प्रथमं बलिना त्वया
पराजितेभ्यःशत्रुभ्यो गृहीत्वा करमुत्तमम् । तेन काञ्चनजातेन कर्तव्योऽयं क्रतूत्तमः
रोचयेमुक्तिमदनं न हित्वां भीषयामि भोः । अतः क्रतुसमारम्भात्पूर्वं दिग्विजयं कुरु
ततोधर्मात्मजःश्रुत्वा कृष्णस्य वचनंहितम् । प्रशंसन्देवकीपुत्रमाजुहवनिजानुजान्
आहूय चतुरो भ्रातॄन् धर्मजःप्राहहर्षयन् । अयि भीम ! महाबाहो बहुवीर्यधनञ्जय
यमौ च सुकुमाराङ्गौ शत्रुसंहारदीक्षितौ । चिकीर्षामि महायज्ञं राजसूयमनुत्तमम्
स च सर्वान् रणे जित्वा कर्तव्यः पृथिवीपतीन् ।
अतो विजेतुं भूपालां श्चत्वारोपि ससैनिकाः ॥ ३६ ॥
दिशश्चतस्रोगच्छन्तु भवन्तोवीर्यवत्तराः । युष्माभिराहृतैर्द्रव्यैःकरिष्यामिमहाक्रतुम्
इत्युक्ताः सादरं सर्वे वृकोदरमुखास्तदा । प्रसन्नवदना भूत्वा धर्मपुत्रानुजाः पुरात्
राज्ञोजयायसर्वासु निर्ययुर्दिक्षुपाण्डवाः । तेसर्वे नृपतीञ्जित्वाचतुर्दिक्षुस्थितान्बहून्
स्ववशेस्थापयित्वातान्नृपतीन्पाण्डुनन्दनाः । तैर्दत्तम्बहुधा द्रव्यमसंख्यातमनुत्तमम्
आदाय स्वपुरं तूर्णमाययुःकृष्णसंश्रयाः । भीमःसमाययौ तत्र महाबलपराक्रमः
शतभारसुवर्णानि समादाय पुरोत्तमम् । सहस्रं भारमादाय सुवर्णानां ततोऽर्जुनः
शक्रप्रस्थं समायातो महाबलपराक्रमः । शतभारं सुवर्णानां प्रगृह्य नकुलस्तथा
समागतो महातेजाःशक्रप्रस्थं पुरोत्तमम् । दत्तान्विभीषणेनाथ स्वर्णतालांश्चतुर्दश
दाक्षिणात्यमहीपानां गृहीत्वा धनसञ्चयम् ।
सहदेवोऽपि सहसा समादाय निजाम्पुरीम् ॥ ४८ ॥
लक्षकोटिसहस्राणि लक्षकोटिशतान्यपि । सुवर्णानि ददौ कृष्णोधर्मपुत्राययादवः

स्वानुजैराहृतैरेवमसङ्ख्यातैर्महाधनैः । कृष्णदत्तैरसङ्ख्यातैर्धनैरपि युधिष्ठिरः ॥ ५०
कृष्णाश्रयोऽयजद्विप्रा राजसूयेनपाण्डवः । तस्मिन्यागेददौद्रव्यं ब्राह्मणेभ्यो यथेष्टतः
अन्नानिप्रददौतत्र ब्राह्मणेभ्यो युधिष्ठिरः । वस्त्राणिगाश्च भूमिश्च भूषणानिददौ तथा
अर्थिनःपरितुष्यन्तियावताकाञ्चनादिना । ततोऽपि द्विगुणन्तेभ्योदापयामासधर्मजः
इयन्तिदत्तान्यर्थिभ्यो धनानिविविधान्यपि । इतीयत्तामपरिच्छेत्तुं नशक्ताब्रह्मकोटयः
अर्थिभिर्दीयमानानि दृष्ट्वा तत्र धनानि वै । सर्वस्वमप्यहो राज्ञादत्तमित्यब्रवीज्जनः
दृष्ट्वा कोशांस्तथानन्ताननन्तमणिकाञ्चनान् ॥ ५६ ॥
स्वल्पं हि दत्तमर्थिभ्य इत्यवोचञ्जनास्तदा । इष्ट्वैवं राजसूयेनधर्मपुत्रःसहानुजः
बहुवित्तःसमृद्धःसन् रेमे तत्र पुरोत्तमे । लक्ष्मीतीर्थस्य माहात्म्याद्धर्मपुत्रो युधिष्ठिरः
लेभे सर्वमिदं विप्रा अहोतीर्थस्य वैभवम् । इदं तीर्थं महापुण्यं महादारिद्र्यनाशनम्
धनधान्यप्रदं पुंसां महापातकनाशनम् । महानरकसंहर्तृ महादुःखनिवर्तकम् ॥
मोक्षदं स्वर्गदन्नित्यं महाऋणविमोचनम् । सुकलत्रप्रदं पुंसांसुपुत्रप्रदमेव च
एतत्तीर्थसमं तीर्थंन भूतन्न भविष्यति । एतद्वःकथितं विप्रा लक्ष्मीतीर्थस्य वैभवम्
दुस्स्वप्ननाशनं पुण्यं सर्वाभीष्टप्रसाधकम् । यःपठेदिममध्यायंश्रृणुतेवासभक्तिकम्
धनधान्यसमृद्धस्स्यात्स नरो नास्ति संशयः ।
भुक्त्वेह सकलान्भोगान्देहान्ते मुक्तिमाप्नुयात् ॥ ६४ ॥

इति श्रीस्कान्देमहापुराणएकाशीतिसाहस्र्यां संहितायांतृतीयेब्रह्मखण्डे सेतुमाहात्म्येलक्ष्मीतीर्थप्रशंसायां धर्मपुत्रनिरतिशयसम्पदावाप्तिर्नामैकविंशोऽध्यायः ॥ २१ ॥

द्वाविंशोऽध्यायः

अग्नितीर्थप्रशंसायां दुष्पण्यपैशाच्यमोक्षणवर्णनम्

श्रीसूत उवाच

लक्ष्मीतीर्थेशुभेपुंसांसर्वैश्वर्यैककारणे । स्नात्वानरस्ततोगच्छेदग्नितीर्थंद्विजोत्तमाः
अग्नितीर्थं महापुण्यं महापातकनाशनम् । तीर्थानामुत्तमंतीर्थं सर्वाभीष्टैकसाधनम्
तत्र स्नायान्नरो भक्त्या स्वपापपरिशुद्धये ।

ऋषय ऊचुः

अग्नितीर्थमितिख्यातिः कथं तस्य मुनीश्वर !॥ ३ ॥
कुत्रेदमग्नितीर्थञ्च कीदृशन्तस्य वैभवम् । एतन्नःश्रद्दधानानां विस्तराद्वक्तुमर्हसि

श्रीसूत उवाच

सम्यक् पृष्टं हि युष्माभिः श्रृणुध्वं मुनिपुङ्गवाः !।
पुरा हि राघवो हत्वा रावणं सपरिच्छदम् ॥ ५ ॥
स्थापयित्वा तु लङ्कायां भर्तारञ्च विभीषणम् ।
सीतासौमित्रिसंयुक्तो रामो दशरथात्मजः ॥ ६ ॥
सिद्धचारणगन्धर्वैर्देवैरप्सरसाङ्गणैः । स्तूयमानोमुनिगणैः सत्याशीस्तीर्थकौतुकी
धारयल्लँलीलया चापं रामोऽसह्यपराक्रमः । आत्मनःशुद्धिमायातुंजानकींशोधितुन्तथा
इन्द्रादिदेववृन्दैश्च मुनिभिःपितृभिस्तथा । विभीषणेन सहितः सर्वैरपि च वानरैः
आययौ सेतुमार्गेण गन्धमादनपर्वतम् । लक्ष्मीतीर्थतटेस्थित्वाजानकीशोधनाय सः
अग्निमावाहयामास देवर्षिपितृसन्निधौ । अथोत्तस्थेमहाम्भोधेर्लक्ष्मीतीर्थाद्विदूरतः
पश्यत्सु सर्वलोकेषु लिहन्नम्भांसि पावकः । आताम्रलोचनःपीतःपीतवासाधनुर्धरः
सप्तभिश्चैव जिह्वाभिर्लेलिहानो दिशो दश । दृष्ट्वा रघुपतिं शूरं लीलामानुषरूपिणम्
जगाद वचनं रम्यं जानकीशुद्धिकारणात् । राम राम महाबाहो राक्षसानां भयावह!

पातिव्रत्येन जानक्या रावणं हतवान्भवान् । सत्यंसत्यंपुनःसत्यंनात्रकार्याविचारणा
कमलेयं जगन्माता लीलामानुषविग्रहा । देवत्वे देवदेहेयं मनुष्यत्वे च मानुषी ॥

जिष्णोर्देहानुरूपां वै करोत्येषात्मनस्तनुम् ।
यदा यदा जगत्स्वामिन्देवदेव! जनार्दन !॥ १७ ॥

अवतारान्करोषित्वं तदेयंत्वत्सहायिनी । यदा त्वंभार्गवोरामस्तदाभूद्धरणीत्वियम्
अधुना जानकी जाताभवित्रीरुक्मिणीततः । अन्येषुचावतारेषुविष्णोरेषासहायिनी
तस्मान्मद्वचनादेनां प्रतिगृह्णीष्व राघव । पावकस्यतुतद्वाक्यंश्रुत्वादेवा महर्षयः
विद्याधराश्च गन्धर्वा मानवाः पन्नगास्तथा । अन्ये च भूतनिवहा रामंदशरथात्मजम्
जानकींमैथिलीञ्चैव प्रशशंसुः पुनः पुनः । रामोऽग्निवचनात्सीतांप्रतिजग्राहनिर्मलाम्
एवंसीताविशुद्ध्यर्थं रामेणाक्लिष्टकर्मणा । आवाहने कृतेवह्निर्लक्ष्मीतीर्थाद्विदूरतः
यतः प्रदेशादुत्तस्थावम्बुधेर्द्विजसत्तमाः । अग्नितीर्थं विजानीत तम्प्रदेशमनुत्तमम् ॥
ततो विनिर्गमादग्नेरग्नितीर्थ मितीर्यते । अत्रस्नात्वा नरो भक्त्या वह्नेस्तीर्थेविमुक्तिदे

उपोष्य वेदविदुषो ब्राह्मणानपि भोजयेत् ।
तेभ्यो वस्त्रं धनं भूमिं दद्यात्कन्याञ्च भूषिताम् ॥ २६ ॥
सर्वपापविनिर्मुक्तो विष्णुसायुज्यमाप्नुयात् ।
अग्नितीर्थस्य कूलेऽस्मिन्नन्नदानं विशिष्यते ॥ २७ ॥
अग्नितीर्थसमन्तीर्थन्न भूतं न भविष्यति ।
दुष्पण्योपि महापापो यत्र स्नानात्पिशाचताम् ॥ २८ ॥

परित्यज्य महाघोरां दिव्यं रूपमवाप्तवान् । पशुमान्नाम वैश्योऽभूत्पुरा पाटलिपुत्रके
स व धर्मपरोनित्यं ब्राह्मणाराधने रतः । कृषिन्निरन्तरं कुर्वन्गोरक्षाञ्चैव सर्वदा ॥

पण्यवीथ्याञ्च विक्रीणन्काञ्चनादीनि धर्मतः ।
पशुमान्नामधेयस्य वणिक्श्रेष्ठस्य तस्य वै ॥ ३१ ॥

बभूवभार्यात्रितयं पतिशुश्रूषणे रतम् । ज्येष्ठा त्रीन्सुषुवे पुत्रान्वैश्यवंशविवर्द्धनान्
सुपण्यं पण्यवन्तञ्च चारुपण्यं तथैव च । मध्यमा सुषुवे पुत्रौ सुकोशबहुकोशकौ

तृतीयायां त्रयः पुत्रास्तस्य वैश्यस्य जज्ञिरे ।
महापण्यो महाकोशो दुष्पण्य इति विश्रुताः ॥ ३४ ॥

एवं पशुमतस्तस्य वैश्यस्य द्विजसत्तमाः बभूवुरष्टौ तनयास्तासु स्त्रीषु तिसृष्वपि
ते सुपण्यमुखास्सर्वे पुत्रावव्रृधिरे क्रमात् । धूलिकेलिं वितन्वन्तःपितरौतोषयन्तिते
पञ्चहायनताम्प्राप्ताः क्रमात्ते वैश्यनन्दनाः । पशुमानपि वैश्येन्द्रः सर्वानपिचतान्सुतान्

बाल्यमारभ्य सततं स्वकृत्येषु व्यशिक्षयत् ।
कृषिगोत्राणवाणिज्यकर्मसु क्रमशिक्षिताः ॥ ३८ ॥

सुपण्यमुख्याःसप्तैव पितृवाक्यमशृण्वत । पशुमान्वक्ति यत्कार्यं तत्क्षणान्निरवर्तयन्
नैपुण्यं प्रापुरत्यन्तं तेसुवर्णक्रियास्वपि । दुष्पण्यस्त्वष्टमःपुत्रोबाल्यमारभ्यसन्ततम्

दुर्मार्गनिरतो भूत्वा नाऽशृणोत्पितृभाषितम् ।
धूलिकेलिं समारभ्य दुर्मार्गनिरतोऽभवत् ॥ ४१ ॥

स बाल एवसन्पुत्रो बालानन्यानबाधत । दुष्कर्मनिरतं दृष्ट्वा तं पिता पशुमांस्तथा
उपेक्षामेवकृतबान्बालिशोऽयमितीरयन् । अथाष्टावपि वैश्यस्य प्रापुर्यौवनमात्मजाः
ततोऽयमष्टमःपुत्रो दुष्पण्यो बलिनां वरः । गृहीत्वा पाणियुगले बालान्नगरवर्तिनः
निचिक्षेप स कूपेषु सरित्सु च सरःस्वपि । न कोपितस्यजानातिदुश्चरित्रमिदञ्जनः
यावन्म्रियन्ते ते बालास्तावन्निक्षिप्तवाञ्जले । तेषांमृतानांबालानांपितरोमातरस्तथा
गवेषयन्ति तान्सर्वान्नगरेषु हि सर्वशः । तानदृष्ट्वा मृतान्पुत्रान्केवलं प्रारुदञ्जनाः ॥
जलेष्वथ शवान्दृष्ट्वा जनाश्चक्रुर्यथोचितम् । एवं प्रतिदिनं बालान्दुष्पण्योमारयन्पुरे
जनैरप्यपरिज्ञातश्चिरमेवमवर्तत । म्रियमाणेषु बालेषु वैश्यपुत्रस्य कर्मणा ॥ ४६ ॥
प्रजानां वृद्धिराहित्याच्छून्यप्रायमभूत्पुरम् । ततः समेत्यपौरास्तु वृत्तंराज्ञेन्यवेदयन्

श्रुत्वा नृपस्तद्वचनमाहूय ग्रामपालकान् ।
कारणं बालमरणे चिन्त्यतामितिसोन्वशात् ॥ ५१ ॥

ग्रामपालास्तथेत्युक्त्वा तत्र तत्र व्यवस्थिताः । सम्यग्गवेषयामासुःकारणंबालमारणे
ते वै गवेषयन्तोऽपि नाविन्दन्बालमारकम् । तेपुनर्नृपमासाद्यभीतावाक्यमथाऽब्रुवन्

गवेषयन्तोपि वयन्तन्नविन्दामहेनृप। यो बालान्नगरेस्थित्वा सन्ततंमारयत्यपि॥
पुनश्च नागराः सर्वे राजानं प्राप्य दुःखिताः। पुनःप्रजानां मरणमब्रुवन्बाष्पसङ्कुलाः

राजा तत्कारणाज्ञानात्तूष्णीमास्ते विचिन्त्य तु।
कदाचिद्वैश्यपुत्रोऽयं पञ्चभिर्बालकैः सह॥ ५६॥
तटाकान्तिकमापेदे पङ्कजाहरणच्छलात्।
बलाद् गृहीत्वा तान्बालान्दुष्पण्यः क्रोशतस्तदा॥ ५७॥
क्रूरात्मा मज्जयामास कण्ठदघ्ने सरोजले।
मृतान्मत्वा च ताञ्छीघ्रं दुष्पण्यःस्वगृहं ययौ॥ ५८॥

पञ्चानां पितरस्तेषां मार्गयन्तः सुतान्पुरे। तेषु वै मार्गमाणेषु पञ्च ते नातिबालकाः
निक्षिप्ता अपि तोयेषु नाऽम्रियन्तयदृच्छया। तेशनैःकूलमासाद्यपञ्चापिक्लिन्नमौलयः
अशक्ता नगरंगन्तुं बाल्यात्तत्रैव बभ्रमुः। दूरादुच्चार्यमाणानि स्वनामानि स्वबन्धुभिः
श्रुत्वा पञ्चापि तेबालाः प्रतिशब्दमकुर्वत। ततस्तत्पितरः श्रुत्वा तत्रागत्यसरस्तटे
पुत्रान्दृष्ट्वा तु सप्राणान्प्रहर्षमतुलङ्गताः। किमेतदिति पित्राद्यैः पृष्टास्तेबालकास्तदा

दुष्पण्यस्याथ दुष्कृत्यं बन्धुभ्यस्ते न्यवेदयन्।
ततो विदितवृत्तान्ता राजानं प्राप्य नागराः॥ ६४॥

पञ्चभिःकथितं वृत्तं दुष्पण्यस्यन्यवेदयन्। ततो राजा समाहूयपशुमन्तं वणिग्वरम्

पौरेष्वपि च शृण्वत्सु वाक्यमेतदभाषत।

राजोवाच

दुष्पण्यनाम्ना पशुमन्बहुप्रजमिदंपुरम्॥ ६६॥

शून्यप्रायं कृतं पश्य त्वत्पुत्रेण दुरात्मना। इदानीं बालकानेतान्मज्जयामास वै जले
यदृच्छया च सप्राणाः पुनरप्यागताःपुरम्। अस्मिन्नित्थङ्गतेकार्ये किंकर्तव्यंवदाधुना
अद्य त्वामेव पृच्छामि यतस्त्वंधर्मतत्परः। इत्युक्तः पशुमान्राज्ञाधर्मज्ञोयुक्तमब्रवीत्

पशुमानुवाच

पुरं निश्शेषितं येन वध्यमेवायमर्हति। न ह्यत्रविषये किञ्चित्प्रष्टव्यं विद्यते नृप

न ह्ययं ममपुत्रः स्याच्छत्रुरेवातिपापकृत्। न ह्यस्य निष्कृतिपश्येयेनानिश्शेषितंपुरम्
वध्यतामेव दुष्टात्मा सत्यमेव ब्रवीम्यहम्। श्रुत्वा पशुमतोवाक्यंनागरास्सर्वएवहि
वणिग्वरं श्लाघमाना राजानमिदमूचिरे। न वध्यतामयंदुष्टस्तूर्ष्णींनिर्वास्यतांपुरात्
ततःसराजादुष्पण्यंसमाहूयेदमब्रवीत्। अस्माद्देशाद्व्रजाञ्छीघ्रंदुष्टात्मन्गच्छसाम्प्रतम्
यदितिष्ठेस्त्वमत्रैव दण्डयेयं वधेन वै। इतिराज्ञाविनिर्भर्त्स्य दूतैर्निर्वासितः पुरात्
दुष्पण्यस्त्वथतं देशं परित्यज्य भयान्वितः। मुनिमण्डलसंबाधं वनमेव ययौ तदा
तत्राप्येकं मुनिसुतं सतोयेषु न्यमज्जयत्। केल्यर्थमागता दृष्ट्वा मुनिपुत्रा मृतं शिशुम्
तत्पित्रे कथयामासुरभ्येत्य भृशदुःखिताः। तत उग्रश्रवाश्श्रुत्वातेभ्यःपुत्रं जलेमृतम्
ततो महिम्ना दुष्पण्यचरितं तदमन्यत। उग्रश्रवाः शशापैनं दुष्पण्यं वैश्यनन्दनम्

उग्रश्रवा उवाच

मत्सुतं पयसि क्षिप्य यत्त्वं मारितवानसि। तवापि मरणंभूयाज्जलएवनिमज्जनात्
मृतश्चसुचिरंकालंपिशाचस्त्वंभविष्यसि। इतिशापेश्रुतेसद्योदुष्पण्यःखिन्नमानसः
तद्वै वनंपरित्यज्य घोरमन्यद्वनंययौ। सिंहादिक्रूरसत्त्वाढ्ये तस्मिन्प्राप्ते वनान्तरे
पांसुवर्षं महद्वर्षं वृक्षानात्रोटयन्मुहुः। वज्रघातसमस्पर्शो ववौ झञ्झानिलो महान्
वेगेनगात्रंभिन्दन्तिवृष्टिश्चासीत्सुदुःसहा। तद्दृष्ट्वासतुदुष्पण्यश्चिन्तयन्भृशदुःखितः
मृतंशुष्कं महाकायं गजमेकमपश्यत। महावातं महावर्षं तदा सोढुमशक्नुवन्
गजस्यविवरेणैव विवेशोदरगह्वरम्। तस्मिन्प्रविष्टमात्रे तु वृष्टिरासीत्सुभूयसी
ततो वर्षजलैःसर्वैः प्रवाहः सुमहानभूत्। स प्रवाहो वने तस्मिन्नदी काचिदजायत
अथतैर्वर्षसलिलैः सगजः पूरितोदरः। प्लवमानो महापूरे नीरन्ध्रः समजायत
ततो निर्विवरस्यास्य जलपूर्णोदरस्य च। गजस्य जठरात्सोयंनिर्गन्तुं न शशाकह
ततश्च वृष्टितोयानां प्रवाहो भीमवेगवान्। उदरस्थितदुष्पण्यं समुद्रं प्रापयद्गजम्
दुष्पण्यःसलिलेमग्नःक्षणात्प्राणैर्व्ययुज्यत। मृतएवसदुष्पण्यःपिशाचत्वमवाप्तवान्
पीडितः क्षुत्पिपासाभ्यां दुर्गमं वनमाश्रितः। घोरेषु धर्मकालेषुबिभ्रद्रूपं भयानकम्
अतिष्ठद्गहनेरण्ये दुःखान्यनुभवन्बहु। कल्पकोटिसहस्राणि कल्पकोटिशतानि च

स पिचाशो महादुःखी न्यवसद्द घोरकानने । वनाद्वनान्तरं धावन्देशाद्देशान्तरन्तथा
सर्वत्रानुभवन्दुःखमाययौ दण्डकान्क्रमात् ।
अगस्त्यादाश्रमात्पुण्यान्नातिदूरे स सञ्चरन् ॥ ९५ ॥
नदन्भैरवनादश्च वाक्यमुच्चैरभाषत । भोभोस्तपोधनाः सर्वे शृणुध्वं मामकं वचः
भवन्तो हि कृपावन्तःसर्वभूतहितेरताः । कृपादृष्ट्यानुगृह्णीत मां दुःखैरतिपीडितम्
पुरादुष्पण्यनामाहं वैश्यः पाटलिपुत्रके । पुत्रः पशुमतश्चापि बहून्बालानमारयम्
ततो विवासितो राज्ञा तस्माद्देशाद्वनंगतः । अमारयञ्जले पुत्रं तत्रोग्रश्रवसो मुनेः
समुनिर्दत्तवाञ्छापंममापिमरणञ्जले । पिशाचताञ्च मे घोरांदत्तवान्दुःखभूयसीम्
कल्पकोटिसहस्राणि कल्पकोटिशतान्यपि । पिशाचतानुभूतेयं शून्यकाननभूमिषु
नाऽहंसोढुं समर्थोऽस्मि पिपासांक्षुधमेवच । रक्षध्वंकृपयायूयमतोमाम्बहुदुःखिनम्
यथा मुच्येय पैशाच्यात्तथा कुरुततापसाः । इति श्रुत्वापिशाचस्यवचनन्तेतपोधनाः
लोपामुद्रा सहचरमूचिरे कुम्भसम्भवम् ।

तापसा ऊचुः

पिशाचस्यास्य भगवन्ब्रूहि निष्कृतिमुत्तमाम् ॥ १०४ ॥
एवंविधानां पापानां त्वं समर्थो हि रक्षणे । तेषामगस्त्यः श्रुतवाक्कृपयापरयायुतः
प्रियशिष्यं समाहूय सुतीक्ष्णं वाक्यमब्रवीत् ।

अगस्त्य उवाच

सुतीक्ष्ण! गच्छ त्वरितं पर्वतं गन्धमादनम् ॥ १०६ ॥
तत्राग्नितीर्थं सुमहद्विद्यते पापनाशनम् । पिशाचमोक्षणार्थाय तत्र स्नाहि महामते
पिशाचार्थन्त्वयिस्नातेतत्रसङ्कल्पपूर्वकम् । पिशाचभावमुन्मुच्य दिव्यतामेषयास्यति
निष्कृतिर्नास्य पश्यामि विना तत्तीर्थसेवनात् ।
अतः सुतीक्ष्ण! कृपया रक्षस्वैनं पिशाचकम् ॥ १०९ ॥
अगस्त्येनैवमुक्तस्तु सुतीक्ष्णो गन्धमादनम् ।
प्राप्याग्नितीर्थे सङ्कल्प्य पिशाचार्थं कृपानिधिः ॥ ११० ॥

सस्नौ तत्र पिशाचार्थं नियमेन दिनत्रयम् । रामनाथादिकं सेव्य तत्तीर्थंप्रविगाह्यच
स्वाश्रमं प्रतिगत्वाथ सुतीक्ष्णो विप्रसत्तमः ।
तत्तीर्थप्रोक्षणात्सद्यः स विसृज्य पिशाचताम् ॥ ११२ ॥
वैभवात्तस्यतीर्थस्यसद्योदिव्यत्वमाप्तवान् । विमानवरमारूढो दिव्यस्त्रीपरिवारितः
सुतीक्ष्णश्चाप्यऽगस्त्यञ्च तथान्यांश्च तपोधनान् ।
पुनः पुनर्नमस्कृत्य तांश्चाऽऽमन्त्र्य प्रहर्षितः ॥ ११४ ॥
स्वर्गमेवाऽरुहत्तूर्णं देवैरपि पूजितः । अग्नितीर्थस्य माहात्म्याद्दुष्पण्योवैश्यनन्दनः
पैशाच्यं शापजं त्यक्त्वा दिव्यतामित्थमाप्तवान् ।
एवम्वः कथितं विप्रा! अग्नितीर्थस्य वैभवम् ॥११६ ॥
यः पठेदिममध्यायं शृणुयाद्वासभक्तिकम् । पिशाचमोक्षणाख्यानंमुच्यतेसर्वपातकैः
इह भुक्त्वा महाभोगान्परत्राऽपि सुखं लभेत् ॥ ११८ ॥

इतिश्रीस्कान्देमहापुराणएकाशीतिसाहस्र्यांसंहितायां तृतीयेब्रह्मखण्डे
सेतुमाहात्म्येऽग्नितीर्थप्रशंसायांदुष्पण्यपैशाच्यमोक्षणंनाम-
द्वाविंशोऽध्यायः ॥ २२ ॥

त्रयोविंशोऽध्यायः

चक्रतीर्थप्रशंसायामादित्यहिरण्मयपाण्यवाप्तिवर्णनम्

श्रीसूत उवाच

अग्नितीर्थाभिधे तीर्थे सर्वपातकनाशने । स्नानंकृत्वाविशुद्धात्माचक्रतीर्थंततोव्रजेत्
यं यंकामं समुद्दिश्य चक्रतीर्थेद्विजोत्तमाः । स्नानंसमाचरेन्मर्त्यस्तं तंकामंसमश्नुते
पुराऽहिर्बुध्न्यनामा तु महर्षिःसंशितव्रतः । सुदर्शनमुपास्तेस्मिंस्तपस्वीगन्धमादने
तपस्यन्तं मुनितत्र राक्षसा घोररूपिणः । अबाधन्तसदाविप्रास्तपोविघ्नैकतत्पराः

सुदर्शनं तदागत्य भक्तरक्षणवाञ्छया । यातुधानान्बाधमानान्न्यवधीलीलयापुरा।
तदाप्रभृति तच्चक्रं भक्तप्रार्थनयाद्विजाः । अहिर्बुध्न्यकृते तीर्थे सन्निधानंसदाऽकरोत्
तदाप्रभृति तत्तीर्थं चक्रतीर्थमितीर्यते । सुदर्शनप्रसादेन तत्र तीर्थे निमज्जनात्

रक्षःपिशाचादिकृता पीडा नाऽस्त्येव कर्हिचित् ।
स्नात्वाऽस्मिन्पावने तीर्थे छिन्नपाणिःपुरा रविः ॥ ८ ॥
सहिरण्मयौ पाणी लब्धवांस्तीर्थवैभवात् ।

ऋषय ऊचुः

छिन्नपाणिः कथमभूदादित्यःसूतनन्दन !॥ ९ ॥
यथा च लब्धवान्पाणी सौवर्णौ तद्वदस्व नः ।

श्रीसूत उवाच

इन्द्रादयः सुराःपूर्वं सततं दैत्यपीडिताः ॥ १० ॥

किंकुर्मइतिसञ्चिन्त्य सम्भूयसममन्त्रयन् । बृहस्पतिंपुरस्कृत्य मन्त्रयित्वाचिरंसुराः
तुराषाहंपुरोधाय धामस्वायम्भुवंययुः । ते ब्रह्माणंसमासाद्य दृष्ट्वा स्तुत्वा चभक्तितः

ततो व्यजिज्ञपंस्तस्मै स्वेषामागमकारणम् ।

सुरा ऊचुः

भगवन्भारतीनाथ! दैत्या ह्यस्मान्बलोत्कटाः ॥ १३ ॥

बाधन्ते सततं देव! तत्र ब्रूहिप्रतिक्रियाम् । इत्युक्तः स सुरैर्ब्रह्मा तानाह कृपया वचः

ब्रह्मोवाच

मा भैष्ट यूयं विबुधास्तत्रोपायं ब्रवीम्यहम् । माहेश्वरं महायज्ञमसुराणां विनाशनम्
प्रारभध्वं सुरायूयं मुनिभिस्तत्त्वदर्शिभिः । अयञ्च दैवतैःसर्वैर्विधिलोपं विना क्रतुः
माहेश्वरो महायज्ञः क्रियतांगन्धमादने । यदि ह्यन्यत्र तं यज्ञं कुर्यास्तद्विबुधर्षभाः
यज्ञविघ्नं तदा कुर्युर्दुरात्मानःसुरद्विषः । क्रियते यद्ययं यज्ञो गन्धमादनपर्वते
सुदर्शनप्रसादेन नैव विघ्नो भवेत्तदा । अहिर्बुध्न्याभिधानस्य महर्षेर्गन्धमादने
अनुग्रहाय तत्तीर्थे सन्निधत्ते सुदर्शनम् । अतःकुरुध्वं भो यूयं तं यज्ञं गन्धमादने

नातिदूरे चक्रतीर्थादसुराणां विनाशकम् । ततस्ते ब्रह्मवचसा सहसा गन्धमादनम्
बृहस्पतिंपुरस्कृत्य जग्मुर्यज्ञचिकीर्षया । ते प्रणम्य महात्मानमहिर्बुध्न्यं मुनीश्वरम्
अकल्पयन्यज्ञवाटन्नातिदूरे तदाश्रमात् । यज्ञकर्मसु निष्णातैः सहितास्ते तपोधनैः

इष्टिमारेभिरे देवा असुराणां विनाशिनीम् ।
तस्मिन्कर्मणि होताऽऽसीत्स्वयमेव बृहस्पतिः ॥ २४ ॥

बभूव मैत्रावरुणो जयन्तः पाकशासनिः । अच्छावाको बभूवाऽत्र वसूनामष्टमो वसुः
ग्रावस्तदाऽभवत्तत्र शक्तिपुत्रः पराशरः । अष्टावक्रो महातेजा अध्वर्युर्धुरमूढवान् ॥
तत्र प्रतिप्रस्थाताभूद्विश्वामित्रो महामुनिः । नेष्टा बभूव वरुण उन्नेताच धनेश्वरः
ब्रह्मा बभूवसविता यज्ञस्यार्धधुरं वहन् । बभूवब्राह्मणाच्छंसि वशिष्ठो ब्राह्मणोत्तमः
आग्नीध्रोऽभूच्छुनः शेपःपोता जातश्चपावकः । उद्गातावायुरभवत्प्रस्तोताचपरेतराट्

प्रतिहर्ता तु तत्राऽऽसीदगस्त्यः कुम्भसम्भवः ।
सुब्रह्मण्यो मधुच्छन्दा विश्वामित्रात्मजो महान् ॥ ३० ॥

यजमानःस्वयमभूद्देवराजःपुरन्दरः । उपद्रष्टा बभूवात्र व्यासपुत्रःशुको मुनिः ॥
ततस्ते ऋत्विजःसर्वे देवराजं पुरन्दरम् । विधिवद्दीक्षयांचक्रुस्तत्र माहेश्वरे क्रतौ
प्रावर्तत महायज्ञ एवं वै गन्धमादने । सुदर्शनप्रभावेण दुःसहेनाऽतिपीडिताः ॥३३ ॥
नाऽविन्दन्नसुरास्तत्र रन्ध्रं यज्ञे प्रवर्तिते । एवं निरन्तरं योऽसौ प्रावर्तत महाक्रतुः
भक्षयंश्च हविस्तत्र जज्वाल हुतवाहनः । विधिवत्कर्मजालानि कृत्वाध्वर्युरसंभ्रमात्
मन्त्रपूतं पुरोडाशं जुहवामास पावके । हुतशेषं पुरोडाशं विभज्याध्वर्युरादरात् ॥
ऋत्विग्भ्योहोतृमुख्येभ्यः प्रददौ पापनाशनम् । सवित्रे ब्रह्मणे चैकमत्युग्रतरतेजसम्
ददौ तत्र पुरोडाशभागं प्राशित्रनामकम् । प्रतिजग्राहपाणिभ्यां प्राशित्रं सवितातदा

सवितृस्पृष्टमात्रं सत्तत्प्राशित्रं दुरासदम् ।
तस्य पाणी प्रचिच्छेद पश्यतां सर्वऋत्विजाम् ॥ ३६ ॥

ततःसंछिन्नपाणिःसप्राशित्रेणोग्रतेजसा । किमेतदितिसंत्रस्तोविषण्णवदनोऽभवत्

सविता ऋत्विजःसर्वान्समाहूयेदमब्रवीत् ।

सवितोवाच

पुरोडाशस्य भागोऽयं मम प्राशित्रनामकः ॥ ४१ ॥

दत्तश्छिच्छेदमत्पाणीमिवत्स्वेवभवत्स्वपि । अतोभवन्तःसम्भूयसर्वएवहिऋत्विजः

कल्पयन्तामिमौ पाणी नो चेद्यज्ञं निहन्म्यमुम् ।

सवितुर्वाक्यमाकर्ण्य ते सर्वे समचिन्तयन् ॥ ४३ ॥

तत्र मध्ये मुनीन्द्राणां देवानाञ्चैव सर्वशः । अष्टावक्रो महातेजा ऋत्विजस्तानभाषत

अष्टावक्र उवाच

शृणुध्वमृत्विजःसर्वेममवाक्यंसमाहिताः । मयिजीवतिविप्रेन्द्राविरिञ्चानांशतंगतम्

जायन्ते चम्रियन्ते च चतुराननकोटयः । पश्यन्नेव च तान्सर्वानहं प्राणानधारयम् ॥

तत्र लोकेश्वराभिख्ये वर्तमाने प्रजापतौ । विप्रो हरिहरो नामनिवसञ्छ्यामलापुरे

व्याधेनारण्यवासेन केल्यर्थंलक्ष्यवेधिना । छिन्नपादोऽभवद्बाणैर्लक्ष्यमध्यं समागतः

स गन्धमादनं प्राप्य मुनिभिः प्रेरितस्तदा ।

स्नात्वा च मुनितीर्थेऽस्मिन्प्राप्तवांश्चरणौ पुरा ॥ ४६ ॥

तदापुण्यमिदंतीर्थं मुनितीर्थमितीरितम् । इदानीं चक्रतीर्थाख्यं चक्रनाम्नात्वविन्दत

तदत्रक्रियतांस्नानं प्राशित्रच्छिन्नपाणिना । मुनितीर्थे सवित्रापियुष्माकंयदिरोचते

ऋत्विजःकथितास्त्वेवमष्टावक्रमहर्षिणा । सवितारमभाषन्त सर्व एव प्रहर्षिताः

सवितः ! स्नाहि तीर्थेऽस्मिंस्तव पाणी भविष्यतः ।

अष्टावक्रो यथा प्राह तथा कुरु समाहितः ॥ ५३ ॥

ततःससविता गत्वा चक्रतीर्थंमहत्तरम् । सस्नौ पाण्योरवाप्त्यर्थमिष्टदायिनितत्रसः

उत्तिष्ठन्नेव स तदा तत्र स्नात्वा सभक्तिकम् ।

युक्तो हिरण्मयाभ्यान्तु पाणिभ्यां समदृश्यत ॥ ५५ ॥

हिरण्यपाणिं तं दृष्ट्वाजहृषुःसर्वऋत्विजः । ततःसमाप्य तं यज्ञं दैत्यसङ्घान्विजित्यच

इन्द्रादयःसुराःसर्वे सुखिताःस्वर्गमाययुः । तस्मादेतत्समागत्य तीर्थं सर्वैश्च मानवैः

सेवनीयं प्रयत्नेन स्वस्वाभीष्टस्यसिद्धये । अन्धैश्च कुणिभिर्मूकैर्बधिरैःकुब्जकैरपि

खञ्जैःपङ्गुभिरप्येतदङ्गहीनैस्तथापरैः । संछिन्नपाणिचरणैः संछिन्नान्याङ्गसञ्चयैः

मनुष्यैश्च तथान्यैश्च विकलाङ्गस्य पूर्तये । सेवनीयमिदं तीर्थं सर्वाभीष्टप्रदायकम्

एवं वःकथितं विप्राश्चक्रतीर्थस्य वैभवम् । यत्रस्नात्वापुराछिन्नौ पाणीप्रापप्रभाकरः

यःपठेदिममध्यायं शृणुयाद्वा समाहितः । अङ्गानिविकलान्यस्य पूर्णानिस्युर्नसंशयः

मोक्षकामस्य मर्त्यस्य मुक्तिः स्यान्नात्र संशयः ॥ ६२ ॥

इतिश्रीस्कान्देमहापुराणएकाशीतिसाहस्र्यांसंहितायां तृतीयेब्रह्मखण्डे

सेतुमाहात्म्ये चक्रतीर्थप्रशंसायामादित्यहिरण्मयपाण्यवाप्तिर्नाम-

त्रयोविंशोऽध्यायः ॥ २३ ॥

चतुर्विंशोऽध्यायः

शिवतीर्थप्रशंसायां भैरवब्रह्महत्याविमोक्षणवर्णनम्

श्रीसूत उवाच

चक्रतीर्थेनरस्स्नात्वा शिवतीर्थंततोव्रजेत् । यत्रहि स्नानमात्रेण महापातककोटयः

तत्संसर्गाश्चनश्यन्ति तत्क्षणादेवतापसाः । अत्रस्नात्वा ब्रह्महत्यांमुमुचे कालभैरवः

ऋषय ऊचुः

कालभैरवरुद्रस्य ब्रह्महत्या महामुने ! । किमर्थमभवत्सूत ! तन्नो वक्तुमिहार्हसि ॥

श्रीसूत उवाच

वक्ष्यामि मुनयःसर्वे पुरावृत्तंविमुक्तिदम् । यस्य श्रवणमात्रेण सर्वपापैः प्रमुच्यते

प्रजापतेश्च विष्णोश्च बभूव कलहःपुरा । किञ्चित्कारणमुद्दिश्य समस्तजनसन्निधौ

अहमेव जगत्कर्ता नान्यःकर्तास्ति कश्चन । अहं सर्वप्रपञ्चानान्निग्रहाऽनुग्रहप्रदः ॥

मत्तोनाऽन्याधिकः कश्चिन्मत्समोवासुरेष्वपि । एवंसमनुतेब्रह्मादेवानांसन्निधौपुरा

तदा नारायणःप्राह प्रहसन्द्विजपुङ्गवाः । किमर्थमेवं ब्रूषेत्वमहङ्कारेण साम्प्रतम् ॥

वाक्यमेवम्विधं भूयोवक्तुंनार्हसि वै विधे । अहमेव जगत्कर्ता यज्ञोनारायणोविभुः मांविनाऽस्यप्रपञ्चस्यर्जावनंदुर्लभंभवेत् । मत्प्रसादाज्जगत्सृष्टं त्वया स्थावरजङ्गमम् विवादं कुर्वतोरेवं ब्रह्मविष्णवोर्जयैषिणोः । देवानां पुरतस्तत्र वेदाश्चत्वार आगताः

प्रोचुर्वाक्यमिदं तथ्यं परमार्थप्रकाशकम् ।

वेदा ऊचुः

न त्वं विष्णो! जगत्कर्ता न त्वं ब्रह्मन्प्रजापते !॥ १२ ॥

किन्त्वीश्वरो जगत्कर्ता परात्परतरो विभुः ।

तन्मायाशक्तिसंकल्पमिदं स्थावरजङ्गमम् ॥ १३ ॥

सर्वदेवाभिवन्द्यो हि साम्बःसत्यादिलक्षणः । स्रष्टा च पालको हर्तासएवजगतांप्रभुः एवं समीरितं वेदैःश्रुत्वा वाक्यंशुभाक्षरम् । ब्रह्माविष्णुस्तदा तत्र प्रोचतुर्द्विजपुङ्गवाः

ब्रह्मविष्णू ऊचतुः

पार्वत्याऽऽलिङ्गितः शम्भुर्मूर्तिमान्प्रमथाधिपः । कथंभवेत्परम्ब्रह्मसर्वसङ्गविवर्जितम् ताभ्यामितीरिते तत्र प्रणवःप्राहतौ तदा । अरूपो रूपमादाय महता ध्वनिनाद्विजाः

प्रणव उवाच

असौ शम्भुर्महादेवः पार्वत्या स्वातिरिक्तया ।

संक्रीडते कदाचिन्नो किन्तु स्वात्मस्वरूपया ॥ १८ ॥

असौशम्भुरनीशानः स्वप्रकाशोनिरञ्जनः । विश्वाधिकोमहादेवोविश्वाधिकइतिश्रुतः सर्वात्मासर्वकर्तासौस्वतन्त्रः सर्वभावनः । ब्रह्मन्नयंसृष्टिकालेत्वान्नियुङ्क्तेरजोगुणैः सत्त्वेन रक्षणे शम्भुस्त्वां प्रेरयति केशवः !। तमसा कालरुद्राख्यं सम्प्रेरयतिसंहृतौ

अतः स्वतन्त्रता विष्णोयुवयोर्न कदाचन ।

नाऽपि प्रजापतेरस्ति किन्तु शम्भोः स्वतन्त्रता ॥ २२ ॥

ब्रह्मन्विष्णो युवाभ्यान्तु किमर्थं न महेश्वरः ।

ज्ञायते सर्वलोकानां कर्ता विश्वाधिकस्तथा ॥ २३ ॥

सापिशक्तिरुमादेवी न पृथक्शङ्करात्सदा । शम्भोरानन्दभूतासादेवीनागन्तुकीस्मृता

अतोविश्वाधिकोरुद्रः स्वतन्त्रोनिर्विकल्पकः । सर्वदेवैरयंवन्द्यो युवाभ्यामपिशङ्करः

कर्ता नाऽस्यास्तिरुद्रस्य नाधिकोऽस्माच्च विद्यते ।

न तत्समोऽपि लोकेषु विद्यते सर्वदा तथा ॥ २६ ॥

अतो मोहं नकुरुतं ब्रह्मविष्णू युवां वृथा । इत्युक्तं प्रणवेनाथ श्रुत्वा ब्रह्मा च केशवः मायया मोहितौ शम्भोर्नैवाज्ञानममुञ्चताम् । एतस्मिन्नन्तरे ब्रह्मा प्रददर्श महाद्भुतम् व्याप्नुवद्गगनं सर्वमनन्तादित्यसन्निभम् । तेजोमण्डलमाकाशमध्यगं विश्वतोमुखम् तन्निरूपयितुं ब्रह्मा ससर्जोर्ध्वगतं मुखम् । तपोबलविसृष्टेन पञ्चमेन मुखेन सः

निरूपयामास विभुस्तत्तेजोमण्डलं मुहुः ।

तत्प्रजज्वाल कोपेन मुखं तेजोविलोकनात् ॥ ३१ ॥

अनन्तादित्यसंकाशंज्वलत्तत्पञ्चमं शिरः । दिधक्षुःप्रलये लोकान्वडवाग्निरिवाबभौ व्यदृश्यत च तत्तेजः पुरुषो नीललोहितः । दृष्ट्वा स्रष्टा तदा ब्रह्मा बभाषे परमेश्वरम्

वेदाहं त्वां महादेव! ललाटान्मे पुरा भवान् ।

विनिर्गतोऽसि शम्भो! त्वं रुद्रनामा ममाऽऽत्मजः ॥ ३४ ॥

इति गर्वेण संयुक्तं वचःश्रुत्वा महेश्वरः । कालभैरवनामानं पुरुषं प्राहिणोत्तदा अयुद्ध्यत चिरंकालं ब्रह्मणा कालभैरवः । महादेवांशसम्भूतः शूलटङ्कगदाधरः युद्ध्वा तु सुचिरं कालं ब्रह्मणा कालभैरवः । वदनंब्रह्मणःशुभ्रं व्यलोकयत पञ्चमम् विलोक्योर्ध्वगतं वक्त्रं पञ्चमं भारतीपतेः । गर्वेण महतायुक्तं प्रजज्वालातिकोपितः ततस्तत्पञ्चमं वक्त्रं भैरवःप्राच्छिनद्रुषा । ततो ममार ब्रह्माऽसौ कालभैरवहिंसितः ईश्वरस्य प्रसादेन प्रपेदे जीवितं पुनः । ततो विलोकयामास शङ्करं शशिभूषणम् ॥ वासुक्याद्यष्टभोगीन्द्रविभूषणविभूषितम् । दृष्ट्वा वेधामहादेवं पार्वत्यासहशङ्करम् लेभे माहेश्वरं ज्ञानं महादेवप्रसादतः । ततस्तुष्टाव गिरिशं वरेण्यंवरदं शिवम्

ब्रह्मोवाच

मह्यं प्रसीद गिरिश! शशाङ्ककृतशेखर !। यन्मयाऽपकृतंशम्भो! तत्क्षमस्वदयानिधे! क्षमस्व मम गर्वं त्वं शङ्करेति पुनःपुनः । नमश्चकार सोमं तं सोमार्धकृतशेखरम्

अथदेवः प्रसन्नोऽस्मै ब्रह्मणेस्वांशजायतु। मा भैरित्यब्रवीच्छम्भुर्भैरवश्चाभ्यभाषत

ईश्वर उवाच

एष सर्वस्य जगतः पूज्योब्रह्मासनातनः। हतस्यास्यविरिञ्चस्यधारयत्वं शिरोऽधुना ब्रह्महत्याविशुद्ध्यर्थं लोकसंग्रहकाम्यया । भिक्षामटकपालेन भैरवत्वं ममाज्ञया

उक्त्वैवं शङ्करो विप्रास्तत्रैवान्तरधीयत।

नीलकण्ठो महादेवो गिरिजार्द्धतनुस्ततः ॥ ४८ ॥

भैरवं ग्राहयामास वदनं वेधसो द्विजाः। चरस्व पापशुद्ध्यर्थं लोकसंग्रहणाय वै कपालधारीहस्तेन भिक्षांगृह्णातु भैरव !। इतीरयित्वा गिरिशःकन्यांकांचिद्भयंकरीम् ब्रह्महत्याभिधांक्रूरां वडवानलसन्निभाम्। तांप्रेरयित्वा गिरिशो भैरवं पुनरब्रवीत्

ईश्वर उवाच

भैरवैतद्व्रतं त्वब्दं ब्रह्महत्याविशुद्धये। चर त्वं सर्वतीर्थेषु स्नाहि शुद्ध्यर्थमात्मनः ततो वाराणसीं गच्छ ब्रह्महत्याप्रशान्तये। वाराणसीप्रवेशेन ब्रह्महत्या तवाऽधमा

पादशेषा विनिष्टा स्याच्चतुर्थांशो न नश्यति।

तस्य नाशं प्रवक्ष्यामि तव भैरव! तच्छृणु ॥ ५४ ॥

दक्षिणाम्भोनिधेस्तीरे गन्धमादनपर्वते। सर्वप्राण्युपकाराय कृतं तीर्थं मया शुभम् शिवसंज्ञं महापुण्यं तत्र याहि त्वमादरात्। तत्प्रवेशनमात्रेण ब्रह्महत्यातवाशुभा

शिवतीर्थस्य माहात्म्यान्निश्शेषं नश्यति ध्रुवम्।

उक्त्वैवंभैरवंरुद्रःकैलासंप्रययौ क्षणात् ॥ ५७ ॥

ततः कपालपाणिस्तु भैरवः शिवचोदितः। देवदानवयक्षादिलोकेषु विचचार सः तं यान्तमनुयातिस्म ब्रह्महत्यातिभीषणा। भैरवःसर्वतीर्थानि पुण्यान्यायतनानिच चरित्वालीलयादेवस्ततो वाराणसींययौ। वाराणसीं प्रविष्टेतु भैरवे शङ्करांशजे चतुर्थांशं विनानष्टा ब्रह्महत्यातिकुत्सिता। चतुर्थांशोऽनुदुद्राव भैरवंशङ्करांशजम् ततः स भैरवो देवः शूलपाणिः कपालधृक्। शिवाज्ञया ययौ पश्चाद्गन्धमादनपर्वतम्

शिवतीर्थं ततो गत्वा भैरवः स्नातवान्द्विजाः।

स्नानमात्रेण तत्राऽस्य शिवतीर्थे महत्तरे ॥ ६३ ॥

निश्शेषं विलयंयाता ब्रह्महत्याऽतिभीषणा। अस्मिन्नवसरेशम्भुः प्रादुरासीत्तदग्रतः

प्रादुर्भूतो महादेवो भैरवं वाक्यमब्रवीत्।

ईश्वर उवाच

निश्शेषं ब्रह्महत्या ते शिवतीर्थे निमज्जनात् ॥ ६५ ॥

नष्टा भैरव! नास्त्यत्रसन्देहस्तवसुव्रत !। इदंकपालंकाश्यांत्वंस्थापयस्वक्वचित्स्थले इत्युक्त्वाभगवाञ्छम्भुस्तत्रैवान्तरधीयत। भैरवोऽपि तदाविप्राब्रह्महत्याविमोचितः

शिवतीर्थस्य माहात्म्यादाययौ वाराणसीं पुरीम्।

कपालं स्थापयामास प्रदेशे कुत्रचिद्द्विजाः !॥ ६८ ॥

कपालतीर्थमित्याख्यामलभत्तत्स्थलन्तदा ।

श्रीसूत उवाच

एवं प्रभावं तत्पुण्यं शिवतीर्थं विमुक्तिदम् ॥ ६९ ॥

महादुःखप्रशमनं महापातकनाशनम्। नरकक्लेशशमनं स्वर्गदं मोक्षदन्तथा ॥ ७० ॥ शिवतीर्थस्य माहात्म्यंमयाप्रोक्तंविमुक्तिदम्। इदंपठन्सदामर्त्योदुःखग्रामाद्विमुच्यते

इतिश्रीस्कान्देमहापुराणेएकाशीतिसाहस्र्यांसंहितायां तृतीयेब्रह्मखण्डे सेतुमाहात्म्ये शिवतीर्थप्रशंसायां भैरवब्रह्महत्याविमोक्षणंनाम चतुर्विंशोऽध्यायः ॥ २४ ॥

———

पञ्चविंशोऽध्यायः

शङ्खतीर्थप्रशंसायांवत्सनाभकृतघ्नदोषशान्तिवर्णनम्

श्रीसूत उवाच

शिवतीर्थेनरस्स्नात्वा ब्रह्महत्याविमोक्षणे । स्वपापजालशान्त्यर्थंशङ्खतीर्थंततोव्रजेत्
यत्रमज्जनमात्रेण कृतघ्नोऽपि विमुच्यते । मातृःपितृन्गुरूंश्चापियेनमन्यन्तिमोहिताः

ये चाप्यन्ये दुरात्मानः कृतघ्ना निरपत्रपाः ।
ते सर्वे शङ्खतीर्थेऽस्मिञ्छुद्ध्यन्ति स्नानमात्रतः ॥ ३ ॥

शङ्खनामा मुनिः पूर्वं गन्धमादनपर्वते । अवर्तत तपः कुर्वन्विष्णुं ध्यायन्समाहितः
स तत्र कल्पयामासस्नानार्थंतीर्थमुत्तमम् । शङ्खेन निर्मितं तीर्थं शङ्खतीर्थमितीर्यते
तत्रस्नात्वासकृन्मर्त्यःकृतघ्नोपिविमुच्यते । अत्रेतिहासंवक्ष्यामिपुराणंपापनाशनम्
यस्य श्रवणमात्रेण नरो मुक्तिमवाप्नुयात् । पुरा बभूव विप्रेन्द्रोवत्सनाभोमहामुनिः
सत्यवाञ्छीलवान्वाग्मीसर्वभूतदयापरः । शत्रुमित्रसमोदान्तस्तपस्वीविजितेन्द्रियः
परब्रह्मणि निष्णातस्तत्त्वब्रह्मैकसंश्रयः । एवं प्रभावः स मुनिस्तपस्तेपे निजाश्रमे
स वै निश्चलसर्वाङ्गस्तिष्ठंस्तत्रैव भूतले । परमाण्वन्तरं वापि न स्वस्थानाच्चचालसः
स्थित्वैकत्र तपस्यन्तमनेकशतवत्सरान् । तमाचक्राम वल्मीकं छादिताङ्गश्चकार च
वल्मीकाक्रान्तदेहोऽपि वत्सनाभोहामुनिः । अकरोत्तपएवासौवल्मीकन्नत्वबुद्ध्यत
तस्मिंश्च तप्यति तपो वासवोमुनिपुङ्गवाः । विसृज्यमेघजालानिवर्षयामासवेगवान्
एवं दिनानि सप्ताऽयं स ववर्ष निरन्तरम् । आसारेणातिमहता वृष्यमाणोपिवैमुनिः
तं वर्षं प्रतिजग्राह निर्मीलितविलोचनः । महतास्तनितेनाशु तदा बधिरयच्छ्रुतीः
वल्मीकस्योपरिष्टाद्धै निपपात महाशनिः । तस्मिन्वर्षतिपर्जन्ये शीतवातातिदुःसहे

वल्मीकशिखरं ध्वस्तं बभूवाऽशनिताडितम् ।
विशीर्णशिखरे तस्मिन्वल्मीकेऽशनिताडिते ॥ १७ ॥

सेहेऽति दुःसहां वृष्टिं वत्सनाभोऽविचिन्तयन् ।
महर्षौ वर्षधाराभिः पीड्यमाने दिवानिशम् ॥ १८ ॥

धर्मस्य चेतसि कृपा संबभूवातिभूयसी । सधर्मश्चिन्तयामास वत्सनाभेतपस्यति
पतत्यत्यतिवर्षेयं तपसो न निवर्तते । अहोऽस्य वत्सनाभस्य धर्मैकायतचित्तता
इति चिन्तयतस्तस्य मतिरेवमजायत । अहं वै माहिषंरूपं सुमहान्तं मनोहरम्
वर्षधारानिपातानांसोढारंकठिनत्वचम् । स्वीकृत्यमाहिषंरूपंस्थास्याम्युपरियोगिनः
न हि बाधिष्यते वर्षं महावेगयुतं त्वपि । धर्म एवं विनिश्चित्य धाराःपृष्ठेन धारयन्
वत्सनाभोपरि तद्गात्रमाच्छाद्यतस्थिवान् । ततः सप्तदिनान्ते तु तद्वैवर्षमुपारमत्
ततो माहिषरूपी स धर्मोऽति कृपयायुतः । तद्वै वल्मीकमुत्सृज्य नातिदूरे ह्यवर्त्तते
ततो निवृत्ते वर्षे तु वत्सनाभोमहामुनिः । निवृत्तस्तपसस्तूर्णंदिशःसर्वाव्यलोकयन्
स्थितोऽहं वृष्टिसम्पाते कुर्वन्नद्यमहत्तपः । पृथिवीसलिलक्लिन्नाद्दृश्यते सर्वतोदिशम्
शिखराणि गिरीणाञ्च वनान्युपवनानि च । आश्रमाणिमहर्षीणामाप्लुतानिजलैर्नवैः

एवमादीनि सर्वाणि दृष्ट्वा प्रमुदितोऽभवत् ।
चिन्तयामास धर्मात्मा वत्सनाभो महामुनिः ॥ २६ ॥

अहमस्मिन्महावर्षे नूनं केनापिरक्षितः । वर्षत्यस्मिन्महावर्षे जीवितं त्वन्यथा कुतः
विचिन्त्यैवं मुनिश्रेष्ठः सर्वत्रसमलोकयत् । ततोऽपश्यन्महाकायमदूरादग्रतःस्थितम्
महिषं नीलवर्णनञ्च वत्सनाभस्तपोधनः । महिषं तं समुद्दिश्य मनसासमचिन्तयन्
तिर्यग्योनिष्वपिकथं दृश्यते धर्मशीलता । यतो ह्यहं महावर्षान्महिषेणाभिरक्षितम्
दीर्घमायुरमुष्यास्तु यन्मां रक्षितवानिह । इत्यादि स विचिन्त्यैवं तपसे पुनरुद्ययौ
तं पुनश्च तपस्यन्तं दृष्ट्वा महिषरूपधृक् । रोमाञ्चावृतसर्वाङ्गः प्रमोदमगमद्भृशम्

वत्सनाभस्य हि मुनेः पुनश्चैव तपस्यतः ।
मनः पूर्ववदैकाग्र्यं परब्रह्मणि नाऽभवत् ॥ ३६ ॥

स विषण्णमना भूत्वावत्सनाभोव्यचिन्तयत् । नभवेद्यादिनैर्मल्यंतदास्याच्चञ्चलंमनः
मनश्च पापबाहुल्ये निर्मलं नैव जायते । पापलेशोऽपि मे नास्तिकथं लोलायते मनः

अचिन्तयद्दोषहेतुं वत्सनाभःपुनःपुनः । सविचिन्त्यविनिश्चित्यनिनिन्दात्मानमञ्जसा

धिङ्मामद्य दुरात्मानमहो मूढोऽस्म्यहं भृशम् ।
कृतघ्नता महान्दोषो मामद्य समुपागतः ॥ ४० ॥

यदीदृशान्महावर्षात्त्रातारं महिषोत्तमम् । तिष्ठाम्यपूजयन्नेव ततो मेऽभूत्कृतघ्नता

कृतघ्नता महान्दोषः कृतघ्ने नास्ति निष्कृतिः ।
कृतघ्नस्य न वै लोकाः कृतघ्नस्य न बान्धवाः ॥ ४२ ॥

कृतघ्नतादोषबलान्मम चित्तंमलीमसम् । कृतघ्ना नरकंयान्ति ये च विश्वस्तघातिनः निष्कृतिं नैव पश्यामि कृतघ्नानां कथञ्चन । ऋतेप्राणपरित्यागाद्धर्मज्ञानां वचो यथा पित्रोरभरणंकृत्वा ह्यदत्त्वा गुरुदक्षिणाम् । कृतघ्नताञ्चसम्प्राप्यमरणान्ताहिनिष्कृतिः

तस्मात्प्राणान्परित्यज्य प्रायश्चित्तं चराम्यहम् ।
इति निश्चित्य मनसा वत्सनाभो महामुनिः ॥ ४६ ॥

तृणीकृत्यनिजान्प्राणान्निस्सङ्गेनान्तरात्मना । मेरोःशिखरमारूढप्रायश्चित्तचिकीर्षया सुमेरुशिखरात्तस्मादियेषपतितुं मुनिः । तस्मिन्पतितुमारब्धे मात्वरिष्ठा इति ब्रुवन्

त्यक्तमाहिषरूपः सन्धर्मएव न्यवारयत् ।

धर्म उवाच

वत्सनाभ! महाप्राज्ञ! जीव त्वं बहुवत्सरान् ॥ ४९ ॥
परितुष्टोऽस्मि भद्रन्ते देहत्यागचिकीर्षया ।
न हि ते धर्मकश्यायां लोके कश्चित्समोऽस्ति वै ॥ ५० ॥

यद्यपिप्राणसंत्यागः कृतघ्नेनिष्कृतिर्भवेत् । तथापिधर्मशालत्वात्तवान्यांनिष्कृतिंवदे शङ्खतीर्थाभिधं तीर्थमस्ति वै गन्धमादने । शान्त्यर्थमन्यपापस्यतत्रस्नाहिसमाहितः प्राप्स्यसे चित्तशुद्धिंत्वमतोविगतकल्मषः । ततश्चलब्धविज्ञानःप्राप्स्यसेशाश्वतंपदम् अहं धर्मोऽस्मि योगीन्द्रसत्यमेवब्रवीमि ते । इतिधर्मवचःश्रुत्वावत्सनाभोमहामुनिः स्नातुकामःशङ्खतीर्थं गन्धमादनमन्वगात् । शङ्खतीर्थञ्चसम्प्राप्य तत्र सस्नौ महामुनिः ततो विगतपापस्य मनो निर्मलतां गतम् । ततोऽचिरेण कालेन ब्रह्मभूयमगान्मुनिः

एवं वः कथितं विप्राः! शङ्खतीर्थस्य वैभवम् ।
यत्र हि स्नानमात्रेण कृतघ्नोऽपि विमुच्यते ॥ ५७ ॥

मातृद्रोही पितृद्रोही गुरुद्रोही तथैव च । अन्ये कृतघ्ननिवहा मुच्यन्तेऽत्रनिमज्जनात् अतःकृतघ्नैर्मनुजैः सेवनीयमिदं सदा । अहोतीर्थस्यमाहात्म्यं यत्कृतघ्नोऽपि मुच्यते

अकृत्वा भरणं पित्रोरदत्त्वा गुरुदक्षिणाम् ।
कृतघ्नताञ्च सम्प्राप्य मरणान्ता हि निष्कृतिः ॥ ६० ॥

इह तु स्नानमात्रेण कृतघ्नस्यापि निष्कृतिः । कृतघ्नतापितत्तीर्थेस्नानमात्राद्विनश्यति

अन्येषां तुच्छपापानां सर्वेषां किमुताऽधुना ॥

अध्यायमेनं पठेद्भक्तियुक्तः कृतघ्नोऽपि मर्त्यः स पापाद्विमुक्तः ।
विशुद्धान्तरात्मा गतः सत्यलोकं समं ब्रह्मणा मोक्षमप्याशु गच्छेत् ॥ ६३ ॥

इतिश्रीस्कान्देमहापुराणएकाशीतिसाहस्र्यां संहितायांतृतीयेब्रह्मखण्डे
सेतुमाहात्म्ये शङ्खतीर्थप्रशंसायांवत्सनाभकृतघ्नदोषशान्तिर्नाम-
पञ्चविंशोऽध्यायः ॥ २५ ॥

षड्विंशोऽध्यायः

यमुनातीर्थप्रशंसायांजानश्रुतिज्ञानावाप्तिवर्णनम्

श्रीसूत उवाच

विधायाभिषवं मर्त्यः शङ्खतीर्थे द्विजोत्तमाः । यमुनाञ्चैवगङ्गाञ्चगयाञ्चापिक्रमाद्व्रजेत् यमुनाख्यं महातीर्थं गङ्गातीर्थमनुत्तमम् । गयातीर्थञ्च मर्त्यानां महापातकनाशनम् एतत्तीर्थत्रयं पुण्यं सर्वलोकेषु विश्रुतम् । सर्वविघ्नप्रशमनं सर्वरोगनिबर्हणम् ॥ ३ ॥ एतद्धितीर्थत्रितयं सकलाज्ञाननाशनम् । अविद्यायां विनष्टायां तथाज्ञानप्रदन्नृणाम् जानश्रुतिर्महाराज एषु तीर्थेषु वै पुरा । स्नात्वारैक्वाद्द्विजश्रेष्ठात्प्राप्तवाञ्ज्ञानमुत्तमम्

ऋषय ऊचुः

सूत! सर्वार्थतत्त्वज्ञ! व्यासशिष्य महामते। यमुनाचैवगङ्गात्र गयाचैवेति विश्रुतम्॥
एतत्तीर्थत्रयं कस्मादागतं गन्धमादने। जानश्रुतेश्च राजर्षे! स्नानात्तीर्थत्रयेऽपि च॥
ज्ञानावाप्तिः कथं रैक्कादस्माकं सूत! तद्वद।

श्रीसूत उवाच

रैक्कनामा महर्षिस्तु पुरा वै गन्धमादने॥ ८॥
तपस्सुदुश्चरं कुर्वन्न्यवसत्तपसान्निधिः। दीर्घकालं तपःकुर्वन्स वै रैक्को महामुनिः
तपोबलेन महता दीर्घमायुरवाप्तवान्। जन्मना पङ्गुरेवासीद्रैक्कनामा महामुनिः॥
पङ्गुत्वादसमर्थोभूद्गन्तुं तीर्थान्यसौ मुनिः। सन्तियानितुतीर्थानिगन्धमादनपर्वते
तानिगच्छति सामीप्याच्छकटेनैवसञ्चरन्। स यद्रैक्को मुनिवरो युग्वेन सह वर्तते
तपस्वीवैदिकेर्लोके सयुग्वानभिधीयते। युग्वेतिशकटंप्रोक्तं स तेन सह वर्तते॥
स खल्वेवं मुनिश्रेष्ठः सयुग्वान्नाम वै मुनिः।
पूर्णज्ञानस्तपस्तेपे गन्धमादनपर्वते॥ १४॥
ग्रीष्मे पञ्चाग्निमध्यस्थः सोऽतप्यत महत्तपः। वर्षायांकण्ठदघ्नेषु जलेषु समवर्तत
तपसा शोषिते गात्रे पामातस्य व्यजायत। कण्डूयतस पामानं दिवारात्रं मुनीश्वरः
कण्डूयमान एवायं पामानं न तपोऽत्यजत्। अजायत मनस्त्वेवंतस्यसयुग्वतोमुनेः
यमुनायां च गङ्गायां गयायां चाधुनैव हि।
अस्मिंस्तीर्थत्रये पुण्ये स्नातव्यं हि मयात्विति॥ १८॥
एवं विचिन्त्य स मुनिरन्यां चिन्तामथाकरोत्। अहंहिजन्मनापङ्गुरतःस्नानंहिदुर्लभम्
अतिदूरं मया गन्तुं शकटेन न शक्यते। किंकरोम्यधुनेत्येवं स वितर्क्यमहामतिः
तीर्थत्रयेषु स्नानार्थं कर्तव्यं निश्चिकाय वै। अप्रसह्यमनाधृष्यं विद्यते मे तपोबलम्
तेनैवाऽऽवाहयिष्यामि तद्धि तीर्थत्रयन्त्विह।
इति निश्चित्य मनसा प्राङ्मुखो नियतेन्द्रियः॥ २२॥
त्रिरात्रम्य च सयुग्वान्दध्यौ क्षणमतन्द्रितः। तस्यमन्त्रप्रभावेणयमुना सामहानदी

गङ्गा च जह्नुतनया गया सा पापनाशिनी।
भूमिं निर्भिद्य तिस्रोऽपि पातालात्सहसोत्थिताः॥ २४॥
मानुषं रूपमास्थाय सयुग्वानमुपेत्य च। ऊचुःपरमसंहृष्टा हर्षयन्त्यश्च तं मुनिम्
सयुग्वन्रैक्कभद्रन्ते ध्यानादस्मादुपारम। त्वन्मन्त्रेणसमाकृष्टा वयमत्र समागताः
किंकर्तव्यं तवाऽस्माभिस्तद्वदस्व मुनीश्वर!।
इति तासां वचः श्रुत्वा सयुग्वान्हि महामुनिः॥ २७॥
ध्यानादुपारमत्तूर्णं ताश्चापश्यत्पुरःस्थिताः। सताःसम्पूज्यविधिवद्रैक्कोवाचमभाषत
यमुनेदेवि! हे गङ्गे! हे गये! पापनाशिनि!। सन्निधानं कुरुध्वं मे गन्धमादनपर्वते॥
यत्र भूमिविनिर्भिद्य भवत्य इह निर्गताः। तानिपुण्यानितीर्थानिभवेयुर्वोऽभिधानतः
सहसान्तरधीयन्तथास्त्वित्यैव तत्र ताः। तदा प्रभृतितीर्थानितानित्रीण्यपिभूतले
तेन तेनाभिधानेन गीयन्ते सर्वदा जनैः। यत्र भूमिं विनिर्भिद्ययमुनानिर्गता तदा
यमुनातीर्थमिति वै तज्जनैरभिधीयते। यतो वै पृथिवीरन्ध्राज्जाह्नवीसहसोत्थिता
गङ्गातीर्थमितिख्यातं तल्लोके पापनाशनम्। गया हि मानुषंरूपं यत आस्थायनिर्ययौ
तद्वैव भूमिविवरं गयातीर्थं प्रचक्ष्यते। एवमेतन्महापुण्यं तीर्थत्रयमनुत्तमम्॥ ३५
रैक्कमन्त्रप्रभावेण पृथिव्याःसहसोत्थितम्। अत्र तीर्थत्रये स्नानंयेकुर्वन्ति नरोत्तमाः
तेषामज्ञाननाशःस्याज्ज्ञानमप्युदयं लभेत्। स्वमन्त्रेण समाकृष्टे तत्र तीर्थत्रये मुनिः
स्नानं समाचरन्नित्यं स कालानत्यवाहयत्।
एतस्मिन्नेव काले तु राजा जानश्रुतिर्महान्॥ ३८॥
पुत्रसञ्ज्ञस्य राजर्षेः पौत्रो धर्मैकतत्परः। ददावन्नादि स तदा ह्यर्थिभ्यःश्रद्धयैव यत्
तदेनं मुनयो लोके श्रद्धादेयं प्रचक्षते। यतो बहुतरं वाक्यमन्नाद्यस्य महीपतेः॥
अर्थिनां क्षुधितानान्तु तृप्त्यर्थं वर्तते गृहे। अतोऽयमर्थिभिःसर्वैर्बहुवाक्य इतीर्यते॥
स वै पौत्रायणो राजा जानश्रुतिसुतो बली।
प्रियातिथिर्बभूवासौ बहुदायी तथाऽभवत्॥ ४२॥
नगरेषु च राष्ट्रेषु ग्रामेषु च वनेषु च। चतुष्पथेषु सर्वेषु महामार्गेषु सर्वशः॥ ४३॥

बह्वन्नपानसंयुक्तं सूपशाकादि संयुतम् । आतिथ्यंकल्पयामास तृप्तयेऽर्थिजनस्य वै ॥
अन्नपानादिकं सर्वमुपभुङ्ग्ध्वमिहार्थिनः । इत्यसौ घोषयामास तत्र तत्र जनास्पदे
तस्य प्रियातिथेरेव नृपस्य बहुदायिनः । अर्थिभ्योदानशौण्डस्यगुणाःसर्वत्रविश्रुताः

अथ पौत्रायणस्यास्य गुणग्रामेण तोषिताः ।
देवर्षयो महाभागास्तस्याऽनुग्रहकाङ्क्षिणः ॥ ४७ ॥

हंसरूपं समास्थाय निदाघसमये निशि । रमणीयां विधायाशु श्रेणीमाकाशमार्गतः
सौधवातायनस्थस्य तस्योपरि महीपतेः । उड्डीयोड्डीयवेगेन तरसाजग्मुरुच्चकैः ॥
तरसा पततां तेषां हंसानां पृष्ठतो व्रजन् । एको हंसस्तु सम्बोध्य हंसमग्रेसरन्तदा

सोपहासमिदं वाक्यं प्राह शृण्वति राजनि ।
भो भो भल्लाक्ष! भल्लाक्ष! पुरोगच्छन्मरालक !॥ ५१ ॥

सौधमध्ये पुरस्ताद्वै जानश्रुतिसुतो नृपः । वर्तते पूजनीयोयं न पश्यसिकिमन्धवत्
यस्य तेजो दुराधर्ष माब्रह्मभवनादिदम् । अनन्तादित्यसङ्काशं ज्वलते पुरतो भृशम्

तमतिक्रम्य राजर्षिमा गास्त्वमुपरि, द्रुतम् ।
यदि गच्छसि तत्तेजस्साम्प्रतं त्वां प्रधक्ष्यति ॥ ५४ ॥

इत्युक्तवन्तं तं हंसमग्रगःप्रत्यभाषतः । अहो भवानभिज्ञोसि श्लाघनीयोऽसिसूरिभिः
अश्लाघनीयं कितवं यत्त्वमेनं प्रशंससे । प्रशंससे किमर्थन्त्वमल्पंसन्तमिमञ्जनम् ॥
भस्त्रावत्पशुवच्चैव केवलंश्वासधारिणम् । न ह्यहं वेत्तिधर्माणां रहस्यंपृथिवीपतिः
तत्त्वज्ञानी यथा रैक्वः सयुग्वान्ब्राह्मणोत्तमः । रैक्वस्यहिमहज्ज्योतिरहस्यं दैवतैरपि
न ह्यस्य प्राणमात्रस्य तेजस्तादृशमस्ति वै । रैक्वस्यपुण्यराशीनामियत्तानैव विद्यते
गण्यन्ते पांसवो भूमेर्गण्यन्ते दिवि तारकाः । रैक्वपुण्यमहामेरुसमूहो नैव गण्यते

किञ्च तिष्ठन्त्विमे धर्मा नश्वरास्तस्य वै मुनेः ।
ब्रह्मज्ञानमबाध्यं यत्तेन स श्लाघ्यते मुनिः ॥ ६१ ॥

जानश्रुतेस्तु तादृक्षो धर्म एव न विद्यते । दुर्लभंयत्तु योगीन्द्रैः कुतस्तज्ज्ञानवैभवम्
परित्यज्य दुरात्मानं तद्वराकमिमञ्जनम् । स एवरैक्वःसयुग्वाञ्श्लाघ्यतांभवतामुनिः

जन्मना पङ्गुरपि यःस्वस्य स्नानचिकीर्षया । गङ्गाञ्च यमुनाञ्चापिगयामपिमुनीश्वरः
आह्वयामास मन्त्रेण निजाश्रमसमीपतः । तस्यब्रह्मविदो रैक्वमहर्षेर्धर्मसञ्चये ॥ ६५

अन्तर्भवन्ति धर्मौघास्त्रैलोक्योदरवर्तिनाम् ।
रैक्वस्य धर्मकक्ष्या तु न हि त्रैलोक्यवर्तिनाम् ॥ ६६ ॥

प्राणिनां धर्मकक्ष्यायामन्तर्भवति कर्हिचित् । एवमग्रेसरे हंसे कथित्वोपरते सति
हंसरूपामुनीन्द्रास्ते ब्रह्मलोकं ययुः पुनः । अथपौत्रायणोराजा जानश्रुतिररिन्दमः
रैक्वंवोत्कर्षकाष्ठायांनिशम्यपरमावधिम् । विषण्णोभवदत्यर्थंवराकोऽक्षजितोयथा

चिन्तयामास स नृपः पौनःपुन्येन निःश्वसन् ।
हंस उत्कर्षयन् रैक्वं निकृष्टं मामिहाब्रवीत् ॥ ७० ॥
अहो रैक्वस्य माहात्म्यं यं प्रशंसन्ति पक्षिणः ।
तत्परित्यज्य संसारं सर्वं राज्यमिहाऽधुना ॥ ७१ ॥

सयुग्वानं महात्मानं तमेव शरणं व्रजे । कृपानिधिः स वै रैक्वः शरणंमामुपागतम् ॥
प्रतिगृह्यात्मविज्ञानं मह्यंसमुपदेक्ष्यति । इत्यसौ चिन्तयन्नेव कथं कथमपि द्विजाः
जाग्रन्नेवायमुद्वेलां रात्रिं तामत्यवाहयत् । निशाऽवसानेसम्प्राप्ते वन्दिवृन्दप्रवर्तितम्
अशृणोन्मङ्गलरवं तूर्यघोषसमन्वितम् । तदाकर्ण्य महाराजस्तदातलपस्थ एव सन्
सारथिं शीघ्रमाहूय बभाषे सादरं वचः । सारथे! सत्वरं गत्वा रथमारुह्य वेगवत् ॥
आश्रमेषु महर्षीणां पुण्येषु विपिनेषु च । विविक्तेषु प्रदेशेषु सतामावासभूमिषु ॥
तीर्थानां च नदीनां च कूलेषु पुलिनेषु च । अन्येषु च प्रदेशेषु यत्रसन्ति मुनीश्वराः
तेषु सर्वेषु योगीन्द्रं पङ्गुंशकटसंस्थितम् । रैक्वाभिधानं सर्वेषां धर्माणामेकसंश्रयम्
ब्रह्मज्ञानैकनिलयं सयुग्वानं गवेषय । अन्विष्य तूर्णमत्प्रीत्यै पुनरागच्छ सारथे !॥
स तथेति विनिर्गत्य वेगवद्रथसंस्थितः । सर्वत्रान्वेषयामास रैक्वंब्रह्मविदंमुनिम्
गुहासु पर्वतानाञ्च मुनीनामाश्रमेषु च । सञ्चचार महीं कृत्स्नां तत्र तत्र गवेषयन्

अन्विष्य विविधान्देशान्सारथिस्त्वरया सह ।
क्रमान्महर्षिसम्बाधं गन्धमादनमन्वगात् ॥ ८३ ॥

मार्गमाणःस तत्रापि तं ददर्श मुनीश्वरम् । कण्डूयमानंपामानंशकटीयस्थलस्थितम्
अद्वैतं निष्कलं ब्रह्म चिन्तयन्तं निरन्तरम् । तं दृष्ट्वासारथिस्तत्रसयुग्वानंमहामुनिम्
रैक्कोऽयमितिसञ्चिन्त्य तमासाद्य प्रणम्यच । विनयान्मुनिमप्राक्षीदुपविश्यतदन्तिके
सयुग्वान् रैक्कनामा च ब्रह्मन्कि वै भवानिति ।
तस्य वाक्यं समाकर्ण्य स मुनिः प्रत्यभाषत ॥ ८७ ॥
अहमेव हि सयुग्वान् रैक्कनामेति वै तदा । इत्याकर्ण्य मुनेर्वाक्यमिङ्गितैर्बहुभिस्तथा
कुटुम्बभरणार्थाय धनेच्छामवगम्य च । सर्वं न्यवेदयद्राज्ञे निवृत्तो गन्धमादनात्
जानश्रुतिर्निशम्याथ सारथेर्वाक्यमादरात् । षट्शतानिगवाञ्चापिनिष्कभारंधनस्यच
रथं चाश्वतरीयुक्तं समादाय त्वरान्वितः । पौत्रायणःसराजर्षिस्तं रैक्वं प्रतिचक्रमे
गत्वा च वचनं प्राह तं रैक्वं स महीपतिः । भगवन्रैक्क सयुग्वन्मद्दत्तं प्रतिगृह्यताम्
षट्शतानि गवाञ्चापि निष्कभारं धनस्य च । रथं चाश्वरीयुक्तं प्रतिगृह्णीष्वमामकम्
गृहीत्वा सर्वमेतत्तु भो ब्रह्मन्ननुशाधिमाम् । अद्वैतब्रह्मविज्ञानं मह्यं समुपदिश्यताम्
इतितस्यवचःश्रुत्वा सस्पृहश्च ससंभ्रमम् । रैक्कःप्रत्याह सयुग्वाञ्जानश्रुतिमरिन्दमम्

रैक्क उवाच

एता गावस्तवैवास्तुनिष्कभारस्तथा रथः । किमल्पेन ममानेन बहुकल्पेषु जीवतः
न मे कुटुम्बनिर्वाहे पर्याप्तमिदमञ्जसा । एवं शतगुणञ्चापि यदि दत्तन्त्वया मम
नालं तदपि राजेन्द्र! कुटुम्बभरणाय वै । इति रैक्कवचःश्रुत्वा जानश्रुतिरभाषत ॥

जानश्रुतिरुवाच

त्वयोपदिश्यमानस्य ब्रह्मज्ञानस्य वै मुने । न हि मूल्यमिदं ब्रह्मन्गोधनं रथ एव च
प्रतिगृह्णीष्व वा नैव ममैतत्तु गवादिकम् । निष्कलाद्वैतविज्ञानं ब्रह्मन्नुपदिशस्व मे
तदाकर्ण्य वचस्तस्य सयुग्वान्वाक्यमब्रवीत् ।

रैक्क उवाच

निर्वेदो यस्य संसारे तथा वै पुण्यपापयोः ॥ १०१ ॥
प्रारब्धयोर्विनाशश्च स वै ज्ञानोपदेशभाक् । तवयद्यपि संसारे निर्वेदःसमजायत ॥

तथापि पुण्यपापानां न हि नाशोऽप्यजायत । पुण्यपापौघसङ्घाश्च पुनर्जन्मनिहेतवः
न हि भोगं विना तेषां नाशो भवति भूपते !। तन्नाशोपायमद्याहं तथापि प्रब्रवीमिते
यतो मां शरणंप्राप्तस्तच्छृणुष्व समाहितः । अत्र तीर्थत्रयं पुण्यंवर्ततेऽभीष्टदायकम्
मुमुक्षूणां हि सर्वेषां सर्वप्रारब्धनाशनम् । एतद्धियमुनातीर्थं गङ्गातीर्थं तथैव च
गयातीर्थमिदं चापि तदेषु स्नाहि माचिरम् । सर्वप्रारब्धनाशःस्यात्तदा नैवात्रसंशयः
ततस्ते शुद्धचित्तस्य ज्ञानं तद दिशाम्यहम् । इत्युक्ते रैक्कमुनिना हर्षसम्फुल्ललोचनः
ससंभ्रममुपागम्यसस्नौ तीर्थत्रयेऽपि सः । तत्तीर्थस्नानमात्रेणशुद्धचित्तोऽभवन्नृपः
उपातिष्ठत राजाऽसौ सयुग्वानं गुरुम्पुनः ।
सयुग्वान् स च रैक्कोऽपि मुनीन्द्रैरपि दुर्लभम् ॥ ११० ॥
तज्ज्ञानश्रुतये ज्ञानं कृपया समुपादिशत् । तेनोपादिष्टमात्रे तु विज्ञाने ब्रह्मरूपिणि
अबाधितानुभववानभवद्राजसत्तमः । ब्रह्मरूपं गतस्याऽस्य प्रसादाद्रैक्कयोगिनः ॥
घटकुड्यकुशूलात्मा न प्रपञ्चस्समस्फुरत् । निर्भिद्य सहसा मायामभूद्ब्रह्मैव केवलम्
इत्थं तीर्थत्रये स्नानाज्ज्ञानश्रुतिरहो नृपः । दुर्लभं योगिवृन्दैश्च ब्रह्मभूयत्वमाप्तवान्
एवं वः कथितं विप्रास्तत्तीर्थत्रयवैभवम् । यस्त्विमं पठतेऽध्यायंतीर्थत्रितयवैभवम्
निर्भिद्याऽज्ञानतिमिरं ब्रह्मभूयाय कल्पते ॥ ११६ ॥

इतिश्रीस्कान्दे महापुराणएकाशीतिसाहस्र्यांसंहितायां तृतीयेब्रह्मखण्डे
सेतुमाहात्म्येयमुनादितीर्थप्रशंसायांजानश्रुतिज्ञानावाप्तिर्नाम
षड्विंशोऽध्यायः ॥ २६ ॥

सप्तविंशोऽध्यायः

कोटितीर्थप्रशंसायांकृष्णस्यमातुलवधदोषशान्तिवर्णनम्

श्रीसूत उवाच

यमुनायां च गङ्गायां गयायां च नरो मुदा ।
स्नानं विधाय विधिवत्कोटितीर्थं ततो व्रजेत् ॥ १ ॥

कोटितीर्थम्महापुण्यं सर्वलोकेषु विश्रुतम् । सर्वसम्पत्करं शुद्धं सर्वपापप्रणाशनम्
दुःस्वप्ननाशनं ह्येतन्महापातकनाशनम् । महाविघ्नप्रशमनम्महाशान्तिकरं नृणाम्

स्मृतिमात्रेण यत्पुंसां सर्वपापनिषूदनम् ।
लीलया धनुषःकोट्या स्वयं रामेण निर्मितम् ॥ ४ ॥

पुरा दाशरथी रामो निहत्ययुधि रावणम् । ब्रह्महत्याविमोक्षाय गन्धमादनपर्वते
प्रातिष्ठिपल्लिङ्गमेकं लोकानुग्रहकाम्यया । लिङ्गस्यास्याभिषेकाय शुद्धंवारिगवेषयन्
नाविन्दतजलन्तत्रपार्श्वे दशरथात्मजः । लिङ्गाभिषेकयोग्यं स्वजलंकिमितिचिन्तयन्
नवेन वारिणा लिङ्गं स्नापनीयं मयेति सः । निश्चित्य मनसातत्रधनुष्कोट्यारघूद्वहः
बिभेदधरणींशीघ्रं मनसा जाह्नवीं स्मरन् । रामकार्मुककोटिःसा तदाप्रापरसातलम्
तत उद्धारयामास तद्धनुर्धन्विनां वरः । धनुष्युद्धृयमाणे तु राघवेण महीतलात्
राघवेणस्मृता गङ्गा निर्ययौ विवरात्ततः । वारिणा तेन तल्लिङ्गमभ्यषिञ्चद्रघूद्वहः
रामकार्मुककोट्यैव यतस्तन्निर्मितम्पुरा । अतः कोटिरितिख्यातं तत्तीर्थं भुवनत्रये
यानि यानीह तीर्थानि सन्ति वै गन्धमादने । प्रथमं तेषुतीर्थेषुस्नात्वाविगतकल्मषः

शेषपापविमोक्षाय स्नायात्कोटौ नरस्ततः ।
तीर्थान्तरेषु स्नानेन यः पापौघो न नश्यति ॥ १४ ॥
अनेकजन्मकोटीभिरर्जितो ह्यस्थिसंस्थितः ।
विनश्यति स सर्वोऽपि कोटिस्नानान्न संशयः ॥ १५ ॥

यदि हि प्रथमं स्नायादत्र कोटौ नरो द्विजाः ! ।
तस्य मुक्तस्य तीर्थानि व्यर्थान्येवापराणि हि ॥ १६ ॥

ऋषय ऊचुः

सूतसर्वार्थतत्त्वज्ञव्यासशिष्यमुनीश्वर! । अस्माकंसंशयंकञ्चिच्छिन्धिपौराणिकोत्तम

कोटौ स्नातस्य मर्त्यस्य यदि तीर्थान्तरं वृथा ।
किमर्थं धर्मतीर्थादि तीर्थेषु स्नान्ति मानवाः ॥ १८ ॥
तीर्थानि तानि सर्वाणि समतिक्रम्य मानवाः ।
अत्रैव कोटौ किं स्नानं न कुर्वन्ति हि तद्वद ॥ १९ ॥

श्रीसूत उवाच

अहोरहस्यं युष्माभिः पृष्टमेतन्मुनीश्वराः । नारदायपुराशम्भुःपृच्छतेयत्किलाऽब्रवीत्
तद्ब्रवीमि मुनिश्रेष्ठाःश्रृणुध्वंश्रद्धयासह । गच्छन्यद्रुच्छयावापितीर्थयात्रापरोऽपिवा
मार्गमध्येद्विजश्रेष्ठास्तीर्थं देवालयं तथा । दृष्ट्वा श्रुत्वापि वा मोहान्नसेवेत नराधमः
निष्कृतिस्तस्यनास्तीतिप्राब्रुवन्परमर्षयः । सेतुंगच्छंस्ततोऽन्येषुनस्नायाद्यदिमानवः

तीर्थादिक्रमदोषैः स बहिष्कार्योऽन्त्यवद् द्विजैः ।
अतः स्नातव्यमेवैषु चक्रतीर्थादिषु द्विजाः ॥ २४ ॥

स्नात्वा चैतेषु तीर्थेषु शेषपापविमुक्तये । प्रयतैर्मनुजैरत्र स्नातव्यं कोटितीर्थके ॥
कोटौ चाभिषवं कृत्वा न तिष्ठेद्गन्धमादने । निवर्तेत्तत्क्षणादेव निष्पापोगन्धमादनात्
रामोऽपि हिपुराकोटितीर्थसम्भूतवारिणा । रामनाथेऽभिषिक्तेतुस्वयंस्नात्वाचतत्रवै
ब्रह्महत्याविमुक्तस्सन्स्तत्क्षणादेवसानुजः । आरूढपुष्पकोयोध्यांप्रययौकपिभिर्वृतः
अतः कोटौ नरःस्नात्वा पापशेषविमोचितः । निवर्तेत्तत्क्षणादेव रामोदाशरथिर्यथा
एतद्धितीर्थप्रवरं सर्वलोकेषु विश्रुतम् । रामनाथाभिषेकाय निर्मितं राघवेण यत्
स्वयम्भगवती यत्र सन्निधत्ते च जाह्नवी । तारकब्रह्मणा यत्र रामेण स्नातमादरात्

तस्य वै कोटितीर्थस्य महिमा केन कथ्यताम् ।
यत्र स्नात्वा पुरा कृष्णो लोकसङ्ग्रहणेच्छया ॥ ३२ ॥

मातुलस्य तुकंसस्यवधदोषाद्विमोचितः । तस्यवै कोटितीर्थस्य महिमाकेनकथ्यते

ऋषय ऊचुः

किमर्थमवधीत्कंसं मातुलं यदुनन्दनः । यद्दोषशान्तये सूत सस्नौ कोटौ सहात्मनः

श्रीसूत उवाच

वसुदेव इति ख्यातः शूरपुत्रो यदोःकुले । आसीत्सदेवकसुतांदेवकीमिति विश्रुताम्
उद्वाह्य रथमारूढः स्वपुरं प्रस्थितः पुरा । अथ सूतोबभूवाऽथ कंसो ह्यानकदुन्दुभेः
अशरीरा तदा वाणी कंसं सारथिमब्रवात् । भगिनीं च तथा भामं वाहयन्तं रथोत्तमे
यामिमां वाहयस्यत्र रथेन त्वमरिन्दम !। अस्यास्त्वामष्टमोगर्भोवधिष्यतिनसंशयः
इत्याकर्ण्य वचो दिव्यं कंसः खड्गं प्रगृह्यच । स्वसारंहन्तुमुद्योगंचकारद्विजपुङ्गवाः

ततः प्रोवाच तं कंसं वसुदेवः ससान्त्वयन् ।

वसुदेव उवाच

अस्यां प्रसूतान्दास्यामि तुभ्यं कंस! सुतानहम् ॥ ४० ॥
एनां स्वसारं मा हिंसीर्नाऽस्यास्ते भीतिरस्ति हि ।
श्रुत्वा तद्वचनं कंसो निवृत्तस्तद्वधात्तदा ॥ ४१ ॥

देवकीवसुदेवाभ्यां सहितः स्वपुरं ययौ । पादावसक्तनिगडौ देवकीवसुदेवकौ ॥
स्थापयामास दुष्टात्मा कंसः कारागृहे तदा । ततःकालेन महता वसुदेवाद्वि देवकी

षट्पुत्राञ्जनयामास क्रमेण मुनिपुङ्गवाः !।
जातांस्तान्वसुदेवेन दत्तान्कंसोऽपि सोऽवधीत् ४४ ॥

हतेषु षट्सु पुत्रेषु देवक्युदरजन्मसु । कंसेन क्रूरमतिना निष्कृपेण द्विजोत्तमाः ॥
शेषोऽभूत्सप्तमो गर्भो देवक्या जठरे तदा । मायादेवीततोगर्भं तं वै विष्णुप्रचोदिता
नन्दगोपगृहस्थायां रोहिण्यां समवेशयत् । देवक्याः सप्तमोगर्भःपतितोजठरादिति
लोके प्रसिद्धिरभवन्महतीविष्णुलीलया । देवकी जठरेपश्चाद्विष्णुगर्भत्वमाप्तवान् ॥
ततो दशसु मासेषु गतेषु हरिरव्ययः । देवकी जठराज्जज्ञे कृष्णइत्यभिविश्रुतः ॥
शङ्खचक्रगदाखड्गविराजितचतुर्भुजः । किरीटीवनमाली च पित्रोः शोकविनाशनः

तं दृष्ट्वा हरिमीशानं तुष्टावाऽऽनकदुन्दुभिः ॥ ५१ ॥

वसुदेव उवाच

विश्वं भवान्विश्वपतिस्त्वमेव विश्वस्य योनिस्त्वयि विश्वमास्ते ।
महान्प्रधानश्च विराट्स्वराट् च सम्राडसि त्वं भगवन्समस्तम् ॥ ५२ ॥
एवं जगत्कारणभूतधाम्ने नारायणायाऽमितविक्रमाय ।
श्रीशार्ङ्गचक्रासिगदाधराय नमोनमः कृत्रिममानुषाय ॥ ५३ ॥

स्तुवन्तमेवं शौरिं तं वसुदेवं हरिस्तदा । अवोचत्प्रीणयन्तश्च देवकीञ्च द्विजोत्तमाः

हरिरुवाच

अहं कंसं वधिष्यामि माभीर्वां पितराविति ।
नन्दगोपस्य गृहिणी यशोदाऽजनयत्सुताम् ॥
मम मायां पूर्वदिने सर्वलोकविमोहिनीम् ॥ ५५ ॥

मां तस्याःशयनेन्यस्ययशोदायाःसुतांतुताम् । आदायदेवकीशय्यांप्रापयस्वयदूत्तम!
एवमुक्तःस कृष्णेन तथैव ह्यकरोद्द्विजाः । रुरोद मायातनया देवकीशयनेस्थिता
अथबालध्वनिंश्रुत्वा कंसःसंकुलमानसः । सूतिकागृहमागम्य तामादाय चदारिकाम्
शिलायां पोथयामास निर्दयो निरपत्रपः । अथतद्धस्तमाच्छिद्य सायुधाष्टमहाभुजा

महादेव्यब्रवीत्कंसं समाहूयाऽतिकोपना ।

मायोवाच

अरे रे कंस ! पापात्मन् ! दुर्बुद्धे ! मूढचेतन ! ॥ ६० ॥

यत्रकुत्राऽपि शत्रुस्ते वर्तते प्राणहारकः । मार्गयस्वात्मनो मृत्युं तंशत्रुकंस! माचिरम्
इर्तारयित्वासादेवीदिव्यस्थानान्यवाप्यच । लब्धपूजामनुष्येभ्योबभूवाभीष्टदायिनी
श्रुत्वासदेवीवचनंकंसोऽपिभृशमाकुलः । बालग्रहान्पूतनादीन्स्वान्तकं बाधितुंरिपुम्

प्रेषयामास देशेषु शिशूनन्यांश्च बाधितुम् ।
ते च बालग्रहाः सर्वे प्रययुर्नन्दगोकुलम् ॥ ६४ ॥

हताश्च कृष्णेन तदाप्रययुर्यमसादनम् । ततःकतिपयाहस्सु गतेषु द्विजपुङ्गवाः !॥

रामकृष्णौ व्यवर्द्धेतांगोकुले बालकौ तदा । अनेकबालक्रीडाभिश्चिक्रीडतुररिन्दमौ

कश्चित्कालं वत्सपालौ वेणुनादमकुर्वताम् ।

कश्चित्कालश्च गोपालौ गुञ्जातापिच्छभूषितौ ॥ ६७ ॥

रेमाते बहुकालं तौ गोकुले रामकेशवौ । कंसःकदाचिदक्रूरं गोकुले रामकेशवौ ॥

प्रेषयामासविप्रेन्द्राः समानयितुमञ्जसा । आनयामास चाक्रूरो रामकृष्णौसगोकुलात्

मथुरां कंसनिर्देशात्स्वर्णतोरणराजिताम् ॥ ६९ ॥

ततःसमानीय स रामकेशवौ ययौ पुरीं गान्दिनिजस्तदग्रे ।

दृष्ट्वा च कंसं विनिवेद्य कार्यं तस्मै स्वगेहं प्रविवेश पश्चात् ॥ ७० ॥

अथाऽपराह्णे वसुदेवपुत्रावन्येद्युरिष्टैः सहगोपपुत्रैः ।

उपेयतुःसालनिखातयुक्तां सगोपुराट्टां मथुरापुरीं तौ ॥ ७१ ॥

स्तोत्राणि शृण्वन्पुरयौवतानि कृष्णस्तु रामेण सहैव गत्वा ।

धनुर्निवेशं सहसैव तत्र ददर्श चापञ्च महद् दृढज्यम् ॥ ७२ ॥

विद्राव्य सर्वानपि चापपालान्धनुः समादाय सलीलयाऽऽशु ।

मौर्व्यां नियोक्तुं नमयाञ्चकार तदन्तरे भग्नमभूद् द्विधैव ॥ ७३ ॥

कोदण्डभङ्गोत्थितशब्दमाशु श्रुत्वा भिया तान्बलिनो निहन्तुम् ।

निजघ्नतुस्तौ प्रतिगृह्य खण्डौ चापस्य पालान्बलिनौ द्विजेन्द्राः !॥ ७४ ॥

ततःकुवलयापीडं गजं द्वारिस्थितं क्षणात् ॥ ७५ ॥

निहत्य रामकृष्णौतौ महाबलपराक्रमौ । तस्य दन्तौसमुत्पाट्य दधानौकरयोर्द्वयोः

अंसेनिधाय तौदन्तौ रङ्गंप्रययतुःक्षणात् । निहत्य मल्लश्चाणूरंमुष्टिकंतौ बलन्तथा

अन्यांश्च मल्लप्रवरान्निन्यतुर्यमसादनम् । समारुरोहतुस्तूर्णं तुङ्गमञ्चञ्च तौ तदा

तत्र तुङ्गे समासीनमासने कंसमेत्य तौ । तस्थतुस्तं तृणीकृत्य सिंहौ क्षुद्रमृगं यथा

ततःकंसंसमाकृष्य कृष्णोमञ्चोपरिस्थितम् । पादौगृहीत्वावेगेनभ्रामयामासचाम्बरे

ततस्तं पातयामास स भूमौ गतजीवितम् ।

कंसभ्रातृन्बलोऽप्यष्टौ निजघ्नेमुष्टिना द्विजाः !॥ ८१ ॥

एवं निहत्य तं कंसं कृष्णःपरबलार्दनः । पितरौ मोचयामास निगडादतिदुःखितौ

सर्वानाश्वासयामास बलेन सह माधवः । श्रीकृष्णेन हतं कंसं श्रुत्वा प्रापुःपुरीं तदा

बान्धवा मथुरायां ये पूर्वं कंसेन बाधिताः ।

उग्रसेनं तथा राज्ये स्थापयामास केशवः ॥ ८४ ॥

असहिष्णुर्द्विजाःपित्रोरेवं कंसकृतागसम् । जघान मातुलं कंसं देवब्राह्मणकण्टकम्

ततःकदाचित्कृष्णोऽयमात्मानंद्रष्टुमागतान् । नारदादीन्मुनीन्सर्वानिदंपप्रच्छसत्तमः

श्रीकृष्ण उवाच

मयाऽयंमातुलोविप्राहतःकंसोऽतिपापकृत् । मातुलस्यवधेदोषःप्रोच्यतेशास्त्रवित्तमैः

प्रायश्चित्तमतो ब्रूत तद्दोषविनिवृत्तये । अवोचन्नारदस्तत्र कृष्णमद्भुतविक्रमम्

वाचा मधुरया विप्रा भक्तिप्रणयपूर्वकम् ।

नारद उवाच

नित्यशुद्धश्च मुक्तश्च बुद्धश्चैव भवान्सदा ॥ ८९ ॥

सच्चिदानन्दरूपश्च परमात्मासनातनः । पुण्यंपापञ्च ते नास्ति कृष्ण ! यादवनन्दन!

तथाऽपि लोकशिक्षार्थं भवता गरुडध्वज । प्रायश्चित्तन्तु कर्तव्यंविधिनाऽनेनमाधव

लोकसंग्रहणं तावत्कर्तव्यं भवताऽधुना । रामसेतौ महापुण्ये गन्धमादनपर्वते ॥

रामेण स्थापितं लिङ्गं रामनाथाभिधंपुरा । तस्याभिषेकतोयार्थं धनुष्कोट्यारघूद्वहः

गांभित्वोत्पादयामासतीर्थंकोटीतिविश्रुतम् । तव पूर्वावतारेण रामेणाक्लिष्टकर्मणा

ब्रह्महत्याविशुद्ध्यर्थं निर्मितं स्वयमेवयत् । तत्र स्नानं कुरुष्वत्वं धर्म्यंपापविनाशने

तेननेमातुलवधाद्दोषः शीघ्रं विनश्यति । कोटितीर्थे हरेःस्नानं ब्रह्महत्यादिशोधकम्

स्वर्गमोक्षप्रदं पुंसामायुरारोग्यवर्द्धनम् ।

इति श्रुत्वा मुनेर्वाक्यं नारदस्य स माधवः ॥ ९७ ॥

विसृज्यतानृषीन्सर्वांस्तस्मिन्नेव क्षणेद्विजाः । रामसेतौययौतूर्णं स्वदोषपरिशुद्धये

दिनैःकतिपयैर्गत्वा कोटितीर्थंयदूद्वहः । स्नात्वा सङ्कल्पपूर्वंच दत्त्वा दानान्यनेकशः

समातुलवधोत्पन्नदोषेभ्यो मुमुचे क्षणात् । निषेव्य रामनाथं च स्वपुरं मथुरां ययौ

श्रीसूत उवाच

एवं प्रभावं पुण्यञ्च कोटितीर्थं मुनीश्वराः । नाऽनेन सदृशंतीर्थमन्यदस्ति महीतले

अत्र स्नानात्त्रयो देवा ब्रह्मविष्णुशिवा द्विजाः ।

प्रीताः स्युरन्ये देवाश्च नाऽत्र कार्या विचारणा ॥ १०२ ॥

एवंवःकथितंचित्रं कोटितीर्थस्यवैभवम् । यच्छ्रुत्वा सर्वपापेभ्योमुच्यतेमानवोभुवि श्रुत्वेमं पुण्यमध्यायं पठित्वा चमुनीश्वराः । ब्रह्महत्यादिभिः सत्यंमुच्यतेपातकैर्नरः

इति श्रीस्कान्दे महापुराणे एकाशीतिसाहस्र्यांसंहितायां तृतीये ब्रह्मखण्डे सेतुमाहात्म्येकोटितीर्थप्रशंसायां कृष्णस्यमातुलवधदोषशान्तिर्नाम-सप्तविंशोऽध्यायः ॥ २७ ॥

अष्टाविंशोऽध्यायः

साध्यामृततीर्थप्रशंसायांपुरूरवश्शापविमोक्षणवर्णनम्

श्रीसूत उवाच

कोटितीर्थंमहापुण्यं सेवित्वाकेवलंनरः । स्नातुंजितेन्द्रियस्तीर्थंततःसाध्यामृतंव्रजेत् साध्यामृतं महातीर्थं महापुण्यफलप्रदम् । महादुःखप्रशमनं गन्धमादनपर्वते ॥ २ ॥

अस्ति पापहरं पुंसां सर्वभीष्टप्रदायकम् ।

यत्र स्नात्वा नरो भक्त्या सर्वान्कामानवाप्नुयात् ॥ ३ ॥

तपसाब्रह्मचर्येण यज्ञैर्दानेन वापुनः । गतिं तां न लभेन्मर्त्यो यांसाध्यामृतमज्जनात् स्पृष्टानि येषामङ्गानि साध्यामृतजलैःशुभैः । तेषां देहगतंपापं तत्क्षणादेव नश्यति ॥ साध्यामृतजले यस्तु सावमर्षणकृन्नरः । स विधूयेहपापानि विष्णुलोके महीयते पूर्ववयसिपापानिकृत्वाकर्माणियोनरः । पश्चात्साध्यामृतं सेवेत्पश्चात्तापसमन्वितः अन्तेवयसिमुक्तःस्यात्सनरो नात्रसंशयः । साध्यामृतेनरःस्नात्वा देहबन्धाद्विमुच्यते

साध्यामृतजलेस्नातामनुष्याःपापकर्मिणः । अनेकक्लेशघोराणिनरकाणिनयान्तिहि साध्यामृतजलेस्नानात्पुंसां यास्याद्गतिर्द्विजाः । नसागतिर्भवेद्यज्ञैर्नवेदैःपुण्यकर्मभिः

यावदस्थि मनुष्याणां साध्यामृतजले स्थितम् ।

तावद्वर्षाणि तिष्ठन्ति शिवलोके सुपूजिताः ॥ ११ ॥

अपहत्यतमस्तीव्रं यथाभात्युदयेरविः । तथासाध्यामृतस्नायी भित्त्वापापानिराजते वाञ्छिताँल्लभते कामानत्र स्नातोनरःसदा । यत्रस्नात्वा महापुण्ये पुराराजापुरूरवाः

विप्रयोगं सहोर्वश्या जहौ तुम्बुरुशापजम् ।

ऋषय ऊचुः

कथं सूत! महाभाग! सहोर्वश्याऽमरस्त्रिया ॥ १४ ॥

प्रथमं लब्धवान्योगं मर्त्योराजापुरूरवाः । विप्रयोगं सहोर्वश्या जहौ तुम्बुरुशापजम् हेतुना केन राजानं शशाप तुम्बुरुर्मुनिः । एतत्सर्वं समाचक्ष्व विस्तरान्मुनिपुङ्गव

श्रीसूत उवाच

आसीत्पुरूरवा नामशक्रतुल्यपराक्रमः । राजराजसमो राजा पुरा ह्यमरपूजितः ॥ १७॥ धर्मतःपालयामास मेदिनीं सपुरूत्तमः । ईजे स बहुभिर्यज्ञैर्ददौ दानानि सर्वदा प्रशासति महीं सर्वां राज्ञितस्मिन्महात्मनि । मित्रावरुणशापेन भुवंप्रापोर्वशीद्विजाः

सा चचारोर्वशी तत्र राज्ञस्तस्य पुरान्तिके ।

कोकिलालापमधुरवीणयोपवने जगौ ॥ २० ॥

स राजोपवने गन्तुं कदाचिद्धृतकौतुकः । आरूढतुरगः प्रायाल्ललनाशतसंवृतः तादृशीमुर्वशीं तत्र करसम्मितमध्यमाम् । उवाचचैनांराजाऽसौ भार्यांमम भवेति वै साऽपि कामातुरा तत्र राजानं प्रत्यभाषत । भवत्वेवं नरश्रेष्ठ! समयं यदि मे भवान् करिष्यतितत्राप्याशेत्रत्स्यामिधृतकौतुका । करिष्येसमयंसुभ्रु तवाहमितिसोब्रवीत् अथोर्वशी बभाषेतं पुरूरवसमुत्सुका । पुत्रभूतं मम यदि रक्षस्युरणकद्वयम् न नग्नं दद्दृशे राजन्दृश्यसे यदि वैतया । नोच्छिष्टं ममदद्याश्चेत्तदा वत्स्येतवान्तिके

घृतमात्राशना चाऽहं भविष्यामि नृपोत्तम !।

एवमस्त्विति राजोक्त्वा तां निनाय निजं गृहम् ॥ २७ ॥
अलकायां स भूपालस्तथा चैत्ररथेवने । रेमे सरस्वतीतीरे पद्मखण्डमनोरमे
एकषष्टिंस वर्षाणि रममाणस्तया नयन् । तेनोर्वशी प्रतिदिनं वर्धमानानुरागिणी
स्पृहां न देवलोकेपि चकार तनुमध्यमा । नाभवद्रमणीयोऽसौदेवलोकस्तया विना
अतस्तामानयिष्यामि देवलोकमिति द्विजाः !।
विश्वावसुर्विचार्यैवं भूर्लोकमगमत्क्षणात् ॥ ३१ ॥
उर्वश्याः समयं राज्ञा विश्वावसुरयंसह । विदित्वा सह गन्धर्वैः समवेतोनिशान्तरे
उर्वश्याःशयनाभ्याशाज्जग्राहोरणकञ्जवात् । आकाशेनीयमानस्यतस्यश्रुत्वोर्वशीतदा
अब्रवीन्मत्सुतः केनगृह्यते त्यज्यतामयम् । अनाथा शरणं यामि कं नरंगतचेतना
पुरूरवाः समाकर्ण्य वाक्यं तस्यानिशान्तरे । मां न नग्नंनिरीक्षेत देवीतिनययौतदा
अथान्यमप्युरणकं गन्धर्वाः प्रतिगृह्यते । ययुस्तयोर्द्वयोश्चापि शब्दंश्रुत्वावचोर्वशी
अनाथाया मम सुतो गृह्यते तस्करैरिति । चुक्रोश देवी परुषं कं यामि शरणं नरम्
अमर्षवशमापन्नं श्रुत्वा तद्वचनं नृपः । तिमिरेणावृतं सर्वमिति मत्वा स खड्गधृक्
दुष्ट दुष्ट कुतोयासीत्यभ्यधावद्वचोवदन् । तावत्सौदामिनीदीप्तागन्धर्वैर्जनिताभृशम्
तत्प्रभामण्डलैर्देवी राजानं विगताम्बरम् । दृष्ट्वा प्रवृत्तसमया तत्क्षणादेव निर्ययौ
त्यक्त्वाह्युरणकौतत्र गन्धर्वाअपिनिर्ययुः । राजामेषौसमादाय हृष्टःस्वशयनान्तिकम्
आगतो नोर्वशीं तत्र ददर्शायतलोचनाम् । तांश्चापश्यद्विवस्त्रश्च बभ्रामोन्मत्तवद्भुवि
कुरुक्षेत्रं गतो राजातटाके पद्मसंकुले । चतुर्भिरप्सरस्त्रीभिः क्रीडमानां ददर्शताम्
हे जाये तिष्ठ मनसा घोरेति व्याहरन्मुहुः । एवं बहु प्रकारं वै ससूक्तं प्रलपन्नृपः
अब्रवीदुर्वशीतञ्च क्रीडन्ती साप्सरोगणैः । महाराजालमेतेन चेष्टितेन तवानघ!
त्वत्तो गर्भिण्यहंपूर्वमब्दान्तेभवतात्र वै । आगन्तव्यंकुमारस्तेभविष्यत्यतिधार्मिकः
एकां विभावरीं राजंस्त्वया वत्स्यामि वै तदा ।
इत्युक्तो नृपतिर्हृष्टः स्वपुरीं प्राविशद्द्विजाः !॥ ४७ ॥
तासामप्सरसां सा तु कथयामास तं नृपम् । अयं स पुरुषोश्रेष्ठोयेनाहं कामरूपिणा

एतावन्तं महाकष्टमनुरागवशातुरा । उषिताऽस्मि सहाऽनेन सख्योनृपतिना चिरम्
एवमुक्तास्ततः सख्यस्तामूचुः साधुसाध्विति ।
अनेन साकं स्थास्यामः सर्वकालं वयं सखि !॥ ५० ॥
इत्यूचुरुर्वशीं तत्रसखीमप्सरसस्तदा । अब्देऽथ पूर्णेराजाऽपि तटाकान्तिकमाययौ
आगतन्नृपतिं दृष्ट्वा पुरूरवसमुर्वशी । कुमारमायुषं तस्मै ददौ सम्प्रीतमानसा
तेन साकं निशामेकामुषिता सानुरागिणी । पञ्चपुत्रप्रदं गर्भं तस्मादापाऽऽशुसोर्वशी
उवाच चैनंराजानमुर्वशी परमाङ्गना । वरं दास्यन्ति गन्धर्वा मत्प्रीत्या तव भूपते!
भवताप्रार्थ्यतान्तेभ्योवरं राजर्षिसत्तम !। इत्युक्तः स तया राजा प्राहगन्धर्वसत्तमान्
अहंसम्पूर्णकोशश्चविजितारातिमण्डलः । सलोकतांविनोर्वश्याःप्राप्तव्यंनान्यदस्तिमे
अतस्तया सहोर्वश्या कालंनेतुमहंवृणे । एवमुक्ते नृपेणाऽथ गन्धर्वास्तुष्टमानसाः
अग्निस्थालीं प्रदायास्मै प्रोचुश्चैनं नृपन्तदा ।

गन्धर्वा ऊचुः

अग्निं वेदानुसारी त्वं त्रिधा कृत्वा नृपोत्तम !॥ ५८ ॥
इष्ट्वा यज्ञेन चोर्वश्याः सालोक्यंयाहिभूपते । इतीरितस्तैरादायस्थालीमग्नेर्ययौनृपः
अहोबतातिमूढोऽहमिति मध्येवनं नृपः । उर्वशीनमयालब्धावह्निस्थाल्यातुकिंफलम्
निधायैव वने स्थालीं स्वपुरं प्रययौ नृपः ।
अर्धरात्रे व्यतीतेऽसौ विनिन्द्रोऽचिन्तयत्स्वयम् ॥ ६१ ॥
उर्वशीलोकसिद्ध्यर्थं ममगन्धर्वपुङ्गवैः । अग्निस्थाली सम्प्रदत्तासाचत्यक्तामयावने
आहरिष्येपुनस्थालीमित्युत्थायययौवनम् । नाग्निस्थालींददर्शाऽसौवनेतत्रपुरूरवाः
शमीगर्भमथाश्वत्थमग्निस्थानेविलोक्यसः व्यचिन्तयन्मयास्थालीनिक्षिप्तात्रवनेपुरा
सा चाऽश्वत्थः शमीगर्भः समभूदधुनात्विह । तस्मादेनं समादाय वह्निरूपमहंपुरम्
गत्वा कृत्वाऽरणीं सम्यक् तदुत्पन्नाग्निमादरात् ।
उपास्यामीति निश्चित्य स्वपुरं गतवान्नृपः ॥ ६६ ॥
रमणीयारणीं चक्रे स्वाङ्गुलैः प्रमितामसौ । निर्माणसमयेराजागायत्रीमजपद्द्विजाः

गायत्र्याः पठ्यमानाया यानिसन्त्यक्षराणि हि । तावदङ्गुलिमर्यादामकरोदरणींनृपः
तत्रनिर्मथनादाग्नित्रयमुत्पाद्य भूपतिः । उर्वशीलोकसम्प्राप्तिफलमुद्दिश्यकाङ्क्षितम्
वेदानुसारी नृपतिर्जुहावाग्नित्रयंमुदा । तेनैव त्वाग्निविधिना बहून्यज्ञानथातनोत्
तेन गन्धर्वलोकांश्च सम्प्राप्य जगतीपतिः । सहोर्वश्या चिरंरेमेदेवलोकेद्विजोत्तमाः
अथ सर्वामरोपेतः कदाचिद्वलवृत्रहा । नृत्यं सुराङ्गनानां वै व्यलोकयत संसदि
पुरूरवा नृपोऽप्यायात्तदा देवेन्द्रसंसदम् । द्रष्टुं सुराङ्गनानृत्यंमनोहारिदिवौकसाम्
एकैकशस्ताः शक्रस्य ननृतुः पुरतोऽङ्गनाः । अथोर्वशी समागत्य ननर्त पुरतो हरेः
नृत्याभिनयसामर्थ्यगर्वयुक्ता ततोर्वशी । तं पुरूरवसं दृष्ट्वा जहासाऽतिमनोहरा

जहास तत्र राजाऽपि तां विलोक्य ततोर्वशीम् ।
हाससङ्कुपितस्तत्रनाट्याचार्योऽथ तुम्बुरुः ॥ ७६ ॥
शशाप तावुभौ कोपादुर्वशीञ्च नृपोत्तमम ।

तुम्बुरुरुवाच

अनेकदेवसम्पूर्णसभायामत्र यत्कृतम् ॥ ७७ ॥
युवाभ्यां हसितं नृत्यमध्ये निष्कारणं वृथा ।
तस्माज्झटिति राजेन्द्र! वियोगो युवयोःक्षणात् ॥ ७८ ॥

भूयादिति शशापैनं सर्वदैवतसन्निधौ । अथ शप्तो नृपस्तत्र नाट्याचार्येण दुःखितः
जगाम शरणंतत्र पाहिपाहीतिवज्रिणम् । उवाच दीनया वाचा पुरुहूतं पुरूरवाः

उर्वश्या सह सालोक्यसिद्ध्यर्थमहमिष्टवान् ।
अतस्तस्य वियोगो मेऽसह्यःस्यात्पाकशासन !॥ ८१ ॥

इत्युक्तवन्तं तं प्राह सहस्राक्षःशचीपतिः । शापमोक्षं प्रवक्ष्यामिमाभैषीस्त्वंनृपोत्तम
दक्षिणाम्भोनिधौ पुण्येगन्धमादनपर्वने । साध्यामृतमितिख्याततंतीर्थमस्तिमहत्तरम्

सेवितं सर्वदेवैश्च सिद्धचारणकिन्नरैः ।
सनकादिमहायोगिमुनिवृन्दनिषेवितम् ॥ ८४ ॥

भुक्तिमुक्तिप्रदं पुंसां सर्वपापविमोक्षदम् । अस्तितीर्थं भवांस्तत्र गच्छतुत्वरयानृप

सर्वेषाममृतं स्नानादत्र साध्यं यतस्ततः । साध्यामृतमितिख्यातंसर्वलोकेषुविश्रुतम्

तत्र स्नानात्तवोर्वश्याः पुनर्योगो भविष्यति ।
मम लोके निवासश्च भविष्यति न संशयः ॥ ८७ ॥

इतिप्रतिसमादिष्टो नृपःसम्प्रीतमानसः । साध्यामृतं महातीर्थंसमुद्दिश्यययौक्षणात्
सस्नौसाध्यामृते तत्र महापातकनाशने । तत्रस्नानान्नरोविप्राः सद्यःशापेन मोचितः

स्नानानन्तरमेवासावुर्वश्या सह सङ्गतः ।
तया सह विमानस्थः प्रययावमरावतीम् ॥ ९० ॥

रेमे पुनस्तया सार्द्धं देववद्देवमन्दिरे । एवं प्रभावं तत्तीर्थं साध्यामृतमनुत्तमम् ॥
पुरूरवाःसहोर्वश्या यत्रस्नानेन सङ्गतः । अतोऽत्र तीर्थे यःस्नायान्महापातकनाशने

वाञ्छितान्लभते कामान् यास्यति स्वर्गमुत्तमम् ।
निष्कामः स्नाति चेद्विप्रा मोक्षमाप्नोति मानवः ॥ ९३ ॥

इमं पवित्रं पापघ्नमध्यायं पठते तु यः । शृणुयाद्वामनुष्योऽसौवैकुण्ठेलभतेस्थितिम्
एवं वः कथितं विप्रावैभवंपापनाशनम् । साध्यामृतस्यतीर्थस्यविस्तराच्छ्रद्धयामया

यत्पुरा सनकादिभ्यः प्रोक्तवांश्चतुराननः ॥ ९६ ॥

इतिश्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मखण्डे
सेतुमाहात्म्ये साध्यामृततीर्थप्रशंसायां पुरूरवश्शापविमोक्षणंनामाऽ-
ष्टाविंशोऽध्यायः ॥ २८ ॥

———

एकोनत्रिंशोऽध्यायः

सर्वतीर्थप्रशंसायांसुचरितस्यसायुज्यप्राप्तिवर्णनम्

श्रीसूत उवाच

स्नात्वा साध्यामृतेनोर्थेनृपशापविमोक्षणे । सर्वतीर्थंततोगच्छेन्मनुजोनियमान्वितः
सर्वतीर्थं महापुण्यं महापातकनाशनम् । महापातकयुक्तोवा मुक्तोवासर्वपातकैः ॥
शुद्ध्येत तत्क्षणादेव सर्वतीर्थनिमज्जनात् । तावत्सर्वाणिपापानिदेहेतिष्ठन्तिसुव्रताः

न यावत्सर्वतीर्थेऽस्मिन्निमज्जेत्पापपूरुषः ।
स्नानार्थं सर्वतीर्थेऽस्मिन्दृष्ट्वा यान्तं द्विजा नरम् ॥ ४ ॥

वेपन्ते सर्वपापानि नाशोऽस्माकंभवेदिति । गर्भवासादिदुःखानितावद्यातिनरोभुवि
न स्नायात्सर्वतीर्थेऽस्मिन्यावद्ब्राह्मणपुङ्गवाः । अनुष्ठितैर्महायागैस्तथातीर्थनिषेवणैः
गायत्र्यादि महामन्त्रजपैर्नियमपूर्वकम् । चतुर्णामपि वेदानामावृत्त्या शतसङ्ख्यया
शिवविष्ण्वादिदेवानां पूजयाभक्तिपूर्वकम् । एकादश्यादितिथिषु तथैवाऽनशनेन च

यत्फलं लभते मर्त्यस्तल्लभेदत्र मज्जनात् ।

ऋषय ऊचुः

सर्वतीर्थमितिख्यातिः सूताऽस्य कथमागता ॥ ६ ॥
ब्रूह्यस्माकमिदं पुण्यं विस्तराद्गच्छृण्वताम्मुने ।

श्रीसूत उवाच

पुरा सुचरितोनाम मुनिर्नियमसंयुतः ॥ १० ॥

भृगुवंशसमुद्भूतो जात्यन्धो जरयातुरः । अशक्तस्तीर्थयात्रायां नेत्राभावेन सद्विजः
सर्वेषामेव तीर्थानां स्नातुकामो महामुनिः । दक्षिणाम्बुनिधौपुण्यंगन्धमादनपर्वतम्
गत्वा शङ्करमुद्दिश्य तपस्तेपे सुदुष्करम् । त्रिकालमर्चयञ्शम्भुमुपवासीजितेन्द्रियः
तथात्रिषवणस्नानात्तथैवाऽतिथिपूजकः । शिशिरेजलमध्यस्थोग्रीष्मेपञ्चाग्निमध्यगः

वर्षास्वासारसहनश्चाभक्षो वायुभोजनः । उद्धूलनन्त्रिपुण्ड्रं च भस्मनाधारयन्सदा
जाबालोपनिषद्रीत्या तथारुद्राक्षधारकः । एवमुग्रं तपश्चक्रे दशसम्वत्सरन्द्विजः ॥
तपसा तस्यसन्तुष्टः शङ्करश्चन्द्रशेखरः । प्रादुरासीन्मुनेस्तस्य द्विजाःसुचरितस्य वै
समारुह्य महोक्षाणं भूतवृन्दनिषेवितः । गिरिजार्धवपुःशूली सूर्यकोटिसमप्रभः ॥

स्वभासाभास यन्सर्वा दिशो वितिमिरास्तदा ।
भस्मपाण्डुसर्वाङ्गो जटामण्डलमण्डितः ॥ १६ ॥

अनन्तादिमहानागविभूषणविभूषितः । प्रादुर्भूतस्ततःशम्भुः प्रादात्तस्य विलोचने
आत्मावलोकनार्थाय शङ्करो गिरिजापतिः । ततःसुचरितोविप्राःशम्भुनादत्तदृग्द्वयः

आलोक्य परमेशानं प्रतुष्टाव प्रसन्नधीः ।

सुचरित उवाच

जयदेव! महेशान! जय शङ्कर ! धूर्जटे !॥ २२ ॥

जय ब्रह्मादिपूज्य! त्वंत्रिपुरघ्न! यमान्तक !। जयोमेश! महादेव! कामान्तक! जयामल
जय संसारवैद्य! त्वं भूतपाल!शिवाव्यय !। त्रियम्बक! नमस्तुभ्यं भक्तरक्षणदीक्षित
व्योमकेश! नमस्तुभ्यं जयकारुण्यविग्रह !। नीलकण्ठ! नमस्तुभ्यंजयसंसारमोचक!
महेश्वर! नमस्तुभ्यं परमानन्दविग्रह !। गङ्गाधर! नमस्तुभ्यं विश्वेश्वर! मृडाव्यय
नमस्तुभ्यं भगवते वासुदेवाय शम्भवे । शर्वायोग्राय भर्गाय कैलासपतये नमः
रक्ष मां करुणासिन्धो! कृपादृष्ट्यवलोकनात् । मम वृत्तमनालोच्यत्राहिमांकृपयाहर

श्रीसूत उवाच

इति स्तुतो महादेवस्तमेनमिदमभ्यधात् । मुनिं सुचरितं विप्रा दयोदन्वानुमापतिः

महादेव उवाच

मुनेसुचरिताद्यत्वं वरंवरयकाङ्क्षितम् । वरंदातुंतवायातः पुण्येऽस्मिन्नाश्रमेशुभे ॥

इतीरितो मुनिःप्राह महादेवं घृणानिधिम्

सुचरित उवाच

भगवंस्त्वं प्रसन्नो मे यदि स्याच्चन्द्रशेखर !॥ ३१ ॥

तर्हि त्वां प्रवृणोम्यद्यावरंमदभिकाङ्क्षितम् । जरापलितदेहोऽहं कुत्रचिद्गन्तुमक्षमः
सर्वतीर्थेषुचस्नातुमाकाङ्क्षा मम विद्यते । तस्मात्सर्वेषु तीर्थेषुस्नानेनमनुजोहियत्
फलं प्राप्नोति मे ब्रूहि तत्फलावाप्तिसाधनम् ।

महादेव उवाच

अहमावाहयिष्यामि तीर्थान्यत्रैव कृत्स्नशः ॥ ३४ ॥

रामस्य सेतुना पूते नगेऽस्मिन्गन्धमादने । इत्युक्त्वा स महादेवः पर्वतेगन्धमादने
तीर्थान्यावाहयामास मुनिप्रीत्यर्थमुत्तमः । ततस्सुचरितं प्राह शङ्करःकरुणानिधिः
मुने!सुचरितेदं तु महापातकनाशनम् । सान्निध्यात्सर्वतीर्थानांसर्वतीर्थाभिधंस्मृतम्
मयाऽत्र सर्वतीर्थानां मनसाऽऽकर्षणादिदम् ।
मानसं तीर्थमित्याख्यां लप्स्यते भुक्तिमुक्तिदम् ॥ ३८ ॥

अतः सुचरिताऽत्रत्वं स्नाहि सद्यो विमुक्तये । महापातकसङ्घानां दावानलसमद्युतौ
काममोहभयक्रोधलोभरोगादिनाशने । विना वेदान्तविज्ञानं सद्यो निर्वाणकारणे
जन्ममृत्य्वादिनक्रौघसंसारार्णवतारणे । कुम्भीपाकादिसकलनरकाग्निविनाशने ॥
इतीरितःसुचरितःशम्भुना मदनारिणा । सस्नौविप्राःसर्वतीर्थे महादेवस्य सन्निधौ
स्नात्वोत्थितःसुचरितोदद्रृशेऽखिलमानवैः । जरापलितनिर्मुक्तस्तरुणोऽतीवसुन्दरः
दृष्ट्वास्वदेहसौन्दर्यं ततःसुचरितो मुनिः । श्लाघयामास तत्तीर्थं बहुधाऽन्ये चतापसाः
महादेवःसुचरितं बभाषे तदनन्तरम् । अस्य तीर्थस्य तीरे त्वं! वसन्सुचरितद्विज!
स्नानं कुरुष्व सततं स्मरन्मां मुक्तिदायकम् ।
देशान्तरीयतीर्थेषु मा व्रज ब्राह्मणोत्तम !॥ ४६ ॥
अस्य तीर्थस्य माहात्म्यान्मामन्ते प्राप्स्यसि ध्रुवम् ।
अन्येऽपि येऽत्र स्नास्यन्ति तेपि मां प्राप्नुयुर्द्विज ॥ ४७ ॥

इत्युक्त्वा भगवानीशस्तत्रैवान्तरधीयत । तस्मिन्नन्तर्हिते रुद्रे ततःसुचरितो मुनिः
अनेककालं निवसन्सर्वतीर्थस्यतीरतः । स्नानंसमाचारंस्तीर्थे मानसे नियमान्वितः
देहान्तेशङ्करं प्राप सर्वबन्धविमोचितः । सायुज्यं चापिसम्प्राप सर्वतीर्थस्यवैभवात्

एवंवःकथितं विप्राःसर्वतीर्थस्य वैभवम् । एतत्पठन्वाश्रृण्वन्वा मुच्यते सर्वपातकैः

इतिश्रीस्कान्देमहापुराणएकाशीतिसाहस्रयांसंहितायां तृतीयेब्रह्मखण्डे
सेतुमाहात्म्ये सर्वतीर्थप्रशंसायां सुचरितविप्रस्यसायुज्यप्राप्तिवर्णनं
नामैकोनत्रिंशोऽध्यायः ॥ २९ ॥

त्रिंशोऽध्यायः

धनुष्कोटिप्रशंसायांधनुष्कोटिवैभवकथनम्

श्रीसूत उवाच

विहिताभिषवो मर्त्यः सर्वतीर्थेऽतिपावने । ब्रह्महत्यादिपापघ्नींधनुष्कोटिंततोव्रजेत्
यस्याःस्मरणमात्रेण मुक्तःस्यान्मानवो भुवि ।
धनुष्कोटिं प्रपश्यन्ति स्नान्ति वा कथयन्ति ये ॥ २ ॥

अष्टाविंशति भेदांस्तेनरकान्नोपभुञ्जते । तामिस्रमन्धतामिस्रं महारौरवरौरवौ ॥
कुम्भीपाकं कालसूत्रकसिपत्त्रवनं तथा । कृमिभक्षोऽन्धकूपश्च संदंशं शाल्मलीतथा
सूर्मिवैतरणीप्राणरोधो विशसनं तथा । लालाभक्षोप्यवीचिश्च सारमेयादनंतथा
तथैव वज्रकणकं क्षारकर्दमपातनम् । रक्षोगणाशनञ्चापि शूलप्रान्तवितोदनम् ॥
दन्दशूकाशनञ्चापिपर्यावर्तनसञ्ज्ञितम् ।
तिरोधानाभिधं विप्रास्तथा सूचिमुखाभिधम् ॥ ७ ॥

पूयशोणितभक्षश्च विषाग्निपरिपीडनम् । अष्टाविंशतिसंख्याकमेवं नरकसञ्चयम्
न याति मनुजोविप्रा धनुष्कोटौ निमज्जनात् ।
वित्तापत्यकलत्राणां योऽन्येषामपहारकः ॥ ९ ॥

स कालपाशनिर्बद्धो यमदूतैर्भयानकैः । तामिस्रनरके घोरे पात्यते बहुवत्सरम्
स्नाति चेद्धनुषःकोटौ तस्मिन्नाऽसौ निपात्यते ।
यो निहत्य तु भर्तारं भुङ्क्ते तस्य धनादिकान् ॥ ११ ॥

पात्यते सोऽन्धतामिस्रे महादुःखसमाकुले ।
स्नाति चेद्धनुषःकोटौ तस्मिन्नाऽसौ निपात्यते ॥ १२ ॥
भूतद्रोहेणयोमर्त्यः पुष्णातिस्वकुटुम्बकम् । सतानिह विहायाशुरौरवेपात्यतेध्रुवम्
विषोल्बणमहासर्पसंकुले यमपूरुषैः । स्नाति चेद्धनुषःकोटौ तस्मिन्नासौ निपात्यते
यः स्वदेहंभरो मर्त्यो भार्यापुत्रादिकंविना । समहारौरवेघोरे पात्यते निजमांसभुक्
स्नाति चेद्धनुषःकोटौ तस्मिन्नाऽसौ निपात्यते ।
यः पशून्पक्षिणो वाऽपि सप्राणान्निरुणद्धि वै ॥ १६ ॥
कृपालेशविहीनं तंक्रव्यादैरपि निन्दितम् । कुम्भीपाके तप्ततैले पातयन्ति यमानुगाः
स्नातिचेद्धनुषःकोटौ तस्मिन्नासौ निपात्यते । मातरंपितरं विप्रान्योद्वेष्टिपुरुषाधमः
स कालसूत्रनरके विस्तृतायुतयोजने । अधस्तादग्निसन्तप्त उपर्यर्कमरीचिभिः ॥
खलैताम्रमयेविप्राः पात्यते क्षुधयार्दितः । स्नातिचेद्धनुषःकोटौतस्मिन्नासौनिात्यते
यो वेदमार्गमुल्लङ्घ्य वर्तते कुपथे नरः । सोऽसिपत्त्रवने घोरे पात्यते यमकिङ्करैः ॥
स्नाति चेद्धनुषःकोटौ तस्मिन्नासौ निपात्यते ।
यो राजा राजभृत्यो वा ह्यदण्डे दण्डमाचरेत् ॥ २२ ॥
शरीरदण्डं विप्रे वा स शूकरमुखे द्विजाः । पात्यतेनरके घोरे इक्षुवद्यन्त्रपीडितः ॥
स्नाति चेद्धनुषःकोटौ तस्मिन्नाऽसौ निपात्यते ।
ईश्वराधीनवृत्तीनां हिंसां यः प्राणिनां चरेत् ॥ २४ ॥
तैरेव पीड्यमानोऽयं जन्तुभिः स्वेन पीडितैः । अन्धकूपेमहाभीमेपात्यतेयमकिङ्करैः
तत्रान्धकारबहुले विनिद्रो निर्वृतश्चरेत् ।
स्नाति चेद्धनुषःकोटौ तस्मिन्नाऽसौ निपात्यते ॥ २६ ॥
योऽश्नातिपङ्क्तिभेदेनसस्यसूपादिकन्नरः । अकृत्वापञ्चयज्ञंवाभुङ्क्तेमोहेनसद्द्विजाः
प्रपात्यते यमभटैर्नरके कृमिभोजने । भक्ष्यमाणःकृमिशतैर्भक्षयन्कृमिसञ्चयान् ॥
स्वयञ्च कृमिभूतस्संस्तिष्ठेद्यावदघक्षयम् ।
स्नाति चेद्धनुषःकोटौ तस्मिन्नाऽसौ निपात्यते ॥ २६ ॥

योहरेद्द्विप्रवित्तानिस्तेयेनबलतोऽपि वा । अन्येषामपि वित्तानि राजातत्पुरुषोपिवा
अयोमयाग्निकुण्डेषु संदंशैः सोऽतिपीडितः । संदंशे नरकेघोरे पात्यते यमपूरुषैः
स्नाति चेद्धनुषः कोटौ तस्मिन्नाऽसौ निपात्यते ।
अगम्यां योऽभिगच्छेत स्त्रियं व पुरुषाधमः ॥ ३२ ॥
अगम्यं पुरुषं योषिद्भिगच्छेत वा द्विजाः । तावयोमयनारीञ्च पुरुषं चाप्ययोमयम्
तप्तावालिङ्ग्य तिष्ठन्तौ यावच्चन्द्रदिवकरौ । सूर्म्याख्ये नरकेघोरे पात्यते बहुकण्टके
स्नातिचेद्धनुषःकोटौतस्मिन्नासौनिपात्यते । बाधते सर्वजन्तून्यो नानोपायैरुपद्रवैः
शाल्मलीनरके घोरेपात्यते बहुकण्टके । स्नाति चेद्धनुषःकोटौतस्मिन्नासौनिपात्यते
राजा वा राजभृत्यो वा यःपाखण्डमनुव्रतः । भेदको धर्मसेतूनां वैतरण्यां निपात्यते
स्नातिचेद्धनुषःकोटौतस्मिन्नासौनिपात्यते । वृषलीसङ्गदुष्टोयःशौचाद्याचारवर्जितः
त्यक्तलज्जस्त्यक्तवेदः पशुचर्यारतस्तथा । स पूयविष्ठामूत्रासृक्श्लेष्मपित्तादिपूरिते
अतिबीभत्सरनके पात्यतेयमकिङ्करैः । स्नाति चेद्धनुषःकोटौतस्मिन्नासौनिपात्यते
दाम्भिकोयः पशून्यज्ञे विध्यनुष्ठानवर्जितः । हन्ति स परलोकेषु वैशसेनरके द्विजाः
कृत्यमानो यमभटैः पात्यतेदुःखसंकुले । स्नातिचेद्धनुषःकोटौतस्मिन्नासौनिपात्यते
आत्मभार्यां सवर्णां यो रेतः पाययतेतुसः । परत्र रेतःपायी सन्रेतः कुण्डेनिपात्यते
स्नातिचेद्धनुषःकोटौतस्मिन्नासौनिपात्यते । योदस्युमार्गमाश्रित्यगरदोग्रामदाहकः
वणिग्द्रव्यापहारी च सपरत्र द्विजोत्तमाः । वज्रदंष्ट्राहिकाभिख्ये नरके पात्यते चिरम्
स्नातिचेद्धनुषःकोटौतस्मिन्नासौनिपात्यते । विद्यन्तेयानिचान्यानिनरकाणिपरत्रवै
तानिनाप्नोतिमनुजोधनुष्कोटिनिमज्जनात् । धनुष्कोटौसकृत्स्नानादश्वमेधफलंलभेत्
आत्मविद्याभवेत्साक्षान्मुक्तिश्चापि चतुर्विधा । नपापे रमते बुद्धिर्न भवेद्दुःखमेववा
बुद्धेः प्रीतिर्भवेत्सम्यग्धनुष्कोटौ निमज्जनात् । तुलापुरुषदानेन यत्फलंलभ्यतेनरैः
तत्फलं लभ्यते पुम्भिर्धनुष्कोटौ निमज्जनात् ।
गोसहस्रप्रदानेन यत्पुण्यं हि भवेन्नृणाम् ॥ ५० ॥
तत्पुण्यं लभते मर्त्यो धनुष्कोटौनिमज्जनात् । धर्मार्थकाममोक्षेषुयंयमिच्छतिपूरुषः

तं तं सद्यःसमाप्नोतिधनुष्कोटौनिमज्जनात् । महापातकयुक्तोवायुक्तोवासर्वपातकैः
सद्यः पूतोभवेद्विप्राधनुष्कोटौनिमज्जनात् । प्रज्ञालक्ष्मीर्यशःसम्पज्ज्ञानंधर्मोविरक्तता
मनः शुद्धिर्भवेन्नृणां धनुष्कोटौ निमज्जनात् । ब्रह्महत्यायुतं चापिसुरापानायुतंतथा
अयुतं गुरुदाराणां गमनंपापकारणम् । स्तेयायुतं सुवर्णानां तत्संसर्गाश्च कोटिशः
शीघ्रं विलयमायान्ति धनुष्कोटौनिमज्जनात् ब्रह्महत्यासमानानिसुरापानसमानिच

गुरुस्त्रीगमनेनाऽपि यानि तुल्यानि चाऽऽस्तिकाः ।
सुवर्णस्तेयतुल्यानि तत्संसर्गसमानि च ॥ ५७ ॥

तानिसर्वाणि नश्यन्तिधनुष्कोटौनिमज्जनात् । उक्तेष्वेतेषुसन्देहोनकर्तव्यःकदाचन
जिह्वाग्रे परशुं तप्तं धारयामि नसंशयः । अर्थवादमिमंसर्वं ब्रुवन्वै नारकी भवेत्
सङ्करः सहिविज्ञेयःसर्वकर्मबहिष्कृतः । अहोमौर्ख्यमहोमौर्ख्यमहोमौर्ख्यंद्विजोत्तमाः
धनुष्कोट्यभिधे तीर्थे सर्वपातकनाशने । अद्वैतज्ञानदे पुंसां भुक्तिमुक्तिप्रदायिनि
इष्टकाम्यप्रदे नित्यंतथैवाऽज्ञाननाशने । स्थितेऽपि तद्विहायाऽयं रमतेऽन्यत्र वै जनः
अहोमोहस्यमाहात्म्यंमयावक्तुंनशक्यते । स्नातस्यधनुषःकोटौनान्तकाद्भयमस्तिवै

धनुष्कोटिं प्रपश्यन्ति तत्रस्नान्ति च ये नराः ।
स्तुवन्ति च प्रशंसन्ति स्पृशन्ति च नमन्ति च ॥ ६४ ॥
न पिबन्ति हि ते स्तन्यं मातॄणां द्विजपुङ्गवाः !।

ऋषय ऊचुः

धनुष्कोट्यभिधा तस्य कथं सूत ! समागता ॥ ६५ ॥

तत्सर्वंब्रूहि तत्वेन विस्तरान्मुनिपुङ्गव !। इतिपृष्टो नैमिषीयैराह सूतः पुनश्च तान्

श्रीसूत उवाच

रामेण निहते युद्धे रावणे लोककण्टके। विभीषणे च लङ्कायां राजनिस्थापितेततः
वैदेहीलक्ष्मणयुतो रामो दशरथात्मजः । सुग्रीवप्रमुखैर्वीरैर्वानरैरपि सम्वृतः॥
सिद्धचारणगन्धर्वदेवविद्याधरर्षिभिः । अप्सरोभिश्च सततं स्तूयमाननिजाद्भुतः
लीलाविधृतकोदण्डस्त्रिपुरघ्नो यथाशिवः । सर्वैः परिवृतोरामोगन्धमादनमन्वगात्

तत्र स्थितं महात्मानं राघवं रावणान्तकम् ।
प्राञ्जलिः प्रार्थयामास धर्मज्ञोऽथ विभीषणः ॥ ७१ ॥

सेतुनाऽनेन ते राम ! राजानः सर्वएवहि । बलोद्रिक्ताः समभ्येत्य पीडयेयुः पुरींमम
अतः सेतुमिमंभिन्धिधनुष्कोट्यारघूद्वह । इतिसम्प्रार्थितस्तेनपौलस्त्येनसराघवः
विभेदधनुषःकोट्यास्वसेतुंरघुनन्दनः । अतोद्विजास्ततस्तीर्थंधनुष्कोटिरितिश्रुतम्
श्रीरामधनुषःकोट्या योरेखां पश्यते कृताम् । अनेककलेशसंयुक्तं गर्भवासंनपश्यति
धनुष्कोट्या कृतारेखा रामेण लवणाम्बुधौ । तद्दर्शनाद्भवेन्मुक्तिर्न जानेस्नानजंफलम्
नर्मदारोधसितपो महापातकनाशनम् । गङ्गातीरे तु मरणमपवर्गफलप्रदम्
दानं द्विजाः! कुरुक्षेत्रे ब्रह्महत्यादिशोधकम् । तपश्च मरणं दानं धनुष्कोटौ कृतं नरैः
महापातकनाशाय मुक्त्यै चाभीष्टसिद्धये । भवेत्समर्थंविप्रेन्द्रा नात्रकार्याविचारणा
तावत्संपीड्यतेजन्तुः पातकैश्चोपपातकैः । यावन्नालोक्यते रामधनुष्कोटिर्विमुक्तिदा
भिद्यतेहृदयग्रन्थिश्छिद्यन्तेसर्वसंशयाः । क्षीयन्तेपापकर्माणिधनुष्कोट्यवलोकिनः

दक्षिणाम्भोनिधौसेतौ रामचन्द्रेण निर्मिता ।
या रेखा धनुषःकोट्या विभीषणहिताय वै ॥ ८२ ॥

सैवकैलासपदवी वैकुण्ठब्रह्मलोकयोः । मार्गः स्वर्गस्यलोकस्यनात्रकार्याविचारणा
तुल्यंयज्ञफलैः पुण्यैर्धनुष्कोट्यवगाहनम् । सर्वमन्त्राधिकंपुण्यं सर्वदानफलप्रदम्

कायक्लेशकरैः पुंसां किन्तपोभीः किमध्वरैः ।
किंवेदैः किमु वा शास्त्रैर्धनुष्कोट्यवलोकिनः ॥ ८५ ॥
रामचन्द्रधनुष्कोटौ स्नानं चेल्लभ्यते नृणाम् ।
सिताऽसितसरित्पुण्यवारिभिः किम्प्रयोजनम् ॥ ८६ ॥

रामचन्द्रधनुष्कोटिदर्शनंलभ्यते यदि । काश्यान्तुमरणान्मुक्तिः प्रार्थ्यतेकिंवृथानरैः
अनिमज्ज्यधनुष्कोटावनुपोष्यदिनत्रयम् । अदत्त्वाकाञ्चनं गाश्चदरिद्रःस्यान्नसंशयः
धनुष्कोट्यवगाहेन यत्फलं लभ्यतेनरैः । अग्निष्टोमादिभिर्यज्ञैरिष्ट्वापिबहुदक्षिणैः
नतत्फलमवाप्नोतिसत्यंसत्यंवदाम्यहम् । धनुष्कोट्यभिधंतीर्थंसर्वतीर्थाधिकंविदुः

दशकोटिसहस्राणि सन्ति तीर्थानि भूतले।

तेषां सान्निध्यमस्त्यत्र धनुष्कोटौ द्विजोत्तमाः!॥ ९९ ॥

अष्टौवसवआदित्यारुद्राश्चमरुतस्तथा । साध्याश्चसहगन्धर्वाःसिद्धविद्याधरास्तथा एते चान्ये चयेदेवाः सान्निध्यंकुर्वते सदा। तीर्थेऽत्रधनुषःकोटौ नित्यमेव पितामहः सन्निधत्तेशिवोविष्णुरुमामाचसरस्वती । धनुष्कोटौतपस्तप्त्वादेवाश्चऋषयस्तथा विपुलांसिद्धिमगमंस्तत्फलेन मुनीश्वराः । स्नायात्तत्रनरोयस्तुपितृदेवांश्चतर्पयेत् सर्वपापविनिर्मुक्तो ब्रह्मलोके महीयते। अत्रैकम्भोजयेद्विप्रं यो नरो भक्तिसंयुतः इहलोके परत्रापि सोऽनन्तसुखमश्नुते । शाकमूलफलैर्वृत्तिं यो न वर्तयते नरः स नरो धनुषः कोटौ स्नायात्तत्फलसिद्धये। अश्वमेधक्रतुं कर्तुं शक्तिर्यस्य नविद्यते धनुष्कोटौसहिस्नायात्तेनतत्फलमश्नुते। ब्राह्मणःक्षत्रियोवैश्यःशूद्रोवापिमुनीश्वराः

निन्द्ययोनौ न जायन्ते धनुष्कोट्यवगाहनात्।

मकरस्थे रवौ माघे धनुष्कोटौ तु यो नरः॥ १०० ॥

स्नायात्पुण्यं निगदितुं तस्याऽहं न क्षमो द्विजाः!।

माघमासे धनुष्कोटावयवगाहेत यो नरः॥ १०१ ॥

सस्नातःसर्वतीर्थेषुगङ्गादिषुमुनीश्वराः । प्राप्नुयादक्षयाँल्लोकान्मोक्षंचापिलभेतसः जन्मप्रभृतियत्पापं स्त्रियोवा पुरुषस्यवा। तत्सर्वं माघमासेऽत्र मज्जनाद्विलयं व्रजेत् यथासुराणां सर्वेषामुत्तमो रघुनन्दनः । तथैवचधनुष्कोटिः सर्वतीर्थोत्तमास्मृता

तत्र स्नानं माघमासे सर्वाभीष्टप्रदायकम्।

त्रिंशद्दिनं माघमासे नियतोऽपि जितेन्द्रियः॥ १०५ ॥

धनुष्कोटौनरः स्नायादपुनर्भवसिद्धये। एकभक्तो जितक्रोधो माघमासेऽत्र योनरः स्नानंकरोति विप्रेन्द्रा मुच्यते ब्रह्महत्यया। श्रीरामधनुषःकोटौ माघमासेनरस्तुयः

स्नात्वाऽन्ते शिवरात्रौ च निराहारो जितेन्द्रियः।

कृत्वा जागरणं रात्रौ प्रतियामं विशेषतः॥ १०८ ॥

रामनाथंमहादेवमभ्यर्च्य विधिपूर्वकम्। परेद्युरुदिते सूर्ये धनुष्कोटौ निमज्ज्य च

अन्येष्वपिचतीर्थेषुस्नात्वा नियतमानसः। निर्वृत्य नित्यकर्माणि रामनाथंनिषेव्यच

यथाशक्ति द्विजानन्नैर्भोजयित्वा द्विजोत्तमाः!।

भूमिंगाश्च तिलान्धान्यं दत्त्वा वित्तश्च शक्तितः॥ १११ ॥

ब्राह्मणैरप्यनुज्ञातःस्वयम्भुञ्जीत वाग्यतः। एवं कृतवतःपुंसो रामनाथो महेश्वरः विमोच्यसर्वपापानि भुक्तिम्मुक्तिम्प्रयच्छति। अतःसर्वप्रयत्नेन माघमासेमुनीश्वराः स्नातव्यं हिधनुष्कोटौ नरैरत्रमुमुक्षुभिः। धनुष्कोटौ नरःस्नानं सेतावर्धोदये तु यः

करोति तस्य पापानि नश्यन्त्येव क्षणाद् द्विजाः।

स्नानं महोदये चात्र भुक्तिमुक्तिफलप्रदम्॥ ११५ ॥

यःस्नायाद्धनुषः कोटावर्द्धोदयमहोदये। तस्य वश्यास्त्रयो देवा ब्रह्मविष्णुमहेश्वराः धनुष्कोटौ द्विजाःस्नानमर्द्धोदयमहोदये। विनाप्यद्वैतविज्ञानं सायुज्यप्राप्तिकारणम् तत्रस्नानं द्विजाःपुंसामर्द्धोदयमहोदये। मन्वाद्युक्तंविना सत्यंप्रायश्चित्तंहिपापिनाम् अत्रसेतौ धनुष्कोटावर्द्धोदयमहोदये। स्नातिचेन्मनुजो विप्राःसत्यंयज्ञं विनाप्ययम् यज्ञानांफलमाप्नोति सम्पूर्णं नात्र संशयः। चन्द्रसूर्योपरागेषु यःस्नायादत्र मानवः तस्य पुण्यफलं वक्तुं शेषेणापिनगण्यते। चन्द्रसूर्योपरागेषु धनुष्कोट्यवगाहनम्॥ ब्रह्महत्यादिपापानां प्रयश्चित्तमुदीरितम् । श्रीरामधनुषः कोटौचन्द्रसूर्योपरागयोः स्नानं सायुज्यदं प्रोक्तं सर्वतीर्थफलप्रदम् । चन्द्रसूर्योपरागेषु अर्द्धोदयमहोदये स्नातव्यमत्र मनुजैर्भुक्तिमुक्तिफलेच्छुभिः। अतःसर्वं परित्यज्यगच्छध्वंमुनिपुङ्गवाः

धनुष्कोटिं महापुण्यां भुक्तिमुक्तिफलप्रदाम्।

तत्र गत्वा पितृभ्यश्च कुरुध्वं पिण्डदापनम्॥ १२५ ॥

आकल्पम्पितृतृप्तिःस्यादत्रपिण्डनिवापनात्। पितॄणांतृप्तिदंस्थानत्रयंरामेणनिर्मितम् सेतुमूलेधनुष्कोट्यांगन्धमादनपर्वते। पिण्डंदत्त्वापितृभ्योऽत्रऋणान्मुक्तोभविष्यति सेतुमूलं धनुष्कोटिर्गन्धमादनमेव च। ऋणमोक्ष इतिख्यातं त्रिस्थानंदेवनिर्मितत् अतःसर्वप्रयत्नेन धनुष्कोटिर्निषेव्यताम्। अत्रागत्यधनुष्कोटौस्नात्वानियमपूर्वकम् द्रोणाचार्यसुतः श्रीमानश्वत्थामा मुनीश्वराः। सुप्तमारणदोषेण घोरेणमुमुचेक्षणात्

एवं वःकथितं विप्रा धनुष्कोटेस्तु वैभवम् । भुक्तिमुक्तिप्रदं नृणां सर्वपापनिबर्हणम्

इतिश्रीस्कान्देमहापुराणएकाशीतिसाहस्र्यांसंहितायां तृतीयेब्रह्मखण्डे
सेतुमाहात्म्येधनुष्कोटिप्रशंसायांधनुष्कोटिवैभवकथनंनाम-
त्रिंशोऽध्यायः ॥ ३० ॥

एकत्रिंशोऽध्यायः

अश्वत्थामसुप्तमारणदोषशान्तिवर्णनम्

ऋषय ऊचुः

अश्वत्थामा कथंसूत!सुप्तमारणमाचरत् । कथं च मुक्तस्तत्पापाद्धनुष्कोटौनिमज्जनात् एतन्नःश्रद्दधानानांब्रूहिपौराणिकोत्तम !। तृप्तिर्नजायतेऽस्माकंत्वद्वचोऽमृतपायिनाम् इति पृष्टस्तदा सूतो नैमिषारण्यवासिभिः । वक्तुं प्रचक्रमे तत्र व्यासं नत्वागुरुंमुदा

श्रीसूत उवाच

राज्यार्थं कलहे जाते पाण्डवानाम्पुराद्विजाः । धार्तराष्ट्रै र्महायुद्धे महदक्षौहिणीयुते युद्धंदशदिनं कृत्वा भीष्मे शान्तनवे हते । द्रोणे पञ्चदिनं कृत्वा कर्णे च द्विदिनंतथा तथैवैकदिनं युद्ध्वा शल्ये त्वनिधनंगते । अष्टादशदिने तत्र रणे दुर्योधने द्विजाः भग्नोरौ भीमगदया पतिते राजसत्तमे । सर्वे नृपतयो विप्रा निवेशाय कृतत्वराः ॥ युद्धे विरमिते तत्र प्रययुर्हृष्टमानसाः । धृष्टद्युम्नशिखण्ड्याद्याः सृञ्जयाःसर्व एव हि

अन्ये चापि महीपाला जग्मुः स्वशिबिराण्यथ ।
अथ पार्था महावीराः कृष्णसात्यकिसंयुताः ॥ ९ ॥
दुर्योधनस्य शिबिरं प्राविशन्निर्जनं द्विजाः !।
वृद्धैरमात्यैस्तत्रस्थैः षण्ढैःस्त्रीरक्षकैस्तथा ॥ १० ॥

कृताञ्जलिपुटैःप्रह्वैः काषायमलिनाम्बरैः । प्रणम्यमानास्ते पार्थाःकुरुराजस्य वेशमनि

तत्रत्यद्रव्यजातानि समादाय महाबलाः । सुयोधनस्य शिबिरेन्यवसन्त सुखेन ते ॥

अथ तानब्रवीत्पार्थाञ्छ्रीकृष्णः प्रीणयन्निव ।
मङ्गलार्थाय चाऽस्माभिर्वस्तव्यं शिबिराद् बहिः ॥ १३ ॥
इत्युक्ता वासुदेवेन तथेत्युक्त्वाऽथ पाण्डवाः ।
कृष्णसात्यकिसंयुक्ताः प्रययुः शिबिराद् बहिः ॥ १४ ॥

वासुदेवेन सहिता मङ्गलार्थंहि पाण्डवाः । ओघवत्याःसमासाद्य तीरं नद्यानरोत्तमाः ऊषुस्तांरजनींतत्र हतशत्रुगणाःसुखम् । कृतवर्माकृपोद्रौणिस्तथादुर्योधनान्तिकम् आदित्यास्तमयात्पूर्वमपराह्णे समाययुः । सुयोधनं तदा दृष्ट्वा रणपांसुषु रूषितम् भग्नोरुदण्डंगदया भीमसेनस्य भीमया । रुधिरासिक्तसर्वाङ्गञ्चेष्टमानं महीतले ॥ अशोचन्त तदा तत्र द्रोणपुत्रादयस्त्रयः । शुशोच सोपि तान्दृष्ट्वा रणे दुर्योधनो नृपः दृष्ट्वातथातुराजानं बाष्पव्याकुललोचनम् । अश्वत्थामा तदाकोपाज्ज्वलन्निवमहानलः

पाणौ पाणिं विनिष्पिष्य क्रोधविस्फारितेक्षणः ।
अश्रुविक्लवया वाचा दुर्योधनमभाषत ॥ २१ ॥

पितामेपातितःक्षुद्रैश्छलेनैव रणाजिरे । न तथा तेन शोचामि यथा निष्पातितेत्वयि शृणु वाक्यं ममाद्य त्वं यथार्थं वदतो नृप । सुकृतेन शपे चाहं सुयोधन ! महामते अद्यरात्रौ हनिष्यामि पाण्डवान्सहसृञ्जयैः । पश्यतो वासुदेवस्य त्वमनुज्ञांप्रयच्छमे तस्यतद्वचनंश्रुत्वाद्रौणिंराजातदाब्रवीत् । तथास्त्वितिपुनःप्राहकृपंराजाद्विजोत्तमाः आचार्यैनन्द्रोणपुत्रंकलशोत्थेनवारिणा । सेनापत्येऽभिषिञ्चस्वेत्यथसोपितथाकरोत्

सोऽभिषिक्तस्तदा द्रौणिः परिष्वज्य नृपोत्तमम् ।
कृतवर्मकृपाभ्यां च सहितस्त्वरितं ययौ ॥ २७ ॥
ततस्ते तु त्रयो वीराः प्रयाता दक्षिणोन्मुखाः ।
आदित्यास्तमयात्पूर्वं शिबिरान्तिकमासत ॥ २८ ॥

पार्थानांभीषणंशब्दंश्रुत्वातत्रजयैषिणः । पाण्डवानुद्रुता भीतास्तदाद्रौण्यादयस्त्रयः प्राङ्मुखादुद्रुवुर्भीत्या कियद्दूरं श्रमातुराः । मुहूर्त्तंतेततो भूत्वा क्रोधामर्षवशानुगाः

दुर्योधनवधार्तास्ते क्षणं तत्रावतस्थिरे । ततोपश्यन्नरण्यं वै नानातरुलतावृतम्
अनेकमृगसम्बाधं क्रूरपक्षिगणाकुलम् । समृद्धजलसम्पूर्णतटाकपरिशोभितम् ॥
पद्मेन्दीवरकह्लारसरसीशतसंकुलम् । तत्र पीत्वा जलन्ते तुपाययित्वा हयांस्तथा ॥

अनेकशाखासंबाधं न्यग्रोधं ददृशुस्ततः ।
सम्प्राप्य तु महावृक्षं न्यग्रोधन्ते त्रयस्तदा ॥ २४ ॥

अवतीर्य रथेभ्यश्च मोचयित्वा तुरङ्गमान् । उपस्पृश्य जलं तत्रसायंसन्ध्यामुपासत
अथ चास्तगिरिं भानुःप्रपेदे च गतप्रभः । ततश्च रजनीघोरा समभूत्तिमिराकुला ॥
रात्रिंचराणिसत्त्वानिसञ्चरन्तित्वितस्ततः । दिवाचराणिसत्त्वानिनिद्रावशमुपाययुः
कृतवर्मा कृपो द्रौणिः प्रदोषसमयेहिते । न्यग्रोधस्योपविविशुरन्तिके शोककर्शिताः
कृपभोजौ तदानिद्रांभेजातेऽतिपराक्रमौ । सुखोचितास्त्वदुःखार्हा निषेदुर्धरणीतले
द्रोणपुत्रस्तु कोपेण कलुषीकृतमानसः । ययौ न निद्रांविप्रेन्द्रा निश्वसन्नुरगोयथा
ततोऽवलोकयाञ्चक्रेतदारण्यं भयानकम् । न्यग्रोधञ्च ततोऽपश्यद्‌बहुवायससंकुलम्
तत्रवायसवृन्दानि निशायांवासमाययुः । सुखंभिन्नासुशाखासुसुषुवुस्ते पृथक्पृथक्
काकेषुतेषुसुप्तेषु विश्वस्तेषुसमन्ततः । ततोऽपश्यत्समायान्तं भासं द्रौणिर्भयङ्करम्
क्रूरशब्दं क्रूरकायंबभ्रपिङ्गकलेवरम् । स भासोऽथ भृशं शब्दं कृत्वाऽलीयतशाखिनि

उत्प्लुत्य तस्य शाखायां न्यग्रोधस्य विहङ्गमः ।
सुप्तान्काकान्निजघ्नेऽसावनेकान्वायसान्तकः ॥ ४५ ॥

काकानामभिनत्पक्षान्स केषाञ्चिद्विहङ्गमः । इतरेषाञ्च चरणाञ्छिरांसिचरणायुधः
विचकर्त क्षणेनासावुलूको बलवान्द्विजाः । सभिन्नदेहावयवैः काकानाम्बहुभिस्तदा
समन्तादावृतं सर्वं न्यग्रोधपरिमण्डलम् । वायसांस्तान्निहत्यासावुलूकोमुमुदे तदा
द्रौणिर्दृष्ट्वा तु तत्कर्म भासेनैवं कृतंनिशि । करिष्याम्यहमप्येवं शत्रूणां निधनंनिशि
इत्यचिन्तयदेकःसन्नुपदेशमिमंस्मरन् । जेतुं न शक्याःपार्था हि ऋजुमार्गेण युध्यता
मयातच्छद्मनातेऽद्यहन्तव्याजिनकाङ्क्षिणः । सुयोधनसकाशे च प्रतिज्ञातोमयावधः
ऋजुमार्गेणयुद्धे मे प्राणनाशो भविष्यति । छलेनयुध्यमानस्य जयश्चास्य रिपुक्षयः

यच्च निन्द्यंभवेत्कार्यं लोके सर्वजनैरपि । कार्यमेव हि तत्कर्म क्षत्त्रधर्मानुवर्तिना

पार्थैरपि छलेनैव कृतं कर्म सुयोधने ।
अस्मिन्नर्थे पुराविद्भिः प्रोक्ताः श्लोका भवन्ति हि ॥ ५४ ॥

परिश्रान्ते विकीर्णे च भुञ्जाने च रिपोर्बले । प्रस्थाने च प्रवेशे च प्रहर्तव्यं नसंशयः
निद्रार्तमर्धरात्रे च तथात्यक्तायुधं रणे । भिन्नयोधं भलं सर्वं प्रहर्तव्यमरातिभिः
एवं सनियमं कृत्वा सुप्तमारणकर्मणि । प्रबोधयद्भोजकृपौ सुप्तौ रात्रौ स साहसी

द्रौणिर्ध्यात्वा मुहूर्तन्तु तावुभावभ्य भाषत ।

अश्वत्थामोवाच

मृतःसुयोधनो राजा महाबलपराक्रमः ॥ ५८ ॥

शुद्धकर्मा हतःपार्थैर्बहुभिःक्षुद्रकर्मभिः । भीमेनाऽतिनृशंसेन शिरो राज्ञःपदाहतम् ॥
ततोऽद्यरात्रौ पार्थानां समेत्यपटमण्डपम् । सुखसुप्तान्हनिष्यामःशस्त्रैर्नानाविधैर्वयम्

कृपः प्रोवाच तत्रैनमिति श्रुत्वा द्विजोत्तमाः ॥

कृप उवाच

सुप्तानां मारणं लोके न धर्मो न च पूज्यते ॥ ६१ ॥

तथैवत्यक्तशस्त्राणां सन्त्यक्तरथवाजिनाम् । शृणु मेवचनंवत्समुच्यतांसाहसंत्वया
वयन्तु धृतराष्ट्रञ्च गान्धारीं च पतिव्रताम् । पृच्छामो विदुरञ्चापि तदुक्तंकरवामहे

इत्युक्तःस तदा द्रौणिः कृपं प्रोवाच वै पुनः ।

अश्वत्थामोवाच

पाण्डवैश्च पुरा यन्मे छलाद्युद्धे पिता हतः ॥ ६४ ॥

तन्मेसर्वाणिमर्माणिनिकृन्ततिहि मातुल ! । द्रोणहन्ताऽहमित्येतद्‌धृष्टद्युम्नस्ययद्वचः
कथं जनसमक्षे तद्वचनं संशृणोम्यहम् । तैरेव पाण्डवैःपूर्वं धर्मसेतुर्निराकृतः ॥ ६६
समक्षमेव युष्माकं सर्वेषामेव भूभृताम् । त्यक्तायुधो मम पिता धृष्टद्युम्नेन पातितः

तथा शान्तनवो भीष्मस्त्यक्तचापो निरायुधः ।
शिखण्डिनं पुरोधाय निहतः सव्यसाचिना ॥ ६८ ॥

एवमन्येऽपिभूपालाश्छलेनैवहतास्तु तैः । तथैवाहं करिष्यामि सुप्तानां मारणंनिशि एवमुक्त्वातदाद्रौणिः संयुक्ततुरगं रथम् । प्रायादभिमुखः शत्रून्समारुह्य क्रुधाज्वलन् तं यान्तमन्वगातान्तौ कृतवर्मकृपावुभौ । ययुश्च शिविरे तेषां सम्प्रसुप्तजने तदा शिविरद्वारमासाद्य द्रोणपुत्रो व्यतिष्ठत । रात्रौ तत्रसमाराध्य महादेवं घृणानिधिम् अवाप विमलं खड्गं महादेवाद्वरप्रदात् । ततो द्रौणिरवस्थाप्य कृतवर्मकृपावुभौ द्वारदेशे महावीरः शिविरान्तःप्रविष्टवान् । प्रविष्टे शिविरे द्रौणौ कृतवर्मकृपावुभौ द्वारदेशे व्यतिष्ठेतां यत्तौ परमधन्विनौ । अथ द्रौणिःसुसंक्रुद्धस्तेजसा प्रज्वलन्निव

खड्गं विमलमादाय व्यचरच्छिविरे निशि ।

ततस्तु धृष्टद्युम्नस्य शिविरं मन्दमाययौ ॥ ७६ ॥

धृष्टद्युम्नादयस्तत्र महायुद्धेन कर्शिताः । सुषुपुर्निशिविश्वस्ताः स्वस्वसैन्यसमावृताः धृष्टद्युम्नस्य शिविरं प्रविश्य द्रौणिरस्त्रवित् । तं सुप्तं शयने शुभ्रे ददर्शारान्महाबलम् पादेनाघातयद्रोषात्स्वपन्तं द्रोणनन्दनः । स बुद्धश्चरणाघातादुत्थाय शयनादथ ॥ व्यलोकयत्तदावीरो द्रोणपुत्रं पुरःस्थितम् । तमुत्पतन्तं शयनाद्द्रोणाचार्यसुतोबली केशेष्वाकृष्य बाहुभ्यां निष्पिपेष धरातले । धृष्टद्युम्नस्तदातेन निष्पिष्टःसभयातुरः

निद्रान्धःपाददघातार्तो न शशाक विचेष्टितुम् ।

द्रौणिस्त्वाक्रम्य तस्योरः कण्ठं बद्ध्वा धनुर्गुणैः ॥ ८२ ॥

नदन्तं विस्फुरन्तन्तं पशुमारममारयत् । तस्य सैन्यनि सर्वाणि न्यवधीच्च तथैवसः युधामन्युं महावीर्यमुत्तमौजसमेव च । तथैव द्रौपदीपुत्रानवशिष्टांश्च सोमकान् ॥ शिखण्डिप्रमुखानन्यान्खड्गेनामारयद्बहून् । तद्भयाद्द्वारनिर्यातान्सर्वानेवचसैनिकान् प्रापयामासतुर्मृत्युं कृतवर्मकृपावुभौ । एवं निहतसैन्यन्तच्छिविरन्तैर्मयाबलैः ॥ तत्क्षणेशून्यमभवत्त्रिजगत्प्रलये यथा । एवं हत्वा ततः सर्वान्द्रोणपुत्रादयस्त्रयः ॥ निरगुःशिविरात्तस्मात्पार्थभीताभयातुराः । सर्वेपृथक्पृथग्देशान्दुद्रुवुःशीघ्रगामिनः अथद्रौणिर्ययौ विप्रारेवातीरं मनोरमम् । तत्र ह्यनेकसाहस्रा ऋषयो वेदवादिनः कथयन्तःकथाःपुण्यास्तपश्चक्रुरनुत्तमम् । तत्रायंप्रययौ द्रौणिर्ऋषीणामाश्रमेष्वथ

प्रविष्टमात्रे तस्मिंस्तु मुनयो ब्रह्मवादिनः । द्रौणेर्दुश्चरितं ज्ञात्वा प्राहुर्योगबलेनतम् सुप्तमारणकृत्पापी द्रौणे! त्वं ब्राह्मणाधमः । त्वद्दर्शनेन ह्यस्माकंपातित्यंभवतिध्रुवम्

त्वत्सम्भाषणमात्रेण ब्रह्महत्यायुतं भवेत् ।

अतोऽस्मदाश्रमेभ्यस्त्वं निर्गच्छ पुरुषाधम !॥ ६३ ॥

इत्यब्रुवंस्तदाद्रौणितत्रत्यामुनयोद्विजाः । इतीरितस्ततो द्रौणिर्मुनिभिर्ब्रह्मवादिभिः लज्जितोनिरगात्तस्मादाश्रमान्मुनिसेवितात् । एवं काश्यादितीर्थेषुपुण्येषुप्रययौचसः तत्र तत्र द्विजैःसर्वैर्निन्दितोऽसौमहात्मभिः । व्यासं शरणमापेदेप्रायश्चित्तचिकीर्षया ततो बदरिकारण्ये समासीनं महामुनिम् । द्वैपायनं समागम्य प्रणनाम सभक्तिकम्

ततो व्यासोऽब्रवीदेनंद्रोणाचार्यसुतं मुनिः ।

त्वमस्मदाश्रमाद् द्रौणे! निर्याहि त्वरया त्विति ॥ ६८ ॥

सुप्तमारणदोषेण महापातकवान्भवान् । अतो मे भवताऽऽलापान्महत्पापं भविष्यति

इत्युक्तः स तदा द्रौणिः प्रोवाचेदं वचो मुनिम् ।

अश्वत्थामोवाच

भगवन्निन्दितःसर्वैस्त्वामस्मि शरणं गतः ॥ १०० ॥

ब्रवीषित्वमप्येवं कोन्यो मेशरणंभवेत् । कृपां कुरु मयिब्रह्मन्साधवोदीनवत्सलाः सुप्तमारणदोषस्य शान्त्यर्थं भगवन्मम । प्रायश्चित्तं विधेहित्वंसर्वज्ञोऽसिभवान्यतः

इत्युक्तो द्रौणिना व्यासश्चिरं ध्यात्वा तमब्रवीत् ।

व्यास उवाच

एतत्पापस्य शान्त्यर्थं प्रायश्चित्तं स्मृतौ न हि ॥ १०३ ॥

तथाप्युपायं वक्ष्यामि तवैतद्दोषशान्तये । दक्षिणाम्बुनिधौ पुण्येरामसेतौ विमुक्तिदे धनुष्कोटिरिति ख्यातंतीर्थमस्तिमहत्तरम् । अस्तिपुण्यतमंद्रौणेमहापातकनाशनम् स्वर्गमोक्षप्रदं पुंसां ब्रह्महत्यादिशोधकम् । सर्वमङ्गलमाङ्गल्यं सर्वाभीष्टप्रदायकम् पवित्राणांपवित्रंचतीर्थानां च तथोत्तमम् । दुःस्वप्ननाशनं पुण्यंनरकक्लेशनाशनम् अकालमृत्युशमनं पुंसां विजयवर्द्धनम् । दारिद्र्यनाशनं पुंसामायुर्वर्द्धनकारणम् ॥

चित्तशुद्धिप्रदं नृणां शान्तिदान्त्यादिकारणम् ।

तत्र गत्वा धनुष्कोटौ रामसेतौ विमुक्तिदे ॥ १०६ ॥

स्नानंकुरुष्वद्रौणे त्वंमासमात्रं निरन्तरम् । सुप्तमारणदोषात्त्वं सद्यःपूतोभविष्यसि कुरुष्व वचनं शीघ्रं ममत्वं द्रोणनन्दन । एवमुक्तस्तदा द्रौणिर्व्यासेन :परमर्षिणा रामसेतुंसमासाद्य धनुष्कोटिं पवित्रदाम् । सस्नौ सङ्कल्पपूर्वन्तु मासमेकंनिरन्तरम् त्रिसन्ध्यंरामनाथश्चसिषेवेसदिनेदिने । ततस्त्रिंशद्दिने तोयस्नानाद्द्रोणात्मजस्तदा जजाप च धनुष्कोट्यां मन्त्रं पञ्चाक्षरं तदा । अकार्षीदुपवासञ्च द्रोणपुत्रस्तु तद्दिने

अकरोज्जागरं रात्रौ रामनाथस्य सन्निधौ ।

अपरेद्युर्धनुष्कोटौ स्नात्वा सङ्कल्पपूर्वकम् ॥ ११५ ॥

सिषेवे रामनाथञ्च स्तुत्वा भक्तिपुरःसरम् । ननर्त पुरतः शम्भोरानन्दाश्रुपरिप्लुतः ततः प्रसन्नो भगवान्प्रादुरासीत्तदग्रतः । दृष्ट्वा तत्र महादेवं तुष्टाव परमेश्वरम्

द्रौणिरुवाच

नमस्ते देवदेवेश ! करुणाकर ! शङ्कर !। आपदाम्बुधिमग्नानां पोतायितपदाम्बुज! महादेव! कृपामूर्ते! धूर्जटे! नीललोहित !। उमाकान्त! विरूपाक्ष! चन्द्रशेखर! ते नमः मृत्युञ्जय! त्रिनेत्र त्वं पाहिमांकृपया दृशा । पार्वतीपतये तुभ्यं त्रिपुरघ्नाय शम्भवे पिनाकपाणये तुभ्यं त्र्यम्बकाय नमोनमः । अनन्तादिमहानागहारभूषण भूषित! शूलपाणे! नमस्तुभ्यं गङ्गाधर! मृडाव्यय !। रक्ष मां कृपया देव ! पापलङ्घातपञ्जरात्

इति स्तुतो महादेवो द्रौणिं प्रोवाच हर्षितः ।

महादेव उवाच

सुप्तमारणदोषस्ते धनुष्कोटौ निमज्जनात् ॥ १२३ ॥

अश्वथामन्विनष्टोऽभूद्वरं वरयसुव्रत । मयि प्रसन्ने लोकेषु किमलभ्यं भवेन्नृणाम् अतोऽभीष्टंवृणीष्वत्वंमत्तोद्रोणात्मजाधुना । इत्युक्तःशम्भुनाद्रौणिःप्राहतंपरमेश्वरम् तवाद्य दर्शनेनाहं कृतार्थोऽस्मिमहेश्वर !। त्वद्दर्शनमपुण्यामलभ्यंजन्मकोटिभिः अतो युष्मत्पदाम्भोजे निश्चलाभक्तिरस्तुमे । इममेव वरंदेहि मह्यंशम्भो नमोऽस्तु ते

उक्त्वा तथास्त्विति द्रौणिं देवदेवोमहेश्वरः । पश्यतो द्रोणपुत्रस्यतत्रैवान्तरधीयत अश्वत्थामापि विप्रेन्द्राधूतपापोविनिर्मलः । रामचन्द्रधनुष्कोटौस्नानमात्रेणतत्क्षणे धूतपापमिमन्द्रौणिं सर्वे चापिमहर्षयः । शुद्धं प्रत्यग्रहीषुस्ते तदाप्रभृति निर्मलम् एवं वः कथितंविप्रा द्रौणिपापविमोक्षणम् । रामचन्द्रधनुष्कोटिस्नानवैभवमात्रतः यः पठेदिममध्यायं शृणुयाद्वा समाहितः । स विधूयेह पापानि शिवलोके महीयते

इति श्रीस्कान्देमहापुराणएकाशीतिसाहस्र्यांसंहितायां तृतीयेब्रह्मखण्डे सेतुमाहात्म्येधनुष्कोटिप्रशंसायामश्वत्थामसुप्तमारणदोषशान्तिर्नामैकत्रिंशोऽध्यायः ॥ ३१ ॥

द्वात्रिंशोऽध्यायः

धनुष्कोटिप्रशंसायांधर्मगुप्तोन्मादविमोक्षणवर्णनम्

श्रीसूत उवाच

भूयोऽपि सम्प्रवक्ष्यामिधनुष्कोटेस्तुवैभवम् । युष्माकमादरेणाहंनैमिषारण्यवासिनः नन्दो नाममहाराजा सोमवंशसमुद्भवः । धर्मेण पालयामास सागरान्तां धरामिमाम् तस्य पुत्रः समभवद्धर्मगुप्त इतिश्रुतः । राज्यरक्षाधुरं नन्दो निजपुत्रे निधायसः जितेन्द्रियो जिताहारः प्रविवेश तपोवनम् । ताते तपोवनं याते धर्मगुप्ताभिधोनृपः मेदिनीं पालयामास धर्मज्ञो नीतितत्परः । ईजे बहुविधैर्यज्ञैर्देवानिन्द्रपुरोगमान् ब्राह्मणेभ्योददौवित्तंक्षेत्राणिचबहूनि सः । सर्वेस्वधर्मनिरतास्तस्मिन्राजनिशासति

बभूवुर्नाभवन्पीडास्तस्मिश्चोरादिसम्भवाः ।

कदाचिद्धर्मगुप्तोऽयमारूढस्तुरगोत्तमम् ॥ ७ ॥

वनं विवेश विप्रेन्द्रा मृगयारसकौतुकी । तमालतालहिन्तालकुरवाकुलदिङ्मुखे विचचार वनेतस्मिन् सिंहव्याघ्रभयानके । मत्तालिकुलसन्नादसम्मूर्छितदिगन्तरे

पद्मकह्लारकुमुदनीलोत्पलवनाकुलैः । तटाकैरपि सम्पूर्णे तपस्विजनमण्डिते ॥ १०
तस्मिन्वने सञ्चरतो धर्मगुप्तस्य भूपतेः । अभूद्विभावरी विप्रास्तमसावृतदिङ्मुखा
राजापि पश्चिमां सन्ध्यामुपास्य नियमान्वितः । जजापतत्रचवनेगायत्रींवेदमातरम्

सिंहव्याघ्रादिभीत्यास्मिन्वृक्षमेकं समास्थिते ।
राजपुत्रे तदाभ्यागादृक्षः सिंहभयार्दितः ॥ १२ ॥

अन्वधावत तं ऋक्षमेकसिंहो वनेचरः । अनुद्रुतः स सिंहेन ऋक्षोवृक्षमुपारुहत्
आरुह्य ऋक्षो वृक्षन्तं ददर्श जगतीपतिम् । वृक्षस्थितं महात्मानं महाबलपराक्रमम्
उवाचभूपतिं दृष्ट्वा ऋक्षोऽयं वनगोचरः । मा भीतिं कुरुराजेन्द्र! वत्स्यावोरजनीमिह
महासत्त्वो महाकायो महादंष्ट्रासमाकुलः । वृक्षमूलं समायातः सिंहोऽयमतिभीषणः
रात्र्यर्धं भजनिद्रांत्वं रक्ष्यमाणो मयानृप । ततः प्रसुप्तं मां रक्ष शर्वर्यर्धं महामते
इति तद्वाक्यमादाय सुप्ते नन्दसुतेहरिः । प्रोवाच ऋक्ष! सुप्तोयं नृपश्चत्यज्यतामिति
तं सिंहमब्रवीदृक्षो धर्मज्ञो द्विजसत्तमाः । भवान्धर्मं न जानीते मृगराजवनेचर
विश्वासघातिनां लोके महाकष्टा भवन्ति हि । न हि मित्रद्रुहांपापंनश्येद्यज्ञायुतैरपि

ब्रह्महत्यादिपापानां कथञ्चिन्निष्कृतिर्भवेत् ।
विश्वस्तघातिनां पापं न नश्येज्जन्मकोटिभिः ॥ २२ ॥

नाहं मेरुं महाभारं मन्ये पञ्चास्य! भूतले । महाभारमिमं मन्येलोकेविश्वासघातकम्
एवमुक्तेऽथ ऋक्षेण सिंहस्तूष्णीमभूत्तदा । धर्मगुप्ते प्रबुद्धे तु ऋक्षः सुष्वाप भूरुहे
ततः सिंहोऽब्रवीद्भूपमेनमृक्षन्त्यजस्व मे । एवमुक्तेऽथ सिंहेन राजा सुप्तमशङ्कितः
स्वकन्यस्तशिरस्कन्तमृक्षंतत्याज भूतले । पात्यमानस्ततोराज्ञानखालम्बितपादपः
ऋक्षः पुण्यवशाद्वृक्षान्न पपात महीतले । स ऋक्षो नृपमभ्येत कोपाद्वाक्यमभाषत
कामरूपधरो राजन्नाहं भृगुकुलोद्भवः । ध्यानकाष्ठाभिधो नाम्ना ऋक्षरूपमधारयम्
यस्मादनागसं सुप्तमत्याक्षीन्मां भवान्नृप !। मच्छापात्त्वमतः शीघ्रमुन्मत्तश्चरभूपते
इतिशप्त्वा मुनिर्भूपं ततः सिंहमभाषत । नृसिंहस्त्वं महायक्ष कुबेरसचिवः पुरा
हिमवद्गिरिमासाद्य कदाचित्त्वं वधूसखः । अज्ञानाद्गौतमाभ्याशे विहारमतनोन्मुदा

गौतमोऽप्युटजाद्दैवात्समिदाहरणाय वै । निर्गतस्त्वांविवसनं दृष्ट्वा शापमुदाहरत्
यस्मान्ममाश्रमेऽद्य त्वं विवस्त्रः स्थितवानसि । अतःसिंहत्वमद्यैवभवितातेनसंशयः
इति गौतमशापेन सिंहत्वमगमत्पुरा । कुबेरसचिवो यक्षो भद्रनामा भवान्पुरा
कुबेरोधर्मशीलो हि तद्भृत्याश्च तथैवहि । अतः किमर्थंत्वंहिंसिमामृषिंवनगोचरम्
एतत्सर्वमहं ध्यानाज्ज्ञानामीह मृगाधिप !। इत्युक्तेध्यानकाष्ठेनत्यक्त्वासिंहत्वमाशुसः
यक्षरूपं गतोदिव्यं कुबेरसचिवात्मकम् । ध्यानकाष्ठमसावाहप्राञ्जलिःप्रणतोमुनिम्
अद्य ज्ञातं मयासर्वं पूर्ववृत्तं महामुने !। गौतमः शापकाले मे शापान्तमपिचोक्तवान्
ध्यानकाष्ठेन सम्वादो ऋक्षरूपेणतेयदा । तदा निर्धूय सिंहत्वं यक्षरूपमवाप्स्यसि
इति मामब्रवीद्ब्रह्मन्गौतमो मुनिपुङ्गवः । अद्य सिंहत्वनाशान्मे जानामित्वांमहामुने
ध्यानकाष्ठाभिधं शुद्धं कामरूपधरंसदा । इत्युक्त्वा तं प्रणम्याथध्यानकाष्ठंसयक्षराट्
विमानवरमारुह्य प्रययावलकापुरीम् । तस्मिन् गते तु यक्षेशे ध्यानकाष्ठोमहामुनिः
अव्याहतेष्टगमनो यथेष्टं प्रययौमहीम् । ध्यानकाष्ठेगते तस्मिन्कामरूपधरे मुनौ
धर्मगुप्तो मुनेःशापादुन्मत्तः प्रययौ पुरीम् । उन्मत्तरूपं तंदृष्ट्वा मन्त्रिणस्तुनृपोत्तमम्
पितुः सकाशमानिन्यू रेवातीरे मनोरमे । तस्मै निवेदयामासुर्मतिभ्रंशं सुतस्य ते
ज्ञात्वा तु पुत्रवृत्तान्तमादितः स नृपोत्तमः । जगामपुत्रमादाय जैमुनिं त्वरयान्वितः
उवाच वचनं चैव जैमुनिं मुनिपुङ्गवम् । भगवञ्जैमुने! पुत्रोममाद्योन्मत्ततां गतः
अथोन्मादविमाशाय ब्रूह्युपायं महामुने । इति पृष्टश्चिरं दध्यौ जैमुनिर्मुनिपुङ्गवः
ध्यात्वातु सुचिरंकालंनृपंनन्दमथाब्रवीत् । ध्यानकाष्ठस्यशापेनह्युन्मत्तस्तेसुतोऽभवत्
तस्यशापस्यमोक्षार्थमुपायं प्रब्रवीमिते । दक्षिणाम्बुनिधौ सेतौ पुण्ये पापविनाशने
धनुष्कोटिरिति ख्यातंतीर्थमस्तिमहत्तरम् । पवित्राणांपवित्रञ्चमङ्गलानांचमङ्गलम्
श्रुतिसिद्धंमहापुण्यंब्रह्महत्यादिशोकधकम् । नीत्वातत्रसुतन्तेऽद्यस्नापयस्वमहीपते!
उन्मादस्तत्क्षणादेव तस्य नश्येन्न संशयः । इत्युक्तस्तं प्रणम्यासौजैमुनिंमुनिपुङ्गवम्
नन्दः पुत्रं समादाय धनुष्कोटिं ययौ तदा । तत्र च स्नापयामास पुत्रंनियमपूर्वकम्

स्नानमात्रात्ततः सद्यो नष्टोन्मादोभवत्सुतः ।

स्वयं सस्नौ स नन्दोऽपि धनुष्कोटौ सभक्तिकम् ॥ ५५ ॥

उषित्वा दिनमेकन्तुसपुत्रस्तुपिता तदा। सेवित्वारामनाथंचसाम्बमूर्त्तिघृणानिधिम्

पुत्रमापृच्छ्य नन्दस्तं प्रययौ तपसे वनम्।

गते पितरि पुत्रोऽपि धर्मगुप्तो नृपो द्विजाः !॥ ५७ ॥

प्रददौ रामनाथाय बहुवित्तानि भक्तितः। ब्राह्मणेभ्योधनंधान्यं क्षेत्राणि च ददौ तदा
प्रययौ मन्त्रिभिः सार्द्धंस्वांपुरींतदनन्तरम्। धर्मेणपालयामासराज्यंनिहतकण्टकम्
पितृपैतामहंविप्रा ! धर्मगुप्तोऽतिधार्मिकः । उन्मादैरप्यपस्मारैर्ग्रहैर्दुष्टैश्च ये नराः

ग्रस्ता भवन्ति विप्रेन्द्रास्तेऽपि चाऽत्र निमज्जनात्।

धनुष्कोटौ विमुक्ताः स्युः सत्यं सत्यं वदाम्यहम् ॥ ६१ ॥

परित्यज्यधनुष्कोटिंतीर्थमन्यद्व्रजेत्तुयः। सिद्धंसगोपयस्त्यक्त्वास्नुहिक्षीरंप्रयाचते
धनुष्कोटिर्धनुष्कोटिर्धनुष्कोटिरिति द्विजाः। त्रिःपठन्तोनरायेतुयत्रक्वापिजलाशये
स्नान्तिसर्वे नरास्ते वै यास्यन्तिब्रह्मणःपदम्। एवंवःकथिताविप्राधर्मगुप्तकथाशुभा

यस्याः श्रवणमात्रेण ब्रह्महत्या विनश्यति।

स्वर्णस्तेयादयश्चान्ये नश्येयुः पापसञ्चयाः ॥ ६५ ॥

इति श्रीस्कान्दे महापुराणएकाशीतिसाहस्र्यांसंहितायां तृतीयेब्रह्मखण्डे
सेतुमाहात्म्ये धनुष्कोटिप्रशंसायांधर्मगुप्तोन्मादविमोक्षणन्नाम
द्वात्रिंशोऽध्यायः ॥ ३२ ॥

त्रयस्त्रिंशोऽध्यायः

धनुष्कोटिप्रशंसायांपरावसोर्ब्रह्महत्याविमोक्षणवर्णनम्

श्रीसूत उवाच

भूयोऽप्यहं प्रवक्ष्यामि धनुष्कोटेस्तु वैभवम्। अत्यद्भुततरं गुह्यं सर्वलोकैकपावनम्
पुरा परावसुर्नाम ब्राह्मणो वेदवित्तमः। अज्ञानात्पितरं हत्वा ब्रह्महत्यामवाप्तवान्

सोऽपि स्नात्वा धनुष्कोटौ तद्दोषान्मुमुचे क्षणात्।

ऋषय ऊचुः

पितरं हतवान्पूर्वं कथं सूत! परावसुः ॥ ३ ॥

कथं वा धनुषःकोटौ मुक्तिस्तस्याप्यभून्मुने !। एतन्नःश्रद्दधानानां विस्तराद्वक्तुमर्हसि

श्रीसूत उवाच

आसीद्राजा बृहद्युम्नश्चक्रवर्ती महाबलः। धर्मेणपालयामास सागरान्तां वसुन्धराम्
अयजत्सत्रयागेन देवानिन्द्रपुरोगमान्। याजकस्तस्य रैभ्योऽभूद्विद्वान्परमधार्मिकः
आस्तां पुत्रावुभौ तस्याप्यर्वावसुपरावसू। षडङ्गवेदविदुषौ श्रौतस्मार्तेषु कोविदौ
काणादे जैमिनीयेचसांख्येवैयासिकेतथा। गौतमे योगशास्त्रेचपाणिनीयेचकोविदौ
मन्वादिस्मृतिनिष्णातौ सर्वशास्त्रविशारदौ। सत्रयागे सहायार्थंबृहद्युम्नेनयाचितौ
भ्रातरौ समनुज्ञातौ पित्रारैभ्येण जग्मतुः। बृहद्युम्नस्य सत्रन्तावश्विनाविवरूपिणौ
अतिष्ठदाश्रमेरैभ्यः स्नुषया ज्येष्ठया सह। तौ गत्वा भ्रातरौतत्र राज्ञः सत्रमनुत्तमम्
याजयामासतुस्सत्रे बृहद्युम्नमहीपतेः। नाभवत्स्खलनं भ्रात्रोः सत्रेसाङ्गेषु कर्मसु
सत्रेसन्तन्यमानेऽस्मिन् बृहद्युम्नस्यभूपतेः। मुनयोभ्यागमन्सर्वेराज्ञाहूतानिरीक्षितुम्
वसिष्ठो गौतमश्चात्रिर्जाबालिरथकश्यपः। क्रतुर्दक्षःपुलस्तिश्च पुलहो नारदो मुनिः

मार्कण्डेयः शतानन्दो विश्वामित्रः पराशरः।

भृगुः कुत्सोऽथ वाल्मीकिर्व्यासधौम्यादयोऽपरे ॥ १५ ॥

शिष्यैःप्रशिष्यैर्बहुभिरसंख्यातैःसमावृताः। तानागतान्समालोक्यबृहद्युम्नोमहीपतिः

अर्घ्यादिना मुनीन्सर्वान्पूजयामास सादरम्।
नानादिग्भ्यः समायाताश्चचतुरङ्गबलैर्युताः ॥ १७ ॥
उपहूतास्तदा भूपास्सत्रं वीक्षितुमादरात्।
वैश्याः शूद्रास्तथा वर्णाश्चत्वारोऽपि समागताः ॥ १८ ॥

वर्णिनोऽथगृहस्थाश्च वानप्रस्थाश्चभिक्षवः। सत्रंनिरीक्षितुंतस्यबृहद्युम्नस्यचाययुः तान्सर्वान्पूजयामास यथार्हंराजसत्तमः। ददौचान्नानि सर्वेभ्यो घृतसूपादिकांस्तथा वस्त्राणि च सुवर्णानि हाररत्नान्यनेकशः। एवंसत्कारयामास राजासत्रे समागतान् रैभ्यपुत्रौ तदा विप्रा अर्वावसुपरावसू। अध्वरादीनि कर्माणिचक्रतुस्स्खलितंविना तद्दृष्ट्वा मुनयस्सर्वे कौशलं रैभ्यपुत्रयोः। श्लाघन्ते सशिरःकम्पंवसिष्ठप्रमुखास्तदा कर्माणिकानि चित्तत्रकारयित्वापरावसुः। तृतीयसवनस्यान्तेगृहकृत्यंनिरीक्षितुम प्रययौ स्वाश्रमंसायंविनैवार्वावसुंद्विजाः। तस्मिन्नवसरेरैभ्यं कृष्णाजिनसमावृतम् वनेचरन्तं पितरं दृष्ट्वा स मृगशङ्कया। निद्राकलुषितो रात्रौ अन्धे तमसिसंकुले आत्मानं हन्तुमायाति मृगोऽयमितिचिन्तयन्। जघानपितरंसोऽयंमहारण्येपरावसुः रिरक्षुणा शरीरं स्वं तेनाकामनयापिता। रजन्यांहिंसितोविप्रामहापातककारिणा अन्तिकंससमागत्यव्यलोकयततं हतम्। ज्ञात्वास्वपितरंरात्रौशुशोचव्यथितेन्द्रियः प्रेतकार्यं ततः कृत्वा पितुः सर्वं परावसुः। भूयोऽपि नृपतेः सत्रं परावसुरुपाययौ स्वचेष्टितन्तुतत्सर्वमनुजायततोब्रवीत्। मृतंस्वपितरंश्रुत्वासोपिशोकाकुलोऽभवत् ज्येष्ठोनुजं ततः प्राह वचनं द्विजसत्तमाः। महत्सत्रं समारब्धं बृहद्युम्नस्य भूपतेः वोढृत्वशक्तिर्नास्त्यस्य कर्मणोबालकस्यते। जनकश्च हतोरात्रौ मयापिमृगशङ्कया प्रायश्चित्तं च कर्त्तव्यं ब्रह्महत्याविशुद्धये। मदर्थं व्रतचर्यां त्वं चर तात कनिष्ठक! एकाकी धुरमुद्वोढुं शक्तोऽहंसत्रकर्मणः। अर्वावसुरिति प्रोक्तो ज्येष्ठेन सतमभ्यधात् तथा भवत्वहं ज्येष्ठ! चरिष्ये व्रतमुत्तमम्। ब्रह्महत्याविशुद्ध्यर्थं त्वं सत्रधुरमावह

इत्युक्त्वा सोऽनुजो ज्येष्ठं तस्मात्सत्राद्विनिर्ययौ।

कारयामास कर्माणि ज्येष्ठस्तस्मिन्गते क्रतौ ॥ ३७ ॥

द्वादशाब्दं कनिष्ठोऽपिब्रह्महत्याव्रतंद्विजाः। चरित्वासत्रयागेऽस्मिन्नाजगाम पुनर्मुदा तंदृष्ट्वा भ्रातरं ज्येष्ठो बृहद्युम्नमुवाचह। अयन्ते ब्रह्महा सत्रमर्वावसुरुपागतः ॥ ३६ ॥ एनमुत्सारयाशु त्वमस्मात्सत्रान्नृपोत्तम। अन्यथासत्रयागस्य फलहानिर्भविष्यति इतीरितःस स्वप्रेष्यैर्यागात्तमुदवासयत्। उद्वास्यमानो राजानमर्वावसुरथाब्रवीत् न मया ब्रह्महत्येयंबृहद्युम्नकृतानघ!। किन्तु ज्येष्ठेन मे सा हि ब्रह्महत्या कृता विभो ब्रह्महत्याव्रतं चीर्णं तदर्थं च मयाऽधुना। एवमुक्तोऽपि राजाऽसौवचसासपरावसोः अर्वावसुंनिजात्सत्रादुदवासयदाशु वै। धिक्कृतो ब्राह्मणैश्चायं ययौ तूष्णींवनंतदा मुनिवृन्दसमाकीर्णं तपोवनमुपेत्य सः। अर्वावसुस्तपश्चक्रे देवैरपि सुदुष्करम् ॥ तपःकुर्वंस्तथादित्यमुपतस्थे समाहितः। मूर्त्तिमांस्तपसातस्यमहतातुष्टधीःस्वयम्

आविरासीत्स्वया दीप्त्या भासयञ्जगतीतलम्।
कर्मसाक्षीजगच्चक्षुर्भास्करो देवताग्रणीः ॥ ४७ ॥

आविर्बभूवुर्देवाश्च पुरस्कृत्य शचीपतिम्। इन्द्रादयस्ततोदेवाः प्रोचुरर्वावसुं द्विजाः अर्वावसो! त्वं प्रवरस्तपसा ब्रह्मचर्यतः। आचारेण श्रुतेनाऽपि वेदशास्त्रादिशिक्षया निराकृतोवमानेन त्वं परावसुना बहु। तथापि क्षमया युक्तो न कुप्यति भवान्यतः यस्माज्ज्येष्ठोऽवधीत्तातंन हिंसित्वं महामते। ब्रह्महत्याव्रतं यस्मात्तदर्थं चरितंत्वया अतःस्वीकुर्महे त्वान्तु पराकुर्मःपरावसुम्। उक्त्वैवंबलभिन्मुख्याःसर्वेचत्रिदिवालयाः तन्तेप्रवरयामासुर्निरासुश्चपरावसुम्। पुनरिन्द्रादयो देवाः पुरोधाय दिवाकरम् ॥ अर्वावसुं प्रोचुरिदंवरं त्वं वरयेति वै। स चापि प्रार्थयामास जनकस्योत्थितंपुनः वधे चास्मरणंदेवा नात्मजो जनकस्यवै। तथास्त्विति सुराःप्रोचुर्पुनरूचुरिदं वचः वरं चान्यं प्रदास्यामो वरय त्वं महामते!। एवमुक्तःसुरैःसोऽयमर्वावसुरभाषत मम भ्रातुरदुष्टत्वं भवतु त्रिदशालयाः। अर्वावसोर्वचः श्रुत्वा त्रिदशाःपुनरब्रुवन् ॥ ब्राह्मणस्य पितुर्घातान्महान्दोषःपरावसोः। न ह्यन्यकृतपापस्य परेणाऽनुष्ठितेन वै

प्रायश्चित्तेन शान्तिःस्यान्महापातकपञ्चके।

पितुर्ब्राह्मणहन्तुस्तु सुतरां नास्ति निष्कृतिः ॥ ५१ ॥

आत्मनानुष्ठितेनापि व्रतेननहिनिष्कृतिः । परावसोस्तव भ्रातुरतो नैवास्तिनिष्कृतिः अतोऽस्माभिरदुष्टत्वमस्मै दातुं न शक्यते । अर्वावसुःपुनःप्राह देवानिन्द्रपुरोगमान् तथापि युष्मन्माहात्म्यात्प्रसादाद्भवतान्तथा । पितुर्ब्राह्मणहन्तुर्मे भ्रातुस्त्रिदशसत्तमाः यथास्यान्निष्कृतिर्ब्रूत तथैव कृपयायुताः । एवमर्वावसोःश्रुत्वा वचस्तेत्रिदशालयाः ध्यात्वातुसुचिरंकालंविनिश्चित्यैदमब्रुवन् । उपायन्तेप्रवक्ष्यामस्तत्पातकनिवारणम्

दक्षिणाम्बुनिधौ पुण्ये रामसेतौ विमुक्तिदे ।

धनुष्कोटिरिति ख्यातं तीर्थमस्ति विमुक्तिदम् ॥ ६५ ॥

ब्रह्महत्यासुरापानस्वर्णस्तेयविनाशनम् । गुरुतल्पगसंसर्गदोषाणामपि नाशनम् ॥ अकामेनापि यःस्नायादपवर्गफलप्रदम् । दुःस्वप्ननाशनं धन्यं नरकक्लेशनाशनम् ॥ कैलाशादिपदप्राप्तिकारणं परमार्थदम् । सर्वकाममिदं पुंसां ऋणदारिद्र्यनाशनम् धनुष्कोटिर्धनुष्कोटिर्धनुष्कोटिरितीरणात् । स्वर्गापवर्गदं पुंसांमहापुण्यफलप्रदम् तत्रगत्वातवभ्रातास्नायाद्यदि परावसुः । तत्क्षणादेव ते ज्येष्ठो मुच्यते ब्रह्महत्यया इदंरहस्यंसुमहत्प्रायश्चित्तमुदीरितम् । उक्त्वेत्यर्वावसुं देवाः प्रययुः स्वपुरींप्रति ततश्चार्वावसुर्ज्येष्ठं समादायपरावसुम् । रामचन्द्रधनुष्कोटिं प्रययौमुक्तिदायिनीम् सेतौसंकल्पमुक्त्वा तु नियमेन परावसुः । सह भ्रात्राधनुष्कोटौ सस्नौपातकशुद्धये

स्नात्वोत्थितं धनुष्कोटौ तम्प्रोवाचाऽशरीरिणी ।

परावसो विनष्टा ते पितुर्ब्राह्मणघातजा ॥ ७४ ॥

ब्रह्महत्यामहाघोरा नरकक्लेशकारिणी । इत्युक्त्वाविरराभाथ सापिवागशरीरिणी परावसुस्तदाविप्राः कनिष्ठेनसमन्वितः । रामचन्द्रधनुष्कोटिं प्रणम्य च सभक्तिकम् रामनाथं महादेवं नत्वा भक्तिपुरःसरम् । विमुक्तपातको विप्राः प्रययौ पितुराश्रमम् मृत्वोत्थितस्तदारैभ्योदृष्ट्वापुत्रौसमागतौ । सन्तुष्टहृदयोह्यास्तेपुत्राभ्यांस्वाश्रमेतदा रामचन्द्रधनुष्कोटौ स्नानेन हतपातकम् । एनं परावसुं सर्वे स्वीचक्रुर्मुनयस्तदा ॥ एनं परावसोरुक्तं ब्रह्महत्याविमोक्षणम् । स्नानमात्राद्धनुष्कोटौयुष्माकं मुनिपुङ्गवाः

सुरापानादयोऽप्यत्रनश्यन्त्येवात्र मज्जनात् । सत्यंसत्यंपुनः सत्यमुद्धृत्यभुजमुच्यते

महापातकसंघाश्च नश्येयुर्मज्जनादिह ।

य इमं पठतेऽध्यायं ब्रह्महत्याविमोक्षणम् ॥ ८२ ॥

ब्रह्महत्याविनश्येतत्तत्क्षणान्नास्तिसंशयः । सुरापानादयोप्यस्य शान्तिगच्छेयुरञ्जसा

इतिश्रीस्कान्देमहापुराणएकाशीतिसाहस्र्यांसंहितायां तृतीयेब्रह्मखण्डे सेतुमाहात्म्ये धनुष्कोटिप्रशंसायां परावसोर्ब्रह्महत्याविमोक्षणन्नाम-त्रयस्त्रिंशोऽध्यायः ॥ ३३ ॥

चतुस्त्रिंशोऽध्यायः

धनुष्कोटिप्रशंसायांशृगालवानरसम्वादेसुर्मतिमहापातकविमोक्षणोपायकथनम्

श्रीसूत उवाच

इतिहासं पुनर्वक्ष्ये धनुष्कोटिप्रशंसनम् । शृगालस्य च संवादं वानरस्य च सत्तमाः शृगालवानरौ पूर्वमास्तां जातिस्मरावुभौ । पुरापिमानुषे भावे सहायौ तौबभूवतुः

अन्यां योनिं समापन्नौ शार्गालीं वानरीं तथा ।

सख्यं समीयतुरुभौ शृगालो वानरो द्विजाः ॥ ३ ॥

कदाचिद्रुद्रभूमिष्ठं शृगालं वानरोऽब्रवीत् । श्मशानमध्ये सम्प्रेक्ष्यपूर्वजातिमनुस्मरन्

वानर उवाच

शृगाल! पातकं पूर्वं किमकार्षीः सुदारुणम् ।

यस्त्वं श्मशाने मृतकान्पूतिगन्धांश्च कुत्सितान् ॥ ५ ॥

अत्सीत्युक्तोऽथ कपिना शृगालस्तमभाषत ।

शृगाल उवाच

अहं पूर्वभवे ह्यासं ब्राह्मणो वेदपारगः ॥ ६ ॥

वेदशर्माभिधो विद्वान्सर्वकर्मकलापवित् । ब्राह्मणाय प्रतिश्रुत्य न मया तत्र जन्मनि कपेधनंतदादत्तं श्रृगालोऽहं ततोऽभवम् । तस्मादेवंविधंभक्ष्यंभक्षयाम्यतिकुत्सितम्

प्रतिश्रुत्य दुरात्मानो न प्रयच्छन्ति ये नराः ।
कपे ! श्रृगालयोनिन्ते प्राप्नुवन्त्यतिकुत्सिताम् ॥ १ ॥

योनद्द्यात्प्रतिश्रुत्यस्वल्पंवायदिवाबहु । सर्वाशास्तस्यनष्टाःस्युःषण्ढस्येवप्रजोद्भवः प्रतिश्रुत्याप्रदाने तु ब्राह्मणाय प्लवङ्गम !। दशजन्मार्जितं पुण्यं तत्क्षणादेव नश्यति॥ प्रतिश्रुत्याप्रदानेन यत्पापमुपजायते । नाश्वमेधशतेनापि तत्पापं परिशुध्यति न जानेऽहमिदं पापं कदा नष्टं भवेदिति । तस्मात्प्रतिश्रुतं द्रव्यंदातव्यंविदुषासदा प्रतिश्रुत्याऽप्रदानेन श्रृगालोभवति ध्रुवम् । तस्मात्प्राज्ञेनविदुषा दातव्यंहिप्रतिश्रुतम् इत्युक्त्वा स श्रृगालस्तं वानरंपुनरब्रवीत् । त्वयाहि किं कृतं पापं येन वानरतामगात् अनागसो वनचरान्पक्षिणो हिंसि वानर !। तत्पातकं वदस्वाद्य वानरत्वप्रदम्मम

इत्युक्तः स श्रृगालेन श्रृगालं वानरोऽब्रवीत् ।

वानर उवाच

पुरा जन्मन्यहं विप्रो वेदनाथ इति स्मृतः ॥ १७ ॥

विश्वनाथोमम पिता ममाम्बाकमलालया । श्रृगालसख्यमभवदावयोःप्राग्भवेऽपिहि त्वं न जानासि तत्सर्वंवेद्म्यहंपुण्यगौरवात् । तपमाराध्य गिरिशंतत्प्रसादात्पुराममम अतीतभाविविज्ञानमस्तिजन्मान्तरेऽपिच । गोमायो तद्भवे शाकं ब्राह्मणस्य हृतंमया तत्पापाद्वानरो भूत्वा नरकानुभवात्ततः । नाऽऽहर्तव्यं विप्रधनं हरणान्नरकं भवेत् अनन्तरं वानरत्वं भविष्यति न संशयः । तस्मान्न ब्राह्मणस्वन्तु हर्तव्यं विदुषासदा ब्रह्मस्वहरणात्पापमधिकं नैव विद्यते । पीतवन्तं विषं हन्ति ब्रह्मस्वं सकुलं दहेत् ब्रह्मस्वहरणात्पापी कुम्भीपाकेषु पच्यते । पश्चान्नरकशेषेण वानरीं योनिमश्नुते विप्रद्रव्यं न हर्तव्यंक्षन्तव्यन्तेष्वतःसदा । बाला दरिद्राःकृपणा वेदशास्त्रादिवर्जिताः ब्राह्मणा नावमन्तव्याः क्रुद्धाश्चेदनलोपमाः । अतीतानागतं ज्ञानं श्रृगालाखिलमस्तिमे ज्ञानमस्ति नमेत्वेकनेतत्पापविशोधने । जातिस्मरोऽपिहि भवान्भाविकार्यंनबुध्यते

अतीतेष्वपि किञ्चिज्ज्ञः प्रतिबन्धवशाद्भवान् ।
अतो भवान्नाजानीते भाव्यतीतं तथाऽखिलम् ॥ २८ ॥

कियत्कालंश्रृगालातोभुजोर्व्यसनमीदृशम् । आवयोरस्यपापस्यकोवामोचयिताभवेत् एवंप्रब्रुवतोस्तत्र प्लवङ्गमश्रृगालयोः । यदृच्छया दैवयोगात्पूर्वपुण्यवशाद्द्विजाः

आययौ स महातेजाः सिन्धुद्वीपाह्वयो मुनिः ।
भस्मोद्धूलितसर्वाङ्गस्त्रिपुण्ड्राङ्कितमस्तकः ॥ ३१ ॥

रुद्राक्षमालाभरणः शिवनामानि कीर्तयन् । श्रृगालवानरौ दृष्ट्वासिन्धुद्वीपाभिधंमुनिम्

प्रणम्य मुदितौ भूत्वा पप्रच्छ तुरिदन्तदा ।

श्रृगालवानरावूचतुः

भगवन्सर्वधर्मज्ञ ! सिन्धुद्वीप ! महामुने !॥ ३३ ॥

आवां रक्ष कृपादृष्ट्या विलोकय मुहुर्मुदा । कपित्वञ्च श्रृगालत्वमावयोर्येन नश्यति तमुपायं वदस्वाद्य त्वंहिपुण्यवतांवरः । अनाथान्कृपणानज्ञानबालान्रोगातुराञ्जनान्

रक्षन्ति साधवो नित्यं कृपया निरपेक्षकाः ।
ताभ्यामितीरितः प्राज्ञः सिन्धुद्वीपो महामुनिः ॥ ३६ ॥
प्राह तौ कपिगोमायू ध्यात्वा तु मनसा चिरम् ।

सिन्धुद्वीप उवाच

जानाम्यहं युवां सम्यग् हेश्रृगालप्लवङ्गमौ !॥ ३७ ॥

श्रृगालप्राग्भवेत्वं वै वेदशर्माभिधोद्विजः । ब्राह्मणायप्रतिश्रुत्यधान्यानामाढकन्त्वया न दत्तन्तेन पापेनशागालीं योनिमाप्तवान् । त्वञ्च वानरपूर्वस्मिन्वेदनाथाभिधोद्विजः

ब्राह्मणस्य गृहाच्छाकं हृतं चौर्यात्त्वया ततः ।
प्राप्तोऽसि वानरीं योनिं सर्वपक्षिभयंकरीम् ॥ ४० ॥

युवयोः पापशान्त्यर्थमुपायंप्रवदाम्यहम् । दक्षिणाम्बुनिधौरामधनुष्कोटौयुवामरम् गत्वाऽत्रकुरुतंस्नानंतेनपापाद्विमोक्ष्यथः । पुराकिरातिसंसर्गात्सुमतिर्ब्राह्मणःसुराम्

पीतवान्तस धनुष्कोटौ स्नात्वा पापाद्विमोचितः ।

श्रृगालवानरावूचतुः

सुमतिः कस्य पुत्रोऽसौ कथञ्च स सुराम्पपौ ।

कथं किरात्यांसक्तोऽभूत्सिन्धुद्वीप महामते !। आवयोर्विस्तरादेतद्वदत्वंकृपयाऽधुना

सिन्धुद्वीप उवाच

महाराष्ट्राभिधेदेशे ब्राह्मणः कश्चिदास्तिकः । यज्ञदेव इति ख्यातो वेदवेदाङ्गपारगः दयालुरातिथेयश्च शिवनारायणार्चकः । सुमतिर्नामपुत्रोऽभूद्यज्ञदेवस्य तस्यवै पितरौ स परित्यज्य भार्य्यामपि पतिव्रताम् । प्रययावुत्कलेदेशेविटगोष्ठीपरायणः काचित्किराती तद्देशेवसन्तीयुवमोहिनी। यूनांसमस्तद्रव्याणिप्रलोभ्यजगृहेचिरम् तस्या गृहं स प्रययौसुमतिर्ब्राह्मणाधमः । सुमतिं सा न जग्राहकिरातिर्निर्धनंद्विजम् तयात्यक्तोऽथसुमतिस्तत्संयोगैकतत्परः । इतस्ततश्चोरयित्वाबहुद्रव्याणिसन्ततम् दत्त्वातयाचिरंरेमे तद्गृहे बुभुजे चमः । एकेन चषकेनासौ तयासह सुरां पपौ एवं स बहुकालं वै रममाणस्तया सह । पितरौ निजपत्नीं च नास्मरद्विषयातुरः स कदाचित्किरातैस्तु चौर्यंकर्तुं ययौसह । द्रव्यं हर्तुंकिरातास्तेलाटानांविषयंययुः विप्रस्यकस्यचिद्गेहेसोऽपिकैरातवेषधृक् । ययौचोरयितुंद्रव्यंसाहसीखड्गहस्तवान् तद्गृहस्वामिनं विप्रं हत्वाखड्गेनसाहसी। समादाय बहुद्रव्यं किरातिभवनं ययौ तं यान्तमनुयातिस्म ब्रह्महत्याभयङ्करी । नीलवस्त्रधराभीमा भृशंरक्तशिरोरुहा गर्जती साट्टहासंसा कम्पयन्ती च रोदसी । अनुद्रुतस्तयासोऽयं बभ्राम जगतीतले एवंभ्रमन्भुवं सर्वांकदाचित्सुमतिः स्वयम् । स्वग्रामंप्रययौभीत्याहेशृगालप्लवङ्गमौ अनुद्रुतस्तया भीतः प्रययौ स्वगृहम्प्रति । ब्रह्महत्याप्यनुद्रुत्यतेन साकंगृहं ययौ पितरं रक्षरक्षेति सुमतिः शरणंययौ । मा भैषीरिरि तं प्रोच्य पिता रक्षितुमुद्यतः

तदानीं ब्रह्महत्येयं तत्तातं प्रत्यभाषत ।

ब्रह्महत्योवाच

मैनं त्वं प्रतिगृह्णीष्व यज्ञदेव! द्विजोत्तम !॥ ६१ ॥

असौसुरापीस्तेयीचब्रह्महाचातिपातकी । मातृद्रोहीपितृद्रोहीभार्य्यात्यागीचपापकृत्

किरातीसङ्गदुष्टश्च नैनं मुञ्चाम्यहं द्विज !। गृह्णासि चेदिमं विप्र! महापातकिनंसुतम्

त्वद्भार्य्यामस्य भार्य्याञ्च त्वां च पुत्रमिमं द्विज !।

भक्षयिष्यामि वंशं च तस्मान्मुञ्च सुतं त्विमम् ॥ ६४ ॥

इमन्त्यजसिचेत्पुत्रंयुष्मान्मोक्ष्यामिसाम्प्रतम् । नैकस्यार्थेकुलंहन्तुमर्हसित्वंमहामते

इत्युक्तः स तया तत्र यज्ञदेवोऽब्रवीच्च ताम् ।

यज्ञदेव उवाच

बाधते मां सुतस्नेहः कथमेनं परित्यजे ॥ ६६ ॥

ब्रह्महत्या तदाकर्ण्य द्विजोक्तं तमभाषत ।

ब्रह्महत्योवाच

अयं हि पतितो भूत्ते वर्णाश्रमबहिष्कृतः ॥ ६७ ॥

पुत्रेऽस्मिन्माकुरु स्नेहंनिन्दितंतस्य दर्शनम् । इत्युक्त्वाब्रह्महत्यासायज्ञदेवस्यपश्यतः तलेन प्रजहारास्य पुत्रं सुमतिनामकम् । रुरोद तातताततेति पितरं प्रब्रुवन्मुहुः ॥ रुरुदुर्जनको माता भार्यापि सुमतेस्तदा । एतस्मिन्नन्तरे तत्र दुर्वासाशङ्करांशजः दिष्ट्या समाययौ योगी हे शृगालप्लवङ्गमौ !। यज्ञदेवोऽथ तं दृष्ट्वा मुनिरुद्रावतारकम् स्तुत्वाप्रणम्यशरणं ययाचेपुत्रकारणात् । दुर्वासस्त्वंमहायोगी साक्षाद्वैशङ्करांशजः त्वद्दर्शनमपुण्यानां भवितानकदाचन । ब्रह्महा च सुरापी च स्तेयी चाऽभूत्सुतो मम एनं प्रहर्तुमायाता ब्रह्महत्या विवर्तते । भूयाद्यथा मे पुत्रोऽयं महापातकमोचितः ॥ घोरा च ब्रह्महत्येयं यथा शीघ्रं लयं व्रजेत् । तमुपायं वदस्वाद्य मम पुत्रे दयां कुरु अयमेवहिपुत्रो मेनान्योऽस्ति तनयोमुने !। अस्मिन्मृतेतुवंशोमेसमुच्छिद्येत्समूलतः

ततः पितृभ्यः पिण्डानां दाताऽपि न भवेद् ध्रुवम ।

अतः कृपां कुरुष्व त्वमस्मासु भगवन्मुने !॥ ७७ ॥

इत्युक्तःस तदोवाच दुर्वासाःशङ्करांशजः । ध्यात्वातुसुचिरंकालं यज्ञदेवंद्विजोत्तमम्

दुर्वासा उवाच

यज्ञदेव! कृतं पापमतिक्रूरं सुतेन ते । नास्यपापस्य शान्तिः स्यात्प्रायश्चित्तायुतैरपि

अथापिते सुतस्याहमस्य पापस्यशान्तये । प्रायश्चित्तंवदिष्यामिशृणुनान्यमनाद्विज!
श्रीरामधनुषःकोटौदक्षिणेसलिलार्णवे । स्नातिचेत्तवपुत्रोयंपातकान्मोक्ष्यतेक्षणात्
दुर्विनीताभिधो विप्रो यत्र स्नानाद् द्विजोत्तमाः ।।
गुरुस्त्रीगमपापेभ्यस्तत्क्षणादेव मोचितः ॥ ८२ ॥
सैषाश्रीधनुषःकोटी राघवस्य स्वयंहरेः । स्नानमात्रेण पापौघं नाशयेत्त्वत्सुतस्यसा

इति श्रीस्कान्देमहापुराणएकाशीतिसाहस्त्र्यां संहितायां तृतीयेब्रह्मखण्डे
सेतुमाहात्म्येधनुष्कोटिप्रशंसायांशृगालवानरसंवादेसुमतिमहा-
पातकविमोक्षोपायकथनन्नामचतुस्त्रिंशोऽध्यायः ॥ ३४ ॥

———

पञ्चत्रिंशोऽध्यायः

धनुष्कोटिप्रशंसायांशृगालवानरविमोक्षणवर्णनम्

यज्ञदेव उवाच

दुर्वासर्षे महाप्राज्ञ! परावरविचक्षण !। दुर्विनीताभिधःकोऽयं योऽसौगुर्वङ्गनामगात्
तस्य पुत्रोधनुष्कोटौस्नानेनसकथंद्विजः । तत्क्षणान्मुमुचे पापाद्गुरुस्त्रीगमसंभवात्
एतन्मे श्रद्दधानस्य विस्तराद्वक्तुमर्हसि ।

दुर्वासा उवाच

पाण्ड्यदेशे पुरा कश्चिद् ब्राह्मणोऽभूद् बहुश्रुतः ॥ ३ ॥
इध्मवाहाभिधोनाम्ना तस्यभार्यारुचिस्तथा । बभूवतस्यतनयोदुर्विनीताभिधोद्विजः
बाल्ये वयसि पुत्रस्य ममार जनकोऽस्य वै ।
दुर्विनीतःपितुस्तस्य स कृत्वा चौर्ध्वदेहिकम् ॥ ५ ॥
कश्चित्कालंगृहेऽवात्सीन्मात्राविधवयासह । ततोदुर्भिक्षमभवद्द्वादशाब्दमवर्षणात्
ततो देशान्तरमगान्मात्रा साकंद्विजोत्तम! । गोकर्णंसमासाद्यसुभिक्षंधान्यसञ्चयैः

उवास सुचिरंकालं मात्राविधवया सह । ततो बहुतिथे काले दुर्विनीतो गते सति
पूर्वदुष्कर्मपाकेन मूढबुद्धिरहो बत । अनङ्गशरविद्धाङ्गो रागाद्विकृतमानसः ॥ ६ ॥
मा मेति वादिनीमम्बां बलादाकृष्य पातकी । बुभुजेकाममोहात्मा मैथुनेनद्विजोत्तम!
स खिन्नोदुर्विनीतोऽयं रेतःसेकादनन्तरम् । मनसा चिन्तयन्पापं रुरोदभृशदुःखितः
अहोऽतिपापकृदहं महापातकिनांवरः । अगमं जननीं यस्मात्कामबाणवशानुगः
इति सञ्चिन्त्य मनसास तत्र मुनिसन्निधौ । जुगुप्समानश्चात्मानंतान्मुनीनिदमब्रवीत्
गुरुस्त्रीगमपापस्य प्रायश्चित्तं मम द्विजाः । वदध्वं शास्त्रतत्त्वज्ञाःकृपयामयिकेवलम्
मरणान्निष्कृतिःस्याच्चेन्मरिष्यामि न संशयः ।
भवद्भिरुच्यते यत्तु प्रायश्चित्तं ममाऽधुना ॥ १५ ॥
करिष्येतद्द्विजाः सत्यं मरणंवान्यदेववा । तच्छ्रुत्वावचनंतस्य केचित्तत्रमुनीश्वराः
अनेनसाकंवार्तातु दोषायेति विनिश्चिताः । मौनित्वंभेजिरेकेचिन्मुनयःकेचिदाभृशम्
दुष्टात्मा मातृगामीत्वं महापातकिनाम्वरः । गच्छगच्छेतिबहुशोवाचमूचुर्द्विजोत्तमाः
तान्निवार्यकृपाशीलः सर्वज्ञःकरुणानिधिः । कृष्णद्वैपायनस्तत्र दुर्विनीतमभाषत
गच्छाशुरामसेतौत्वं धनुष्कोटौसहाम्बया । मकरस्थेरवौमाघे मासमेकंनिरन्तरन्
जितेन्द्रियोजितक्रोधः परद्रोहविवर्जितः । एकमासंनिराहारः कुरुस्नानं सहाम्बया
पूतोभविष्यस्यद्धात्वं गुरुस्त्रीगमदोषतः । यत्पातकं न नश्येत सेतुस्नानेन तन्नहि
श्रुतिस्मृतिपुराणेषु धनुष्कोटिप्रशंसनम् । बहुधाभण्यते पञ्चमहापातकनाशनम्
तस्मात्त्वंत्वरयागच्छ धनुष्कोटिसहाम्बया । प्रमाणंकुरुमद्वाक्यं वेदवाक्यमिवद्विज
श्रीरामधनुषःकोटौ स्नातस्य द्विजपुत्रक! ।
महापातककोट्योऽपि नैव लक्ष्या इतीव हि ॥ २५ ॥
प्रायश्चित्तान्तरं प्रोक्तं मन्वादिस्मृतिभिःस्मृतौ ।
तद्गच्छत्वं धनुष्कोटिं महापातकनाशिनीम् ॥ २६ ॥
इतीरितोऽथ व्यासेन दुर्विनीतो द्विजोत्तमाः ।
मात्रा साकं धनुष्कोटिं नत्वा व्यासं च निर्ययौ ॥ २७ ॥

मकरस्थे रवौमाघे मासमात्रं निरन्तरम् । मात्रा सह निराहारोजितक्रोधोजितेन्द्रियः श्रीरामधनुषःकोटौ सस्नौ सङ्कल्पपूर्वकम् । रामनाथं नमस्कुर्वंस्त्रिकालंभक्तिपूर्वकम्

मासान्ते पारणांकृत्वा मात्रा सह विशुद्धधीः ।
व्यासान्तिकं पुनःप्रायात्तस्मै वृत्तं निवेदितुम् ॥ ३० ॥
स प्रणम्य पुनर्व्यासं दुर्विनीतोऽब्रवीद्वचः ।

दुर्विनीत उवाच

भगवन्करुणासिन्धो! द्वैपायन महत्तम ! ॥ ३१ ॥

भवतः कृपयाराम धनुष्कोटौ सहाम्बया । माघमासेनिराहारोमासमात्रमतन्द्रितः अहं त्वकरवंस्नानं नमस्कुर्वन्महेश्वरम् । इतः परंमयाव्यास भगवन्भक्तवत्सल! ॥ यत्कर्त्तव्यं मुने तत्त्वं ममोपदिशतत्त्वतः । इतितस्यवचःश्रुत्वा दुर्विनीतस्य वै मुनिः

बभाषे दुर्विनीतं तं व्यासो नारायणांशकः ।

व्यास उवाच

दुर्विनीत! गतं तेऽद्य पातकं मातृसङ्गजम् ॥ ३५ ॥

मातुश्चपातकं नष्टं त्वत्सङ्गतनिमित्तजम् । सन्देहोनात्र कर्तव्यः सत्यमुक्तं मया तव बान्धवाःस्वजनाःसर्वेतथाऽन्येब्रह्मणाश्चये । सर्वेत्वांसंग्रहीष्यन्तिदुर्विनीताम्बयासह

मत्प्रसादाद्धनुष्कोटौ विशुद्धस्त्वं निमज्जनात् ।
दारसंग्रहणं कृत्वा गार्हस्थं धर्ममाचर ॥ ३८ ॥
त्यज त्वं प्राणिहिंसां च धर्मं भज सनातनम् ।
सेवस्व सज्जनान्नित्यं भक्तियुक्तेन चेतसा ॥ ३६ ॥

सन्ध्योपासनमुख्यानि नित्यकर्माणिन त्यज । निगृहीष्वेन्द्रियग्राममर्चयस्वहरंहरिम् परापवादं माब्रूया माऽसूयांभजकर्हिचित् । अन्यस्याभ्युदयं दृष्ट्वा सन्तापंकुणुमावृथा मातृवत्परदारांश्च त्वन्नित्यमवलोकय । अधीतवेदानखिलान्माविस्मर कदाचन ॥

अतिथीन्माऽवमन्यस्व श्राद्धं पितृदिने कुरु ।
पैशुन्यं मा वदस्व त्वं स्वप्नेऽप्यन्यस्य कर्हिचित् ॥ ४३ ॥

इतिहासपुराणानि धर्मशास्त्राणि संततम् । अवलोकय वेदान्तं वेदाङ्गानि तथा पुनः हरिशङ्करनामानि मुक्तलज्जोऽनुकीर्त्तय । जाबालोपनिषन्मन्त्रैस्त्रिपुण्ड्रोद्धूलनं कुरु रुद्राक्षान् धारय सदा शौचाचारपरो भव । तुलस्याबिल्वपत्रैश्चनारायणहरावुभौ ॥

एकं कालं द्विकालं वा त्रिकालं चार्चयस्व भोः ।
तुलसीदलसम्मिश्रं सिक्तंपादोदकेन च ॥ ४७ ॥
नैवेद्यान्नं सदा भुङ्क्ष्व शम्भुनारायणाग्रतः ।
कुरु त्वं वैश्वदेवाख्यं बलिमन्नविशुद्धये ॥ ४८ ॥

यतीश्वरान्ब्रह्मनिष्ठांस्तर्पयान्नैर्गृहागतान् । वृद्धानन्याननाथांश्चरोगिणोब्रह्मचारिणः कुरुत्वं मातृशुश्रूषामौपासनपरो भव । पञ्चाक्षरं महामन्त्रं प्रणवेन समन्वितम् ॥ तथैवाष्टाक्षरं मन्त्रमन्यमन्त्रानपि द्विज! । जप त्वंप्रयतोभूत्वाध्यायन्मन्त्राधिदेवताः एवमन्यांस्तथाधर्मान् स्मृत्युक्तान्सर्वदाकुरु । एवंकृतवतस्तेस्याद्देहान्तेमुक्तिरप्यलम् इत्युक्तो व्यासमुनिना दुर्विनीतःप्रणम्य तम् । तदुक्तमखिलंकृत्वादेहान्तेमुक्तिमाप्तवान् तन्मातापि मृताकाले धनुष्कोटिनिमज्जनात् । अवाप परमांमुक्तिमपुनर्भवदायिनीम्

दुर्वासा उवाच

एवं ते दुर्विनीतस्य तन्मातुश्च विमोक्षणम् । धनुष्कोट्यभिषेकेणयज्ञदेव मयेरितम् पुत्रमेनं त्वमप्याशु ब्रह्महत्याविशुद्धये । समादाय व्रजब्रह्मन्धनुष्कोटिं विमुक्तिदाम्

सिन्धुद्वीप उवाच

इति दुर्वाससा प्रोक्तो यज्ञदेवो निजं सुतम् ।
समादाय ययौ रामधनुष्कोटिं विमुक्तिदाम् ॥ ५७ ॥

गत्वानिवासमकरोत्षाण्मासं तत्र सद्विजः । पुत्रेण साकं नियतोहेश्टगालप्लवङ्गमौ

स सस्नौ च धनुष्कोटौ षण्मासं वै स पुत्रकम् ।
षाण्मासान्ते यज्ञदेवं प्राह वागशरीरिणी ॥ ५६ ॥

विमुक्ता यज्ञदेवास्यब्रह्महत्यासुतस्यते । स्वर्णस्तेयात्सुरापानात्किरातीसङ्गमात्तथा

अन्येभ्योऽपि हि पापेभ्यो विमुक्तोऽयं सुतस्तव ।

संशयं मा कुरुष्व त्वं यज्ञदेव! द्विजोत्तम !॥ ६१

इत्युक्त्वा विररामाऽथ सातुवागशरीरिणी । यदाशरीरिणीवाक्यंयज्ञदेवःसशुश्रुवान् सन्तुष्टःपुत्रसहितो रामनाथं निषेव्य च । धनुष्कोटिं नमस्कृत्य पुत्रेण सहितस्तदा स्वदेशं प्रययौ हृष्टः स्वग्रामं स्वगृहं तथा । सपुत्रदारःसुचिरं सुखमास्ते सुनिर्वृतः

सिन्धुद्वीप उवाच

गोमायुवानरावेवं युवयोः कथितं मया । यज्ञदेवसुतस्यास्य सुमतेःपरिमोक्षणम् पातकेभ्योमहद्भ्यश्चधनुष्कोटौ निमज्जनात् । युवामतोधनुष्कोटिं गच्छतःपापशुद्धये

नाऽन्यथा पापशुद्धिःस्यात्प्रायश्चित्तायुतैरपि ।

श्रीसूत उवाच

सिन्धुद्वीपस्य वचनमिति श्रुत्वा द्विजोत्तमाः ॥ ६७ ॥

शृगालवानरावाशु विलङ्घितमहापथौ । धनुष्कोटिं प्रयासेन गत्वा स्नात्वाच तज्जले विमुक्तौ सर्वपापेभ्यो विमानवरसंस्थितौ । देवैःकुसुमवर्षेण कीर्यमाणौ सुतेजसौ हारकेयूरमुकुटकटकादिविभूषितौ । देवस्त्रीधूयमानाभ्यां चामराभ्यां विराजितौ

गत्वा देवपुरीं रम्यामिन्द्रस्यार्द्धासनं गतौ ।

श्रीसूत उवाच

युष्माकमेवं कथितं शृगालस्य कपेरपि ॥ ७१ ॥

पापाद्विमोक्षणंविप्राधनुष्कोटौनिमज्जनात् । भक्त्यायइममध्यायंशृणोतिपठतेऽपिवा स्नानजंफलमाप्नोतिधनुष्कोटौसमानवः । योगिवृन्दैरसुलभांमुक्तिमप्याशुविन्दति

इतिश्रीस्कान्देमहापुराणएकाशीतिसाहस्र्यां संहितायां तृतीयेब्रह्मखण्डे सेतुमाहात्म्येधनुष्कोटिप्रशंसायांशृगालवानरविमोक्षणंनाम-

पञ्चत्रिंशोऽध्यायः ॥ ३५ ॥

षट्त्रिंशोऽध्यायः

धनुष्कोटिप्रशंसायांदुराचारसंसर्गदोषशान्तिवर्णनम्

श्रीसूत उवाच

धनुष्कोटेस्तु माहात्म्यं भूयोऽपि प्रब्रवीम्यहम् ।

दुराचाराभिधो यत्र स्नात्वा मुक्तोऽभवद् द्विजाः !॥ १ ॥

मुनय ऊचुः

दुराचाराभिधःकोऽसौसूत ! तत्त्वार्थकोविद !। किं च पापंकृतं तेन दुराचारेणवैमुने! कथंवापातकान्मुक्तो धनुष्कोटौनिमज्जनात् । एतच्छुश्रूषमाणानां विस्तराद्वदनोमुने

श्रीसूत उवाच

मुनयःश्रूयतां तस्य दुराचारस्य पातकम् । स्नानेन धनुषःकोटौ यथामुक्तश्चपातकात् दुराचाराभिधोविप्रो गौतमीतीरमाश्रितः । कश्चिदस्ति द्विजाः! पापीक्रूरकर्मरतःसदा ब्रह्मघ्नैश्चसुरापैश्च स्तेयिभिर्गुरुतल्पगैः । सदासंसर्गदुष्टोऽसौतैःसाकंन्यवसद्द्विजाः महापातकिसंसर्गदोषेणास्यद्विजस्य वै । ब्राह्मण्यं सकलं नष्टं निःशेषेण द्विजोत्तमाः महापातकिभिःसार्द्धं दिनमेकन्तुयोद्विजः । निवसेत्सादरंतस्य तत्क्षणाद्वैद्विजन्मनः ब्राह्मण्यस्यतुरीयांशो नश्यत्येव न संशयः । द्विदिनंसेवनात्स्पर्शाद्दर्शनाच्छयनात्तथा

भोजनात्सह पङ्क्तौ च महापातकिभिर्द्विजाः ।

द्वितीयभागो नश्येत ब्राह्मणस्य न संशयः ॥ १० ॥

त्रिदिनाच्चतृतीयांशो नश्यत्येव न संशयः । चतुर्दिनाच्चतुर्थांशो विलयंयातिहिध्रुवम् अतःपरन्तु तैःसाकं शयनासनभोजनैः । तत्तुल्यपातकी भूयान्महापातकसंभवात् तेनब्राह्मण्यहीनोऽयं दुराचाराभिधो द्विजाः । ग्रस्तोऽभवद्भीषणेन वेतालेन बलीयसा असौ परवशस्तेन वेतालेनाऽतिपीडितः । देशाद्देशंभ्रमन्विप्रा वनाच्चैव वनान्तरम् पूर्वपुण्यविपाकेन दैवयोगेन स द्विजः । रामचन्द्रधनुष्कोटिं महापातकनाशिनीम्

अनुद्रुतःपिशाचेन तेनाविष्टोययौद्विजाः । न्यमज्जयत्स वेतालो धनुष्कोटिजलेत्वमु
धनुष्कोटिजले सोऽयं वेतालेनप्रवेशितः । उदतिष्ठत्क्षणादेव वेतालेन विमोचित

उत्थितोऽसौ द्विजो विप्रा! धनुष्कोटिजलात्तदा ।
स्वस्थो व्यचिन्तयत्कोऽयं देशो जलधितीरतः ॥ १८ ॥
कथं मयाऽऽगतमिह गौतमीतीरवासिना ।
इतिचिन्ताकुलःसोऽयं धनुष्कोटिनिवासिनम् ॥ १६ ॥

दत्तात्रेयंमहात्मानं योगिप्रवरमुत्तमम् । समागम्य प्रणम्याऽसौ दुराचारोऽभ्यभाषत
न जाने भगवन्! देशः कतमोऽयं वदाधुना । गौतमीतीरनिलयोदुराचाराभिधोह्यहम्
कृपया ब्रूहि मे ब्रह्मन्मयात्र कथमागतम् । इति पृष्टो मुनिस्तेन दुराचारेण सुव्रतः॥
ध्यात्वा मुहूर्तमवदद्दुराचारं घृणानिधिः । महापातकिसंसर्गाद्दुराचारकृते पु

ब्राह्मण्यं नष्टमभवद्वेतालस्त्वां ततोऽग्रहीत् ।
तेनाविष्टस्त्वमायातो विवशोऽत्र विमूढधीः ॥ २४ ॥

न्यमज्जयत्त्वांवेतालो धनुष्कोटिजलेऽत्रतु । तत्र मज्जनमात्रेण विमुक्तःपातकाद्भवा
धनुष्कोटौतुयेस्नानं पुण्यंकुर्वन्तिमानवाः । तेषांनश्यन्ति वैसत्यं पञ्चपातकसञ्चया
रामचन्द्रधनुष्कोटावत्र मज्जनमात्रतः । महापातकिसंसर्गदोषस्ते विलयं ययौ॥

तन्नाशादेव वेतालस्त्वां मुक्त्वा विलयंगतः ।
त्वामग्रहीद्यो वेतालः पुराऽयं ब्राह्मणोऽभवत् ॥ २८ ॥

सोऽयम्भाद्रपदे मासे कृष्णपक्षे महालयम् । पार्वणेन विधानेनपितृणां नाकरोन्मुद
तेनस्वपितृभिःशप्तो वेतालत्वमगादयम् । सोऽपि चास्य धनुष्कोटेरवलोकनमात्रत
वेतालत्वं विहायेह विष्णुलोकमवाप्तवान् । अतो भाद्रपदे मासे कृष्णपक्षेमहालयम
उद्दिश्य स्वपितॄन्येतुनकुर्वन्त्यतिलोभतः । महालोभयुतास्तेद्धा वेतालाःस्युर्नसंशय
तस्माद्भाद्रपदे मासे कृष्णपक्षेमहालयम् । पितॄनुद्दिश्यशक्त्या ये ब्राह्मणान्वेदपारगा
भोजयेयुर्महान्नेन न तेविन्दन्ति दुर्गतिम् । यस्तु भाद्रपदे मासे कृष्णपक्षे महालयम
स्वशक्त्यानुगुणं विप्रमेकं द्वौत्रीनकिञ्चनः । भोजयेन्नहि दौर्गत्यं भवेत्तस्य कदाच

अयम्भाद्रपदेमासे पितृणामनुपासनात् । ययौ वेतालतांविप्रो यस्त्वांजग्राहपापिनम्
कालो भाद्रपदंमासमारभ्यवृश्चिकावधि । महालयस्यकथितो मुनिभिस्तत्त्वदर्शिभिः
मासोभाद्रपदःकालस्तत्रापिहिविशिष्यते । कृष्णपक्षोविशिष्टःस्याद्दुराचारक!तत्रवै
तस्मिञ्छुभेकृष्णपक्षे प्रथमायांतथातिथौ । श्राद्धंमहालयं कुर्याद्यो नरोभक्तिपूर्वकम्
तस्य प्रीणाति भगवान्पावकःसर्वपावनः । सवह्निलोकमाप्नोति वह्निना सह मोदते

तस्मै च ज्वलनो देवः सर्वैश्वर्यं ददात्यपि ।
प्रथमायां तिथौ मर्त्यो यो न कुर्यान्महालयम् ॥ ४१ ॥

वह्निर्गृहं दहेत्तस्य श्रियं क्षेत्रादिकं तथा । वेदविद्ब्राह्मणे भुक्ते प्रथमायां महालये

दशकल्पसहस्राणि पितरो यान्ति तृप्तताम् ।
द्वितीयायां तु यो भक्त्या कुर्याच्छ्राद्धम्महालयम् ॥ ४३ ॥

तस्य प्रीणाति भगवान्भवानीपतिरीश्वरः । स कैलासमवाप्नोति शिवेन सहमोदते

विपुलां सम्पदं तस्मै प्रीतो दद्यान्महेश्वरः ।
द्वितीयायां तिथौ मर्त्यो यो न कुर्यान्महालयम् ॥ ४५ ॥

तस्य वैकुपितःशम्भुर्नाशयेद्ब्रह्मवर्चसम् । रौरवं कालसूत्राख्यं नरकं चास्यदास्यति
वेदविद्ब्राह्मणेभुक्तेद्वितीयायांमहालये । विंशत्कल्पसहस्राणि पितरोयान्तितृप्तताम्

अनुग्रहात्पितृणां च सन्ततिश्चास्य वर्द्धते ।
तृतीयायां नरोभक्त्या कुर्याच्छ्राद्धम्महालयम् ॥ ४८ ॥

तस्यप्रीणाति भगवाँल्लोकपालो धनाधिपः । महापद्मादिनिधयो वर्तन्तेतस्यवैवशे
तस्यानुगास्त्रयोदेवाब्रह्मविष्णुमहेश्वराः । तृतीयायांतिथौमर्त्यो योनकुर्यान्महालयम्
धनदो भगवांस्तस्य सम्पदंहरतिक्षणात् । दारिद्र्यंचददात्यस्मैबहुदुःखसमाकुलम्

तृतीयायां तिथौ मर्त्यो यः करोति महालयम् ।
तृप्यन्ति पितरस्तस्य त्रिंशत्कल्पसहस्रकम् ॥ ५२ ॥
चतुर्थ्यान्तु नरो भक्त्या श्राद्धं कुर्यान्महालयम् ।
तस्य प्रीणाति भगवान्हेरम्बः पार्वतीसुतः ॥ ५३ ॥

तस्य विघ्नाश्च नश्यन्ति गजवक्त्रप्रसादतः ।
चतुर्थ्यान्तु तिथौमर्त्यो यो न कुर्यान्महालयम् ॥ ५४ ॥
विघ्नेशो भगवांस्तस्यसदाविघ्नंकरोतिहि । चण्डकोलाहलाभिख्ये नरकेचपतत्यथ
चतुर्थ्यांवैतिथौमर्त्यो यःकरोतिमहालयम् । पितरःकल्पसाहस्रंचत्वारिंशत्प्रहर्षिताः
बहून्पुत्रान्प्रदास्यन्ति श्राद्धकर्तुर्निरन्तरम् ।
पञ्चम्यां तु तिथौ भक्त्या यो न कुर्यान्महालयम् ॥ ५७ ॥
तस्यलक्ष्मीर्भगवती परित्यजतिमन्दिरम् । अलक्ष्मीः कलहाधारातस्यप्रादुर्भवेद्गृहे
पञ्चम्यांतु तिथौमर्त्योयःकरोतिमहालयम् । तस्यतृप्यन्तिपितरःपञ्चकल्पसहस्रके
सन्तति चाप्यविच्छिन्नामस्मै दास्यन्ति तर्पिताः ।
पार्वती च प्रसन्ना स्यान्महदैश्वर्यदायिनी ॥ ६० ॥
षष्ठ्यां तिथौ नरो भक्त्या श्राद्धं कुर्यान्महालयम् ।
तस्य प्रीणाति भगवान्षण्मुखः पार्वतीसुतः ॥ ६१ ॥
तस्यपुत्राश्चपौत्राश्च षण्मुखस्य प्रसादतः । ग्रहैर्बालग्रहैश्चैव न बाध्यन्ते कदाचन
षष्ठ्यां तिथौ नरो भक्त्या यो न कुर्यान्महालयम् ।
तस्य स्कन्दो महासेनो विमुखः स्यान्न संशयः ॥ ६३ ॥
गर्भान्निर्गतमात्रैव प्रजा तस्य विनश्यति । पूतनादि ग्रहकुलैर्बाध्यते च निरन्तरम्
वह्निज्वाला प्रवेशाख्ये नरके च पतत्यधः ।
षष्ठ्यां तिथौ यः श्रद्धावान्कुर्याच्छ्राद्धम्महालयम् ॥ ६५ ॥
षष्टिकल्पसहस्रन्तु पितरोयान्ति तृप्तताम् । पुत्रानपिप्रदास्यन्तिसम्पदं विपुलांतथा
सप्तम्यां तु तिथौ मर्त्यः श्राद्धं कुर्यान्महालयम् ।
हिरण्यपाणिर्भगवानादित्यस्तस्य तुष्यति ॥ ६७ ॥
अरोगो दृढगात्रःस्याद्भास्करस्य प्रसादतः ।
हिरण्यपाणिर्भगवान्हिरण्यं पाणिना स्वयम् ॥ ६८ ॥
महालयश्राद्धकर्त्रे ददाति प्रीतमानसः । सप्तम्यांतुतिथौ भक्त्यायोनकुर्यान्महालयम्

व्याधिभिः क्षयरोगाद्यैर्बाध्यते स दिवानिशम् ।
तीक्ष्णधारास्त्रशय्याख्ये नरके च पतत्यधः ॥ ७० ॥
सप्तम्यांयोनरोभक्त्याश्राद्धंकुर्यान्महालयम् । सप्ततिकल्पसाहस्रंप्रीणन्तिपितरोस्यवै
सन्तति चाप्यविच्छिन्नां दद्युः पितृगणाःसदा ।
अष्टम्यां तु तिथौ मर्त्यः श्राद्धं कुर्यान्महालयम् ॥ ७२ ॥
मृत्युञ्जयः कृत्तिवासास्तस्यप्रीणातिशङ्करः । करस्थं तस्यकैवल्यंशङ्करस्यप्रसादतः
महालयेन श्राद्धेन तुष्टे साक्षात्त्रियम्बके । चतुर्दशसुलोकेषु दुर्लभं तस्य किम्भवेत्
महालयं न कुर्याद्वै योऽष्टम्यांमूढचेतनः । संसारसागरेघोरे सदा मज्जति दुःखितः
कदाचिदपितस्येष्टं नैवसिद्ध्यति भूतले । वैतरिण्याख्यनरके पतत्याचन्द्रतारकम्
योऽष्टम्यांश्रद्धयाश्राद्धंनरःकुर्यान्महालयम् । अशीतिकल्पसाहस्रंतृप्यन्तिपितरोस्यवै
आशीर्भिर्वर्द्धयन्त्येनं विघ्नश्चास्य व्यपोहति ।
सन्तति चाप्यविच्छिन्नां दद्युःपितृगणाः सदा ॥ ७८ ॥
नवम्यांतुतिथौमर्त्यःश्राद्धंकुर्यान्महालयम् । दुर्गादेवीभगवतीतस्यप्रीणातिशाम्भवी
क्षयापस्मारकुष्ठादीन्क्षुद्रप्रेतपिशाचकान् । नाशयेत्तस्य सन्तुष्टा दुर्गामहिषमर्दिनी
नवम्यां तु तिथौमर्त्यो योनकुर्यान्महालयम् । अपस्मारेणपीड्येत तथैवब्रह्मरक्षसा
अभिचारार्थकृत्याभिर्बाध्येत च निरन्तरम् ।
नवम्यां यस्तिथौमर्त्यः श्राद्धं कुर्यान्महालयम् ॥ ८२ ॥
नवतिकल्पसाहस्रंतृप्यन्तिपितरोस्यवै । सन्ततिंचाप्यविच्छिन्नांदद्युःपितृगणाःसदा
दशम्यान्तुतिथौमर्त्यःश्राद्धंकुर्यान्महालयम् । तस्यामृतकलश्चन्द्रःषोडशात्माप्रसीदति
औषधीनामधीशे ऽस्मिञ्छ्राद्धेनाऽनेन तोषिते ।
व्रीह्यादीनि तु धान्यानि दद्युरोषधयः सदा ॥ ८५ ॥
यो न कुर्याद्दशम्यां तु महालयमनुत्तमम् ।
औषध्यो निष्फलास्तस्य कृषिश्चाप्यस्य निष्फला ॥ ८६ ॥
दशम्यांयस्तिथौमर्त्यःश्राद्धंकुर्यान्महालयम् । शतकल्पसहस्राणितृप्यन्तिपितरोस्यवै

सन्ततिं चाप्यविच्छिन्नां दद्युः पितृगणाः सदा ।
एकादश्यां नरो भक्त्या श्राद्धं कुर्यान्महालयम् ॥ ८८ ॥
संहर्ता सर्वलोकस्य तस्यरुद्रः प्रसीदति । रुद्रस्य सर्वसंहर्तुः प्रसादेन जगत्पतेः
शत्रून्पराजयत्येष श्राद्धकर्तानिरन्तरम् । ब्रह्महत्यायुतंचापि तस्य नश्यतितत्क्षणात्
अग्निष्टोमादियज्ञानां फलमाप्नोति पुष्कलम् ।
एकादश्यां नरो भक्त्या यो न कुर्यान्महालयम ॥ ९१ ॥
तस्यवै विमुखोरुद्रोनप्रसीदतिकर्हिचित् । सर्वतो वर्धमानाश्च बाधन्ते शत्रवोह्यमुम्
अग्निष्टोमादिका यज्ञाः कृताश्च बहुदक्षिणाः ।
निष्फला एव तस्य स्युर्भस्मनि न्यस्तहव्यवत् ॥ ९३ ॥
ब्रह्मघातकतुल्यः स्याच्छ्राद्धाकरणदोषतः ।
एकादश्यां तिथौ यस्तु श्राद्धं कुर्यान्महालयम् ॥ ९४ ॥
द्विशतंकल्पसाहस्रंतृप्यन्तिपितरोऽस्यवै । सन्ततिंचाप्यविच्छिन्नांदद्युःपितृगणाःसदा
द्वादश्यां तु तिथौ मर्त्यः कुर्याच्छ्राद्धं महालमम् ।
तस्य लक्ष्मीपतिः साक्षात्प्रसीदति जनार्दनः ॥ ९६ ॥
प्रसन्ने सति देवेशे देवदेवे जनार्दने । चराचरंजगत्सर्वं प्रीतमेव न संशयः ॥
भूमिर्हरिप्रिया चास्यसस्यं संवर्द्धयत्यपि । लक्ष्मीश्चवर्द्धतेतस्यमन्दिरेहरिवल्लभा
गदाकौमोदकीनाम नारायणकरस्थिता । अपस्मारादिभूतानि नाशयत्येव सर्वदा
तीक्ष्णधारं तथाचक्रंशत्रूनस्यदहत्यपि । यातुधानपिशाचादींश्छत्रूंश्चास्यव्यपोहति
एवं सर्वात्मना पीडां वारयत्यस्य केशवः । महालयं न कुर्याद्यो द्वादश्यांमनुजाधमः
तस्यक्षेत्राणि सम्पच्च विनश्यन्तिनसंशयः । अपस्मारादिभूतानि शत्रवश्चमहाबलाः
यातुधानाश्च बाधन्ते तंवै विष्णुपराङ्मुखम् । पात्यते नरकेचापि अस्थिभेदननामके
द्वादश्यां भक्तियुक्तो यः श्राद्धं कुर्यान्महालयम् ।
षट्शतं कल्पसाहस्रं प्रीणन्ति पितरोऽस्य वै ॥ १०४ ॥
सन्ततिं चाप्यविच्छिन्नां पितरोऽस्मै ददत्यपि ।

त्रयोदश्यां नरो भक्त्या श्राद्धं कुर्यान्महालयम् ॥ १०५ ॥
प्रसीदत्यस्य भगवान्कन्दर्पो रतिनायकः । स्रक्चन्दनाद्योभोगा ललनाश्चमनोरमाः
कामदेवप्रसादेन तस्यसिद्ध्यन्तिसर्वदा । आजन्म मरणान्तंच सुखमेव सविन्दते
यो न कुर्यात्त्रयोदश्यां भक्त्या श्राद्धम्महालयम् ।
कामदेवोऽस्य विमुखः स्त्रियो भोगांश्च नाशयेत् ॥ १०८ ॥
अङ्गारशय्याभ्रमणे नरके पातयत्यमुम् । पितृनुद्दिश्ययः कुर्यात्त्रयोदश्यां महालयम्
सहस्रकल्पसाहस्रं प्रीणन्ति पितरोऽस्य वै ।
सन्ततिं चाप्यविच्छिन्नां दद्युः पितृगणास्तदा ॥ ११० ॥
चतुर्दश्यांनरोभक्त्याश्राद्धंकुर्यान्महालयम् । तस्याभीष्टप्रदानायजागर्तिभगवाञ्छिवः
उपदिश्य शिवज्ञानं सायुज्यं च ददात्यपि । सुरापानायुतंचापिस्वर्णस्तेयायुतंतथा
नश्यन्ति तत्क्षणादेव चतुर्दश्यांमहालयात् । चण्डालवृषलस्त्रीणांसङ्गदोषोपिनश्यति
अश्वमेधसहस्रस्यपौण्डरीकायुतस्यच । पुष्कलाफलसिद्धिःस्याच्चतुर्दश्यांमहालयात्
यो न कुर्याच्चतुर्दश्यां श्राद्धमेतन्महालयम् । सकल्पकोटिसाहस्रंकल्पकोटिशतन्तथा
संसारान्धमहाकूपे पतितःस्यादनिष्कृतिः । अचोरयित्वाकनकमपीत्वाऽपिसुरांतथा
सुरापानादिभिर्दोषैर्लिप्यते स विमूढधीः ।
कृता अपि विधानेन यज्ञास्स्युर्निष्फलास्तथा ॥ ११७ ॥
चतुर्दश्यांतिथौयस्तुकुर्याच्छ्राद्धंमहालयम् । लक्षकोटिसहस्राणिलक्षकोटिशतानिच
कल्पानि पितरस्तस्य तृप्यन्त्येवनसंशयः । नरकस्थाश्चपितरःस्वर्गंयान्तिप्रहर्षिताः
सन्ततिं चाप्यविच्छिन्नां दद्युःपितृगणास्सदा ।
अमायान्तु नरो भक्त्या श्राद्धंकुर्यान्महालयम् ॥ १२० ॥
पितृणांतस्य तृप्तिःस्यादनन्तानात्रशंशयः । सुधामास्वाद्ययातृप्तिर्देवानां दिविवैभवेत्
अनन्ता तादृशीतृप्तिरमावास्यां महालयात् । अमावास्यामहापुण्यापितृदेवनमस्कृता
शान्ता ह्येषा तु परमा शिवस्यचमहाप्रिया । तस्यांमहालयेश्राद्धेभोजयेद्वेदवित्तमान्
तेन तृप्तिःपितृणां स्यादनन्ता तुष्यते शिवः । ब्रह्महत्यादयःपञ्चपातकानाशमाप्नुयुः

कृताश्चस्युर्विधानेनसर्वेयज्ञाःसदक्षिणाः । अनुष्ठितास्स्युर्विधिवत्सर्वेधर्माःसनातनाः
अमावास्यादिने येन कृतंश्राद्धंमहालयम् । प्रत्यग्ब्रह्मैकतांज्ञात्वासायुज्यंयात्यसंशयम्
यो न कुर्यादमावास्यां महालयमचेतनः । ब्रह्मलोकगताश्चास्यपितरोयान्तिनारकम्

सन्ततिश्चास्य मूढस्य विच्छिद्येतैव तत्क्षणात् ।
स एव हि महाऽनर्थो (महानर्थो) यदमायान्तिथौ नरैः ॥ १२८ ॥

महालयार्थेविप्रेन्द्राविधिवच्चैव(नैव)भोजिताः । मासिभाद्रपदेप्राप्तेनृत्यन्तिपितृदेवताः
अस्मानुद्दिश्य मत्पुत्रा भोजयेयुर्द्विजोत्तमान् । तेननोनरकक्लेशोनभविष्यतिदारुणः
वासश्चस्वर्गलोकेस्याद्यावदाचन्द्रतारकम् । मासि भाद्रपदेप्राप्ते पितृणांतृप्तिदायिनि
एकैकं भोजयेद्विप्रं प्रत्यहं भक्तिपूर्वकम् । पितृमातृकुलोद्भूताः पितरस्तृप्तिमाप्नुयुः
कृष्णपक्षेविशेषेण ब्राह्मणान्भोजयेत्सुधीः । घृतसूपादिसस्यैश्च तैलाभ्यङ्गपुरःसरम्
सुधां पास्यन्तिपितरस्तस्याकल्पं प्रहर्षिताः । सप्तमीकृष्णपक्षस्य प्रारभ्यप्रत्यहंनरः

विप्रान्यावदमावास्या त्रींस्त्रीनभ्यर्च्य भोजयेत् ।
आरभ्य द्वादशीं विप्रांस्त्रींनवश्यन्तु भोजयेत् ॥ १३५ ॥
अन्यथैश्वर्यहानिः स्यान्महादारिद्र्यभाग्भवेत् ।
वित्तलोभं परित्यज्य विप्रान्सूपघृतादिभिः ॥ १३६ ॥

पयसा पयसान्नेन दध्नाऽपूपादिभिस्तथा । पेयैर्लेह्यैश्चचोष्यैश्च भक्ष्यैश्चविविधैरपि

भोजयेद्वेदविन्मुख्यांस्तृप्तिस्तेषां यथा भवेत् ।
तेन ब्रह्मा हरिः शम्भुस्तृप्तास्स्युर्नात्र संशयः ॥ १३८ ॥

अग्निष्वात्तादि पितरस्तथैवेन्द्राधिदेवताः । बहुनाऽत्रकिमुक्तेन तुष्टन्तेन जगत्त्रयम्
पार्वणेन विधानेन कुर्याच्छ्राद्धेमहालयम् । नरो महालयश्राद्धे पितृवंश्यान्पितॄनिव
मातृवंश्यानपि पितॄन्भोजयेच्छ्रेयसेमुदा । दक्षिणां च यथाशक्तिदद्याद्वित्तानुसारतः
तस्मिमहालयेश्राद्धेवित्तशाठ्यं न कारयेत् । दक्षिणा खलुयज्ञानांकथितेयंपुरोगवा
अनः पुरोगवैर्हीनं नरिष्यतियथाध्वनि । अदक्षिणंतथासोयं पितृयज्ञोऽपिरिष्यति
तस्माद्यज्ञेषु दातव्या दक्षिणाल्पा हि जानता । विधवाभिरपिस्त्रीभिरपुत्राभिर्महालयः

भर्तॄनुद्दिश्य कर्तव्यो भूरिभोजनकर्मणा । अन्यथा धर्महानिः स्यान्नरकं च महद्भवेत्
मासिभाद्रपदेप्राप्ते योनकुर्यान्महालयम् । तत्कुलंनाशमाप्नोति ब्रह्महत्याञ्च विन्दति
महालयं प्रकुर्वन्ति श्रद्धावन्तः पितॄन्प्रति । न तेषां सन्ततिच्छेदो भवेत्सम्पदभङ्गुरा
आलयं ह्यास्पदं प्रोक्तं महःकल्याणमुच्यते । कल्याणानामास्पदत्वान्महालयमुदीर्यते
तस्मान्महालयं मर्त्यःकुर्यात्कल्याणसिद्धये । अमङ्गलं भवेत्तस्यनकुर्याच्चेन्महालयम्
न कुर्याद्यद्यपि श्राद्धंमातापित्रोर्मृतेऽहनि । कुर्यान्महालयश्राद्धमस्मरन्नेवबुद्धिमान्
कर्तुं महालयश्राद्धं यदिशक्तिर्न विद्यते । याचित्वापिनरः कुर्यात्पितॄणांतन्महालयम्
ब्राह्मणेभ्यो विशिष्टेभ्यो याचेतधनधान्यकम् । पतितेभ्योनगृह्णीयाद्धनधान्यंकदाचन
ब्राह्मणेभ्यो न लभ्येतयदि धान्यधनादिकम् । याचेतक्षत्रियश्रेष्ठान्महालयचिकीर्षया
दातारश्चेन्न भूपाला वैश्येभ्योपिचयाचयेत् । वैश्याअपिहिदातारोयदिलोकेनसन्तिवै
दद्याद्भाद्रपदे मासे गोग्रासं पितृतृप्तये । अथवा रोदनं कुर्याद्बहिर्निर्गत्य कानने
पाणिभ्यामुदरं स्वीयमोहत्याश्रूणि वर्तयन् । तेष्वरण्यप्रदेशेषु उच्चैरेवं वदेन्नरः
शृण्वन्तु पितरःसर्वे मत्कुलीनावचोमम । अहं दरिद्रः कृपणो निर्लज्जः क्रूरकर्मकृत्
प्राप्तो भाद्रपदोमासः पितॄणांप्रीतिवर्द्धनः । कर्त्तुं महालयश्राद्धं नचमेशक्तिरस्तिवै
भ्रमित्वापिमहींकृत्स्नांनमेकिञ्चनलभ्यते । अतोमहालयंश्राद्धंनयुष्माकंकरोम्यहम्
क्षमध्वं मम तद्यूयं भवन्तो हि दयापराः। दरिद्रो रोदनं कुर्यादेवं काननभूमिषु
तस्यरोदनमाकर्ण्य पितरस्तत्कुलोद्भवाः । हृष्टास्तृप्तिं प्रयान्त्येव सुधांपीत्वैवनिर्जराः
महालयार्थे विप्रौघे भुक्ते तृप्तिर्यथाभवेत् । गोग्रासारण्यरुदितैः पितृतृप्तिस्तथाभवेत्
मासिभाद्रपदेविघ्नो यदिस्यात्सूतकादिना । यातेषु सूतकाहस्सुकुर्यादावृश्चिकावधि
बुधो महालयस्यार्थे ब्राह्मणान्वृणुयान्नव । पित्रर्थमेकं वृणुयात्पितामहकृते तथा
प्रपितामहमुद्दिश्य तथैकं वृणुयाद्द्विजम् । तथामातामहार्थन्तु एकंवैवृणुयाद्द्विजम्
मातुः पितामहार्थञ्च वृणुयाद्द्विजमेककम् । वृणुयादेकमुद्दिश्यमातुश्च प्रपितामहम्
तथैव विश्वेदेवार्थे वृणुयाद्द्वौ द्विजोत्तमौ । विष्ण्वर्थंब्राह्मणंत्वेकं वृणुयाद्वेदवित्तमम्
एवं महालयश्राद्धे ब्राह्मणान्वृणुयान्नव । अथवा पितृवर्गार्थं वरयेद्विप्रमेककम्

मातामहादीन्वोद्दिश्य वरयेद्विप्रमेककम् । विश्वेदेवार्थमेकञ्च विष्णवर्थञ्चतथापरम्
एवंवैवरयेद्विप्रांश्चचतुरस्तु महालये । ब्राह्माणन्वेदसम्पन्नान्सुशीलान्वरयेत्सुधीः
दुःशीलान्वरयेद्यस्तु सवैश्राद्धस्यघातकः । मासि भाद्रपदेप्राप्ते कृष्णपक्षेविशेषतः
कुर्यान्महालयश्राद्धं यो नरः श्रद्धयासह । सस्नातःसर्वतीर्थेषु दुराचार ! महामते!
अग्निष्टोमादयो यज्ञाः शतमप्यमुनाकृताः । तुलापुरुषमुख्यानि दानान्यपि कृतानि वै
चान्द्रायणादिकृच्छ्राणि कृतान्येव न संशयः । चतुर्णांसाङ्गवेदानांपारायणफलंलभेत्
गायत्र्यादिमहामन्त्रजपपुण्यंलभेत्तथा । इतिहासपुराणानां पारायणफलंलभेत्
महालयसमं पुण्यं वृत्त नास्ति महीतले । ब्रह्मविष्णुमहेशानलोकप्राप्तिर्महालयात्
महालयादिकंश्राद्धं नित्यं काम्यमर्पीष्यते । तस्मादकरणेतस्य प्रत्यवायो महान्भवेत्
करणादिष्टसिद्धिश्च भविष्यति न संशयः । महालयस्य करणाद्भूतवेतालकादयः

अपस्मारग्रहाश्चापि शाकिनीडाकिनीगणाः ।
यातुधानाः पिशाचाश्च वेतालाश्च भयानकाः ॥ १७६ ॥

नश्यन्ति तत्क्षणादेव भूतान्यन्यानि वै तथा । महालयस्य करणाद्विपुलांश्रियमश्नुते
पुरा दशरथो राजा वसिष्ठस्योपदेशतः । मासिभाद्रपदे प्राप्ते कृत्वा श्राद्धं महालयम्

रामादींश्चतुरः पुत्रान्प्राप्तवाँल्लोकसम्मतान् ।
विश्वातिशायिनीं लक्ष्मीं प्रपेदे कीर्तिमुत्तमाम् ॥ १८२ ॥

महालयस्य करणाद्ययातीराजसत्तमः । यदुमुख्यान्महापुत्रान्प्रपेदे वंशवर्द्धनान्
अनन्यदुर्लभं स्वर्गं प्रपेदे श्राद्धपुण्यतः । दुष्यन्तो भरतं लेभे महालयविधानतः
महालयविधानेन दमयन्ती पतिर्नलः । कृच्छ्रं महत्तरं तीर्त्वा पुनर्लेभेमहीमिमाम्
निजग्राहकलिंघोरंपुष्करंचाप्यरातिनम् । इन्द्रसेनाभिधानञ्च पुत्रं लेभेऽतिधार्मिकम्
हरिश्चन्द्रोमहाराजो महालयविधानतः । विश्वामित्रकृताद्दुःखान्मुक्तःसत्यवतांवरः
लेभे चन्द्रवतीं भार्यां लो(रो)हिताश्वंसुतं पुनः । महालयविधानेनकृतवीर्यसुतोबली
अष्टादशानां द्वीपानामाधिपत्यमवाप्तवान् । रामोऽपि दण्डकारण्ये महालयविधानतः
हत्वा तु रावणं संख्ये सीतां पुनरवाप्तवान् । महालयस्य करणाद्धर्मपुत्रो युधिष्ठिरः

दुःखसागरमुत्तीर्य धार्तराष्ट्राञ्जघान च । महालयस्य करणाद्वसिष्ठो मुनिसत्तमः
अत्रिर्भृगुश्चकुत्सश्चगौतमश्चाङ्गिरास्तथा । काश्यपश्चभरद्वाजोविश्वामित्रश्चकुम्भजः
पराशरो मृकण्डश्च ये चान्ये मुनिसत्तमाः । विधाय विधिवच्छ्राद्धं महालयमनुत्तमम्

अणिमाद्यष्टसिद्धीनांव्रतानां तपसां तथा ।
निवासभूताःसञ्जातास्तथा विश्वातिशायिनः ॥ १६४ ॥

जीवन्मुक्ताश्च तेसर्वे ह्यभवन्मुनिसत्तमाः । अतो महालयश्राद्धं कर्तव्यं भूतिमिच्छता
अतोऽद्यापिदुराचार! नकुर्याद्योमहालयम् । भूतवेतालकादिभ्यो भूयात्तस्य महद्भयम्
महालयस्याकरणाद्वेतालत्वमवाप्नुयात् । त्वयाऽऽविष्टमिदं भूतंविप्रःसन्पूर्वजन्मनि

नाम्ना वेदनिधिःपुण्यो भरद्वाजस्य चात्मजः ।
कुशस्थलयभिधाने च वसन्ग्रामे महामनाः ॥ १६८ ॥

न चकार विधानेनश्राद्धमेतन्महालयम् । ततोऽयं पितृणां शापाद्वेतालत्वमवाप्तवान्
तस्माद्भाद्रपदे मासे दुराचार! पितृन्प्रति । ब्राह्मणान्भोजयान्नेन षड्रसेन सभक्तिकम्
दारिद्र्यं तेन तेनस्यात्सुखी चैवभवान्भवेत् । महापातकिसंसर्गं माकुरुत्वमितःपरम्

त्वयाऽनुभूतं यद्दुःखं वेतालग्रहणोद्भवम् ।
गच्छत्वमनुजानामि स्वदेशं प्रति मा चिरम् ॥ २०२ ॥

इतीरितःस मुनिना दत्तात्रेयेण योगिना । तं प्रणम्य ययौ देशं कृतार्थेनान्तरात्मना
गत्वाचस्वगृहंविप्रो दुराचारोद्विजोत्तमाः । विमुक्तवेतालभयो गतपातककञ्चुकः
दत्तात्रेयेरितेनासौ मार्गेण प्रीतमानसः । त्यक्तपातकिसंसर्गः स्वाश्रमाचारतत्परः ॥
रामचन्द्रधनुष्कोटितीर्थमज्जनगौरवात् । देहान्ते परमां मुक्तिं दुराचारो ययौ तदा

श्रीसूत उवाच

एवं वःकथितं पुण्यं दुराचारविमोक्षणम् ।
सेयं पुण्या धनुष्कोटिर्महापातकनाशिनी ॥ २०७ ॥

यत्र हिस्नानमात्रेण दुराचारो विमोचितः । अथवा धनुषःकोटेरियत्ता किंहिवैभवेत्

या निष्कृतिविहीनानि पापान्यपि विनाशयेत् ।

प्रायश्चित्तविहीनानि यानि पापानि सन्ति वै ॥ २०९ ॥
तान्यप्यत्र विनश्यन्ति धनुष्कोटौ निमज्जनात् ।
शूद्रेण पूजितं लिङ्गं विष्णुं वा यो नमेद्द्विजः ॥ २१० ॥
प्रायश्चित्तं न तस्योक्तं स्मृतिभिः परमर्षिभिः ।
नश्येत्तस्यापि तत्पापं धनुष्कोटिनिमज्जनात् ॥ २११ ॥

विप्रनिन्दाकृतां नृणां प्रायश्चित्तंनविद्यते । विश्वासघातकानाञ्च कृतघ्नानांननिष्कृतिः भ्रातृभार्यारतानाञ्च प्रायश्चित्तंनविद्यते । शूद्रान्नेनियतानाञ्च श्रुतिनिन्दारतात्मनाम् कन्याविक्रयिणांविप्राहयविक्रयिणां तथा । देवविक्रयिणांवेदविक्रयेनिरतात्मनाम् धर्मविक्रयिणांपुंसांवृत्तविक्रयिणान्तथा । तीर्थविक्रयिणांपुंसांप्रायश्चित्तंनविद्यते तेषां पापानिनश्यन्तिधनुष्कोटौनिमज्जनात् । मातृद्रोहपितृद्रोहयतिद्रोहरतात्मनाम्

गुरुनिन्दापराणाञ्च शिवनिन्दारतात्मनाम् ।
विष्णुनिन्दापराणाञ्च यतिनिन्दारतात्मनाम् ॥ २१७ ॥

सत्कथादूषकाणाञ्चप्रायश्चित्तंनविद्यते । तेषांचात्रधनुष्कोटौस्नानाच्छुद्धिर्भविष्यति एवंवःकथितंविप्रा धनुष्कोटेस्तुवैभवम् । यच्छ्रुत्वा सर्वपापेभ्यो मुच्यतेमानवोभुवि

श्रीस्कान्देमहापुराण एकाशीतिसाहस्र्यां संहितायां तृतीयेब्रह्मखण्डे
सेतुमाहात्म्येधनुष्कोटिप्रशंसायांदुराचारसंसर्गदोषशान्तिर्नाम-
षट्त्रिंशोऽध्यायः ॥ ३६ ॥

———

सप्तत्रिंशोऽध्यायः

क्षीरकुण्डप्रशंसायांक्षीरकुण्डस्वरूपकथनम्

श्रीसूत उवाच

भोभोस्तपोधनाःसर्वे नैमिषारण्यवासिनः । यावद्रामधनुष्कोटिचक्रतीर्थमुखानिवः चतुर्विंशतियीर्थानि कथितानि मयाऽधुना । इतोन्यदद्भुतं यूयं किंभूयःश्रोतुमिच्छथ

मुनय ऊचुः

क्षीरकुण्डस्यमाहात्म्यं श्रोतुमिच्छामहेमुने !। यत्समीपेत्वयाचक्रतीर्थमित्युदितंपुरा क्षीरकुण्डश्चतत्कुत्रकीदृशंतस्यवैभवम् । क्षीरकुण्डमितिख्यातिःकथंवास्यसमागता

एतन्नःश्रद्दधानानां विस्तराद्वक्तुमर्हसि ।

श्रीसूत उवाच

ब्रवीमि मुनयः! सर्वे शृणुध्वं सुसमाहिताः ॥ ५ ॥

देवीपुरान्महापुण्यात्प्रतीच्यांदिशयदूरतः । फुल्लग्राममितिख्यातंस्थानमस्तिमहत्तरम् यत आरभ्य रामेण सेतुबन्धो महार्णवे । तद्धि पुण्यतमं क्षेत्रं फुल्लग्रामाभिधं पुरम्

क्षीरकुण्डन्तु तत्रैव महापातकनाशनम् ।
दर्शनात्स्पर्शनाद्ध्यानात्कीर्तनाच्चापि मोक्षदम् ॥ ८ ॥

तस्यतीर्थस्यपुण्यस्य क्षीरकुण्डमितिप्रथाम् । भवतांसादरं वक्ष्येशृणुध्वंश्रद्धयासह पुरा हि मुद्गलोनाम मुनिर्वेदोक्तमार्गकृत् । दक्षिणाम्बुनिधेस्तीरे फुल्लग्रामेऽतिपावने नरायणप्रीतिकरममरोद्यज्ञमुत्तमम् । तस्य विष्णुःप्रसन्नात्मा यागेन परितोषितः प्रादुर्बभूवपुरतोयज्ञवाटे द्विजोत्तमाः । तं दृष्ट्वामुद्गलो विष्णुं लक्ष्मीशोभितविग्रहम् कालमेघतनुंकान्त्यापीताम्बरविराजितम् । विनतानन्दनारूढं कौस्तुभालंकृतोरसम् शङ्खचक्रगदापद्मराजद्बाहुचतुष्टयम् । भक्त्या परवशो दृष्ट्वा पुलकाङ्कुरमण्डितः ॥

मुद्गलःपरितुष्टाव शब्दैः श्रोत्रसुखावहैः ।

मुद्गल उवाच

प्रथमं जगतःस्रष्ट्रे पालकाय ततःपरम् ॥ १९ ॥

संहर्त्रे च ततःपश्चान्नमो नारायणाय ते । नमःशफररूपाय कमठाय चिदात्मने
नमो वराहवपुषे नमःपञ्चास्यरूपिने । वामनाय नमस्तुभ्यं जमदग्निसुताय ते
राघवायनमस्तुभ्यंबलभद्राय ते नमः । कृष्णाय कल्कये तुभ्यं नमो विज्ञानरूपिणे
रक्ष मां करुणासिन्धो! नारायणजगत्पते !। निर्लज्जंकृपणंक्रूरंपिशुनंदाम्भिकंकृशम्
परदारपरद्रव्यपरक्षेत्रैकलोलुपम् । असूयाविष्टमनसं मां रक्ष कृपया हरे !॥ २० ॥
इति स्तुतो हरिःसाक्षान्मुद्गलेन द्विजोत्तमाः । तमाह मुद्गलमुनिं मेघगम्भीरया गिरा

श्रीहरिरुवाच

प्रीतोऽस्म्यनेन स्तोत्रेण मुद्गल! क्रतुनाचते । प्रत्यक्षेणहविर्भोक्तुमहन्ते क्रतुमागतः
इत्युक्तो हरिणा तत्र मुद्गलस्तुष्टमानसः । उवाचाधोक्षजं विप्रो भक्त्या परमयायुतः

मुद्गल उवाच

कृतार्थोऽस्मि हृषीकेश! पत्नी मे धन्यतांययौ । अद्यमेसफलं जन्म ह्यद्यमेसफलं तपः
अद्य मे सफलो वंशो ह्यद्य मे सफलास्सुताः । आश्रमःसफलोऽद्यैव सर्वंसफलमद्य मे
यद्भवान्यज्ञवाटम्मे हविर्भोक्तुमिहागतः । योगिनो योगनिरता हृदये मृगयन्ति यम्

तमद्य साक्षात्त्वां पश्ये सफलोऽयं मम क्रतुः ।

इतीरयित्वा तं विष्णुमर्चयित्वाऽऽसनादिभिः ॥ २७ ॥

चन्दनैःकुसुमैरन्यैर्दत्त्वाचार्घ्यंसविष्णवे । प्रददौविष्णवे प्रीत्या पुरोडाशादिकंहविः
स्वयमेव समादाय पाणिना लोकभावनः । हविस्तद्बुभुजे विष्णुर्मुद्गलेन समर्पितम्
तस्मिन्हविषिभुक्तेतुविष्णुनाप्रभविष्णुना। साग्नयस्त्रिदशाःसर्वेतृप्ताःसमभवन्द्विजाः

ऋत्विजो यजमानश्च तत्रत्या ब्राह्मणास्तथा ।

यत्किञ्चित्प्राणिलोकेऽस्मिंश्चरं वा यदि वाऽचरम् ॥ ३१ ॥

सर्वमेव जगत्तृप्तं भुक्ते हविषि विष्णुना । ततो हरिःप्रसन्नात्मा मुद्गलं प्रत्यभाषत
प्रीतोऽहं वरदोऽस्म्येष वरं वरय सुव्रत !। इत्युक्ते केशवेनाऽथ महर्षिस्तमभाषत

यत्त्वयामेहविर्भुक्तं यागे प्रत्यक्षरूपिणा । अनेनैवकृतार्थोऽस्मि किमस्मादधिकंवरम्
तथापि भगवन्विष्णो! त्वयिमेनिश्चलासदा । भक्तिर्निष्कपटा भूयादिदं मेप्रथमंवरम्
माधवाहं प्रतिदिनं सायं प्रातरिहाग्नये । त्वद्रूपाय नवप्रीत्यै सुरभेःपयसा हरे!
होतुमिच्छामिवरद! तन्मेदेहिवरान्तरम् । पयसानित्यहोमोहि द्विकालंश्रुतिचोदितः
न मे सुरभयःसन्ति तापसस्याधनस्य च । इत्युक्ते मुद्गलेनाथदेवो नारायणो हरिः
आहूयविश्वकर्माणं त्वष्टारममृताशिनम् । एकंसरःकारयित्वा शिल्पिना तेनशोभनम्

स्फटिकादिशिलाभेदैस्तेनासौ विश्वकर्मणा ।

समीचकार च पुनस्तत्प्राकाराद्यलंकृतम् ॥ ४० ॥

तत आहूय भगवान्सुरभिं वाक्यमब्रवीत् ।

श्रीहरिरुवाच

मुद्गलो मम भक्तोऽयं सुरभे! प्रत्यहं मुदा ॥ ४१ ॥

मत्प्रीत्यर्थं पयोहोमं कर्तुमिच्छति साम्प्रतम् ।

मत्प्रीत्यर्थमितो देवि त्वमतो मत्प्रचोदिता ॥ ४२ ॥

सायंप्रातरिहागत्य प्रत्यहं सुरभे शुभे । पयसा त्वत्प्रसूतेन सर एतत्प्रपूरय ॥ ४३ ॥
तेनासौपयसानित्यं सायंप्रातश्चहोष्यति । ओमित्युक्त्वाथ सुरभिरेवंनारायणेरिता
अथ नारायणो देवो मुद्गलं प्रत्यभाषत । सुरभेःपयसा नित्यमस्मिन्सरसितिष्ठता
सायंप्रातःप्रतिदिनं मत्प्रीत्यर्थमिहाग्नये । जुहुधित्वं महाभाग! तेनप्रीणाम्यहन्तव
मत्प्रीत्या तेखिलासिद्धिर्भविष्यतिचमुद्गल! । इदंक्षीरसरोनाम तीर्थंख्यातंभविष्यति

अस्मिन्क्षीरसरस्तीर्थे स्नातानां पञ्चपातकम् ।

अन्यान्यपि च पापनि नाशं यास्यन्ति तत्क्षणात् ॥ ४८ ॥

मुद्गल! त्वञ्च मां याहि देहान्ते मुक्तबन्धनः ।

इत्युक्त्वा भगवान्विष्णुस्तं समालिङ्ग्य मुद्गलम् ॥ ४६ ॥

नमस्कृतश्च तेनायं तत्रैवान्तरधीयत । मुद्गलोऽपिगते विष्णावनेकशतवत्सरम् ॥
सुरभेःपयसा जुह्वन्नग्नये हरितुष्टये । उवास प्रयतो नित्यं फुल्लग्रामे विमुक्तिदे

देहान्ते मुक्तिमगमद्विष्णुसायुज्यरूपिणीम् ।

श्रीसूत उवाच

एवमेतद् द्विजवरा! युष्माकं कथितं मया ॥ ५२ ॥

यथा क्षीरसरोनामतीर्थस्यास्य पुराभवत् । इदं क्षीरसरःपुण्यं सर्वलोकेषु विश्रुतम्

कश्यपस्य मुनेःपत्नी कद्रूर्यत्र द्विजोत्तमाः ।

स्नात्वा स्वभर्तृवाक्येन नोदिता नियमान्विता ॥ ५४ ॥

छलेन मुमुचे सद्यः सपत्नीजयदोषतः । अतोऽत्रतीर्थे ये स्नान्ति मानवाःशुद्धमानसाः

तेषांविमुक्तबन्धानांयुक्तानांपुण्यकर्मिणाम् । किंयागैःकिमुवावेदैःकिंवातीर्थनिषेवणैः

जपैर्वा नियमैर्वापिक्षीरकुण्डविलोकिनाम् । क्षीरकुण्डस्यवातेनस्पृष्टदेहोनरोद्विजाः

ब्रह्मलोकमनुप्राप्यतत्रैव परिमुच्यते । निमग्नाःक्षीरकुण्डेऽस्मिन्नवमत्यापिभास्करिम्

तस्य मूर्द्धनि तिष्ठेयुर्ज्वलन्तः पावकोपमाः ।

मग्नानां क्षीरकुण्डेऽस्मिञ्छीता वैतरणी नदी ॥ ५६ ॥

सर्वाणि नरकाण्यद्धा व्यर्थानि च भवन्ति हि ।

कामधेनुसमे तस्मिन्क्षीरकुण्डे स्थितेऽप्यहो ॥ ६० ॥

योऽन्यत्रभ्रमतेस्नातुं सनरोविप्रसत्तमाः । गोक्षीरेविद्यमानेऽपि ह्यर्कक्षीरायगच्छति

स्नातानां क्षीरकुण्डेऽस्मिन्नालभ्यं किञ्चिदस्ति हि ।

करप्राप्तैव मुक्तिःस्यात्किमन्यैर्बहुभाषणैः ॥ ६२ ॥

ब्रवीमि भुजमुद्धृत्य सत्यंसत्यं ब्रवीमि वः । यःपठेदिममध्यायं शृणुयाद्वासमाहितः

सक्षीरकुण्डस्नानस्य लभते फलमुत्तमम् ॥ ६४ ॥

इतिश्रीस्कान्देमहापुराणएकाशीतिसाहस्रयांसंहितायां तृतीयेब्रह्मखण्डे

सेतुमाहात्म्ये क्षीरकुण्डप्रशंसायांक्षीरकुण्डस्वरूपकथनन्नाम-

सप्तत्रिंशोऽध्यायः ॥ ३७ ॥

———

अष्टत्रिंशोऽध्यायः

क्षीरकुण्डप्रशंसायांकद्रूछलनवर्णनम्

ऋषय ऊचुः

सूत! कद्रूःकथं मुक्ता क्षीरकुण्डनिमज्जनात् । छलंकथंकृतवती सपत्न्यांपापनिश्चया

कस्य पुत्री चसाकद्रूः सपत्नी साचकस्यवै । किमर्थमजयत्कद्रूः स्वसपत्नीं छलेनतु

एतन्नःश्रद्दधानानां ब्रूहि सूत! कृपानिधे! ।

श्रीसूत उवाच

पुरा कृतयुगे विप्राः! प्रजापतिसुते उभे ॥ ३ ॥

कद्रूश्च विनताचेति भगिन्यौ संबभूवतुः । भार्ये तेकश्यपस्यास्तां कद्रूश्चविनतातथा

विनता सुषुवे पुत्रावरुणं गरुडं तथा । भर्त्तुःसकाशात्कद्रूश्च लेभे सर्पान्बहून्सुतान्

अनन्तवासुकिमुखान्विषदर्पसमन्वितान् । एकदा तु भगिन्यौ ते कद्रूश्चविनता तथा

अपश्यतांसमायान्तमुच्चैःश्रवसमन्तिकात् । विलोक्यकद्रूस्तुरगंविनतामिदमब्रवीत्

श्वेतोऽश्वबालो नीलो वा विनते ब्रूहि तत्त्वतः ।

इत्युक्ता विनता विप्राः कद्रूं तामिदमब्रवीत् ॥ ८ ॥

तुरङ्गःश्वेतबालोमे प्रतिभातिसुमध्यमे! । किंवात्वंमन्यसेकद्रूमितितांविनताऽब्रवीत्

पृष्टैवं विनतां कद्रूर्बभाषे स्वमतञ्च सा । कृष्णबालमहं मन्ये हयमेनमनिन्दिते

ततःपराजयेकृत्वा दासीभावंपणंमिथः । व्यतिष्ठेतां महाभागेसपत्न्यौतेद्विजोत्तमाः

ततःकद्रूर्निजसुतान्वासुकिप्रमुखानहीन् । तस्या नाहं यथादासी तथाकुरुत पुत्रकाः!

तदभीप्सितसिद्धयर्थमित्यवोचद् भृशातुरा ।

युष्माभिरुच्चैःश्रवसो बालः प्रच्छाद्यतामिति ॥ १३ ॥

नाङ्गीचक्रुर्मतं तस्या नागाःकद्रूरुषातदा । अशपत्कुपितापुत्राञ्ज्वलन्तीरोषमूर्च्छिता

पारीक्षितस्य सर्वेऽद्धा यूयं सत्रे मरिष्यथ । इतिशापे कृतेमात्रात्रस्तःकर्कोटकस्तदा

प्रणम्यपादयोःकद्रूं दीनो वचनमब्रवीत् । अहमुच्चैःश्रवोबालं विधास्याम्यञ्जनप्रभम्
माभीरम्बत्वयाकार्यंत्यवादीच्छापविलकवः । श्वेतमुच्चैःश्रवोबालंततःकर्कोटकोरगः
छादयित्वा स्वभोगेन व्यतनोदञ्जनद्युतिम् । अथ तेविनताकद्रूर्दास्येकृतपणे उभे
देवराजहयं द्रष्टुं संरम्भादभ्यगच्छताम् । शशाङ्कशङ्खमाणिक्यमुक्तैरावतकारणम्
युगान्तकालशयनं योगनिद्राकृतेहरेः । अतीत्य कद्रूविनते समुद्रं सरितांपतिम् ॥
दद्दृशतुर्हयं गत्वा देवराजस्य वाहनम् । कृष्णबालं हयं दृष्ट्वा विनतादुःखिताऽभवत्

दुःखितां वनितां कद्रूर्दासीकृत्ये न्ययुङ्क्त सा ।
एतस्मिन्नन्तरे तार्क्ष्योऽप्यण्डमुद्भिद्य वह्निवत् ॥ २२ ॥

प्रादुर्बभूव विप्रेन्द्रा गिरिमात्रशरीरवान् । दृष्ट्वा तद्देहमाहात्म्यमभूत्त्रस्तं जगत्त्रयम्
ततस्तन्तुष्टुवुर्देवा गरुडं पक्षिणांवरम् । दृष्ट्वामद्देहमाहात्म्यं त्रस्तंस्याद्भुवनत्रयम्
इत्यालोच्योपसंहृत्य देहमत्यन्तभीषणम् । अरुणंपृष्ठमारोप्यमातुरन्तिकमभ्यगात्
अथाह विनतां कद्रूः प्रणतामतिविह्वलाम् । चेटि! नागालयं गन्तुमुद्योगो मम वर्तते

त्वत्पुत्रो गरुडोऽतो मां मत्पुत्रांश्च वहत्विति ।
ततश्च विनता पुत्रं गरुडं प्रत्यभाषत ॥ २७ ॥

अहं कद्रूमिमां वक्ष्ये त्वं सर्वान्वहतत्सुतान् । तथेतिगरुडोमातुःप्रत्यगृह्णाद्वचोद्विजाः
अवहद्विनताकद्रूं सर्वांस्तान्गरुडोऽवहत् । रविसामीप्यगाःसर्पास्तत्करैराहतास्तदा
अस्तौषीद्वज्रिणं कद्रूः सुतानां तापशान्तये । सर्वतापंजलासारैर्देवराजोऽप्यशामयत्
नीयमानास्तदासर्पा गरुडेनबलीयसा । गत्वा तं देशमचिरादवदन्विनतासुतम् ॥
वयंद्वीपान्तरं गन्तुंसर्वेद्रष्टुं कृतत्वराः । वहत्वमस्मान्गरुड! चेटीसुत! ततःक्षणात्
ततोमातरमप्राक्षीद्विनतां गरुडो द्विजाः । अहं कस्माद्वहामीमांस्त्वंचेमां वहसेसदा
चेटीपुत्रेति मामेते किंभणन्ति सरीसृपाः । सर्वमेतद्वद त्वं मे मातस्तत्त्वेन पृच्छतः
पृष्ट्वैवं जननी तेन गरुडं प्राब्रवीत्सुतम् । भगिन्याक्रूरया पुत्र ! छलेनाहं पराजिता
तस्या दासीभवाम्यद्य चेटीपुत्रस्ततो भवान् । अतस्त्वंवहसेसर्पान्वहाम्येनामहंसदा

इत्यादिसर्ववृत्तान्तमादितोऽस्मै न्यवेदयत् ।

अथ तां गरुडोऽवादीन्मातरं विनतासुतः ॥ ३७ ॥

अस्माद्दास्याद्विमोक्षार्थं किं कार्यन्ते मयाऽधुना । इतिपृष्टा सुतेनाथविनतातमभाषत
सर्पान्पृच्छस्व गरुड! मम मातृविमोक्षणे । युष्माकं मातुःकिंकार्यंमयेतिवदताधुना
इति मात्रा समुदितो गरुडःपन्नगान्प्रति । गत्वाऽपृच्छद्द्विजश्रेष्ठास्तेप्येनमवदंस्तदा
यदाहरिष्यसे शीघ्रं सुधां त्वममरालयात् । दास्यान्मुक्ताभवेन्मातावैनतेय!भवानपि
ततो मातरमागम्य गरुडःप्रणतोऽब्रवीत् । सुधामम्ब ! ममानेतुं गच्छतोभक्ष्यमर्पय
इतीरिता सुतं प्राह माता तं विनता सुतम् । समुद्रमध्ये वर्तन्ते शबराःकतिचत्सुत!
तान्भक्षयित्वा शबरानमृतं त्वमिहानय । तत्रकश्चिद्द्विजःकामी शबरीसङ्गकौतुकी
त्यज तं ब्राह्मणं कण्ठं दहन्तं ब्रह्मतेजसा । पक्षादीनि तवाङ्गानिपान्तुदेवा मरुन्मुखाः
इतिस्वमातुराशीर्भिर्गरुडो वर्धितो ययौ । शबरालयमभ्येत्य तस्य भक्षयतो मुखम्

आवृतं प्राविशन्व्याधा वयांसीव दरीगिरेः ।
अथ स ब्राह्मणोऽप्यागात्तत्कण्ठं मुनिपुङ्गवाः ! ॥ ४७ ॥

कण्ठंदहन्तं विप्रं तमुवाचविनतासुतः । विप्रःपादोऽप्यवध्योहिनिर्याहित्वमतोबहिः
एवमुक्तस्तदा विप्रो गरुडंप्रत्यभाषत । किरातिर्मम भार्यापि निर्गन्तव्या मया सह
एवमस्त्विति तं विप्रमुवाच पतगेश्वरः । ततः सगरुडोविप्रमुज्जगार सभार्यकम् ॥
विप्रोप्यभीप्सितान्देशान्निषाद्या सहनिर्ययौ । शबरान्भक्षयित्वाथगरुडःपक्षिणांवरः
आत्मनः पितरंवेगात्कश्यपं समुपेयिवान् । कुत्रयासीति तत्पृष्टो गरुडस्तमभाषत
मातुर्दास्यविमोक्षाय सुधामाहर्तुमागमम् । बहून्किरातान्जग्ध्वाऽपितृप्तिर्ममन जायते
अपर्यन्तक्षुधा ब्रह्मन्बाधते मामहर्निशम् । तन्निवृत्तिप्रदं भक्ष्य ममार्पय तपोधन! ॥५४॥
येनाहं शक्नुयां तात ! सुधामाहर्तुमोजसा । इतीरितःसुतंप्राह कश्यपो विनतोद्भवम्

कश्यप उवाच

मुनिर्विभावसुर्नाम्ना पुरासीत्तस्य चानुजः । सुप्रतीक इतिभ्राता तावुभौ वंशवैरिणौ
अन्योन्यं शेपतुर्विप्रामहाक्रोधसमाकुलौ । गजोऽभवत्सुप्रतीकःकूर्मोऽभूच्चविभावसु
एवंवित्तविवादात्तौ शेपतुर्भ्रातरौ मिथः । गजःषड्योजनोच्छ्रायोद्विगुणायामसंयुतः

कूर्मस्त्रियोजनोच्छ्रायो दशयोजनविस्तृतः । बद्धवैरावुभावेतौ सरस्यस्मिन्विहङ्गम!
पूर्ववैरमनुस्मृत्य युध्येते जेतुमिच्छया । उभौ तौ भक्षयित्वात्वंसुधामाहरतृप्तिमान्
एवं पित्रेरितःपक्षी गत्वातद्गजकच्छपौ । समुद्धृत्य महाकायौ महाबलपराक्रमौ

वहन्नखाभ्यां संतीर्थं विलम्बाभिधमभ्यगात् ।
तत्रागतं समालोक्य पक्षिराजं द्विजोत्तमाः ॥ ६२ ॥

तत्तीरजोमहावृक्षो रोहिणाख्यो महोच्छ्रयः । वैनतेयमिदंप्राह महाबलपराक्रमम् ॥
एनामारुह मच्छाखांशतयोजनमायताम् । स्थित्वाऽत्रगजकूर्मौत्वंभक्षयस्वखगोत्तम
इत्युक्तस्तरुणापक्षी सतत्रास्तेमनोजवः । तद्भारात्सातरोःशाखाभग्नाभूद्द्विजसत्तमाः

बालखिल्यमुनींस्तस्मिँल्लम्बमानानधोमुखान् ।
दृष्ट्वा तत्पातशङ्कावांस्तां शाखां गरुडोऽग्रहीत् ॥ ६६ ॥

गजकूर्मौ च तां शाखां गृहीत्वायान्तमम्बरे । पितातस्याब्रवीत्तत्रगरुडंविनतासुतम्
त्यजेमां निर्जनेशैले शाखां त्वंविनतोद्भव !। इत्युक्तःसतथागत्वा शाखांनिष्पुरुषेनगे
विन्यस्याभक्षयत्पक्षी तौ तदागजकच्छपौ । अथोत्पातःसमभवत्तस्मिन्नवसरेदिवि
दृष्ट्वोत्पातं बलारातिः पप्रच्छ स्वपुरोहितम् । उत्पातकारणं जीव! किमत्रेतिपुनःपुनः

बृहस्पतिस्तदा शक्रं प्रोवाच द्विजसत्तमाः !।

बृहस्पतिरुवाच

काश्यपो हि मुनिः पूर्वमयजत्क्रतुना हरे !॥ ७१ ॥
सर्वानृषीन्सुरान्सिद्धान्यक्षान्गन्धर्वकिन्नरान् ।
यज्ञसम्भारसिद्ध्यर्थं प्रेषयामास स द्विजाः !॥ ७२ ॥
बालखिल्यान्ससम्भारान्ह्रस्वानङ्गुष्ठमात्रकान् ।
मज्जतो गोष्पदजले दृष्ट्वा हसितवान्भवान् ॥ ७३ ॥

भवताऽवमताःक्रुद्धा बालखिल्यास्तदा हरे! । जुहुवुर्यज्ञवह्नौ ते क्रोधेन ज्वलिताननाः
देवेन्द्रभयदःशत्रुः काश्यपस्य सुतोऽस्त्विति । तस्यपुत्रोऽद्यगरुडःसुधाहरणकौतुकी
समागच्छति तद्धेतुरयमुत्पातआगतः । इत्युक्तःसोऽब्रवीदिन्द्रोदेवानग्निपुरोगमान्

सुधामाहर्तुमायाति पक्षीसा रक्ष्यतामिति । इतीन्द्रप्रेरितादेवा ररक्षुःसायुधाः सुधाम्
पक्षिराजस्तदाभ्यागाद्देवानायुधधारिणः । महाबलन्तेगरुडं दृष्ट्वाकम्पन्त वै सुराः ॥
गरुडस्य सुराणाञ्च ततोयुद्धमभून्महत् । अखण्डिपक्षितुण्डेन भौवनोऽमृतपालकः
तदा निजघ्नुर्गरुडं देवाःशस्त्रैरनेकशः । वीपतिर्गरुडोदेवैर्बाधितःशस्त्रपाणिभिः ॥
पक्षाभ्यामाक्षिपद्दूरे देवानग्निपुरोगमान् । तत्पक्षविक्षितादेवास्तदापरमकोपनाः ॥

नाराचान्भिण्डिपालांश्च नानाशस्त्राणि चाक्षिपन्
ततस्तु गरुडो वेगाद्देवदृष्टिविलोपिनीम् ॥ ८२ ॥
धूलिमुत्थापयामास पक्षाभ्यां विनतासुतः ।
वायुना शमयामासुस्तान्पांसूंस्त्रिदशोत्तमाः ॥ ८३ ॥
रुद्रान्वसूंस्तथादित्यान्मरुतोऽन्यान्सुरांस्तथा ।
गरुडः पक्षतुण्डाभ्यां व्यथितानकरोद्द्विजाः ॥ ८४ ॥

पलायितेषु देवेषु सोऽद्राक्षीज्ज्वलनं पुरः । ज्वलन्तंपरितस्त्वग्निंशमापयितुमुद्ययौ
ससहस्रमुखो भूत्वातैःपिबञ्छतशो नदीः । तमग्निंनाशयामासतैःपयोभिस्त्वरान्वितः
सितधारं भ्रमच्चक्रं सुधारक्षकमन्तिके । दृष्ट्वा तदरिरन्ध्रेण संक्षिप्ताङ्गोऽन्तराविशत्

ततो ददर्श द्वौ सर्पौ व्यात्तास्यौ भीषणाकृती ।
याभ्यां दृष्टो ऽपि भस्म स्यात्तौ सर्पौ गरुडस्तदा ॥ ८८ ॥

आच्छिद्यपक्षतुण्डाभ्यांगृहीत्वामृतमुद्ययौ । यन्त्रमुत्पाट्यचोद्यन्तंगरुडंप्राहमाधवः
तव तुष्टोऽस्मिपक्षीश! वरं वरय सुव्रत । अथ पक्षी तमाहस्म कमलानायकं हरिम्
तवोपरिस्थितिर्मे स्यान्माभूतां च जरामृती । तथास्त्वितिहरिःप्राहवरंदत्तंमयातव
इत्युक्त्वा तं हरिः प्राह ममत्वं वाहनंभव । स्यन्दनोपरिकेतुश्च मम त्वं विनतासुत!

तथास्त्विति खगोऽप्याह कमलापतिमच्युतम् ।
हृतामृतं खगं श्रुत्वा तत आखण्डलो जवात् ॥ ९३ ॥

अभिद्रुत्याशु कुलिशं पक्षे चिक्षेप पक्षिणः । ततो विहस्यगरुडः पाकशासनमब्रवीत्
कुलिशस्य निपातान्मे न हरेकापिवेदना । सफलो वज्रपातस्ते भूयाच्च सुरनायक!

इतीरयत्पत्रमेकं व्यसृजत्पक्षतस्तदा। शोभनं पर्णमस्यैति सुपर्ण इतिसोऽभवत्
तस्मिन्सुपर्णेहेमाभे सर्वे विस्मयमाययुः। ततस्तु गरुडः शक्रमब्रवीद्द्विजपुङ्गवाः
भवतासाकमखिलं जगदेतच्चराचरम् । देवेन्द्रमततं वोढुममोघा शक्तिरस्ति मे
नाखण्डलसहस्रं मे रणे लभ्यं हरे भवेत् । इति ब्रुवाणं गरुडमब्रवीत्पाकशासनः
किन्तेऽमृतेन कार्यंस्याद्दीयताममृतंमम। इमांसुधां भवान्दद्याद्येभ्योहिविनतोद्भव!

तेऽधुनाऽमृतपानेन जरामरणवर्जिताः।
अस्मद्वयोऽधिकवीर्याः स्युर्बाधेरंस्त्रिदशांस्तथा ॥ १०१ ॥

इतिब्रुवन्तंदेवेन्द्रंगरुडोऽप्यब्रवीद्द्विजाः। यत्रैतत्स्थापयिष्यामितत्रागत्यभवानिदम्
गृह्णातु झटितीत्युक्तो गरुडं प्राह वृत्रहा। प्रीतोऽहन्तव दास्यामिवरं वृणु महामते!
इत्युक्तवन्तं गरुडः पाकशासनमब्रवीत्। दास्येछलप्रयोक्तारो मम मातुः सरीसृपाः
भक्ष्याभवन्तु नित्यं मेपाकशासनवृत्रहन् !। इतितेनेरितःशक्रस्तथास्त्वित्यवदच्चतम्
अथायं गरुडो विप्रा धारयन्नमृतंययौ। यान्तं तमनुयातिस्म गरुडं पाकशासनः
वेगेन स द्विजश्रेष्ठाः सुधाहरणकौतकी। मातुरभ्याशमागत्य सर्पान्प्राह सपक्षिराट्
कुशेषुन्यस्यतेसर्पास्सुधैवमधुनामया। स्नात्वातद्भुङ्ध्वममृतंशुचयःसुसमाहिताः

मोक्षोऽपि मम मातुः स्याद्दासीभावाद्धि पन्नगाः।
तथाऽस्त्वित्यवदन्सर्पा गरुडं विनतासुतम् ॥ १०६ ॥

मुक्तातदैवविनतादासीभावाद्द्विजोत्तमाः । सर्पास्तेऽमृतभक्षार्थंस्नातुंसर्वेययुस्तदा
तस्मिन्नवसरेशक्रस्तामादायसुधांययौ । स्नात्वागत्यभुजङ्गास्तेतत्राद्दृष्ट्वातदासुधाम्
जिह्वाभिर्लिलिहुर्दर्भानेषुन्यस्ता सुधेति हि । तदाप्रभृतिसर्पाणांजिह्वादर्भाग्रपाटिता
द्विधाभवन्मुनिश्रेष्ठाद्विजिह्वास्तेनतेस्मृताः । सुधासंयोगतोदर्भाःप्रययुश्चपवित्रताम्
मोचयित्वा चगरुडोदासीभावात्स्वमातरम्। शशापकुपितःकद्रूं छद्मनाजितमातरम्
कद्रु! त्वं जननीं यन्मे छलेनजितवत्यसि। भर्तुस्त्वं परिचर्यायामतोनार्हाभविष्यसि
शप्त्वैवं गरुडः कद्रूं प्रययौ स यथेच्छया। कद्रूश्च विनताचोभे ययतुर्भर्तुरन्तिकम्
कश्यपोविमुखस्तत्रकद्रूंकोपादथाब्रवीत्। यस्माच्छलेनविनतांकद्रु!निर्जितवत्यसि

अतोमत्परिचर्यायां न योग्यासि दुरात्मिके!। स्त्रियं वापुरुषंवापिनारीवापुरुषोपिवा
छलाद्विजयतेयोऽसौसमहापातकीभवेत्। छलाद्विजयिनासार्धं सम्भाष्यब्रह्महाभवेत्
स्तेयी सुरापी विज्ञेयो गुरुदाररतश्च सः। संसर्गदोषदुष्टश्च मुनिभिः परिकीर्त्यते
त्वया संभाषणाद्दोषो ममस्यान्नरकप्रदः । तस्मात्प्रयाहिकद्रु!त्वंमत्समीपाद्विदारुणे
छलजेत्रा सपङ्क्तौ यो भुञ्जीत मनुजोभुवि। तेन सम्भाषणात्सद्यःपतेद्विनरकार्णवे
विलोक्यछलजेतारंतस्यपापस्यशान्तये। आदित्यंवाजलं वापिपावकंवाविलोकयेत्
छलजेता यत्र तिष्ठेदाश्रमेऽपि गृहेऽपि वा। वस्तव्यं नहि तत्रान्यैर्वसन्नरकमश्नुते

अतो निर्याहि निर्याहि मम त्वं दृष्टिमार्गतः ।
स्वाश्रमात्कुटिले! त्वेनां विनतां जितवत्यसि ॥ १२५ ॥
इति धिक्कृत्य सहसा कद्रूं तां कश्यपस्तदा।
विनतां स्वच्छशीलां तां स्वीचकार महामतिः ॥ १२६ ॥

कद्रूरित्थं सपरुषं कथिता कश्यपेन सा। रुदन्ती भृशदुःखार्तापादयोस्तस्यचापतत्
पतितां पादयोर्दृष्ट्वा कश्यपो मुनिपुङ्गवः। न जग्राहैव कद्रूंतां स्मरन्पापंतया कृतम्
ततः प्रणम्य विनता कश्यपं वाक्यमब्रवीत्। भगवन्भगिनीमेनांस्वीकुरुष्वकृपानिधे
अज्ञानान्मुग्धया पापं कद्र्वा यदधुनाकृतम्। क्षन्तुमर्हसि तत्सर्वंदयाशीलाहिसाधवः
जनन्या गरुडस्यैवंकथितः कश्यपोमुनिः। उवाचविनतेनैनांविनापापस्यनिष्कृतिम्
ग्रहीष्यामिदुराचारांत्रिस्त्वांशपथयाम्यहम्। कश्यपस्यवचःश्रुत्वाविनतापुनरब्रवीत्
भगिन्याममपापस्यब्रह्मंस्त्वंब्रूहिनिष्कृतिम्। येनेयं परिचर्यायांतवयोग्याभविष्यति
तथैव मुदितो विप्रा मारीचः कश्यपस्तदा। ध्यात्वा मुहूर्तंमनसा पश्चादिदमभाषत
दक्षिणाम्बुनिधेस्तीरे फुल्लग्रामे विमुक्तिदे। अस्तिक्षीरसरोनाम तीर्थंपापविनाशनम्
तत्तीर्थस्नानमात्रेण दोषश्चास्याविनश्यति। प्रायश्चित्तायुतेनापितत्तीर्थे मज्जनंविना
ननश्यत्येषदोषोऽस्यास्तदेषा यातुतत्सरः। भर्त्रैवमुदितेकद्रूस्तंप्रणम्यद्विजोत्तमम्
तत्क्षणात्प्रययौ क्षीरसरःपुत्रसहायिनी। साकद्रूःपुत्रसहिता गत्वाकतिपयैर्दिनैः॥
प्राप्यक्षीरसरः पुण्यं प्रयताविजितेन्द्रिया। सस्नौ नियमपूर्वंच संकल्प्यक्षीरकुण्डके

उपोष्य त्रिदिनं सस्नौ तस्मिन्क्षीरसरोजले ।
चतुर्थे दिवसे तस्यां कुर्वत्यां स्नानमादरात् ॥ १४० ॥
अदेहा व्योमगा वाणी समुत्तस्थौ द्विजोत्तमाः !।

अशरीरिण्युवाच

कद्रु! त्वं मज्जनादत्र छलजेतृत्वदोषतः ॥ १४१ ॥
विमुक्काभर्तृ शुश्रूषायोग्याचासिनसंशयः । शापोऽपिगरुडोकस्तेलयंयात्रोऽत्रमज्जनात्
गच्छ भर्तृ सकाशं त्वं सोऽपि त्वां स्वीकरिष्यति ।
इत्युक्त्वा विरराामाऽथ व्योमवागशरीरिणी ॥ १४३ ॥
तस्यैवात्रे नमस्कृत्य कद्रूःसाप्रीतमानसा । तीर्थं प्रदक्षिणीकृत्य नत्वापुत्रसमन्विता
प्रययौ भर्तुरभ्याशं तच्छुश्रूषणकौतुकात् ।
आगतान्तां समालोक्य स्नातां क्षीरसरोजले ॥ १४५ ॥
ज्ञात्वाविधूतपापाञ्च कश्यपःससमाधिना । अङ्गीचकारपत्नींतामात्मशुश्रूषणोचिताम्
एवं वःकथितंविप्राः कद्रूपापविमोक्षणम् । मज्जनान्मुक्तिदं पुंसां पुण्येक्षीरसरोजले
यश्शृणोतीममध्यायं पठते वापि मानवः । सक्षीरकुण्डस्नानस्य लभतेफलमुत्तमम्
अश्वमेधादियज्ञानां समग्रं फलमश्नुते । गङ्गादिसर्वतीर्थेषु सस्नातो भवति ध्रुवम् ॥
यःपठेदिममध्यायं क्षीरकुण्डप्रशंसनम् । गोसहस्रप्रदातृणां प्राप्नोत्यविकलंफलम् ॥

इति श्रीस्कान्देमहापुराणएकाशीतिसाहस्र्यांसंहितायां तृतीयेब्रह्मखण्डे सेतुमाहात्म्येक्षीरकुण्डप्रशंसायांकद्रूछलनन्नामाष्टत्रिंशोऽध्यायः ॥ ३८ ॥

एकोनचत्वारिंशोऽध्यायः

कपितीर्थप्रशंसायांरम्भाशापविमोक्षणवर्णनम्

श्रीसूत उवाच

अथातःसंप्रवक्ष्यामि कपितीर्थस्य वैभवम् । तत्तीर्थं कपिभिःपूर्वं गन्धमादनपर्वते ॥
सर्वेषामुपकाराय कपिभिर्निर्मितं द्विजाः । रावणादिषु रक्षःसु हतेषु तदनन्तरम् ॥
तीर्थं निर्माय तत्रैव सस्नुस्ते कपयो मुदा । तीर्थाय च वरंप्रादुः कपयःकामरूपिणः
अस्मिंस्तीर्थेनिमग्नाये भक्तिप्रवणचेतसः । तेसर्वे मुक्तिभाजःस्युर्महापातकमोचिताः
अत्रतीर्थेनिमग्नानां नस्यान्नरकजंभयम् । अत्रस्नातानराःसर्वेदारिद्र्यं नाप्नुवन्तिहि
अत्र तीर्थेनिमग्नानां यमपीडाऽपिनोभवेत् । कपितीर्थं प्रयास्येऽहमितियःसततंब्रुवन्
व्रजेच्छतपदंविप्राः स यायात्परमंपदम् । एतत्तीर्थसमं तीर्थं न भूतं न भविष्यति ॥
एवं वरन्तु ते दत्त्वा तीर्थायास्मै कपीश्वराः । रामं दाशरथिंसर्वे प्रणम्याथ ययाचिरे
स्वामिंस्त्वयाऽस्मै तीर्थाय दीयतां वरमद्भुतत् ।
कपिभिःप्रार्थितो विप्रा! रामचन्द्रोऽतिहर्षितः ॥ ६ ॥
तत्तीर्थायवरंप्रादात्कपीनांप्रीतिकारणात् । अत्रतीर्थेनिमग्नानां गङ्गास्नानफलंभवेत्
प्रयागस्नानजंपुण्यं सर्वतीर्थफलं तथा । अग्निष्टोमादियागानां फलं भूयादनुत्तमम् ॥
गायत्र्यादिमहामन्त्रजपपुण्यंतथाभवेत् । गोसहस्रप्रदातृणां प्राप्नोत्यविकलं फलम्
चतुर्णामपि वेदानां पारायणफलं लभेत् । ब्रह्मविष्णुमहेशादिदेवपूजाफलं लभेत् ॥
कपितीर्थाय रामोऽयं प्रादादेवं वरंद्विजाः । एवं रामेणदत्ते तु वरे तत्र कुतूहलात् ॥
षडर्धनयनो ब्रह्मा सहस्राक्षो यमस्तथा । वरुणाग्निस्तथा वायुः कुबेरश्चन्द्रमा अपि
आदित्योनिर्ऋतिश्चैव साध्याश्च वसवस्तथा ।
अन्येऽपि त्रिदशाः सर्वे विश्वेदेवादयस्तथा ॥ १६ ॥
अत्रिर्भृगुस्तथा कुत्सो गौतमश्चपराशरः ।

कण्वोऽगस्त्यःसुतीक्ष्णश्च विश्वामित्रादयोऽपरे ॥ १७ ॥

योगिनःसनकाद्याश्च नारदाद्याः सुरर्षयः। रामदत्तवरंतीर्थंश्लाघन्ते बहुधा तदा॥ सस्नुश्च तत्र तीर्थे ते सर्वाभीष्टप्रदायिनि। कपिभिर्निर्मितं यस्मादेतत्तीर्थमनुत्तमम् कपितीर्थमितिख्यातिमतो लोकेप्रयास्यति। इत्यप्यवोचंस्ते सर्वेदेवाश्चमुनयस्तथा तस्मादवश्यं गन्तव्यं कपितीर्थंमुमुक्षुभिः। रम्भाकौशिकशापेन शैलीभूतापुराद्विजाः तत्र स्नात्वा निजंरूपंप्रपेदेचदिवं ययौ। अस्य तीर्थस्यमाहात्म्यं मया वक्तुं नशक्यते

मुनय ऊचुः

रम्भां किमर्थमशपत्कौशिकःसूतनन्दन!। कथं गता शिलाभूता कपितीर्थं सुराङ्गना

एतन्नःसर्वमाचक्ष्व विस्तरान्मुनिसत्तम!।

श्रीसूत उवाच

विश्वामित्राभिधो राजा प्रागभूत्कुशिकान्वये ॥ २४ ॥

सकदाचिन्महाराजः सेनापरिवृतो बली। मेदिनीं परिचक्राम राज्यवीक्षणकौतुकी॥ अटित्वासबहून्देशान्वसिष्ठस्याश्रमंययौ। आतिथ्यायवृतःसोऽयं वशिष्ठेनमहात्मना तथास्त्वित्यब्रवीत्सोऽयं दण्डवत्प्रणतोनृपः। कामधेनुप्रभावेण विश्वामित्रायभूभुजे आतिथ्यमकरोद्विप्रा वसिष्ठो ब्रह्मनन्दनः। कामधेनुप्रभावं वै ज्ञात्वा कुशिकनन्दनः

वसिष्ठं प्रार्थयामास कामधेनुमभीष्टदाम्।

प्रत्याख्यातो वसिष्ठेन प्रचकर्ष च तां बलात् ॥ २६ ॥

कामधेनुविसृष्टैस्तुम्लेच्छाद्यैः सपराजितः। महादेवं समाराध्यतस्मादस्त्राण्यवाप्यच वसिष्ठस्याश्रमंगत्वा व्यसृजच्छरसञ्चयान्। सर्वाण्यस्त्राणिमुमुचेब्रह्मास्त्रंचनृपोत्तमः तानिसर्वाणि चास्त्राणि वसिष्ठोब्रह्मनन्दनः। एकेनब्रह्मदण्डेन निजघ्नेस्वतपोबलात्

ततःपराजितो विप्रा विश्वामित्रोऽतिलज्जितः।

ब्राह्मण्यावाप्तये स्वस्य तपःकर्तुं वनं ययौ ॥ ३३ ॥

पूर्वादिपश्चिमान्तासु त्रिषुदिक्षुतपोऽचरत्। प्रादुर्भूतमहाविघ्नस्तत्तद्दिक्षुसकौशिकः उत्तरांदिशमासाद्य हिमवत्पर्वतेऽमले। कौशिक्यास्सरितस्तीरेपुण्येपापविनाशिनि

दिव्यंवर्षसहस्त्रन्तुनिराहारोजितेन्द्रियः। निरालोकोजितश्वासोजितक्रोधःसनिश्चलः

ग्रीष्मे पञ्चाग्निमध्यस्थः शिशिरे वारिषु स्थितः।

वर्षास्वाकाशगो नित्यमूर्ध्वबाहुर्निराश्रयः ॥ ३७ ॥

ब्राह्मण्यसिद्धयेऽत्युग्रं चचार सुमहत्तपः। उद्विग्नमनसस्तस्य त्रिदशास्त्रिदिवालयाः

जम्भारिणा च सहिता रम्भाम्प्रोचुरिदम्वचः।

देवा ऊचुः

रम्भे! त्वं हिमवच्छैले कौशिकीतीरगम्मुनिम् ॥ ३९ ॥

विश्वामित्रंतपस्यन्तं विलोभयविचेष्टितैः। यथातत्तपसो विघ्नो भविष्यतितथाकुरु एवमुक्ता यदा रम्भा देवैरिन्द्रपुरोगमैः। प्रत्युवाच सुरान्सर्वान्प्राञ्जलिःप्रणता तदा॥

रम्भोवाच

अतिक्रूरोमहाक्रोधोविश्वामित्रोमहामुनिः। सशप्स्यतेमांक्रोधेनबिभेम्यस्मादहंसुराः त्रायध्वंकृपयायूयं मांयुष्मत्परिचारिकाम्। इत्युक्तोरम्भयातत्र जम्भारिस्तामभाषत

इन्द्र उवाच

रम्भे! त्वया न भीः कार्या विश्वामित्रात्तपोधनात्।

अहमप्यागमिष्यामि त्वत्सहायःसमन्मथः ॥ ४४ ॥

कोकिलालापमधुरो वसन्तोप्यागमिष्यति। अतिसुन्दररूपात्वं प्रलोभय महामुनिम्

इतीन्द्रकथिता रम्भा विश्वामित्राश्रमं ययौ।

तद्दृष्टिगोचरा स्थित्वा ललितं रूपमास्थिता ॥ ४६ ॥

सामुनिंलोभयामास मनोहरविचेष्टितैः। पिकोऽपि तस्मिन्समयेचुकूजानन्दयन्मनः श्रुत्वापिकस्वरंरम्भां दृष्ट्वा च मुनिपुङ्गवः। संशयाविष्टहृदयो विदित्वा शक्रकर्म तत्

शशाप रम्भां क्रोधेन विश्वामित्रस्तपोधनः।

विश्वामित्र उवाच

यस्मात्कोपयसे रम्भे! मान्त्वं कोपजयैषिणम् ॥ ४९ ॥

शिलाभवाऽत्र तस्मात्त्वं रम्भे!वर्षशतायुतम्। तदन्तरेब्राह्मणेनरक्षितामोक्षमाप्स्यसि

विश्वामित्रस्य शापेन तदन्ते सा शिलाऽभवद् ।
बहुकालं शिलाभूता तस्थौ तस्याश्रमे द्विजाः !॥ ५१ ॥
विश्वामित्रोऽपिब्रह्मर्षितामापुनस्तप्त्वामहत्तपः । लेभेवसिष्ठवाक्येनब्राह्मण्यंदुर्लभंनृपैः
बहुकालं शिलाभूता रम्भाप्यासीत्तदाश्रमे ।
तस्मिन्नेवाश्रमे पुण्ये शिष्योऽगस्त्यस्य संमतः ॥ ५३ ॥
श्वेतो नाममुनिश्चक्रे मुमुक्षुः परमं तपः । चिरकालं तपस्तस्मिन्प्रकुर्वति महामुनौ
अङ्गारकेतिविख्याता राक्षसी काचिदागता । तस्याश्रममतिक्रूरा मेघस्वनमहाध्वना
मूत्ररक्तपुरीषाद्यैर्दूषयामास भीषणा । उपद्रवैस्तथा चान्यैर्बाधयामास तं मुनिम् ॥
अथ क्रुद्धो मुनिः श्वेतो वायव्यास्त्रेण योजयन् ।
शप्तां कुशिकपुत्रेण राक्षस्यै प्राक्षिपच्छिलाम् ॥ ५७ ॥
राक्षसीं सा प्रदुद्राव वायव्यास्त्रेण योजिता । वायव्यास्त्रप्रयुक्तेन दूषतानुद्रुता च सा
दक्षिणाम्बुनिधेस्तीरं धावतिस्म भयार्दिताम् ।
धावन्तीमनुधावन्ती सा शिलाऽस्त्रप्रयोजिता ॥ ५९ ॥
पपातोपरिराक्षस्यामज्जन्त्याःकपितीर्थके । मृतासाराक्षसीतत्रशिलापातात्स्वमूर्द्धनि
विश्वामित्रेण शप्ता सा कपितीर्थेनिमज्जनात् ।
शिलारूपं परित्यज्य रम्भारूपमुपेयुषी ॥ ६१ ॥
देवैः कुसुमधाराभिरभिवृष्टा मनोरमा । दिव्यं विमानमारूढा दिव्याम्बरविराजिता ॥
हारकेयूरकटकनासाभरणभूषिता । उर्वश्याद्यप्सरोभिश्च सखिभिः परिवारिता ॥
कपितीर्थस्य माहात्म्यं प्रशंसन्ती पुनः पुनः । निषेव्यरामनाथंच शङ्करंशशिभूषणम्
आखण्डलपुरीं रम्यांप्रययावमरावतीम् । राक्षसी सापि शापेन कुम्भजस्य महौजसः
घृताचीदेववेश्याहिराक्षसीरूपमागता । साप्यत्रकपितीर्थाप्सुस्नानात्स्वंरूपमाययौ
एवं रम्भाघृताच्यौ ते कपितीर्थे निमज्जनात् ।
अगस्त्यशिष्यश्वेतस्य प्रसादाद् द्विजसत्तमाः !॥ ६७ ॥
राक्षसीत्वंशिलात्वञ्चहित्वास्वंरूपमागते । तस्मिन्सर्वप्रयत्नेन स्नातव्यंकपितीर्थके

यः शृणोतीममध्यायं पठते वापि मानवः । प्राप्नोतिकपितीर्थस्यस्नानजंफलमुत्तमम्
इतिश्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यांसंहितायांतृतीयेब्रह्मखण्डे
सेतुमाहात्म्ये रम्भाशापविमोक्षणन्नामैकोनचत्वारिंशोऽध्यायः ॥ ३९ ॥

चत्वारिंशोऽध्यायः

गायत्रीसरस्वतीतीर्थप्रशंसायांगन्धमादनेगायत्रीसरस्वतीसन्निधानकथनम्

श्रीसूत उवाच

अथातः सम्प्रवक्ष्यामि मुनयो लोकपावनम् ।
गायत्र्या च सरस्वत्या माहात्म्यं मुक्तिदं नृणाम् ॥ १ ॥
शृण्वतां पठतां चैव महापातकनाशनम् । महापुण्यप्रदं पुंसां नरकक्लेशनाशनम्
गायत्र्यां च सरस्वत्यां ये स्नान्ति मनुजा मुदा ।
न तेषां गर्भवासःस्यात्किन्तु मुक्तिर्भवेद् ध्रुवम् ॥ ३ ॥
सरस्वत्याश्च गायत्र्या गन्धमादनपर्वते । ब्रह्मपत्न्योः सन्निधानात्तन्नाम्ना कथिते इमे

ऋषय ऊचुः

गायत्र्याश्च सरस्वत्या गन्धमादनपर्वते । किमर्थं सन्निधानं वै सूताभूत्तद्वदस्व नः

सूत उवाच

प्रजापतिः पुराविप्राःस्वांवैदुहितरंमुदा । वाङ्नाम्नींकामुकोभूत्वास्पृहयामासमोहनः
अथ प्रजापतेः पुत्री स्वस्मिन्वै तस्य कामिताम् ।
विलोक्य लज्जिता भूत्वा रोहिद्रूपं दधार सा ॥ ७ ॥
ब्रह्माऽपि हरिणो भूत्वा तया रन्तुमनास्तदा ।
गच्छन्तीमनुयातिस्म हरिणीरूपधारिणीम् ॥ ८ ॥
तं दृष्ट्वा देवताः सर्वाः पुत्रीगमनसादरम् । करोत्यकार्यं ब्रह्माऽयं पुत्रीगमनलक्षणम्

इतिनिन्दन्ति तं विप्राः स्रष्टारं जगतां पतिम् । निषिद्धकृत्यनिरतंतं दृष्ट्वापरमेष्ठिनम्
हरः पिनाकमादाय व्याधरूपधरः प्रभुः । आकर्णपूर्णकृष्टेन पिनाकधनुषा शरम् ॥
संयोज्य वेधसन्तेन विव्याध निशितेन सः । त्रिपुरान्तकबाणेन विद्धोऽसौन्यपद्भुवि
तस्य देहादथोत्थाय महज्ज्योतिर्महाप्रभम् । आकाशेमृगशीर्षाख्यंनक्षत्रमभवत्तदा
आर्द्रानक्षत्ररूपी सन्हरोऽप्यनुजगामतम् । पीडयन्मृगशीर्षाख्यं नक्षत्रं ब्रह्मरूपिणम्
अधुनाऽपि मृगव्याधरूपेणत्रिपुरान्तकः । अम्बरे दृश्यते स्पष्टं मृगशीर्षान्तिकेद्विजाः
एवं विनिहितेतस्मिञ्छम्भुना परमेष्ठिनि । अनन्तरन्तुगायत्रीसरस्वत्यौशुचार्दिते
भर्तृहीनेमुनिश्रेष्ठाभर्तृजीवनकाङ्क्षया । किंकरिष्यावहेह्यावामित्यन्योन्यंविचार्यतु
स्वपतिप्राणसिद्ध्यर्थं गायत्रीचसरस्वती । सर्वोत्कृष्टंशिवस्थानंगन्धमादनपर्वतम्
सर्वाभीष्टप्रदं पुंसां तपः कर्तुंसमुद्यते । जग्मतुर्नियमोपेतं तपः कर्तुं शिवं प्रति ॥
स्नानार्थमात्मनोविप्रा गायत्री च सरस्वती । तीर्थद्वयंस्वनाम्नावैचक्रतुःपापनाशनम्
तत्र त्रिषवणस्नानं प्रत्यहं चक्रतुर्मुदा । बहुकालमनाहारे कामक्रोधादिवर्जिते ॥
अत्युग्रनियमोपेते शिवध्यानपरायणे । पञ्चाक्षरमहामन्त्रं जपैकनियते शुभे ॥ २२ ॥
स्वपतेर्जीवनार्थंवै गायत्री च सरस्वती । महादेवं समुद्दिश्य तप एवं प्रचक्रतुः ॥
तयोरथ तपस्तुष्टो महादेवो महेश्वरः । सन्निधत्ते महामूर्तिस्तपसां फलदित्सया ॥
ततःसन्निहितंशम्भुंपार्वतीरमणंशिवम् । गणेशकार्त्तिकेयाभ्यांपार्श्वयोःपरिसेवितम्
दृष्ट्वासन्तुष्टचित्ते तेगायत्रीचसरस्वती । स्तोत्रैस्तुष्टुवतुश्शम्भुंमहादेवंघृणानिधिम्

गायत्रीसरस्वत्यावूचतुः

नमोदुर्वारसंसारध्वान्तध्वंसैकहेतवे । ज्वलज्ज्वालावलीभीमकालकूटविषादिने
जगन्मोहनपञ्चास्त्रदेहनाशैकहेतवे । जगदन्तकरक्रूर! यमान्तक! नमोऽस्तु ते ॥ २८ ॥
गङ्गातरङ्गसम्पृक्तजटामण्डलधारिणे । नमस्तेऽस्तु विरूपाक्ष ! बालशीतांशुधारिणे!
पिनाकभीमटङ्कारत्रासितत्रिपुरौकसे । नमस्तेविविधाकार! जगत्स्रष्टृशिरश्छिदे ॥
शान्तामलकृपादृष्टिसंरक्षितमृकण्डुज !। नमस्ते गिरिजानाथ! रक्षाऽऽवां शरणागते
महादेव! जगन्नाथ! त्रिपुरान्तक! शङ्कर !। वामदेवमहादेव! रक्षाऽऽवां शरणागते ॥

इति ताभ्यां स्तुतःशम्भुर्देवदेवोमहेश्वरः । अब्रवीत्प्रीतिसंयुक्तोगायत्रींचसरस्वतीम्

महादेव उवाच

भोःसरस्वति! गायत्रि !प्रीतोऽस्मियुवयोरहम् । वरं वरयतं मत्तोयद्वांमनसि वर्तत
इत्युक्ते ते तु गायत्रीसरस्वत्यौ हरेण वै । अब्रूतां पार्वतीकान्तं महादेवंघृणानिधिम्

गायत्रीसरस्वत्यावूचतुः

भगवन्नावयोर्देव! भर्त्तारं चतुराननम् । स प्राणं कुरुसर्वेश! कृपया करुणाकर !॥ ३६
त्वमावयोः पितादेव! तवाप्यावां सुते उभे । रक्षावांपतिदानेनतस्मात्त्वंत्रिपुरान्तक

स एवं प्रार्थितः शम्भुस्ताभ्यां ब्राह्मणपुङ्गवाः ।
एवमस्त्विति संप्रोच्य गायत्रीं च सरस्वतीम् ॥ ॥ ३८ ॥

तदेव वेधसःकायं शिरसायोक्तुमुत्सुकः । तत्रैववेधसःकायं शिरोभिः सह सुव्रताः
भूतैरानाययामास नन्दिभृङ्गिमुखैस्तदा । शिरांसि तान्यानीतानि कायेनसह शङ्करः

क्षणात्सन्धारयामास वाणीगायत्रिसन्निधौ ।
सन्धितोऽथ हरेणाऽसौ चतुर्वक्त्रो जगत्पतिः ॥ ४१ ॥

उत्तस्थौ तत्क्षणादेव सुप्तोत्थित इव द्विजाः । ततःप्रजापतिर्दृष्ट्वाशङ्करंशशिभूषणम्

तुष्टाव वाग्भिरग्र्याभिर्भार्याभ्यां च समन्वितः ।

ब्रह्मोवाच

नमस्ते देवदेवेश ! करुणाकर! शङ्कर !॥ ४३ ॥
पाहि मां करुणासिन्धो! निषिद्धाचरणात्प्रभो !
मम त्वत्कृपया शम्भो ! निषिद्धाचरणे क्वचित् ॥ ४४ ॥

माप्रवृत्तिर्भवेद्भूयोरक्षमान्त्वंतथासदा । तथैवास्त्विति सम्प्राहब्रह्माणंगिरिजापतिः
इतःपरंप्रमादं त्वं माकुरुष्व विधे!पुनः । उत्पथप्रतिपन्नानां पुंसांशास्तास्मिसर्वदा
एवमुक्त्वा चतुर्वक्त्रं महादेवो द्विजोत्तमाः । सरस्वतींचगायत्रीं प्रोवाचप्रीणयन्गिरा

महादेव उवाच

युवयोर्मत्प्रसादेन हेगायत्रिसरस्वति !। अयंभर्तासमायातः सप्राणश्चतुराननः ॥ ४८॥

सहानेनब्रह्मलोकं यातं मा भूद्विलम्बता । युवयोःसन्निधानेन सदाकुण्डद्वयेऽत्र वै ॥

भविष्यति नृणां मुक्तिः स्नानात्सायुज्यरूपिणी ।
युष्मन्नाम्ना च गायत्रीसरस्वत्याविति द्वयम् ॥ ५० ॥

इदंतीर्थं सर्वलोके ख्यातिं यास्यतिशाश्वतीम् । सर्वेषामपितीर्थानामिदंतीर्थद्वयंसदा शुद्धिप्रदन्तथा भूयान्महापातकनाशनम् । महाशान्तिकरं पुसां सर्वाभीष्टप्रदायकम् ममप्रसादजननं विष्णुप्रीतिकरन्तथा । एतत्तीर्थद्वयसमं न भूतं न भविष्यति ॥ ५३ अत्रस्नानाद्धि सर्वेषां सर्वाभीष्टं भविष्यति । इदंकुण्डद्वयंलोके भवतीभ्यां कृतंमहत्

युष्मन्नाम्ना प्रसिद्धञ्च भविष्यति विमुक्तिदम् ।
गायत्र्युपास्तिरहिता वेदाभ्यासविवर्जिताः ॥ ५५ ॥

औपासनविहीनाश्च पञ्चयज्ञविवर्जिताः । युष्मत्कुण्डद्वये स्नानात्तत्तत्फलमवाप्नुयुः अन्येचयेपातकिनोनित्यानुष्ठानवर्जिताः । स्नात्वाकुण्डद्वयेतत्रशुद्धाःस्युर्द्विजसत्तमाः सरस्वतीं च गायत्रीमेवमुक्त्वा महेश्वरः । क्षणादन्तरधात्तत्र सर्वेषामेव पश्यताम् पतिलब्ध्वाऽथगायत्रीसरस्वत्यौ मुदान्विते । तेनसाकंब्रह्मलोकं जग्मतुर्द्विजसत्तमाः

श्रीसूत उवाच

एवम्वः कथितं विप्रा गन्धमादनपर्वते । सन्निधानं सरस्वत्या गायत्र्याश्चसहेतुकम् यःशृणोतीममध्यायं पठते वा सभक्तिकम् । एतत्तीर्थद्वयस्नानफलमाप्नोत्यसंशयः

इति श्रीस्कान्देमहापुराणएकाशीतिसाहस्र्यांसंहितायां तृतीयेब्रह्मखण्डे सेतुमाहात्म्येगायत्रीसरस्वतीतीर्थप्रशंसायांगन्धमादनेगायत्री सरस्वतीसन्निधानकथनंनामचत्वारिंशोऽध्यायः ॥ ४० ॥

एकचत्वारिंशोऽध्यायः

गायत्रीसरस्वतीतीरप्रशंसायांकाश्यपपापशान्तिवर्णनम्

श्रीसूत उवाच

अथातः सम्प्रवक्ष्यामि गायत्रीं च सरस्वतीम् ।
लक्षीकृत्य कथामेकां पवित्रां द्विजसत्तमाः ! ॥ १ ॥

कश्यपाख्योद्विजःपूर्वमस्मिंस्तीर्थद्वयेशुभे । स्नात्वातिमहतःपापाद्विमुक्तोनरकप्रदात्

ऋषय ऊचुः

मुने! कश्यपनामासावकरोत्किं हि पातकम् ।
स्नात्वा तीर्थद्वयेऽप्यत्र यस्मान्मुक्तोऽभवत्क्षणात् ॥ ३ ॥

एतन्नःश्रद्दधानानां ब्रूहिसूत! कृपाबलात् । त्वद्वचोमृततृप्तानां न पिपासाऽपि विद्यते

श्रीसूत उवाच

गायत्र्याश्चसरस्वत्यामाहात्म्यप्रतिपादकम् । इतिहासंप्रवक्ष्यामिशृण्वतांपापनाशनम् अभिमन्युसुतोराजा परीक्षिन्नामनामतः । अध्यास्ते हास्तिनपुरं पालयन्धर्मतोमहीम् स राजा जातुविपिने चचारमृगयारतः । षष्टिवर्षवयाभूपः क्षुत्तृषापरिपीडितः ॥ नष्टमेकं स विपिने मार्गयन्मृगमादरात् । ध्यानारूढ मुनिं दृष्ट्वा प्राह चीवरवाससम् मयाबाणेन विपिने मृगोविद्धोऽधुना मुने! । दृष्टः सकिंत्वयाविद्धन्विद्रुतोभयकातरः

समाधिनिष्ठो मौनित्वान्नकिञ्चिदपि सोऽब्रवीत् ।
ततो धनुरटन्याऽसौ स्कन्धे तस्य महामुनेः ॥ १० ॥

निधाय मृतसर्पन्तु कुपितःस्वपुरं ययौ । मुनेस्तस्य सुतःकश्चिच्छृङ्गीनाम बभूव वै

सखा तस्य कृशाख्योऽभूच्छृङ्गिणो द्विजसत्तमाः ।
सखायं शृङ्गिणम्प्राह कृशाख्यः स सखा ततः ॥ १२ ॥

पिता तव मृतं सर्पं स्कन्धेन वहतेऽधुना । मा भूद्दर्पस्तव सखे मा कृथास्त्वंमदंवृथा

सोऽवदत्कुपितःशृङ्गी दित्सुश्शापं नृपायवै । मत्तातेशवसर्पंयो न्यस्तवान्मूढचेतनः
ससप्तरात्रान्म्रियतां संदष्टस्तक्षकाहिना । शशापैवं मुनिसुतः सौभद्रेयं परीक्षितम्
शमीकाख्यःपिता तस्य श्रुत्वा शप्तं सुतेनतम् । नृपंप्रोवाचतनयं शृङ्गिणं मुनिपुङ्गवः
रक्षकं सर्वलोकानां नृपं किं शप्तवानसि । अराजके वयं लोके स्थास्यामःकथमञ्जसा
क्रोधेन पातकमभूद्येन नो प्राप्यते सुखम् । यःसमुत्पादितं कोपं क्षमयैवनिरस्यति

इह लोके परत्रासावत्यन्तं सुखमेधते ।
क्षमायुक्ता हि पुरुषा लभन्ते श्रेय उत्तमम् ॥ १६ ॥

ततःशमीकःस्वंशिष्यं प्राहगौरमुखाभिधम् । भोगौरमुखगत्वात्वं वदभूपंपरीक्षितम्
इमं शापं मत्सुतोक्तं तक्षकाहिविदंशनम् । पुनरायाहि शीघ्रंत्वं मत्समीपं महामते ! ॥
एवमुक्तःशमीकेन ययौ गौरमुखो नृपम् । समेत्य चाब्रवीद्भूपं सौभद्रेयं परीक्षितम्

दृष्ट्वा सर्पं पितुःस्कन्धे त्वया विनिहतं मृतम् ।
शमीकस्य सुतः शृङ्गी शशाप त्वां रुषान्वितः ॥ २३ ॥

एतद्दिनात्सप्तमेऽह्नितक्षकेण महाहिना । दष्टो विषाग्निना दग्धो भूयादाश्वभिमन्युजः

एवं शशाप त्वां राजञ्छृङ्गी तस्य मुनेःसुतः ।
एतदुक्तुं पिता तस्य प्राहिणोन्मान्त्वदन्तिकम् ॥ २५ ॥

इतीरयित्वा तं भूपमाशुगौरमुखो ययौ । गते गौरमुखे पश्चाद्राजा शोकपरायणः ॥
अभ्रंलिहमथोत्तुङ्गमेकस्तम्भंसुविस्तृतम् । मध्येगङ्गां व्यतनुतं मण्डपं नृपपुङ्गवः ॥
महागरुडमन्त्रज्ञैरौषधज्ञैश्चिकित्सकैः । तक्षकस्य विषं हन्तुं यत्नं कुर्वन्समाहितः ॥
अनेकदेवब्रह्मर्षिराजर्षिप्रवरान्वितः । आस्ते तस्मिन्नृपस्तुङ्गे मण्डपे विष्णुभक्तिमान्
तस्मिन्नवसरेविप्रःकाश्यपोमान्त्रिकोत्तमः । राजानंरक्षितुंप्रायात्तक्षकस्यमहाविषात्
सप्तमेऽहनि विप्रेन्द्रो दरिद्रो धनकामुकः । अत्रान्तरेतक्षकोऽपि विप्ररूपी समाययौ
मध्येमार्गं विलोक्याऽथ काश्यपं प्रत्यभाषत । ब्राह्मणत्वंकुत्रयासिवदमेऽद्य महामुने!

इति पृष्टस्तदावादीत्काश्यपस्तक्षकं द्विजाः ।
परीक्षितं महाराजं तक्षकोऽद्य विषाग्निना ॥ ३३ ॥

धक्ष्यते तं शमयितुं तत्समीपमुपैम्यहम् । इत्युक्तवन्तं तं विप्रं तक्षकःपुनरब्रवीत् ॥
तक्षकोऽहं द्विजश्रेष्ठमयादष्टंचिकित्सितुम् । न शक्तोऽब्दशतुनापि महामन्त्रायुतैरपि
चिकित्सितुं चेन्मद्दष्टं शक्तिरस्ति तवाधुना । अनेकयोजनोच्छ्रायमिमं वटतरुंत्वहम्
दशाम्युज्जीवयैनंत्वं समर्थोऽस्तिततोभवान् । इतीरयित्वातंवृक्षमदंशत्तक्षकस्तदा
अभवद्भस्मसात्सोपि वृक्षोत्यन्तंसमूर्च्छितः । पूर्वमेव नरः कश्चित्तंवृक्षमधिरूढवान्

तक्षकस्य विषोल्काभिः सोऽपि दग्धोऽभवत्तदा ।
तं नरं न विजिज्ञाते तौच काश्यपतक्षकौ ॥ ३६ ॥

काश्यपःप्रतिजज्ञेथतक्षकस्यापिशृण्वतः । तन्मन्त्रशक्तिंपश्यन्तुसर्वेविप्राहिनोऽधुना

इतीरयित्वा तं वृक्षं भस्मीभूतं विषाग्निना ।
अजीवयन्मन्त्रशक्त्या काश्यपो मान्त्रिकोत्तमः ॥ ४१ ॥

नरोऽपितेनवृक्षेणसाकमुज्जीवितोऽभवत् । अथाब्रवीत्तक्षकस्तंकाश्यपंमन्त्रकोविदम्
यथानमुनिवाङ्मिथ्या भवेदेवं कुरुद्विज । यत्तेराजाधनं दद्यात्ततोपिद्विगुणं धनम्
ददाम्यहंनिवर्तस्व शीघ्रमेव द्विजोत्तम !। इत्युक्त्वानर्घ्यरत्नानि तस्मैदत्त्वासतक्षकः
न्यवर्तयत्काश्यपंतंब्राह्मणंमन्त्रकोविदम् । अल्पायुषं नृपंमत्वाज्ञानदृष्ट्यासकाश्यपः

स्वाश्रमं प्रययौ तूष्णीं लब्धरत्नश्च तक्षकात् ।
सोऽब्रवीत्तक्षकःसर्वान्सर्पानाहूय तत्क्षणे ॥ ४६ ॥

यूयं तं नृपतिं प्राप्य मुनीनां वेषधारिणः । उपहारफलान्याशु प्रयच्छत परीक्षिते ॥
तथेत्युक्त्वा सर्वसर्पाददूराज्ञे फलान्यमी । तक्षकोऽपितदातत्र कस्मिंश्चिद्बदरीफले
कृमिवेषधरो भूत्वा व्यतिष्ठद्दंशितुं नृपम् । अथ राजाप्रदत्तानि सर्पैर्ब्राह्मणरूपकैः ॥
परीक्षिन्मन्त्रिवृद्धेभ्यो दत्त्वा सर्वफलान्यपि । कौतूहलेन जग्राह स्थूलमेकं फलंकरे
अस्मिन्नवसरे सूर्योप्यस्ताचलमगाहत । मिथ्याऋषिवचो माभूदितितत्रत्यमानवाः
अन्योन्यमवदन्सर्वे ब्राह्मणाश्च नृपास्तथा । एवं वदत्सु सर्वेषु फले तस्मिन्नदृश्यत
फलेरक्तकृमिःसर्वै राज्ञा चापि परीक्षिता । अयंकिमां दशेदद्य कृमिरित्युक्तवान्नृपः
निदधेतत्फलंकर्णे सकृमिर्द्विजसत्तमाः । तक्षकोऽस्मिन्स्थितःपूर्वं कृमिरूपीफलेतदा

निर्गत्य तत्फलादाशु नृपदेहमवेष्टयत् ।
तक्षकावेष्टिते भूपे पार्श्वस्था दुद्रुवुर्भयात् ॥ ५५ ॥
अनन्तरं नृपो विप्रास्तक्षकस्य विषाग्निना ।
दग्धोऽभूद्भस्मसादाशु स प्रासादो वलीयसा ॥ ५६ ॥
कृत्वौर्ध्वदैहिकंतस्य नृपस्यसपुरोहिताः । मन्त्रिणस्तत्सुतं राज्येजनमेजयनामकम्
राजानमभ्यषिञ्चन्वै जगद्रक्षणवाञ्छया । तक्षकाद्रक्षितुंभूपमायातःकाश्यपाभिधः
योब्राह्मणोमुनिश्रेष्ठाः ससर्वैर्निन्दितोजनैः । बभ्रामसकलान्देशाञ्छिष्टैःसर्वैश्चदूषितः
अवस्थानंनलेभेऽसौग्रामेवाप्याश्रमेपिवा । यान्यान्देशानसौयातस्तत्रतत्रमहाजनैः
तत्तद्देशान्निरस्तःसशाकल्यंशरणंययौ । प्रणम्यशाकल्यमुनिं काश्यपोनिन्दितोजनैः
इदं विज्ञापयामास शाकल्याय महात्मने ।

काश्यप उवाच

भगवन्सर्वधर्मज्ञ! शाकल्यहरिवल्लभ! ॥ ६२ ॥
मुनयो ब्राह्मणाश्चान्ये मां निन्दन्ति सुहृज्जनाः ।
नास्याऽहं कारणं जाने किं मां निन्दन्ति मानवाः ॥ ६३ ॥
ब्रह्महत्यासुरापानं गुरुस्त्रीगमनं तथा । स्तेयं संसर्गदोषोवा मया नाचरितःक्वचित्
अन्यान्यपि हि पापानि न कृतानि मया मुने !।
तथाऽपि निन्दन्ति जना वृथा मां बान्धवादयः ॥ ६५ ॥
जानासिचेत्त्वंशाकल्यमयादोषंकृतंवद । उक्तोऽथकाश्यपेनैवंशाकल्याख्योमहामुनिः
क्षणं ध्यात्वा बभाषे तं काश्यपं द्विजसत्तमाः ।

शाकल्य उवाच

परीक्षितं महाराजं तक्षकाद्रक्षितुं भवान् ॥ ६७ ॥
अयासीदर्द्धमार्गेतुतक्षकेणनिवारितः । चिकित्सितुंसमर्थोपि विषरोगादिपीडितम्
यो न रक्षति लोभेन तमाहुर्ब्रह्मघातकम् ।
क्रोधात्कामाद्भयाल्लोभान्मात्सर्यान्मोहतोऽपि वा ॥ ६९ ॥

योनरक्षति विप्रेन्द्रा! विषरोगातुरं नरम् । ब्रह्महा स सुरापी च स्तेयीचगुरुतल्पगः
संसर्गदोषदुष्टश्चनाऽपितस्यहिनिष्कृतिः । कन्याविक्रयिणश्चापिहयविक्रयिणस्तथा
कृतघ्नस्यापि शास्त्रेषु प्रायश्चित्तं हि विद्यते ।
विषरोगातुरं यस्तु समर्थोऽपि न रक्षति ॥ ७२ ॥
नतस्य निष्कृतिःप्रोक्ता प्रायश्चित्तायुतैरपि । नतेनसहपङ्क्तौ च भुञ्जीतसुकृतीजनः
न तेन सह भाषेत न पश्येत्तं नरं क्वचित् । तत्संभाषणमात्रेण महापातकभाग्भवेत् ॥
परीक्षित्समहाराजः पुण्यश्लोकश्च धार्मिकः ।
विष्णुभक्तो महायोगी चातुर्वर्ण्यस्य रक्षिता ॥ ७५ ॥
व्यासपुत्राद्धरिकथांश्रुतवान्भक्तिपूर्वकम् । अरक्षित्वानृपं तन्त्वं वचसातक्षकस्ययत्
निवृत्तस्तेन विप्रेन्द्रैर्बान्धवैरपि दूष्यसे । सपरीक्षिन्महाराजो यद्यपि क्षणजीवितः
तथापियावन्मरणंबुधैःकार्यंचिकित्सनम् । यावत्कण्ठगताःप्राणा मुमूर्षोर्मानवस्यहि
तावच्चिकित्सा कर्तव्या कालस्य कुटिला गतिः ।
इति प्राहुःपुरा श्लोकं भिषग्विद्याब्धिपारगाः ॥ ७९ ॥
अतश्चिकित्साशक्तोऽपि यस्मादकृतभेषजः । अर्धमार्गेनिवृत्तस्त्वन्तेन तं हतवानसि
शाकल्येनैवमुदितः काश्यपः प्रत्यभाषत ।

काश्यप उवाच

ममैतद्दोषशान्त्यर्थमुपायं वद सुव्रत !॥ ८१ ॥
येन मां प्रतिगृह्णीयुर्बान्धवाःससुहृज्जनाः ॥ ८२ ॥
कृपां मयि कुरुष्वत्वं शाकल्य! हरिवल्लभ । काश्यपेनैवमुक्तस्तुशाकल्योऽपिमुनीश्वरः
क्षणं ध्यात्वा जगादैवं काश्यपं कृपया तदा ।

शाकल्य उवाच

अस्य पापस्य शान्त्यर्थमुपायं प्रवदामि ते ॥ ८४ ॥
तत्कर्त्तव्यंत्वयाशीघ्रं विलम्बंमाकृथाद्विज । दक्षिणाम्बुनिधौ सेतौगन्धमादनपर्वते
अस्ति तीर्थद्वयं विप्र गायत्रीचसरस्वती । तत्रत्वं स्नानमात्रेण शुद्धोभूयाश्चतत्क्षणे

गायत्र्याश्चसरस्वत्याजलवातस्पृशोनरः । विधूयसर्वपापानिस्वर्गंयास्यन्तिनिर्मलाः
तद्याहिशीघ्रंविप्रत्वंगायत्रींचसरस्वतीम् । इत्युक्तःकाश्यपस्तेनशाकल्येनद्विजोत्तमाः
नत्वा मुनिं च शाकल्यं तमापृच्छ्य मुनीश्वरम् ।
तेन चैवाभ्यनुज्ञातः प्रययौ गन्धमादनम् ॥ ८९ ॥
तत्रगत्वाचगायत्रीसरस्वत्यौचकाश्यपः । नत्वातीर्थद्वयंभक्त्या दण्डपाणिंचभैरवम्
सङ्कल्पपूर्वं तत्तीर्थे सस्नौ नियमसंयुतः । तीर्थद्वयेस्नानमात्रान्मुक्तपापोऽथकाश्यपः
तीर्थद्वयस्य तीरेऽसौ किञ्चित्कालन्तु तस्थिवान् ।
तस्मिन्काले च गायत्रीसरस्वत्यौ मुनीश्वराः ॥ ९२ ॥
प्रादुर्बभूवतुर्मूर्ते सर्वाभरणभूषिते । देव्यौ ते स नमस्कृत्य काश्यपो भक्तिपूर्वकम्
के युवांरूपसम्पन्ने सर्वालंकारसंयुते । इति पप्रच्छ दृष्ट्वा ते काश्यपो हृष्टमानसः ॥
तेन पृष्टे च गायत्रीसरस्वत्यौ तमूचतुः ।

गायत्रीसरस्वत्यावूचतुः

काश्यपावां हि गायत्रीसरस्वत्यौ विधिप्रिये ॥ ९५ ॥
एतत्तीर्थस्वरूपेण नित्यं वर्तावहेऽत्र तु । अत्र तीर्थद्वये स्नानादावां तुष्टे तवाधुना
वरं मत्तो वृणीष्व त्वं यदिष्टं काश्यपद्विज! ।
स्नान्ति तीर्थद्वये येऽत्र दास्यावस्तदभीप्सितम् ॥ ९७ ॥
श्रुत्वा वचस्तद्गायत्रीसरस्वत्योः स काश्यपः ।
तुष्टाव वाग्भिरग्र्याभिस्ते देव्यौ वेधसःप्रिये ॥ ९८ ॥

काश्यप उवाच

चतुराननगेहिन्यौ जगद्धात्र्यौ नमाम्यहम् । विद्यास्वरूपेगायत्रीसरस्वत्यौ शुभे उभे
सृष्टिस्थित्यन्तकारिण्यौजगतांवेदमातरौ । हव्यकव्यस्वरूपेचचन्द्रादित्यविलोचने
सर्वदेवाधिपे वाणीगायत्र्यौसततं भजे । गिरिजाकमलाचापि युवामेव जगद्धिते ॥
युष्मद्दर्शनमात्रेण जगत्सृष्ट्यादिकल्पनम् । युष्मन्निमेषे सततं जगतां प्रलयोऽभवत्
उन्मेषे सृष्टिरभवद्भोगायत्रि! सरस्वति ! । युवयोर्दर्शनादद्य कृतार्थोऽभवमाशुवै १०३

मामद्य पातकान्मुक्तं स्नानत्तीर्थद्वयेऽत्र तु ।
स्वीकुर्वन्तु मुनिश्रेष्ठा ब्राह्मणाबान्धवास्तथा ॥ १०४ ॥
इतः परं पापकृत्ये मा मे बुद्धिःप्रवर्तताम् । धर्मे प्रवर्ततां नित्यमयमेव वरो मम
दीयताम्भोमहादेव्यौ! नान्यदिच्छाम्यहं वरम् ।
इति ते प्रार्थिते तेन काश्यपेन द्विजोत्तमाः !॥ १०६ ॥
सरस्वतीचगायत्रीद्वेदेव्यौ ब्रह्मणःप्रिये । काश्यपं प्रोचतुःप्रीते जनन्यौ जगतां सदा
काश्यपैतद्वरं सर्वं प्रार्थितं यत्त्वयाऽधुना । अनुग्रहादावयोस्तदचिरेण तवास्तु हि
इत्युक्त्वातंतुगायत्रीसरस्वत्यौ क्षणेनवै । तिरोधानंगतेविप्रास्तस्मिंस्तीर्थद्वयेतदा
काश्यपोऽपि कृतार्थःसन्स्वदेशं प्रतिनिर्ययौ ।
बान्धवा ब्राह्मणाः सर्वे काश्यपं गतकिल्बिषम् ॥ ११० ॥
प्रत्यगृह्णंश्च गायत्रीसरस्वत्योर्निमज्जनात् ।
एवम्वःकथितं विप्राः काश्यपस्य विमोक्षणम् ॥ १११ ॥
पातकेभ्योहिगायत्रीसरस्वत्योर्निमज्जनात् । पठतेत्विममध्यायं शृणुतेवासमाहितः
यो गायत्र्यांसरस्वत्यां स स्नातफलमश्नुते ॥ ११३ ॥

इतिश्रीस्कान्देमहापुराणएकाशीतिसाहस्र्यां संहितायांतृतीयेब्रह्मखण्डे
सेतुमाहात्म्येगायत्रीसरस्वतीतीर्थप्रशंसायांकाश्यपपापशान्तिर्नामैक
चत्वारिंशोऽध्यायः ॥ ४१ ॥

द्विचत्वारिंशोऽध्यायः

सकलतीर्थप्रशंसायांरामनाथमाहात्म्यवर्णनम्

श्रीसूत उवाच

अथातःसर्वतीर्थानां वैभवं प्रवदाम्यहम् । सेतुमध्यनिविष्टानामनुक्तानां मुनीश्वराः !
अस्तितीर्थम्महापुण्यंनाम्नातुऋणमोचनम् । ऋणानित्रीणिनश्यन्तिनराणाममज्जनात्

द्विजस्य जायमानस्य ऋणानि त्रीणि सन्ति हि ।
ऋषीणां देवतानांच पितृणां च द्विजोत्तमाः !॥ ३ ॥

ब्रह्मचर्याननुष्ठानादृषीणां ऋणवान्भवेत् । यज्ञादीनामकरणाद्देवानां च ऋणीभवेत्
पुत्रानुत्पादनाच्चैव पितृणामृणवान्भवेत् । विनापि ब्रह्मचर्येण विनायागं विनासुतम्
ऋणमोक्षाभिधेतीर्थेस्नानमात्रेणमानवाः । ऋषिदेवपितृणान्तु ऋणेभ्योमुक्तिमाप्नुयुः
ब्रह्मचर्येण यज्ञेन तथा पुत्रोद्भवेनच । नैवतुष्यन्ति ऋषयो देवाःपितृगणास्तथा ॥ ७
ऋणमोक्षे यथास्नानादतुलां तुष्टिमाप्नुयुः । किञ्चात्र मज्जानात्तीर्थेदरिद्राअधमर्णिनः
मुक्ता ऋणेभ्यःसर्वेभ्यो धनिनःस्युर्न संशयः । यदत्र मज्जनात्पुंसामृणमुक्तिःप्रजायते
तस्मादुक्तमिदं तीर्थमृणमोचनसंज्ञया । अतोऽत्र ऋणिभिःसर्वैःस्नातव्यंतद्विमुक्तये
एतत्तीर्थसमंतीर्थं न भूतं न भविष्यति । पाण्डवैःकृतमप्यत्र तीर्थमस्त्यपरं महत् ॥
यत्रेष्टं धर्मपुत्राद्यैः पाण्डवैः पञ्चभिःपुरा । तदेतत्तीर्थमुद्दिश्य भुक्तिमुक्तिफलप्रदम् ॥

दशकोटिसहस्राणि तीर्थान्यनुत्तमानि हि ।
पञ्चपाण्डवतीर्थेऽस्मिन्सान्निध्यं कुर्वते सदा ॥ १३ ॥
आदित्या वसवो रुद्राः साध्याश्च समरुद्गणाः ।
पाण्डवानां महातीर्थे नित्यं सन्निहितास्तथा ॥ १४ ॥

अत्राभिषेकं यःकुर्यात्पितृदेवांश्च तर्पयेत् । सर्वपापविनिर्मुक्तो ब्रह्मलोके स पूज्यते ॥
अप्येकं भोजयेद्विप्रमेतत्तीर्थतटेऽमले । तेनासौ कर्मणा तत्र परत्राऽपि च मोदते ॥१६

ब्राह्मणः क्षत्रियो वैश्यःशूद्रो वाप्यन्य एव वा ।
अस्मिंस्तीर्थवरे स्नात्वा वियोनिं न प्रयाति वै ॥ १७ ॥

पाण्डवानां महातीर्थे पुण्ययोगेषु यो नरः । स्नायात्स मनुजःश्रेष्ठो नरकंनैवपश्यति
पाण्डवानां महातीर्थं सायंप्रातश्चयःस्मरेत् । सुस्नातःसर्वतीर्थेषुगङ्गादिषु न संशयः
इन्द्रादिदेवताभिश्च यत्रेष्टं दैत्यशान्तये । तदन्यद्देवतीर्थाख्यं विद्यते गन्धमादने ॥

देवतीर्थे नरः स्नात्वा सर्वपापविमोचितः ।
प्राप्नुयादक्षयाँल्लोकान्सर्वकामसमन्वितान् ॥ २१ ॥
जन्मप्रभृति यत्पापं स्त्रिया वा पुरुषेण वा ।
कृतन्तद्देवकुण्डेऽस्मिन् स्नानात्सद्यो विनश्यति ॥ २२ ॥

यथा सुराणां सर्वेषामादिर्वै मधुसूदनः । तथादिःसर्वतीर्थानां देवकुण्डमनुत्तमम् ॥
यस्तुवर्षशतंपूर्णमग्निहोत्रमुपासते । यस्त्वेकोदेवकुण्डेऽस्मिन्कदाचित्स्नानमाचरेत्
सममेवं तयोःपुण्यं नात्र सन्देहकारणम् । दुर्लभं देवतीर्थेऽस्मिन्दानं वासश्च दुर्लभः
देवतीर्थाभिगमनं स्नानं चाप्यतिदुर्लभम् । देवतीर्थं समासाद्य देवर्षिपितृसेवितम्
अश्वमेधमवाप्नोति विष्णुलोकं चगच्छति । द्विदिनं त्रिदिनंवापि पञ्चवाथ षडेववा

उषित्वा देवकुण्डस्थतीरे नरकनाशने ।
न मातृयोनिमाप्नोति सिद्धिं चाप्नोत्यनुत्तमाम् ॥ २८ ॥

त्रिरात्रस्नानतो ह्यत्र वाजपेयफलं लभेत् । देवतीर्थस्मृते सद्यः पापेभ्योमुच्यते नरः
अर्चयित्वा पितृन्देवानेतत्तीर्थतटे नरः । सर्वकामसमृद्धःस्यात्सर्वयज्ञफलं लभेत् ॥
एतत्तीर्थसमं पुण्यं न भूतं न भविष्यति । तस्मादवश्यं स्नातव्यं देवतीर्थे मुमुक्षुभिः
ऐहिकामुष्मिकफलप्राप्तिकामैश्चमानवैः । देवतीर्थस्यमाहात्म्यं संक्षिप्यकथितंद्विजाः
विस्तरेणास्यमाहात्म्यंमयावक्तुंनपार्यते । सुग्रीवतीर्थंवक्ष्यामि रामसेतौविमुक्तिदे
अत्र स्नात्वा नरोभक्त्या सूर्यलोकं समश्नुते । सुग्रीवतीर्थेस्नानेनहयमेधफलंभवेत्

ब्रह्महत्यादिपापानां निष्कृतिश्चापि जायते ।
सुग्रीवतीर्थगमनाद्गोसहस्रफलं लभेत् ॥ ३५ ॥

स्मरणात्तस्यवेदानां पारायणफलंभवेत् । दिनोपवासमात्रेण तस्यतीर्थस्यतीरतः ॥
महापातकनाशःस्यात्प्रायश्चित्तंविनाद्विजाः । अत्राभिषेकं कुर्वाणःपितृदेवांश्चतर्पयेत्
आप्तोर्यामस्य यज्ञस्य फलमष्टगुणंभवेत् । सुग्रीवतीर्थस्नानेन नरमेधफलं लभेत् ॥
सुग्रीवतीर्थस्नानेन नरोजातिस्मरो भवेत् । सुग्रीवतीर्थं भोविप्राःप्रयाताभीष्टसिद्धये
सुग्रीवतीर्थमहात्म्यमेवं वःकथितं द्विजाः । वैभवं नलतीर्थस्य त्विदानीं प्रब्रवीमिवः
नलतीर्थे नरःस्नानात्स्वर्गलोकं समश्नुते । नलतीर्थेसकृत्स्नानात्सर्वपापविमोचितः
अग्निष्टोमातिरात्रादिफलमाप्नोत्यनुत्तमम् । त्रिरात्रमुषितस्तस्मिंस्तर्पयन्पितृदेवताः
सूर्यवद्भासते विप्रा वाजिमेधफलं लभेत् । नीलतीर्थंप्रवक्ष्यामि महापातकनाशनम् ॥
अग्निपुत्रेण नीलेन कृतंसेतौ विमुक्तिदम् । नीलतीर्थेनरः स्नानात्सर्वपापविमोचितः
बहुवर्णस्य यागस्य फलं शतगुणं लभेत् । नीलतीर्थेनरःस्नात्वा सर्वाभीष्टप्रदायिनि
अग्निलोकमवाप्नोति सर्वकामसमृद्धिमान् । गवाक्षेण कृतं तीर्थं गन्धमादनपर्वते ॥
विद्यते स्नानमात्रेण नरकं नैव याति सः । अङ्गदेन कृतं तीर्थमस्ति सेतौ विमुक्तिदे
अत्रस्नानेन मनुजो देवेन्द्रत्वं समश्नुते । गजेन गवयेनात्र शारणेन महौजसा ॥ ४८
कुमुदेन हरेणापि पनसेन बलीयसा । कृतानि यानि तीर्थानि तथाऽन्यैःसर्ववानरैः

रामसेतौ महापुण्ये गन्धमादनपर्वते ।
तेषु तीर्थेषु यःस्नाति सोऽमृतत्वं समश्नुते ॥ ५० ॥

विभीषणकृतं तीर्थमस्ति पापविमोचनम् । महादुःखप्रशमनं महारोगनिबर्हणम् ॥
महापातकसङ्घानामनलोपममुत्तमम् । कुम्भीपाकादिनरकक्लेशनाशनकारणम् ॥ ५२
दुःस्वप्ननाशनंधन्यंमहादारिद्र्यबाधनम् । तत्रयोमनुजःस्नायात्तस्यनास्तीहपातकम्
स वैकुण्ठमवाप्नोति पुनरावृत्तिवर्जितम् । विभीषणस्य सचिवैःकृतं तीर्थचतुष्टयम्
तत्रस्नानेनमनुजः सर्वपापैःप्रमुच्यते । सरयूश्च नदी विप्रा! गन्धमादनपर्वते ॥ ५५ ॥
रामनाथं महादेवं सेवितुं वर्तते सदा । तत्रस्नात्वा नराःसर्वे सर्वपातकवर्जिताः ॥
सर्वयज्ञतपस्तीर्थसेवाफलमवाप्नुयुः । दशकोटिसहस्राणि तीर्थानि द्विजसत्तमाः ॥
वसन्त्यस्मिन्महापुण्ये गन्धमादनपर्वते । गङ्गाद्याःसरितःसर्वास्तथा वै सप्तसागराः

ऋष्याश्रमानिपुण्यानि तथा पुण्यवनानिच । अनुत्तमानिक्षेत्राणि हरिशङ्करयोस्तथा
सान्निध्यं कुर्वते नित्यं गन्धमादनपर्वते । उपवीतान्तरं तीर्थं प्रोक्तवांश्चतुराननः ॥
त्रयस्त्रिंशत्कोटयोऽत्र देवाःपितृगणैःसह । सर्वैश्चमुनिभिस्सार्द्धं यक्षसिद्धैश्चकिन्नरैः

वसन्ति सेतौ देवस्य रामचन्द्रस्य चाज्ञया ।

श्रीसूत उवाच

एवमुक्तं द्विजश्रेष्ठास्तीर्थानां वैभवं मया ॥ ६२ ॥

इदंपठन्वाशृण्वन्वादुःखसङ्घाद्विमुच्यते । कैवल्यं च समाप्नोति पुनरावृत्तिवर्जितम्

इतिश्रीस्कान्देमहापुराणएकाशीतिसाहस्र्यां संहितायांतृतीयेब्रह्मखण्डे
सेतुमाहात्म्येसकलतीर्थप्रशंसायांरामनाथमाहात्म्यवर्णनंमाम
द्विचत्वारिंशोऽध्यायः ॥ ४२ ॥

त्रिचत्वारिंशोऽध्यायः

रामनाथप्रशंसनवर्णनम्

श्रीसूत उवाच

अथेदानीं प्रवक्ष्यामि रामनाथस्यवैभवम् । यच्छ्रुत्वा सर्वपापेभ्यो मुच्यतेमानवोभुवि
रामप्रतिष्ठितंलिङ्गंयःपश्यतिनरःसकृत् । सनरोमुक्तिमाप्नोतिशिवसायुज्यरूपिणीम्
दशवर्षैस्तु यत्पुण्यं क्रियते तु कृते युगे । त्रेतायामेकवर्षेण तत्पुण्यं साध्यते नृभिः
द्वापरे तच्चमासेन तद्दिनेन कलौयुगे । तत्फलं कोटिगुणितं निमिषेनिमिषे नृणाम्
निस्सन्देहं भवेदेवं रामनाथविलोकिनाम् । रामेश्वरमहालिङ्गे तीर्थानि सकलान्यपि
विद्यन्ते सर्वदेवाश्च मुनयःपितरस्तथा । एककालं द्विकालं वा त्रिकालं सर्वदैववा ॥

ये स्मरन्ति महादेवं रामनाथं विमुक्तिदम् ।
कीर्तयन्त्यथवा विप्रास्ते विमुक्ताऽघपञ्जराः ॥ ७ ॥

सच्चिदानन्दमद्वैतं साम्बं रुद्रं प्रयान्ति वै । रामेश्वराख्यं यल्लिङ्गं रामचन्द्रेण पूजितम्

तस्य स्मरणमात्रेण यमपीडाऽपि नो भवेत् । रामेश्वरमहालिङ्गं येऽर्चयन्तिसकृन्नराः
न मानुषास्ते विज्ञेयाः किन्तु रुद्रा न संशयः । रामेश्वरमहालिङ्गं नार्चितं येनभक्तितः
चिरकालं स संसारे संसरेद्दुःखसंकुले । रामेश्वरमहालिङ्गं ये पश्यन्ति सकृन्नराः ॥
किंदानैःकिंव्रतैस्तेषां किंतपोभिःकिमध्वरैः । रामेश्वरमहालिङ्गंयोनच्चिन्तयतिक्षणम्

अज्ञानी स च पापीस्यात्समूको बधिरस्तथा ।
स जडोऽन्धश्च विज्ञेयश्छिद्रन्तस्य सदा भवेत् ॥ १३ ॥

धनक्षेत्रसुतादीनां तस्यहानिस्तथाभवेत् । रामेश्वरमहालिङ्गे सकृद्दृष्टे मुनीश्वराः ॥
किं काश्या गयया किंवाप्रयागेणापिकिंफलम् । दुर्लभंप्राप्यमानुष्यंमानवायेऽत्र भूतले
रामनाथमहालिङ्गं नमस्यन्त्यर्चयन्ति च । जन्मतेषां हि सफलं ते कृतार्थाश्चनेतरे
रामेश्वरमहालिङ्गे पूजितेवास्मृतेऽपिवा । विष्णुनाब्रह्मणाकिंवाशक्रेणाप्यखिलामरैः
रामनाथमहालिङ्गं भक्तियुक्ताश्च ये नराः । तेषां प्रणामस्मरणपूजायुक्तास्तु ये नराः
न ते पश्यन्तिदुःखानिनैवयान्ति यमालयम् । ब्रह्महत्यासहस्राणिसुरापानायुतानिच
दृष्टे रामेश्वरे देवेविलयं यान्तिकृत्स्नशः । ये वाञ्छन्तिसदाभोगंराज्यंचत्रिदशालये
रामेश्वरमहालिङ्गं ते नमन्तु सकृन्मुदा । यानिकानि च पापानि जन्मकोटिकृतान्यपि
तानिरामेश्वरेदृष्टेविलयंयान्तिसद्गतिम् । सम्पर्कात्कौतुकाल्लोभाद्भयाद्वापिचसंस्मरन्
रामेश्वरमहालिङ्गं नेहामुत्र च दुःखभाक् । रामेश्वरमहालिङ्गं कीर्तयन्नर्चयन्नपि ॥ २३॥
अवश्यं रुद्रसारूप्यंलभतेनात्रसंशयः । यथैधांसिसमिद्धोऽग्निर्भस्मसात्कुरुतेक्षणात्
तथा पापानिसर्वाणि रामेश्वरविलोकिनाम् । रामेश्वरमहालिङ्गभक्तिरष्टविधास्मृता
तद्भक्तजनवात्सल्यं तत्पूजापरितोषणम् । स्वयंतत्पूजनं भक्त्या तदर्थे देहचेष्टितम्
तन्माहात्म्यकथानांच श्रवणेष्वादरस्तथा । स्वरेनेत्रशरीरेषु विकारस्फुरणं तथा
रामेश्वरमहालिङ्गस्मरणं सन्ततं तथा । रामेश्वरमहालिङ्गमाश्रित्यैवोपजीवनम् ॥
एवमष्टविधाभक्तिर्यस्मिन्म्लेच्छेऽपिविद्यते । सएवमुक्तिक्षेत्राणांदायभाक्परिकीर्त्यते
भक्त्या त्वनन्ययामुक्तिर्ब्रह्मज्ञानेननिश्चिता । वेदान्तशास्त्रश्रवणाद्यतीनामूर्ध्वरेतसाम्
सा च मुक्तिर्विनाज्ञानं दर्शनश्रवणोद्भवम् । यत्राश्रमंविना विप्राविरक्तिं च विना तथा

सर्वेषां चैव वर्णानामखिलाश्रमिणामपि । रामेश्वरमहालिङ्गदर्शनादेव केवलात्
अपुनर्भवदामुक्तिर्भविष्यत्यविलम्बिता । कृमिकीटाश्च देवाश्च मुनयश्च तपोधनाः ॥
तुल्यारामेश्वरक्षेत्रे रामनाथप्रसादतः । पापं कृतं मयानेकमिति माक्रियतां भयम् ॥
मा गर्वः क्रियतां पुण्यंमयाकारीति वा जनैः । रामेश्वरमहालिङ्गेसाम्बरुद्रेविलोकिते

न न्यूना नाधिकाश्च स्युः किन्तु सर्वे जनाः समाः ।
रामेश्वरमहालिङ्गं यः पश्यति स भक्तिकम् ॥ ३६ ॥

न तेन तुल्यतामेति चतुर्वेद्यपि भूतले । रामेश्वरमहालिङ्गे भक्तोयः श्वपचोऽपि सन्
तस्मै दानानिदेयानिनान्यस्मैचत्रयीविदे । या गतिर्योगयुक्तानांमुनीनामूर्ध्वरेतसाम्
सा गतिः सर्वजन्तूनां रामेश्वरविलोकिनाम् । रामनाथशिवक्षेत्रेयेवसन्तिनराद्विजाः
ते सर्वे पञ्चवक्त्राःस्युश्चन्द्रालङ्कृतमस्तकाः । नागाभरणसंयुक्तस्तथैववृषभध्वजाः
त्रिनेत्रा भस्मदिग्धाङ्गाः कपालकृतशेखराः । साक्षात्साम्बमहादेवा भवेयुर्नात्रसंशयः
रामनाथशिवक्षेत्रं ये व्रजन्ति नरा मुदा । पदेपदेऽश्वमेधानां प्राप्नुयुः सुकृतानि ते
रामसेतुं समाश्रित्य रामनाथस्यतुष्टये । ददाति ग्राममेकं यो ब्राह्मणाय सभक्तिकम्
तेन भूः सकलादत्ता सशैलवनकानना । पत्रं पुष्पंफलं तोयं रामनाथाय यो नरः ॥
भक्त्या ददातितं रक्षेद्रामनाथो ह्यहर्निशम् । रामनाथमहालिङ्गे साम्बेकारुणिकेशिवे
अत्यन्तदुर्लभा भक्तिस्तत्पूजाप्यतिदुर्लभा । स्तोत्रंचदुर्लभंप्रोक्तंस्मरणंचातिदुर्लभम्
रामनाथेश्वरंलिङ्गं महादेवं त्रिलोचनम् । शरणं ये प्रपद्यन्ते भक्तियुक्तेन चेतसा ॥
लाभस्तेषां जयस्तेषामिहलोके परत्रच । रामनाथमहालिङ्गविषया यस्य शेमुषी ॥
दिवारात्रं च भवति स वै धन्यतरो भुवि । रामनाथेश्वरंलिङ्गं यो न पूजयते शिवम्
नायं भुक्तेश्चमुक्तेश्च राज्यानामपि भाजनम् । रामेश्वरमहालिङ्गं यः पूजयतिभक्तितः
भुक्तिमुक्त्योश्च राज्यानामसौ परमभाजनः । रामनाथार्चनसमं नाधिकंपुण्यमस्तिवै
रामनाथेश्वरंलिङ्गं द्वेष्टि यो मोहमास्थितः । ब्रह्महत्यायुतंतेन कृतंनरककारणम् ॥
तत्संभाषणमात्रेण मानवो नरकं व्रजेत् । रामनाथपरादेवा रामनाथपरामखाः ॥
रामनाथपराः सर्वे तस्माद्रन्यन्नविद्यते । अतः सर्वंपरित्यज्य रामनाथं समाश्रयेत् ॥

रामनाथमहालिङ्गं शरणं याति चेन्नरः । दौर्मत्यं तस्यनास्त्येवशिवलोकंच यास्यति
सर्वयज्ञतपोदानतीर्थस्नानेषु यत्फलम् । तत्फलंकोटिगुणितं रामनाथस्य सेवया ॥
रामनाथेश्वरंलिङ्गं चिन्तयन्घटिकाद्वयम् । कुलैकविंशमुद्धृत्य शिवलोके महीयते ॥
दिनमेकं तु यः पश्येद्रामनाथं महेश्वरम् । इहैव धनवान्भूत्वा सोऽन्ते रुद्रश्चजायते ॥
यः स्मरेत्प्रातरुत्थाय रामनाथं महेश्वरम् । अनेनैव शरीरेण सशिवो वर्तते भुवि ॥
रामनाथमहालिङ्गद्रष्टुर्दर्शनमात्रतः । अन्येषां प्राणिनांपापं तत्क्षणादेव नश्यति ॥
रामनाथेश्वरंलिङ्गंमध्याह्नेयस्तुपश्यति । सुरापानसहस्राणितस्यनश्यन्तितत्क्षणात्
सायंकाले पश्यति यो रामनाथंसभक्तिकम् । गुरुस्त्रीगमनोत्पन्नपातकंतस्यनश्यति

सायं कालेमहास्तोत्रैः स्तौति रामेश्वरं तु यः ।
स्वर्णस्तेयसहस्राणि तस्य नश्यन्ति तत्क्षणात् ॥ ६३ ॥

स्नानं च धनुषः कोटौ रामनाथस्य दर्शनम् । इतिलभ्येतत्वैपुंसांकिंगङ्गाजलसेवया
रामनाथमहालिङ्गसेवयायन्नलभ्यते । तदन्यद्धर्मजालेन नैवलभ्येत कर्हिचित् ॥
रामनाथंमहालिङ्गं यः कदापि न पश्यति । संकरः स तु विज्ञेयो नपितुर्बीजसम्भवः
रामनाथेतिशब्दं यस्त्रिःपठेत्प्रातरुत्थितः । तस्यपूर्वदिनोत्पन्नपातकंनश्यतिक्षणात्
रामनाथेमहालिङ्गे भक्तरक्षणदीक्षिते । भोजनाविद्यमानेऽपि याचनाः किंप्रयास्यथ ॥
रामनाथमहालिङ्गे प्रसन्ने करुणानिधौ । नश्यन्ति सकलाःक्लेशायथासूर्योदयेहिमाः
प्राणोत्क्रमणवेलायां रामनाथंस्मरेद्यदि । जन्मनेऽसौ न कल्पेतभूयःशङ्करतामियात्
रामनाथमहादेव! मां रक्षकरुणानिधे !। इति यः सततं ब्रूयात्कलिनासौ न बाध्यते
रामनाथजगन्नाथ! धूर्जटे! नीललोहित !। इति यःसततंब्रूयाद्बाध्यतेऽसौ न मायया
नीलकण्ठमहादेव! रामेश्वरसदाशिव !। इति ब्रुवन्सदाजन्तुर्नैवकामेन बाध्यते ॥ ७३
रामेश्वर ! यमाराते ! कालकूटविषादन ! । इतीरयञ्जनोनित्यं न क्रोधेन प्रपीड्यते ॥
रामनाथालयं यस्तु दारुभिः कुरुतेनरः । सपुमान्स्वर्ग माप्नोति त्रिकोटिकुलसंयुतः

इष्टकाभिस्तु यः कुर्यात्स वैकुण्ठमवाप्नुयात् ।
शिलाभिः कुरुते यस्तु स गच्छेद्ब्रह्मणः पदम् ॥ ७६ ॥

स्फटिकादिशिलाभेदैः कुर्वन्नस्यालयञ्जनः । शिवलोकमवाप्नोतिविमानवरमास्थितः

रामनाथालयं ताम्रैः कुर्वन्भक्तिपुरःसरम् ।
शिवसामीप्यमाप्नोति शिवस्यार्द्धासनस्थितः ॥ ७८ ॥

रामेश्वरालयं रूप्यैःकुर्वन्वैमानवो मुदा । शिवसारूप्यमाप्नोति शिववन्मोदते सदा
रामनाथालयंहेम्नायःकरोति सभक्तिकम् । सनरोमुक्तिमाप्नोतिशिवसायुज्यरूपिणीम्
रामनाथालयंहेम्ना धनाढ्यःकुरुते नरः । मृदा दरिद्रःकुरुते तयोः पुण्यंसमंस्मृतम्
रामनाथमहालिङ्गस्नानकालेद्विजोत्तमाः । त्रिसन्ध्यं गेयनृत्तेच मुखवाद्यैश्च काहलम्
वाद्यान्यन्यानिकुरुते यःपुमान्भक्तिपूर्वकम् । समहापातकैर्मुक्तो रुद्रलोकेमहीयते ॥
योऽभिषेकस्य समये रामनाथस्य शूलिनः । रुद्राध्यायं च चमकं तथापुरुषसूक्तकम्
त्रिसुपर्णं पञ्चशान्ति पावमान्यादिकं तथा । जपेत्प्रीतियुतो विप्रा नरकंन समश्नुते
गवांक्षीरेण दध्ना च पञ्चगव्यैर्घृतैस्तथा । रामनाथमहालिङ्गस्नानं नरकनाशनम्
रामनाथमहालिङ्गं घृतेनस्नापयेच्च यः । कल्पजन्मार्जितं पापं तत्क्षणादेव नश्यति
रामनाथमहालिङ्गं गोक्षीरैः स्नापयन्नरः । कुलैकविंशमुत्तीर्य शिवलोके महीयते ॥
रामनाथमहालिङ्गं दध्नासंस्नापयन्नरः । सर्वपापविनिर्मुक्तो विष्णुलोके महीयते ॥
अभ्यङ्गन्तिलतैलेन रामेश्वरशिवस्य यः । करोति हि सकृद्भक्त्या स कुबेरगृहेवसेत्
रामनाथमहालिङ्गे स्नानमिक्षुरसेन यः । सकृदप्याचरेद्भक्त्या चन्द्रलोकं समश्नुते ॥
लिकुचाम्ररसोत्पन्नसारेण स्नापयन्नरः । रामनाथमहालिङ्गं पितृलोकं समश्नुते ॥
नालिकेरजलैस्नानं रामनाथमहेश्वरे । ब्रह्महत्यादिपापानां नाशनं परिकीर्तितम् ॥
रामनाथमहालिङ्गं रम्भापक्वैर्विमर्दयन् । विनाश्यसकलं पापं वायुलोके महीयते ॥
वस्त्रपूतेन तोयेन रामनाथं महेश्वरम् । स्नापयन्वारुणं लोकमाप्नोति द्विजसत्तमाः
चन्दनोदकधाराभी रामनाथं महेश्वरम् । स्नापयेत्पुरुषो विप्रा गन्धर्वलोकमाप्नुयात्
पुष्पवासिततोयेन हेमसंपृक्तवारिणा । दुग्धसम्पृक्ततोयेन स्नानाद्रामेश्वरस्य तु ॥६७
महेन्द्रासनमारुह्य तेनैव सह मोदते । पाटलोत्पलकह्लारपुन्नागकरवीरकैः ॥ ६८ ॥
वासितैर्वारिभिर्विप्रा रामेश्वरमहेश्वरम् । अभिषिच्य महद्भिश्च पातकैःस विमुच्यते

यानि चान्यानि पुष्पाणि सुरभीणि महान्ति च ।

तद्गन्धवासितैस्तोयैरभिषिञ्च्य दयानिधिम् ॥ १०० ॥

रामेश्वरमहालिङ्गं शिवलोकेमहीयते । एलाकर्पूरलामज्जवासितैःशुद्धवारिभिः ॥
रामेश्वरमहालिङ्गमभिषिञ्च्यविशुद्धधीः । आग्नेयंलोकमासाद्यसर्वान्कामान्समश्नुते
रामनाथाभिषेकार्थं मृद्घटान्यःप्रयच्छति । इहलोके शतायुःस्यात्सर्वकामसमृद्धिमान्
ताम्रकुम्भप्रदानेन देवेन्द्रत्वमवाप्नुयात् । रौप्यकुम्भप्रदानेन ब्रह्मलोकंसमश्नुते ॥
हेमकुम्भप्रदानेन शिवलोकेमहीयते । रत्नकुम्भप्रदानेन शिवसामीप्यमश्नुते ॥ १०५

रामनाथाभिषेकार्थं नैवेद्यार्थमपि द्विजाः ।

यो गां पयस्विनीं दद्यात्सोऽश्वमेधफलं लभेत् ॥ १०६ ॥

प्राप्नोति शिवलोकं च देहान्तेशिववेषभाक् । रामसेतौधनुष्कोटौरामनाथेत्युदीर्ययः
यत्रक्वाप्याचरेत्स्नानं सेतुस्नानफलंलभेत् । सुधाप्रलिप्तं यःकुर्याद्रामनाथशिवालयम्
तत्पुण्यं गदितुं नाऽहं शक्तोवर्षशतादपि । नवीकरोति योमर्त्योरामनाथशिवालयम्
कर्तुःशतगुणं ज्ञेयंयस्यपुण्यफलंद्विजाः । छिन्नभिन्नंचयःसम्यक् रामनाथशिवालयम्
करोतिभक्त्या पुरुषो ब्रह्महत्यायुतंदहेत् । रामनाथस्य पुरतो दीपानारोपयन्मुदा ॥
अविद्यापटलं भित्त्वायाति ब्रह्मसनातनम् । घृतंतैलं तथामुद्गं शर्करास्तण्डुलान्गुडान्
प्रयच्छन् रामनाथाय देवेन्द्रपदमश्नुते । रामनाथमहालिङ्गदर्शनादर्चनात्स्मृतेः ॥ ११३

स्पर्शनादपि पापानि विलयं यान्ति तत्क्षणात् ।

रामनाथाय योदद्यान्महाघण्टां च दर्पणम् ॥ ११४ ॥

विमानशतसंभोगैश्चिरं शिवपुरे वसेत् । भेरीमृदङ्गपटहनिस्साणरमुरजादिकम् ॥

वंशकांस्यादिवादित्रं तथावाद्यान्तराणि च ।

प्रयच्छन् रामनाथाय महादेवाय सादरम् ॥ ११६ ॥

सविमानैर्महाभोगैर्वाद्यघोषसमन्वितैः । अनेकयुगपर्यन्तं शिवलोके महीयते ॥ ११७
रामनाथं समुद्दिश्य यद्दत्तं स्वल्पमादरात् । तदनन्तफलं दातुः परत्र भवति ध्रुवम्
रामेश्वरे महाक्षेत्रे रामनाथस्य सन्निधौ । वसन्मुक्तिमवाप्नोतिपुनरावृत्तिवर्जिताम्

आयुःप्रयाति त्वरितं त्वरितं याति यौवनम् ।

त्वरितं सम्पदो यान्ति दारपुत्रादयस्तथा ॥ १२० ॥

राजादिभिर्धनं बाध्यं गृहक्षेत्रादिकं तथा । सर्वं च क्षणिकं विप्रागृहोपकरणादिकम्
तस्मात्सर्वं परित्यज्य संसारस्योपलालनम् । रामेश्वरमहालिङ्गमापन्नार्तिहरंनृणाम्

श्रोतव्यं कीर्तितव्यं च स्मर्तव्यं च मनीषिभिः ।

रामेश्वराय देवाय यो वै ग्रामान्प्रयच्छति ॥ १२३ ॥

सहिप्रारब्धदेहान्ते शिव एव प्रजायते । पात्राणामुत्तमं पात्रं रामनाथो महेश्वरः ॥
तस्मैदत्त्वा द्विजाःसत्यमनन्तं सुखमश्नुते । रामनाथमहालिङ्गदर्शनावधिपातकम् ॥
दत्त्वा तस्मै जनःकिञ्चित्सार्वभौमोभवेद्ध्रुवम् । तालवृन्तंध्वजंछत्रंचन्दनंगुग्गुलंतथा
ताम्रकांस्यादिरजतहेमरत्नमयान्घटान् । प्रयच्छन्त्यभिषेकार्थं रामनाथस्य ये नराः
भूमण्डलाधिपतयो जायन्ते ते भवान्तरे । रामनाथस्यपूजार्थं पुष्पाण्युत्पादयन्ति ये
अश्वमेधादियागानां फलान्यद्धाप्नुवन्तिते । रामेश्वरे महालिङ्गे पूजिते नमितेस्मृते
श्रुतेदृष्टे च विप्रेन्द्रा दुर्लभं नास्ति किञ्चन । रामनाथमहालिङ्गंसेवितुंयःपुमान्व्रजेत्
तं दृष्ट्वाभयमाप्नोति तस्यपापौघमाशुवै । रामनाथो महादेवो दृष्टो यदि भवेन्नृभिः ॥
किं वेदैःकिमु वाशास्त्रैःकिंवा तीर्थनिषेवणैः । चन्दनंकुङ्कुमंकोष्ठंकस्तूरीगुग्गुलंतथा
मृगनाभिंचसरलं दद्याद्रामेश्वराय यः । सभूमाविह जायेत धनाढ्यो वेदपारगः ॥१३३
मुक्ताभरणवस्त्राणि महार्हाणिददातियः । रामनाथायदेवाय नासौ दौर्गत्यमाप्नुयात्

रामनाथमहालिङ्गं गङ्गातोयैःसमाहृतैः ।

योऽभिषिञ्चत्यसौ पूज्यः शिवस्यापि न संशयः ॥ १३५ ॥

यावन्नयाति मरणं यावन्नाक्रमतेजरा । यावन्नेन्द्रियवैकल्यंभवत्येव द्विजोत्तमाः ॥
तावदेव महादेवो रामनाथोमुमुक्षुभिः । वन्द्यःपूज्यश्च मन्तव्यः स्तुत्यश्चसततं शिवः
रामेश्वरमहालिङ्गपूजातुल्यो न विद्यते । धर्मःसर्वपुराणेषु धर्मशास्त्रेषु वै तथा ॥१३८

रामनाथेश्वरं देवं महाकारुणिकं प्रभुम् ।

भक्त्या भजन्ति ये नित्यं ते भूलोके सुखान्विताः ॥ १३९ ॥

भुक्त्वा भोगान्बहुसुखान्पुत्रदारयुता भृशम् ।
एतच्छरीरपातान्ते मुक्तिं यास्यन्ति शाश्वतीम् ॥ १४० ॥

श्रीसूत उवाच

एवंवः कथितं विप्रा रामनाथस्य वैभवम् । यस्त्वेतच्छृणुयान्नित्यंपठतेचसभक्तिकम्
स रामनाथसेवायाः फलमाप्नोत्यनुत्तमम् । धनुष्कोटिमहातीर्थस्नानपुण्यञ्चयास्यति

इति श्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यांसंहितायां तृतीये ब्रह्मखण्डे
सेतुमाहात्म्ये रामनाथप्रशंसानामत्रिचत्वारिंशोऽध्यायः ॥ ४३ ॥

चतुश्चत्वारिंशोऽध्यायः

रामनाथलिङ्गप्रतिष्ठाविधिवर्णनम्

ऋषय ऊचुः

सर्ववेदार्थतत्त्वज्ञ! पुराणार्णवपारग !। व्यासपादाम्बुजद्वन्द्वनमस्कारहृताशुभ !॥ १ ॥
पुराणार्थोपदेशेन सर्वप्राण्युपकारक । त्वयाह्यनुगृहीताःस्म पुराणकथनाद्वयम् ॥ २
अधुनासेतुमाहात्म्यकथनात्सुतरां मुने !। वयं कृतार्थाःसञ्जाता व्यासशिष्यमहामते!
यथा प्रातिष्ठिपल्लिङ्गं रामोदशरथात्मजः । तच्छ्रोतुंवयमिच्छामस्त्वमिदानींवदस्वनः

श्रीसूत उवाच

यदर्थं स्थापितंलिङ्गं गन्धमादनपर्वते । रामचन्द्रेण विप्रेन्द्रास्तदिदानीं ब्रवीमि वः ॥५
हृतभार्यो वनाद्रामो रावणेन बलीयसा। कपिसेनायुतोवीरः ससौमित्रिर्महाबलः ॥
महेन्द्रं गिरिमासाद्य व्यलोकयत वारिधिम् । तस्मिन्नपारे जलधौकृत्वासेतुंरघूद्वहः
तेन गत्वा पुरीं लङ्कां रावणेनाभिरक्षिताम् ।
अस्तङ्गते सहस्रांशौ पौर्णमास्यां निशामुखे ॥ ८ ॥
रामःससैनिकोविप्राः सुवेलागिरिमारुहत् । ततःसौधस्थितं रात्रौ दृष्ट्वालङ्केश्वरं बली

सूर्यपुत्रोऽस्य मुकुटं पातयामासभूतले । राक्षसो भग्नमुकुटः प्रविवेश गृहोदरम् ॥
गृहं प्रविष्टेलङ्केशे रामःसुग्रीवसंयुतः । सानुजःसेनयासार्द्धमवरुह्य गिरेस्तटात् ॥
सेनां न्यवेशयद्वीरो रामोलङ्कासमीपतः । ततो निवेशमानांस्तान्वानरान्रावणानुगाः
अभिजग्मुर्महाकायाः सायुधाःसहसैनिकाः ।
पर्वणः पूतनाजृम्भः खरःक्रोधवशोहरिः ॥ १३ ॥
प्ररुजश्चारुजश्चैव प्रहस्तश्चेतरे तथा । ततोऽभिपततां तेषामदृश्यानां दुरात्मनाम्
अन्तर्धानवधंतत्र चकारस्म विभीषणः । तेदृश्यमाना बलिभिर्हरिभिर्दूरपातिभिः ॥
निहतासर्वतश्चैते न्यपतन्वै गतासवः । अमृष्यमाणःसबलो रावणो निर्ययावथ ॥
व्यूह्यतान्वानरान्सर्वान्न्यवारयत सायकैः । राघवस्त्वथ निर्यायव्यूढानीकोदशाननम्
प्रत्ययुध्यतवेगेन द्वन्द्वयुद्धमभूत्तदा । युयुधेलक्ष्मणेनाथ इन्द्रजिद्रावणात्मजः ॥ १८
विरूपाक्षेणसुग्रीवस्तारेयेणापि खर्वटः । पौण्ड्रेणच्च नलस्तत्र पुढशः पनसेन च ॥
अन्येऽपि कपयो वीरा राक्षसैर्द्वन्द्वमेत्यतु । चक्रुर्युद्धं सतुमुलं वीराणां भयवर्द्धनम् ॥
अथरक्षांसि भिन्नानि वानरैर्भीमविक्रमैः । प्रदुद्रुवूरणादाशु लङ्कां रावणपालिताम्
भग्नेषु सर्वसैन्येषु रावणप्रेरितेनवै । पुत्रेणेन्द्रजितायुद्धे नागास्त्रैरतिदारुणैः ॥ २२॥
बद्धौदाशरथीविप्रा उभौ तौ रामलक्ष्मणौ । मोचितौ वैनतेयेन गरुडेन महात्मना ॥
तत्रप्रहस्तस्तरसा समभ्येत्य विभीषणम् । गदया ताडयामास विनद्यरणकर्कशः ॥
सतयाभिहतो धीमान्गदया भीमवेगया । नाकम्पत महाबाहुर्हिमवानिवसुस्थितः
ततः प्रगृह्यविपुलामष्टघण्टांविभीषणः । अभिमन्त्र्य महाशक्तिं चिक्षेपास्यशिरःप्रति
पतन्त्या स तयावेगाद्राक्षसोऽशनिनायथा । हृतोत्तमाङ्गो ददृशे वातरुग्णइवद्रुमः ॥
तं दृष्ट्वा निहतं संख्ये प्रहस्तं क्षणदाचरम् । अभिदुद्रावधूम्राक्षो वेगेन महताकपीन्
कपिसैन्यं समालोक्य विद्रुतं पवनात्मजः । धूम्राक्षमाजघानाशु शरेण रणमूर्धनि
धूम्राक्षं निहतं दृष्ट्वा हतशेषानिशाचराः । सर्वं राज्ञेयथावृत्तं रावणाय न्यवेदयन् ॥
ततःशयानं लङ्केशः कुम्भकर्णमबोधयत् । प्रबुद्धं प्रेषयामास युद्धाय स च रावणः ॥
आगतं कुम्भकर्णं तं ब्रह्मास्त्रेण तु लक्ष्मणः । जघान समरेक्रुद्धो गतासुर्न्यपतच्चसः

दूषणस्यानुजौ तत्र वज्रवेगप्रमाथिनौ । हनुमन्नीलनिहतौ रावणप्रतिमौ रणे ॥३३ ॥
वज्रदंष्ट्रं समवधीद्विश्वकर्मसुतोनलः । अकम्पनं चान्यहनत्कुमुदो वानरर्षभः ॥ ३४ ॥
षष्ठ्यां पराजितो राजा प्राविशच्च पुरीं ततः ।
अतिकायो लक्ष्मणेन हतश्च त्रिशिरास्तथा ॥ ३५ ॥
सुग्रीवेण हतौ युद्धे देवान्तकनरान्तकौ । हनूमता हतौयुद्धे कुम्भकर्णसुतावुभौ
विभीषणेन निहतो मकराक्षःखरात्मजः । ततइन्द्रजितंपुत्रं चोदयामास रावणः ॥३७
इन्द्रजिन्मोहयित्वातौ भ्रातरौ रामलक्ष्मणौ । घोरैःशरैरङ्गदेन हतवाहोदिविस्थितः
कुमुदाङ्गदसुग्रीवनलजाम्बवदादिभिः । सहितावानराःसर्वे न्यपतंस्तेन घातिताः ॥
एवं निहत्य समरे ससैन्यौ रामलक्ष्मणौ । अन्तर्दधे तदाव्योम्नि मेघनादो महाबलः
ततो विभीषणो राममिक्ष्वाकुकुलभूषणम् । उवाचप्राञ्जलिर्वाक्यं प्रणम्य च पुनःपुनः
अयमम्भोगृहीत्वा तु राजराजस्य शासनात् ।
गुह्यकोऽभ्यागतो राम त्वत्सकाशमरिन्दम !॥ ४२ ॥
इदमम्भः कुबेरस्ते महाराज प्रयच्छति । अन्तर्हितानां भूतानां दर्शनार्थं परंतप ॥ ४३
अनेन स्पृष्टनयनो भूतान्यन्तर्हितान्यपि । भवान्द्रक्ष्यति यस्मैच भवानेतत्प्रदास्यति
सोऽपि द्रक्ष्यति भूतानि वियत्यन्तर्हितानि वै ।
तथेतिरामस्तद्वारि प्रतिगृह्याथ सत्कृतम् ॥ ४५ ॥
चकारनेत्रयोःशौचं लक्ष्मणश्चमहाबलः । सुग्रीवजाम्बवन्तौच हनुमानङ्गदस्तथा ॥
मैन्दद्विविदनीलाश्च ये चान्ये वानरास्तथा । ते सर्वे रामदत्तेन वारिणाशुद्धचक्षुषः
आकाशेऽन्तर्हितं वीरमपश्यन् रावणात्मजम् ।
ततस्तमभिदुद्राव सौमित्रिर्दृष्टिगोचरम् ॥ ४८ ॥
ततोजघान संक्रुद्धो लक्ष्मणःकृतलक्षणः । कुबेरमिश्रितजलैः पवित्रीकृतलोचनः ॥
ततः समभवद्युद्धं लक्ष्मणेन्द्रजितोर्महत् । अतीवचित्रमाश्चर्यं शक्रप्रह्लादयोरिव ॥
ततस्तृतीयदिवसे यत्नेनमहताद्विजाः । इन्द्रजिन्निहतोयुद्धे लक्ष्मणेन बलीयसा ॥
ततोमूलबलंसर्वं हतं रामेणधीमता । अथक्रुद्धो दशग्रीवःप्रियपुत्रे निपातिते ॥ ५२ ॥

निर्ययौ रथमास्थाय नगराद्बहुसैनिकः । रावणोजानकींहन्तुमुद्युक्तोविन्ध्यवारितः
ततोहर्यश्वयुक्तेन रथेनादित्यवर्चसा । उपतस्थे रणेरामं मातलिःशक्रसारथिः ॥ ५४
ऐन्द्रं रथं समारुह्य रामो धर्मभृतां वरः । शिरांसि राक्षसेन्द्रस्यब्रह्मास्त्रेणावधीद्रणे
ततो हतदशग्रीवं रामंदशरथात्मजम् । आशीर्भिर्जययुक्ताभिर्देवाः सर्षिपुरोगमाः ॥
तुष्टुवुः परिसन्तुष्टाः सिद्धविद्याधरास्तथा । रामं कमलपत्राक्षं पुष्पवर्षैरवाकिरन्
रामस्तैः सुरसंघातैःसहितः सैनिकैर्वृतः । सीतासौमित्रिसहितःसमारुह्यचपुष्पकम्
तथाभिषिच्य राजानं लङ्कायां च विभीषणम् ।
कपिसेनावृतो रामो गन्धमादनमन्वगात् ॥ ५६ ॥
परिशोध्य च वैदेहीं गन्धमादनपर्वते । रामं कमलपत्राक्षं स्थितवानरसंवृतम् ॥
हतलङ्केश्वरं वीरं सानुजं स विभीषणम् । सभार्यं देववृन्दैश्च सेवितं मुनिपुङ्गवैः ॥
मुनयोऽभ्यागतंद्रष्टुंदण्डकारण्यवासिनः । अगस्त्यन्तेपुरस्कृत्यतुष्टुवुर्मैथिलीपतिम्

मुनय ऊचुः

नमस्तेरामचन्द्राय लोकानुग्रहकारिणे । अरावणजगत्कर्तुमवतीर्णाय भूतले ॥ ६३॥
ताटिकादेहसंहर्त्रे गाधिजाध्वररक्षिणे । नमस्तेजितमारीच! सुबाहुप्राणहारिणे ॥
अहल्यामुक्तिसंदायिपादपङ्कजरेणवे । नमस्ते हरकोदण्डलीलाभञ्जनकारिणे ॥
नमस्तेमैथिलीपाणिग्रहणोत्सवशालिने । नमस्ते रेणुकापुत्रपराजयविधायिने ॥
सहलक्ष्मणसीताभ्यां कैकेय्यास्तु वरद्वयात् । सत्यं पितृवचः कर्तुंनमोवनमुपेयुषे ॥
भरतप्रार्थनादत्तपादुकायुगलाय ते । नमस्ते शरभङ्गस्य स्वर्गप्राप्त्यैकहेतवे ॥ ६८ ॥
नमोविराधसंहर्त्रे गृध्रराजसखाय ते । मायामृगमहाक्रूरमारीचाङ्गविदारिणे ॥ ६९ ॥
रावणापहृतासीता युद्धत्यक्तकलेवरम् । जटायुषं तु संदह्य तत्कैवल्यप्रदायिने ॥
नमः कबन्धसंहर्त्रे शबरीपूजिताङ्घ्रये । प्राप्तसुग्रीवसख्याय कृतबालिवधाय ते ॥
नमः कृतवतेसेतुं समुद्रे वरुणालये । सर्वराक्षससंहर्त्रे रावणप्राणहारिणे ॥
संसारराम्बुधिसंतारपोतपादाम्बुजायते । नमोभक्तार्तिसंहर्त्रे सच्चिदानन्दरूपिणे ॥
नमस्तेरामभद्राय जगतामृद्धिहेतवे । रामादिपुण्यनामानि जपतांपापहारिणे ॥ ७४ ॥

नमस्ते सर्वलोकानांसृष्टिस्थित्यन्तकारिणे । नमस्तेकरुणामूर्ते ! भक्तरक्षणदीक्षित!
ससीताय नमस्तुभ्यं विभीषणसुखप्रद ! । लङ्केश्वरवधाद्राम! पालितं हि जगत्त्वया
रक्षरक्ष जगन्नाथ! पाह्यस्माञ्जानकीपते! । स्तुत्वैवंमुनयःसर्वेतूष्णींतस्थुर्द्विजोत्तमाः

श्रीसूत उवाच

य इमंरामचन्द्रस्यस्तोत्रंमुनिभिरीतम् । त्रिसन्ध्यंपठते भक्त्याभुक्तिमुक्तिञ्चविन्दति
प्रयाणकाले पठतो न भीतिरुपजायते । एतत्स्तोत्रस्य पठनाद्भूतवेतालकाइह ॥
नश्यन्ति रोगानश्यन्तिनश्यतेपापसञ्चयः । पुत्रकामोलभेत्पुत्रंकन्याविन्दतिसत्पतिम्

मोक्षकामो लभेन्मोक्षं धन कामोधनं लभेत् ।
सर्वान्कामानवाप्नोति पठन्भक्त्या त्विमं स्तवम् ॥ ८१ ॥

ततो रामो मुनीन्प्राह प्रणम्य च कृताञ्जलिः । अहं विशुद्धयेप्राप्यःसकलैरपिमानवैः
मद्दृष्टिगोचरोजन्तुर्नित्यं मोक्षस्यभाजनम् । तथापि मुनयोनित्यंभक्तियुक्तेनचेतसा

स्वात्मलाभेन सन्तुष्टान्साधून्भूतसुहृत्तमान् ।
निरहंकारिणः शान्तान्नमस्याम्यूर्ध्वरेतसः ॥ ८४ ॥
यस्माद् ब्रह्मण्यदेवोऽहमतो विप्रान्भजे सदा ।
युष्मान्पृच्छाम्यहं किञ्चित्तद्वदध्वं विचार्य तु ॥ ८५ ॥

रावणस्यवधाद्विप्रा यत्पापम्ममवर्तते । तस्यमेनिष्कृतिम्ब्रूत पौलस्त्यवधजस्य हि

यत्कृत्वा तेन पापेन मुच्येऽहम्मुनिपुङ्गवाः ।

मुनय ऊचुः

सत्यव्रतजगन्नाथ ! जगद्रक्षाधुरन्धर !॥ ८७ ॥

सर्वलोकोपकारार्थं कुरु राम शिवार्चनम् । गन्धमादनशृङ्गेऽस्मिन्महापुण्येविमुक्तिदे
शिवलिङ्गप्रतिष्ठां त्वं लोकसंग्रहकाम्यया । कुरु राम दशग्रीववधदोषापनुत्तये ॥
लिङ्गस्थापनजम्पुण्यंचतुर्वक्त्रोऽपिभाषितुम् । न शक्नोतिनरोवक्तुंकिम्पुनर्मनुजेश्वर
यत्त्वयास्थाप्यते लिङ्गंगन्धमादनपर्वते । अस्यसंदर्शनम्पुंसांकाशीलिङ्गावलोकनात्

अधिकं कोटिगुणितम्फलवत्स्यान्न संशयः ।

तव नाम्नात्विदं लिङ्गं लोके ख्यातिं समश्नुताम् ॥ ९२ ॥

नाशकन्पुण्यपापाख्यकाष्ठानां दहनोपमम् । इदं रामेश्वरं लिङ्गं ख्यातंलोकेभविष्यति
मा विलम्बं कुरुष्वातो लिङ्गस्थापनकर्मणि । रामचन्द्र! महालिङ्ग!करुणापूर्णविग्रह

श्रीसूत उवाच

इति श्रुत्वा वचोरामो मुनीनान्तुमुनीश्वराः । पुण्यकालंविचार्याथद्विमुहूर्तंजगत्पतिः
कैलासम्प्रेषयामास हनुमन्तं शिवालयम् । शिवलिङ्गं समानेतुं स्थापनार्थं रघूद्वहः

राम उवाच

हनूमन्नञ्जनासूनो! वायुपुत्र महाबल! । कैलासन्त्वरितो गत्वा लिङ्गमानय माचिरम्
इत्याज्ञप्तसरामेणभुजावास्फोट्य वीर्यवान् । मुहूर्तद्वितयंज्ञात्वापुण्यकालंकपीश्वरः
पश्यतां सर्वदेवानामृषीणां च महात्मनाम् । उत्पपात महावेगश्चालयन्गन्धमादनम्
लङ्घयन्सवियन्मार्गं कैलासम्पर्वतं ययौ । नददर्श महादेवं लिङ्गरूपधरं कपिः ॥
कैलासे पर्वते तस्मिन्पुण्ये शङ्करपालिते । आञ्जनेयस्तपस्तेपे लिङ्गप्राप्त्यर्थमादरात्
प्रागग्रेषु समासीनःकुशेषुमुनिपुङ्गवाः । ऊर्ध्वबाहुर्निरालम्बोनिरुच्छ्वासोजितेन्द्रियः
प्रसादयन्महादेवं लिङ्गं लेभे समारुतिः । एतस्मिन्नन्तरेविप्रामुनिभिस्तत्त्वदर्शिभिः
अनागतं हनूमन्तं कालं स्वल्पावशेषितम् । ज्ञात्वा प्रकथितं तत्ररामम्प्रतिमहामतिम्

राम ! राम ! महाबाहो ! कालो ह्यत्येति साम्प्रतम् ।
जानक्या यत्कृतं लिङ्गं सैकतं लीलया विभो !॥ १०५ ॥

तल्लिङ्गंस्थापयस्वाद्यमहालिङ्गमनुत्तमम् । श्रुत्वैतद्वचनंरामोजानक्यासहसत्वरम्
मुनिभिः सहितःप्रीत्याकृतकौतुकमङ्गलः । ज्येष्ठेमासेसितेपक्षेदशम्याम्बुधहस्तयोः
गरानन्देव्यतीपाते कन्याचन्द्रे वृषे रवौ । दशयोगे महापुण्ये गन्धमादनपर्वते ॥
सेतुमध्ये महादेवं लिङ्गरूपधरं हरम् । ईशानं कृत्तिवसनं गङ्गाचन्द्रकलाधरम् ॥

रामो वै स्थापयामास शिवलिङ्गमनुत्तमम् ।
लिङ्गस्थम्पूजयामास राघवः साम्बमीश्वरम् ॥ ११० ॥

लिङ्गस्थः समहादेवः पार्वत्या सह शङ्करः । प्रत्यक्षमेव भगवान्दत्तवान्वरमुत्तमम् ॥

सर्वलोकशरण्याय राघवाय महात्मने । त्वयात्रस्थापितंलिङ्गं ये पश्यन्ति रघूद्वह!
महापातकयुक्ताश्च तेषाम्पापम्प्रणश्यति ।
सर्वाण्यपि हि पापानि धनुष्कोटौ निमज्जनात् ॥ ११३ ॥
दर्शनाद्रामलिङ्गस्य पातकानि महान्त्यपि । विलयं यान्ति राजेद्र! रामचन्द्रन संशयः
प्रादादेवं हि रामाय वरंदेवोऽम्बिकापतिः । तदग्रे नन्दिकेशं च स्थापयामासराघवः
ईश्वरस्याभिषेकार्थं धनुष्कोट्याथराघवः । एकंकूपन्धराम्भित्त्वाजनयामासवैद्विजाः
तस्माज्जलमुपादय स्नापयामासशङ्करम् । कोटितीर्थमितिप्रोक्तं तत्तीर्थं पुण्यमुत्तमम्
उक्तंतद्वैभवं पूर्वमस्माभिर्मुनिपुङ्गवाः । देवाश्च मुनयो नागा गन्धर्वाप्सरसां गणाः ॥
सर्वेऽपि वानरा लिङ्गमेकैकं चक्रुरादरात् ।

श्रीसूत उवाच

एवं वःकथितं चिप्रा यथा रामेण धीमता ॥ ११६ ॥
स्थापितंशिवलिङ्गंवै भुक्तिमुक्तिप्रदायकम् । इमांलिङ्गप्रतिष्ठांयः शृणोतिपठतेऽथवा
स रामेश्वरलिङ्गस्य सेवाफलमवाप्नुयात् ।
सायुज्यं च समाप्नोति रामनाथस्य वैभवात् ॥ १२१ ॥
इतिश्रीस्कान्दे महापुराणएकाशीतिसाहस्र्यांसंहितायां तृतीयेब्रह्मखण्डे
सेतुमाहात्म्ये रामनाथलिङ्गप्रतिष्ठाविधिर्नाम-
चतुश्चत्वरिंशोऽध्यायः ॥ ४४ ॥

पञ्चचत्वारिंशोऽध्यायः

रामचन्द्रतत्त्वज्ञानोपदेशवर्णनम्

श्रीसूत उवाच

एवं प्रतिष्ठिते लिङ्गे रामेणाक्लिष्टकारिणा । लिङ्गं वरं समादाय मारुतिःसहसाययौ
रामं दाशरथिं वीरमभिवाद्य समारुतिः । वैदेहीलक्ष्मणौ पश्चात्सुग्रीवं प्रणनाम च ॥
सीतासैकतलिङ्गं तत्पूजयन्तं रघूद्वहम् । दृष्ट्वाथ मुनिभिःसार्द्धं चुकोपपवनात्मजः ॥
अत्यन्तं खेदखिन्नःसन्वृथाकृतपरिश्रमः । उवाच रामं धर्मज्ञं हनूमानञ्जनात्मजः ॥ ४

हनूमानुवाच

दुर्जातोऽहं वृथा राम! लोके क्लेशाय केवलम् ।
खिन्नोऽस्मि बहुशो देव! राक्षसैः क्रूरकर्मभिः ॥ ५ ॥
मास्मसीमन्तिनीकाचिज्जनयेन्मादृशं सुतम् । यतोऽनुभूयतेदुःखमनन्तंभवसागरे ॥
खिन्नोऽस्मिसेवयापूर्वंयुद्धेनाऽपिततोऽधिकम् । अनन्तदुःखमधुना यतोमामवमन्यसे
सुग्रीवेण चभार्यार्थं राज्यार्थं राक्षसेनच । रावणावरजेन त्वं सेवितोऽसिरघूद्वह! ॥
मया निर्हेतुकं राम! सेवितोऽसि महामते! । वानराणामनेकेषु त्वयाऽऽज्ञप्तोऽहमद्यवै
शिवलिङ्गं समानेतुं कैलासात्पर्वतोत्तमात् ।
कैलासं त्वरितो गत्वा न चापश्यम्पिनाकिनम् ॥ १० ॥
तपसा प्रीणयित्वा तं साम्बं वृषभवाहनम् । प्राप्तलिङ्गो रघुपते! त्वरितःसमुपागतः
अन्यलिङ्गं त्वमधुना प्रतिष्ठाप्य तुसैकतम् । मुनिभिर्देवगन्धर्वैः साकं पूजयसेविभो!
मया नीतमिदं लिङ्गं कैलासात्पर्वताद्वृथा । अहोभारायमेदेहो मन्दभाग्यस्य जायते
भूतलस्य महाराज! जानकीरमणप्रभो! । इदं दुःखमहं सोढुं न शक्नोमि रघूद्वह! ॥
अधुना किं करिष्यामि न मे भवति सद्गतिः ।
अतः शरीरं त्यक्ष्यामि त्वयाऽहमवमानितः ॥ १५ ॥

श्रीसूत उवाच

एवंसबहुशोविप्राःक्रुशित्वापवनात्मजः । दण्डवत्प्रणतोभूमौ क्रोधशोकाकुलोऽभवत्
तं दृष्ट्वा रघुनाथोऽपि प्रहसन्निदमब्रवीत् । पश्यतां सर्वदेवानां मुनीनां कपिरक्षसाम्
सान्त्वयन्मारुतिं तत्र दुःखं चास्य प्रमार्जयन् ।

श्रीराम उवाच

सर्वं जानाम्यहं कार्यमात्मनोऽपि परस्य च ॥ १८ ॥

जातस्य जायमानस्य मृतस्यापि सदाकपे! । जायते म्रियतेजन्तुरेक एव स्वकर्मणा
प्रयातिनरकं चापि परमात्मा तु निर्गुणः । एवं तत्त्वं विनिश्चित्य शोकंमाकुरुवानर!
लिङ्गत्रयविनिर्मुक्तं ज्योतिरेकं निरञ्जनम् । निराश्रयं निर्विकारमात्मानं पश्यनित्यशः
किमर्थं कुरुषे शोकं तत्त्वज्ञानस्य बाधकम् । तत्त्वज्ञाने सदानिष्ठां कुरु वानरसत्तम!
स्वयंप्रकाशमात्मानं ध्यायस्वसततंकपे! । देहादौ ममतांमुञ्च तत्त्वज्ञानविरोधिनीम्
धर्मं भजस्वसततं प्राणिहिंसां परित्यज । सेवस्वसाधुपुरुषाञ्जहि सर्वेन्द्रियाणि च
परित्यजस्व सततमन्येषां दोषकीर्तनम् । शिवविष्णवादिदेवानामर्चां कुरु सदा कपे!
सत्यं वदस्व सततं परित्यज्य शुचं कपे! । प्रत्यग्ब्रह्मैकताज्ञानं मोहवस्तुसमुद्भतम्
शोभनाऽशोभनाभ्रान्तिः कल्पितास्मिन्यथार्थवत् ।
अध्यास्ते शोभनत्वेन पदार्थे मोहवैभवात् ॥ २७ ॥

रोगो विजायते नृणां भ्रान्तानां कपिसत्तम । रागद्वेषबलाद्बद्ध्वाधर्माधर्मवशंगताः
देवतिर्यङ्मनुष्यादिनिरयं यान्ति मानवाः । चन्दनागरुकर्पूरप्रमुखा अतिशोभनाः ॥
मलंभवन्तियत्स्पर्शात्तच्छरीरंकथंसुखम् । भक्ष्यभोज्यादयःसर्वे पदार्थाअतिशोभनाः
विष्ठाभवन्ति यत्सङ्गात्तच्छरीरं कथंसुखम् । सुगन्धिशीतलंतोयंमूत्रंयत्सङ्गमाद्भवेत्
तत्कथं शोभनं पिण्डं भवेद्ब्रूहिकपेऽधुना । अतीव धवलाःशुद्धाःपटायत्सङ्गमेन हि
भवन्ति मलिनाःस्वेदात्तत्कथं शोभनंभवेत् । श्रूयतां परमार्थोमे हनूमन्वायुनन्दन!
अस्मिन्संसारगर्तेतु किञ्चित्सौख्यंनविद्यते । प्रथमंजन्तुराप्नोतिजन्मबाल्यंततःपरम्
पश्चाद्यौवनमाप्नोति ततो वार्द्धक्यमश्नुते ।

पश्चान्मृत्युमवाप्नोति पुनर्जन्मतदश्नुते ॥ ३५ ॥

अज्ञानवैभवादेव दुःखमाप्नोति मानवः । तदज्ञाननिवृत्तौ तु प्राप्नोति सुखमुत्तमम् ॥
अज्ञानस्य निवृत्तिस्तु ज्ञानादेव न कर्मणा । ज्ञानं नाम परंब्रह्म ज्ञानं वेदान्तवाक्यजम्
तज्ज्ञानंचविरक्तस्य जायते नेतरस्यहि । मुख्याधिकारिणः सत्यमाचार्यस्यप्रसादतः
यदासर्वे प्रमुच्यन्ते कामायस्य हृदिस्थिताः । तदा मर्त्योऽमृतोऽत्रैवपरंब्रह्मसमश्नुते
जाग्रतं चस्वपन्तञ्च भुञ्जन्तञ्च स्थितं तथा ।
इमं जनं सदा क्रूरः कृतान्तः परिकर्षति ॥ ४० ॥
सर्वे क्षयान्तानिचयाः पतनान्ताःसमुच्छ्रयाः ।
संयोगा विप्रयोगान्ता मरणान्तं च जीवितम् ॥ ४१ ॥

यथा फलानां पक्वानांनान्यत्र पतनाद्भयम् । तथानराणां जातानां नान्यत्तमरणाद्भयम्
यथा गृहदृढस्तम्भं जीर्णकाले विनश्यति । एवं विनश्यन्ति नरा जरामृत्युवशं गताः
अहोरात्रस्यगमनान्नृणामायुर्विनश्यति । आत्मानमनुशोचत्वं किमन्यमनुशोचसि ॥
नश्यत्यायुःस्थितस्यापि धावतोऽपि कपीश्वर! ।
सहैव मृत्युर्व्रजति सहमृत्युर्निषीदति ॥ ४५ ॥

चरित्वा दूरदेशं च सहमृत्युर्निवर्तते । शरीरे वलयो जाताः श्वेता जाताः शिरोरुहाः
जीर्यते जरया देहः श्वासकासादिनातथा । यथाकाष्ठं च काष्ठं च समेयातांमहोदधौ
समेत्य च व्यपेयातां कालयोगेन वानर! । एवं भार्या च पुत्रश्च बन्धुक्षेत्रधनानिच॥
क्वचित्सम्भूय गच्छन्ति पुनरन्यत्र वानर! ।
यथा हि पान्थं गच्छन्तं पथि कश्चित्पथिस्थितः ॥ ४६ ॥

अहमप्यागमिष्यामि भवद्भिःसाकमित्यथ । कञ्चित्कालंसमेतौतौ पुनरन्यत्रगच्छतः
एवंभार्यासुतादीनां सङ्गमो नश्वरःकपे । शरीरजन्मना साकं मृत्युःसञ्जायते ध्रुवम्
अवश्यम्भाविमरणे न हि जातु प्रतिक्रिया । एतच्छरीरपाते तु देही कर्मगतिं गतः
प्राप्य पिण्डान्तरं वत्स! पूर्वपिण्डं त्यजत्यसौ ।
प्राणिनां न सदैकत्र वासो भवति वानर! ॥ ५३ ॥

स्वस्वकर्मवशात्सर्वे वियुज्यन्ते पृथक् पृथक् ।
यथा प्राणिशरीराणि नश्यन्ति च भवन्ति च ॥ ५४ ॥
आत्मनो जन्ममरणे नैवस्तःकपिसत्तम! । अतस्त्वमञ्जनासूनो! विशोकं ज्ञानमद्वयम्
सद्रूपममलम्ब्रह्म चिन्तयस्व दिवानिशम् । त्वत्कृतम्मत्कृतंकर्ममत्कृतन्त्वत्कृतन्तथा
मल्लिङ्गस्थापनंतस्मात्त्वल्लिङ्गस्थापनं कपे! । मुहूर्तातिक्रमाल्लिङ्गं सैकतं सीतयाकृतम्
मयाऽत्र स्थापितन्तस्मात्कोपं दुःखं च मा कुरु ।
कैलासादागतं लिङ्गं स्थापयास्मिञ्च्छुभेदिने ॥ ५८ ॥
तवनाम्नात्विदंलिङ्गं यातुलोकत्रये प्रथाम् । हनूमदीश्वरं दृष्ट्वा द्रष्टव्योराघवेश्वरः ॥
ब्रह्मराक्षसयूथानि हतानिभवताकपे! । अतःस्वनाम्ना लिङ्गस्य स्थापनात्त्वम्प्रमोक्ष्यसे
स्वयं हरेण दत्तन्तु हनूमन्नामकं शिवम् । सम्पश्यन्रामनाथञ्च कृतकृत्यो भवेन्नरः
योजनानां सहस्रेऽपि स्मृत्वा लिङ्गं हनूमतः ।
रामनाथेश्वरंचापि स्मृत्वा सायुज्यमाप्नुयात् ॥ ६२ ॥
तेनेष्टं सर्वयज्ञैश्च तपश्चाकारिकृत्स्नशः । येन दृष्टौ महादेवौ हनूमद्राघवेश्वरौ ॥ ६३॥
हनूमता कृतंलिङ्गं यच्चलिङ्गंमयाकृतम् । जानकीयं च यल्लिङ्गं यल्लिङ्गं लक्ष्मणेश्वरम्
सुग्रीवेण कृतं यच्च सेतुकर्त्रा नलेन च । अङ्गदेन च नीलेन तथाजाम्बवताकृतम् ॥
विभीषणेन यच्चापि रत्नलिङ्गं प्रतिष्ठितम् ।
इन्द्राद्यैश्च कृतं लिङ्गं यच्छेषाद्यैःप्रतिष्ठितम् ॥ ६६ ॥
इत्येकादशरूपोऽयं शिवःसाक्षाद्विभासते । सदाह्येतेषु लिङ्गेषु सन्निधत्ते महेश्वरः ॥
तत्स्वपापौघशुद्ध्यर्थं स्थापयस्व महेश्वरम् ।
अथचेत्त्वम्महाभाग! लिङ्गमुत्सादयिष्यसि ॥ ६८ ॥
मयाऽत्र स्थापितं वत्स! सीतया सैकतं कृतम् ।
स्थापयिष्यामि च ततो लिङ्गमेतत्त्वया कृतम् ॥ ६९ ॥
पातालंसुतलम्प्राप्य वितलञ्च रसातलम् । तलातलञ्च तदिदं भेदयित्वातु तिष्ठति
प्रतिष्ठितम्मया लिङ्गं भेत्तुंकस्य बलम्भवेत् ।

उत्तिष्ठ लिङ्गमुद्वास्य मयैतत्स्थापितं कपे ! ॥ ७१ ॥
त्वया समाहृतं लिङ्गं स्थापयम्वाऽऽशु मा शुचः ।
इत्युक्तस्तम्प्रणम्याह ज्ञानसत्त्वोऽथ वानरः ॥ ७२ ॥
उद्वासयामि वेगेन सैकतं लिङ्गमुत्तमम् । संस्थापयामि कैलासादानीतंलिङ्गमादरात्
उद्वासने सैकतस्य कियान्भारो भवेन्मम । चेतसैवं विचार्याऽयं हनूमान्मारुतात्मजः
पश्यतां सर्वदेवानांमुनीनांकपिरक्षसाम् । पश्यतोरामचन्द्रस्यलक्ष्मणस्यापिपश्यतः
पश्यन्त्याअपिवैदेह्या लिङ्गन्तत्सैकतम्बलात् । पाणिना सर्वयत्नेन जग्राहेतरसावली
यत्नेन महता चाऽयं चालयन्नपि मारुतिः । नालञ्चालयितुंह्यासीत्सैकतंलिङ्गमोजसा
ततःकिलकिलाशब्दं कुर्वन्वानरपुङ्गवः ।
पुच्छमुद्यम्य पाणिभ्यांनिरास्थत्तं निजौजसा ॥ ७८ ॥
इत्यनेकप्रकारेण चालयन्नपि वानरः । नैव चालयितुंशक्तो बभूव पवनात्मजः ॥ ७९॥
तद्वेष्टयित्वा पुच्छेन पाणिभ्यां धरणींस्पृशन् ।
उत्पपाताथ तरसा व्योम्नि वायुसुतःकपिः ॥ ८० ॥
कम्पयन्सधरां सर्वां सप्तद्वीपांसपर्वताम् । लिङ्गस्यक्रोशमात्रेतुमूर्च्छितोरुधिरंवमन्
पपातहनुमान्विप्राः कम्पिताङ्गो धरातले । पततोवायुपुत्रस्य वक्त्राच्चनयनद्वयात् ॥
नासापुटाच्छ्रोत्ररन्ध्रादपानाच्च द्विजोत्तमाः । रुधिरौघान्ससुस्त्रावरक्तकुण्डमभूच्च तत्
ततो हाहाकृतं सर्वं सदेवासुरमानुषम् ।
धावन्तौ कपिभिःसार्द्धमुभौ तौ रामलक्ष्मणौ ॥ ८४ ॥
जानकीसहितौ विप्रा ह्यास्तां शोकाकुलौ तदा ।
सीतया सहितौ वीरौ वानरैश्च महाबलौ ॥ ८५ ॥
रुरुचाते तदा विप्रा गन्धमादनपर्वते । यथा तारागणयुतौ रजन्यांशशिभास्करौ ॥
ददृशतुर्हनूमन्तं चूर्णीकृतकलेवरम् । मूर्च्छितम्पतितं भूमौ वमन्तं रुधिरम्मुखात् ॥
विलोक्यकपयःसर्वे हाहाकृत्वापतन्भुवि । कराभ्यां सदयंसीता हनूमन्तंमरुत्सुतम्
तातातेति पस्पर्श पतितं धरणीतले । रामोऽपि दृष्ट्वापतितं हनूमन्तं कपीश्वरम् ॥

आरोप्याङ्कं स्वपाणिभ्यामाममर्श कलेवरम् ।
विमुञ्चन्नेत्रजं वारि वायुजं चाब्रवीद् द्विजाः !॥ ६० ॥
इतिश्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीये ब्रह्मखण्डे
सेतुमाहात्म्ये रामचन्द्रतत्त्वज्ञानोपदेशोनाम
पञ्चचत्वारिशोऽध्यायः ॥ ४५ ॥

———

षट्चत्वारिंशोऽध्यायः

रामनाथलिङ्गप्रतिष्ठाकारणकथनम्

श्रीराम उवाच

पम्पारण्ये वयं दीनास्त्वया वानरपुङ्गव! ।
आश्वासिताः कारयित्वा सख्यमादित्यसूनुना ॥ १ ॥
त्वां दृष्ट्वा पितरन्बन्धून्कौशल्यांजननीमपि । न स्मरामो वयंसर्वान्मेत्वयोपकृतम्बहुः
मदर्थं सागरस्तीर्णो भवतावहुयोजनः । तलप्रहाराभिहतो मैनाकोऽपि नगोत्तमः ॥
नागमाता च सुरसा मदर्थम्भवता जिता । छायाग्राहमहाक्रूरामवधीद्राक्षसीम्भवान्
सायं सुवेलमासाद्य लङ्कामाहत्य पाणिना । अयासीरावणगृहम्मदर्थन्त्वम्महाकपे!
सीतामन्विष्य लङ्कायां रात्रौ गतभयो भवान् ।
अदृष्ट्वा जानकीम्पश्चादशोकवनिकां ययौ ॥ ६ ॥
नमस्कृत्य च वैदेहीमभिज्ञानंप्रदाय च । चूडामणिं समादाय मदर्थंजानकीकरात् ॥
अशोकवनिकावृक्षानभाङ्क्षीस्त्वम्महाकपे ! ।
ततस्त्वशीतिसाहस्रान्किङ्करान्नामराक्षसान् ॥ ८ ॥
रावणप्रतिमान्युद्धे पत्त्यश्वेभरथाकुलान् । अवधीस्त्वम्मदर्थे वै महाबलपराक्रमान्
ततःप्रहस्ततनयं जम्बुमालिनमागतम् । अवधीन्मन्त्रितनयान्सप्तसप्तार्चिवर्चसः ॥१०

पञ्चसेनापतीन्पश्चादनयस्त्वं यमालयम् । कुमारमक्षमवधीस्ततस्त्वं रणमूर्धनि ॥
ततइन्द्रजितानीतो राक्षसेन्द्रसभांशुभाम् । तत्रलङ्केश्वरंवाचा तृणीकृत्यावमन्य च
अभाङ्क्षीस्त्वम्पुरीं लङ्काम्मदर्थंवायुनन्दन! । पुनःप्रतिनिवृत्तस्त्वमृष्यमूकम्महागिरिम्
एवमादिमहादुःखम्मदर्थम्प्राप्तवानसि । त्वमत्र भूतले शेषे मम शोकमुदीरयन् ॥ १४
अहम्प्राणान्परित्यक्ष्ये मृतोऽसि यदि वायुज! ।
सीतया मम किं कार्यं लक्ष्मणेनानुजेन वा ॥ १५ ॥
भरतेनापि किं कार्यं शत्रुघ्नेन श्रियापि वा । राज्येनापि न मेकार्यं परेतस्त्वंकपे!यदि
उत्तिष्ठ हनुमन्वत्स! किं शेषेऽद्यमहीतले । शय्यां कुरुमहाबाहो! निद्रार्थम्मम वानर
कन्दमूलफलानि त्वमाहारार्थम्ममाहर। स्नातुमद्य गमिष्यामि द्रुतं कलशमानय ॥
अजिनानि च वासांसि दर्भांश्च समुपाहर । ब्रह्मास्त्रेणावबद्धोऽहं मोचितश्चत्वयाहरे
लक्ष्मणेन सहभ्रात्रा ह्यौषधानयनेनवै । लक्ष्मणप्राणदाता त्वं पौलस्त्यमदनाशन !॥
सहायेन त्वयायुद्धेराक्षसान्रावणादिकान् । निहत्यातिबलान्वीरानवापमैथिलींगृहम्
हनूमन्नञ्जनासूनो!सीताशोकविनाशन! । कथमेवम्परित्यज्यलक्ष्मणम्माञ्चजानकीम्
अप्रापयित्वाऽयोध्यान्त्वंकिमर्थङ्गतवानसि । क्वगतोऽसिमहावीर!महाराक्षसकण्टक
इति पश्यन्मुखन्तस्य निर्वाक्यं रघुनन्दनः । प्ररुदन्नश्रुजालेन सेचयामास वायुजम्
वायुपुत्रस्ततो मूर्च्छामपहाय शनैर्द्विजाः । पौलस्त्यभयसन्त्रस्तलोकरक्षार्थमागतम्
आश्रित्य मानुषम्भावंनारायणमजंविभुम् । जानकीलक्ष्मणयुतंकपिभिःपरिवारितम्
कालाम्भोधरसङ्काशंरणधूलिसमुक्षितम् । जटामण्डलशोभाढ्यं पुण्डरीकायतेक्षणम्
खिन्नञ्च बहुशोयुद्धे ददर्श रघुनन्दनम् । स्तूयमानममित्रघ्नं देवर्षिपितृकिन्नरैः ॥
दृष्ट्वा दाशरथिं रामं कृपाबहुलचेतसम् । रघुनाथकरस्पर्शपूर्णगात्रः स वानरः ॥
पतित्वा दण्डवद् भूमौ कृताञ्जलिपुटो द्विजाः !।
अस्तौषीज्जानकीनाथं स्तोत्रैः श्रुतिमनोहरैः ॥ ३० ॥

हनूमानुवाच

नमोरामाय हरये विष्णवे प्रभविष्णवे । आदिदेवाय देवाय पुराणायगदाभृते ॥३१॥

विष्टरे पुष्पकेनित्यं निविष्टाय महात्मने । प्रहृष्टवानरानीकजुष्टपादाम्बुजायते ॥ ३२ ॥
निष्पिष्टराक्षसेन्द्राय जगदिष्टविधायिने । नमः सहस्रशिरसे सहस्रचरणाय च ॥
सहस्राक्षायशुद्धाय राघवायच विष्णवे । भक्तार्तिहारिणे तुभ्यं सीतायाः पतये नमः
हस्थेनारसिंहाय दैत्यराजविदारिणे । नमस्तुभ्यं वराहाय दंष्ट्रोद्धृतवसुन्धर! ॥
त्रिविक्रमायभवते बलियज्ञविभेदिने । नमोवामनरूपाय महामन्दरधारिणे ॥ ३६ ॥
नमस्तेमत्स्यरूपाय त्रयीपालनकारिणे । नमः परशुरामाय क्षत्रियान्तकरायते ॥
नमस्तेराक्षसघ्नाय नमोराघवरूपिणे । महादेवमहाभीम! महाकोदण्डभेदिने ॥ ३८ ॥
क्षत्रियान्तकरक्रूरभार्गवत्रासकारिणे । नमोऽस्त्वहल्यासन्तापहारिणे चापहारिणे ॥
नागायुतबलोपेतताटकादेहहारिणे । शिलाकठिनविस्तारवालिवक्षोविभेदिने॥४०॥

नमोमायामृगोन्माथकारिणे ज्ञानहारिणे ।
दशस्यन्दनदुःखाब्धिशोषणागस्त्यरूपिणे ॥ ४१ ॥

अनेकोर्मिसमाधूतसमुद्रमदहारिणे । मैथिलीमानसाम्भोजभानवे लोकसाक्षिणे ॥
राजेन्द्राय नमस्तुभ्यं जानकीपतये हरे ! । तारकब्रह्मणेतुभ्यं नमोराजीवलोचन ॥
रामाय रामचन्द्राय वरेण्याय सुखात्मने । विश्वामित्रप्रियायेदं नमः खरविदारिणे
प्रसीददेव देवेश! भक्तानामभयप्रद! । रक्ष मां करुणासिन्धो! रामचन्द्रनमोऽस्तुते
रक्ष मां वेदवचसामप्य गोचर राघव! । पाहि मां कृपया राम! शरणं त्वामुपैम्यहम्
रघुवीर! महामोहमपाकुरु ममाधुना । स्नाने चाचमने भुक्तौ जाग्रत्स्वप्नसुषुप्तिषु ॥
सर्वावस्थासु सर्वत्र पाहि मां रघुनन्दन! । महिमानन्तवस्तोतुं कः समर्थोजगत्त्रये
त्वमेवत्वन्महत्त्वंवै जानासि रघुनन्दन !। इति स्तुत्वावायुपुत्रोरामचन्द्रंघृणानिधिम्

सीतामप्यभितुष्टाव भक्तियुक्तेन चेतसा ।
जानकि! त्वान्नमस्यामि सर्वपापप्रणाशिनीम् ॥ ५० ॥

दारिद्र्यरणसंहर्त्रीं भक्तानामिष्टदायिनीम् । विदेहराजतनयां राघवानन्दकारिणीम्

भूमेर्दुहितरं विद्यां नमामि प्रकृतिं शिवाम् ।
पौलस्त्यैश्वर्यसंहर्त्रींभक्ताभीष्टां सरस्वतीम् ॥ ५२ ॥

पतिव्रताधुरीणांत्वां नमामि जनकात्मजाम् । अनुग्रहपरामृद्धिमनघां हरिवल्लभाम्

आत्मविद्यात्रयीरूपामुमारूपां नमाम्यहम् ।
प्रसादाभिमुखीं लक्ष्मीं क्षीराब्धितनयां शुभाम् ॥ ५४ ॥

नमामि चन्द्रभगिनीं सीतां सर्वाङ्गसुन्दरीम् । नमामिधर्मनिलयांकरुणांवेदमातरम्

पद्मालयां पद्महस्तां विष्णुवक्षस्थलालयाम् ।
नमामि चन्द्रनिलयां सीतां चन्द्रनिभाननाम् ॥ ५६ ॥
आह्लादरूपिणीं सिद्धिं शिवां शिवकरीं सतीम् ।
नमामि विश्वजननीं रामचन्द्रेष्टवल्लभाम् ॥ ५७ ॥
सीतां सर्वानवद्याङ्गीं भजामि सततं हृदा ।

श्रीसूत उवाच

स्तुत्वैवं हनूमान्सीतारामचन्द्रौ सभक्तिकम् ॥ ५८ ॥

आनन्दाश्रुपरिक्लिन्नस्तूष्णीमास्ते द्विजोत्तमाः । यइदंवायुपुत्रेणकथितम्पापनाशनम्
स्तोत्रं श्रीरामचन्द्रस्य सीतायाःपठतेऽन्वहम् । सनरोमहदैश्वर्यमश्नुतेवाञ्छितंसदा

अनेकक्षेत्रधान्यानि गाश्च दोग्ध्रीः पयस्विनीः ।
आयुर्विद्याश्च पुत्रांश्च भार्यामपि मनोरमाम् ॥ ६१ ॥

एतत्स्तोत्रं सकृद्विप्राः पठन्नाप्नोत्यसंशयः । एतत्स्तोत्रस्यपाठेन नरकन्नैव यास्यति
ब्रह्महत्यादिपापानिनश्यन्तिसुमहान्त्यपि । सर्वपापविनिर्मुक्तोदेहान्तेमुक्तिमाप्नुयात्
इतिस्तुतो जगन्नाथो वायुपुत्रेण राघवः । सीतया सहितोविप्रा हनूमन्तमथाब्रवीत्

श्रीराम उवाच

अज्ञानाद्वानरश्रेष्ठ! त्वयेदं साहसं कृतम् । ब्रह्मणाविष्णुना वापि शक्रादित्रिदशैरपि
नेदं लिङ्गं समुद्धर्तुं शक्यत स्थापितम्मया । महादेवापराधेनपतितोऽस्यद्य मूर्च्छितः
इतः परं माक्रियतान्द्रोहः साम्बस्यशूलिनः । अद्यारभ्य त्विदंकुण्डंतवनाम्नाजगत्त्रये
ख्यातिं प्रयातु यत्र त्वं पतितोवानरोत्तम । महापातकसङ्घानांनाशःस्यादत्रमज्जनात्
महादेवजटाजाता गौतमीसरितांवरा । अश्वमेधसहस्रस्य फलदा स्नायिनान्नृणाम्

ततः शतगुणागङ्गा यमुनाचसरस्वती । एतन्नदीत्रयंयत्र स्थले प्रवहते कपे !॥ ७० ॥

मिलित्वा तत्र तु स्नानं सहस्रगुणितं स्मृतम् ।
नदीष्वेतासु यत्स्नानात्फलम्पुंसां भवेत्कपे !॥ ७१ ॥
तत्फलन्तवकुण्डेऽस्मिन्स्नानात्प्राप्नोत्यसंशयम् ।
दुर्लभम्प्राप्य मानुष्यं हनूमत्कुण्डतीरतः ॥ ७२ ॥

श्राद्धन्नकुरुते यस्तु भक्तियुक्तेन चेतसा । निराशास्तस्यपितरःप्रयान्तिकुपिताःकपे! कुप्यन्ति मुनयोऽप्यस्मै देवाःसेन्द्राःसचारणाः । न दत्तन्नहुतं येन हनूमत्कुण्डतीरतः वृथाजीवित एवासाविहामुत्र चदुःखभाक् । हनूमत्कुण्डसविधे येनदत्तन्तिलोदकम्

मोदन्ते पितरस्तस्य घृतकुल्याःपिबन्ति च ।

श्रीसूत उवाच

श्रुत्वैतद्वचनं विप्रा! रामेणोक्तं स वायुजः ॥ ७६ ॥

उत्तरेरामनाथस्य लिङ्गंस्वेनाहृतम्मुदा । आज्ञया रामचन्द्रस्य स्थापयामास वायुजः प्रत्यक्षमेवसर्वेषांकपिलाङ्गूलवेष्टितम् । हरोऽपितत्पुच्छजातम्बिभर्तिच वलित्रयम्

तदुत्तरायां ककुभि गौरीं संस्थापयेन्मुदा ॥ ७९ ॥

श्रीसूत उवाच

एवं वःकथितं विप्रा यदर्थंराघवेणतु । लिङ्गं प्रतिष्ठितं सेतौ भुक्तिमुक्तिप्रदन्नृणाम् यःपठेदिममध्यायं शृणुयाद्वासमाहितः । सविधूयेहपापानि शिवलोके महीयते ॥

इतिश्रीस्कान्देमहापुराणएकाशीतिसाहस्र्यांसंहितायां तृतीयेब्रह्मखण्डे
सेतुमाहात्म्येरामनाथलिङ्गप्रतिष्ठाकारणकथनन्नाम
षट्चत्वारिंशोऽध्यायः ॥ ४६ ॥

सप्तचत्वारिंशोऽध्यायः

रामस्यब्रह्महत्योत्पत्तिहेतुनिरूपणम्

ऋषय ऊचुः

राक्षसस्य वधात्सूत! रावणस्य महामुने! । ब्रह्महत्या कथमभूद्राघवस्य महात्मनः ॥ ब्राह्मणस्य वधात्सूत! ब्रह्महत्याऽभिजायते । न ब्राह्मणो दशग्रीवः कथं तद्वदनो मुने! ब्रह्महत्याऽभवत्क्रूरा रामचन्द्रस्य धीमतः । एतन्नःश्रद्दधानानां वद कारुण्यतोऽधुना इतिपृष्टस्ततःसूतो नैमिषारण्यवासिभिः । वक्तुम्प्रचक्रमे तेषां प्रश्नस्योत्तरमुत्तमम्

श्रीसूत उवाच

ब्रह्मपुत्रोमहातेजाः पुलस्त्यो नामवैद्विजाः । बभूवतस्य पुत्रोऽभूद्विश्रवा इतिविश्रुतः तस्य पुत्रःपुलस्त्यस्य विश्रवामुनिपुङ्गवाः । चिरकालं तपस्तेपे देवैरपि सुदुष्करम् तपःकुर्वति तस्मिंस्तु सुमालीनामराक्षसः । पताललोकाद्भूलोकं सर्ववैविचचारह हेमनिष्काङ्गदधरःकालमेघनिभच्छविः । समादाय सुतां कन्यां पद्महीनामिवश्रियम् विचरन्समहीपृष्ठे कदाचित्पुष्पकस्थितम् । दृष्ट्वा विश्रवसःपुत्रं कुबेरंवै धनेश्वरम् चिन्तयामासविप्रेन्द्राः सुमालीसतुराक्षसः । कुबेरसदृशःपुत्रो यद्यस्माकम्भविष्यति वयंवर्द्धामहेसर्वे राक्षसा ह्यकुतोभयाः । विचार्यैवं निजसुतामब्रवीद्राक्षसेश्वरः ॥ ११ सुते! प्रदानकालोऽद्य तव कैकसि! शोभने! । अद्यते यौवनम्प्राप्तं तद्देया त्वं वरायहि

अप्रदानेन पुत्रीणां पितरो दुःखमाप्नुयुः ।
किञ्च सर्वगुणोत्कृष्टा लक्ष्मीरिव सुते! शुभे! ॥ १३ ॥
प्रत्याख्यानभयात्पुम्भिर्न च त्वं प्रार्थ्यसे शुभे! ।
कन्या पितृणां दुःखाय सर्वेषां मानकाङ्क्षिणाम् ॥ १४ ॥

नजानेऽहंवरःको वा वरयेदितिकन्यके! । सात्वम्पौलस्त्यतनयं मुनिंविश्रवसंद्विजम् पितामहकुलोद्भूतं वरयस्व स्वयंगता । कुबेरतुल्यास्तनया भवेयुस्ते न संशयः ॥

कैकसी तद्वचः श्रुत्वा सा कन्या पितृगौरवात् ।
अङ्गीचकार तद्वाक्यं तथास्त्विवति शुचिस्मिता ॥ १७ ॥
पर्णशालांमुनिश्रेष्ठा गत्वाविश्रवसोमुनेः । अतिष्ठदन्तिके तस्य लज्जमानाह्यधोमुखा
तस्मिन्नवसरे विप्राः पौलस्त्यतनयः सुधीः ।
अग्निहोत्रमुपास्तेस्म ज्वलत्पावकसन्निभः ॥ १९ ॥
सन्ध्याकालमतिक्रूरमविचिन्त्य तुकैकसी । अभ्येत्यतंमुनिंसुभ्रूः पितुर्वचनगौरवात्
तस्थावधोमुखी भूमिं लिखत्यङ्गुष्ठकोटिना ।
विश्रवास्तां विलोक्याऽथ कैकसीं तनुमध्यमाम् ॥ २१ ॥
उवाच सस्मितो विप्राः पूर्णचन्द्रनिभाननाम् ।

विश्रवा उवाच

शोभने! कस्य पुत्री त्वं कुतो वा त्वमिहागता ॥ २२ ॥
कार्यंकिंवात्वमुद्दिश्य वर्तसेऽत्रशुचिस्मिते! । यथार्थतोवदस्वाद्य ममसर्वमनिन्दिते!
इतीरिताकैकसीसा कन्या बद्धाञ्जलिर्द्विजाः । उवाच तम्मुनिं प्रह्वविनयेन समन्विता
तपःप्रभावेण मुने! मदभिप्रायमद्य तु । वेत्तुमर्हसि सम्यक्त्वं पौलस्त्यकुलदीपन! ॥
अहं तु कैकसीनाम सुमालीदुहितामुने! । मत्तातस्याज्ञया ब्रह्मंस्तवान्तिकमुपागता
शेषं त्वं ज्ञानदृष्ट्याऽद्य ज्ञातुमर्हस्यसंशयः ।
क्षणं ध्यात्वा मुनिःप्राह विश्रवाः स तुकैकसीम् ॥ २७ ॥
मया ते विदितं सुभ्रु! मनोगतमभीप्सितम् ।
पुत्राभिलाषिणी सा त्वं मामगात्साम्प्रतं शुभे! ॥ २८ ॥
सायङ्कालेऽधुना क्रूरे! यस्मान्मां त्वमुपागता ।
पुत्राभिलाषिणी भूत्वा तस्मात्त्वाम्प्रब्रवीम्यहम् ॥ २९ ॥
शृणुष्वावहितारामे! कैकसि! त्वमनिन्दिते! ।
दारुणान् दारुणाकारान् दारुणाभिजनप्रियान् ॥ ३० ॥
जनयिष्यसिपुत्रांस्त्वं राक्षसान्क्रूरकर्मणः । श्रुततद्वचनासातु कैकसीप्रणिपत्यतम्

पुलस्त्यतनयं प्राह कृताञ्जलिपुटा द्विजाः । भगवन्नीदृशाःपुत्रास्त्वत्तःप्राप्तुंनयुज्यते
इत्युक्तःसमुनिःप्राहकैकसींतांसुमध्यमाम् । मद्वंशानुगुणःपुत्रः पश्चिमस्तेभविष्यति
धार्मिकः शास्त्रविच्छान्तो न तु राक्षसचेष्टितः ।
इत्युक्ता कैकसी विप्राः! काले कतिपये गते ॥ ३४ ॥
सुषुवे तनयं क्रूरं रक्षोरूपं भयङ्करम् । द्विपञ्चशीर्षं कुमतिं विंशद्बाहुंम्भयानकम् ॥
ताम्रोष्ठं कृष्णवदनं रक्तश्मश्रुशिरोरुहम् । महादंष्ट्रं महाकायं लोकत्रासकरं सदा
दशग्रीवाभिधोऽसौऽभूत्तथा रावणनामवान् ।
रावणानन्तरं जातः कुम्भकर्णाभिधः सुतः ॥ ३७ ॥
ततःशूर्पणखानाम्ना क्रूराजज्ञे च राक्षसी । ततो बभूवकैकस्या विभीषण इति श्रुतः
पश्चिमस्तनयोधीमान्धार्मिकोवेदशास्त्रवित् । एतेविश्रवसःपुत्रादशग्रीवादयोद्विजाः
अतो दशग्रीववधात्कुम्भकर्णवधादपि । ब्रह्महत्या समभवद्रामस्याक्लिष्टकर्मणः ॥
अतस्तच्छान्तये रामो लिङ्गं रामेश्वराभिधम् ।
स्थापयामास विधिना वैदिकेन द्विजोत्तमाः ॥ ४१ ॥
एवं रावणघातेन ब्रह्महत्यासमुद्भवः । समभूद्रामचन्द्रस्यलोककान्तस्य धीमतः ॥
तत्सहैतुकमाख्यातंभवताम्ब्रह्मघातजम् । पापंयच्छान्तयेरामोलिङ्गम्प्रातिष्ठिपत्स्वयम्
एवंलिङ्गं प्रतिष्ठाप्य रामचन्द्रोऽतिधार्मिकः । मेनेकृतार्थमात्मानं ससीतावरजोद्विजाः
ब्रह्महत्या गता यत्र रामचन्द्रस्य भूपतेः । तत्र तीर्थमभूत्किञ्चिद्ब्रह्महत्याविमोचनम्
तत्रस्नानं महापुण्यंब्रह्महत्याविनाशनम् । दृश्यते रावणोऽद्यापि छायारूपेण तत्र वै
तदग्रे नागलोकस्य विलमन्ति महत्तरम् । दशग्रीववधोत्पन्नां ब्रह्महत्याम्बलीयसीम्
तद् बिलं प्रापयामास जानकीरमणो द्विजाः !।
तस्योपरि बिलस्याथ कृत्वा मण्डपमुत्तमम् ॥ ४८ ॥
भैरवं स्थापयामास रक्षार्थं तत्र राघवः । भैरवाज्ञापरित्रस्ता ब्रह्महत्याभयङ्करी ॥
नाऽशक्नोत्तद्बलादूर्ध्वं निर्गन्तुं द्विजसत्तमाः !।
तस्मिन्नेव बिले तस्थौ ब्रह्महत्या निरुद्यमा ॥ ५० ॥

रामनाथमहालिङ्गदक्षिणेगिरिजा मुदा । वर्तते परमानन्दशिवस्यार्धशरीरिणी ॥५१
आदित्यसोमौ वर्तेते पार्श्वयोस्तत्रशूलिनः । देवस्यपुरतोवह्नी रामनाथस्य वर्तते
आस्ते शतक्रतुः प्राच्यामाग्नेय्यां च तथाऽनलः ।
आस्ते यमो दक्षिणस्यां रामनाथस्य सेवकः ॥ ५३ ॥
नैर्ऋते निर्ऋतिर्विप्रा वर्तते शङ्करस्य तु । वारुण्यां वरुणोभक्त्यासेवतेराघवेश्वरम्
वायव्ये तु दिशो भागे वायुरास्ते शिवस्य तु । उत्तरस्याञ्चधनदो रामनाथस्यवर्तते
ईशान्यस्य च दिग्भागे महेशो वर्ततेद्विजाः । विनायककुमारौ च महादेवसुतावुभौ
यथाप्रदेशं वर्तेते रामनाथालयेऽधुना । वीरभद्रादयःसर्वे महेश्वरगणेश्वराः ॥ ५७ ॥
यथाप्रदेशंवर्तन्ते रामनाथालये सदा । मुनयःपन्नगाःसिद्धा गन्धर्वाप्सरसाङ्गणाः ॥
सन्तुष्यमाणहृदया यथेष्टं शिवसन्निधौ । वर्तन्तेरामनाथस्य सेवार्थं भक्तिपूर्वकम्
रामनाथस्य पूजार्थं श्रोत्रियान्ब्राह्मणान्बहून् । रामेश्वरेरघुपतिःस्थापयामासपूजकान्
रामप्रतिष्ठितान्विप्रान्हव्यकव्यादिनार्चयेत् ।
तुष्टास्ते तोषिताःसर्वाःपितृभिःसहदेवताः ॥ ६१ ॥
तेभ्यो बहुधनान्ग्रामान्प्रददौ जानकीपतिः । रामनाथमहादेवनैवेद्यार्थमपिद्विजाः ॥
बहून्ग्रामान्बहुधनं प्रददौ लक्ष्मणाग्रजः । हारकेयूरकटकनिष्काद्याभरणानि च ॥
अनेकपटवस्त्राणि क्षौमाणि विविधानि च । रामनाथायदेवाय ददौ दशरथात्मजः
गङ्गा च यमुनापुण्या सरयू च सरस्वती । सेतौ रामेश्वरं देवं भजन्तेस्वाघशान्तये
एतदध्यायपठनाच्छ्रवणादपि मानवः । विमुक्तःसर्वपापेभ्यः सायुज्यं लभते हरेः ॥

इतिश्रीस्कान्देमहापुराण एकाशीतिसाहस्र्यांसंहितायां तृतीयेब्रह्मखण्डे
सेतुमाहात्म्येरामस्यब्रह्महत्योत्पत्तिहेतुनिरूपणंनाम-
सप्तचत्वारिंशोऽध्यायः ॥ ४७ ॥

अष्टचत्वारिंशोऽध्यायः

रामनाथप्रशंसायांशाकल्यदुर्मणशान्तिवर्णनम्

श्रीसूत उवाच

रामनाथं समुद्दिश्य कथाम्पापविनाशिनीम् ।
प्रवक्ष्यामि मुनिश्रेष्ठाः शृणुध्वं सुसमाहिताः ॥ १ ॥
पाण्ड्यदेशाधिपो राजा पुराऽऽसीच्छङ्कराभिधः ।
ब्रह्मण्यःसत्यसङ्घश्च यायजूकश्च धार्मिकः ॥ २ ॥
वेदवेदाङ्गतत्त्वज्ञः परसैन्यविदारणः । चतुरोऽप्याश्रमान्वर्णान्धर्मतःपरिपालयन् ॥ ३
वैदिकाचारनिरतः पुराणस्मृतिपारगः । शिवविष्ण्वर्चको नित्यमन्यदैवतपूजकः ॥
महादानप्रदो नित्यं ब्राह्मणानां महात्मनाम् ।
मृगयार्थं ययौ धीमान्स कदाचित्तपोवनम् ॥ ५ ॥
सिंहव्याघ्रेभमहिषक्रूरसत्त्वं भयङ्करम् । झिल्लिकाभीषणरवं सरीसृपसमाकुलम् ॥
भीमश्वापदसम्पूर्णं दावानलभयङ्करम् । महारण्यम्प्रविश्याथ शङ्करोराजशेखरः ॥
अनेकसैनिकोपेत आखेटिकुलसङ्कुलः । पादुकागूढचरणो रक्तोष्णीषो हरिच्छदः ॥
बद्धगोधांगुलित्राणो धृतकोदण्डसायकः । कक्ष्याबद्धमहाखड्गःश्वेताश्ववरमास्थितः
सुवेषधारी सन्नद्धः पत्तिसङ्घसमावृतः । कान्तारेषु च रम्येषु पर्वतेषु गुहासु च ॥१०
समुत्तीर्णमहास्रोतो युवासिंहपराक्रमः । विचचार बलैःसाकं दरीषु मृगयन्मृगान् ॥
वध्यतां वध्यतामेव यातिवेगान्मृगोवने । एवंवदत्सुसैन्येषु स्वयमुत्प्लुत्य शङ्करः
मृगं हन्ति महाराजो विगाह्य विपिनस्थलीम् ।
सिंहान्वराहान्महिषान्कुञ्जराञ्छरभांस्तथा ॥ १३ ॥
विनिघ्नन्स मृगानन्यान्वन्याञ्छङ्करभूपतिः । कुत्रचिद्द्विपिनोद्देशेदरीमध्यनिवासिनम्
व्याघ्रचर्मधरंशान्तं मुनिं नियतमानसम् । व्याघ्रबुद्ध्या जघानाशु शरेणानतपर्वणा

अतिवेगेन विप्रेन्द्रास्तत्पत्नीं च सशायकः । निजघानपतिप्राणांनिविष्टांपत्युरन्तिके
विलोक्य मातापितरौ तत्पुत्रोनिहतौ वने । रुरोदभृशदुःखार्तो विललाप च कातरः

भोस्तात! मातर्मां हित्वा युवां यातौ क्वाऽधुना ।
अहं कुत्र गमिष्यामि को वा मे शरणम्भवेत् ॥ १८ ॥
को मामध्यापयेद्वेदाञ्छास्त्रं वा पाठयेत्पितः ! ।
अम्ब! मे भोजनं का वा दास्यते स्नोपदेशकम् ॥ १९ ॥
आचाराञ्छिक्षयेत्कोवा तात! त्वयि मृतेऽधुना ।
अम्ब! बालं प्रकुपितं का वा मामुपलालयेत् ॥ २० ॥

युवां निरागसावद्य केन पापेन सायकैः । निहतौ वै तपोनिष्ठौमत्प्राणौमद्गुरू वने
एवं तयोः सुतोविप्रा मुक्तकण्ठं रुरोद वै । अथप्रलपितं श्रुत्वा शङ्करोविपिने चरन्

तच्छब्दाभिमुखःसद्यः प्रययौ स दरीमुखम् ।
तत्रत्या मुनयोऽप्याशु समागच्छंस्तमाश्रमम् ॥ २३ ॥

ते दृष्ट्वा मुनयः सर्वे शरेण निहतंमुनिम् । तत्पत्नीं चहतां विप्रा राजानं च धनुर्धरम्
विलपन्तं सुतं चापिविलोक्यभृशविह्वलाः । पुत्रमाश्वासयामासुर्मारोदीरितिकातरम्

मुनय ऊचुः

आढ्ये वाऽपि दरिद्रे वा मूर्खे वा पण्डितेऽपि वा
पीने वाऽथ कृशे वापि समवर्ती परेतराट् ॥ २६ ॥

वने वा नगरे ग्रामे पर्वते वा स्थलान्तरे । मृत्योर्वशे प्रयातव्यं सर्वैरपि हि जन्तुभिः
वत्स! नित्यं च गर्भस्थैर्जातैरपिचजन्तुभिः । युवभिःस्थविरैःसर्वैर्यातव्यंयमपत्तनम्
वर्णिभिश्चगृहस्थैश्च वानप्रस्थैश्च भिक्षुभिः । कालेप्राप्ते स्वयंदेहस्त्यक्तव्योद्विजपुत्रक!
ब्राह्मणैःक्षत्रियैर्वैश्यैः शूद्रैरपि च सङ्करैः । यातव्यः प्रेतनिलये द्विजपुत्रमहामते! ॥
देवाश्चमुनयो यक्षा गन्धर्वोरगराक्षसाः । अन्ये च जन्तवः सर्वे ब्रह्मविष्णुहरादयः ॥
सर्वे यास्यन्ति विलयं न त्वंशोचितुमर्हसि । अद्वयं सच्चिदानन्दंयद्ब्रह्मोपनिषद्गतम्
न तस्यविलयो जन्म वर्धनंचापिसत्तम ! । मलभाण्डे नवद्वारे पूयासृक्शोणितालये

देहेऽस्मिन्बुद्बुदाकारे कृमियूथसमाकुले । कामक्रोधभयद्रोहमोहमात्सर्यकारिणि
परदारपरक्षेत्रपरद्रव्यैकलोलुपे । हिंसाऽसूयाशुचिव्याप्ते विष्ठामूत्रैकभाजने ॥ ३५ ॥
यःकुर्याच्छोभनधियं समूढःसचदुर्मतिः । बहुच्छिद्रघटाकारे देहेऽस्मिन्नशुचौ सदा

वायोरवस्थितिः किंस्यात्प्राणाख्यस्य चिरं द्विज! ।
अतो मा कुरु शोकं त्वं जननीं पितरं प्रति ॥ ३७
तौ स्वकर्मवशाद्यातौ गृहं त्यक्त्वा त्विदं क्वचित् ।
तव कर्मवशात्त्वं च तिष्ठस्यस्मिन्महीतले ॥ ३८ ॥

यदाकर्मक्षयस्तेस्यात्तदात्वं च मरिष्यसि । मरिष्यमाणप्रेतो हि मृतप्रेतस्य शोचति

यस्मिन्काले समुत्पन्नौ तव माता पिता तथा ।
न तस्मिंस्त्वं समुत्पन्नस्ततो भिन्ना गतिर्हि वः ॥ ४० ॥

यदितुल्यागतिस्तेस्यात्ताभ्यांसहमहामते !। तर्हित्वयापियातव्यंमृतौयत्रहितौगतौ
मृतानां बान्धवायेतुमुञ्चन्त्यश्रूणिभूतले । पास्यन्त्यश्रूणि तान्यद्धामृताःप्रेताःपरत्रवै
अतः शोकंपरित्यज्य धृतिं कृत्वासमाहितः । अनयोःप्रेतकार्याणिकुरुत्वंवैदिकानितु
शरघातान्मृतावेतौ यस्मात्ते जननीपिता । अतस्तद्दोपशान्त्यर्थमस्थीन्यादायवैतयोः
रामनाथशिवक्षेत्रे रामसेतौविमुक्तिदे । स्थापयस्व तथाश्राद्धंसपिण्डीकरणादिकम्
तत्रैव कुलशुद्ध्यर्थं तयोर्ब्राह्मणपुत्रक! । तेन दुर्मृत्युदोषस्य शान्तिर्भवतिनान्यथा

श्रीसूत उवाच

एवमुक्तः समुनिभिः शाकल्यस्यसुतोद्विजाः । जाङ्गलाख्यस्तयोःसर्वंपितृमेधंचकारवै

अन्येद्युरस्थीन्यादाय हालास्यं प्रययौ च सः ।
तस्माद्रामेश्वरं सद्यो गत्वाऽयं जाङ्गलोद्विजः ॥ ४८ ॥

मुनिप्रोक्तप्रकारेणतस्मिन्रामेश्वरेस्थले । निधायपित्रोरस्थीनिश्राद्धादीन्यकरोत्तथा
प्रथमाब्दिकपर्यन्तं कार्यंतत्राकरोच्च सः । स्थित्वाब्दं समुनेः पुत्र एकोजाङ्गलसंज्ञकः
आब्दिकान्ते दिनेविप्रो रात्रौस्वप्नेविलोकयत् । स्वमातरंचपितरंशङ्खचक्रगदाधरौ
गरुडोपरिसंविष्टौ पद्ममालाविभूषितौ । शोभितौ तुलसीदाम्ना स्फुरन्मकरकुण्डलौ

कौस्तुभालंकृतोरस्कौ पीताम्बरविराजितौ । एवं दृष्ट्वामुनिसुतोजाङ्गलःसुप्रसन्नधीः
स्वाश्रमं पुनरागत्य सुखेनन्यवसद्द्विजाः । स्वप्नदृष्टं च वृत्तान्तंमातापित्रोःसजाङ्गलः
तेभ्योन्यवेदयत्सर्वंब्राह्मणेभ्योऽतिहर्षितः । श्रुत्वा तेमुनयो वृत्तमासन्संप्रीतमानसाः
अथ राजनमालोक्यसर्वेतेऽपिमहर्षयः । अवदन्कुपिताविप्राः शपन्तः शङ्करं नृपम् ॥

पाण्ड्यभूप महामूर्ख! क्रौर्याद् ब्राह्मणघातक! ।
स्त्रीहत्या ब्रह्महत्या च कृता यस्मात्त्वयाऽधुना ॥ ५७ ॥

अतः शरीरसंत्यागं कुरु त्वं हव्यवाहने । नो चेत्तवन शुद्धिः स्यात्प्रायश्चित्तशतैरपि

त्वत्संभाषणमात्रेण ब्रह्महत्यायुतं भवेत् ।
अस्मत्सकाशाद्गच्छ त्वं पाण्ड्यानां कुलपांसन! ॥ ५६ ॥

इत्युक्तो मुनिभिः पाण्ड्यःशङ्करोद्विजपुङ्गवाः । तथास्तुदेहसंत्यागंकरिष्येहव्यवाहने
ब्रह्महत्याविशुद्ध्यर्थं भवतां सन्निधावहम् । अनुग्रहं मे कुर्वन्तु भवन्तो मुनिसत्तमाः

यथा शरीरसंत्यागात्पातकं मे लयं व्रजेत् ।
एवमुक्त्वा मुनीन्सर्वाञ्छङ्करः पाण्ड्यभूपतिः ॥ ६२ ॥

स्वान्मन्त्रिणःसमाहूयबभाषेवचनंत्विदम् । भोमन्त्रिणोब्रह्महत्यामयाकार्यविचारतः
स्त्रीहत्या च तथाक्रूरा महानरकदायिनी ।एतत्पातकशुद्ध्यर्थं मुनीनांवचनादहम्
प्रदीप्तेऽग्नौमहाज्वालेपरित्यक्ष्येकलेवरम् । काष्ठान्यानयतक्षिप्रंतैरग्निश्चसमिध्यताम्
मम पुत्रं च सुरुचिंराज्ये स्थापयताचिरात् । मा शोकंकुरुतामात्यादैवतंदुरितक्रमम्
इतीरितां नृपतिना मन्त्रिणोरुरुदुस्तदा । पाण्ड्यनाथमहाराज!रिपूणामपिवत्सल!
वयं हि भवता नित्यं पुत्रवत्परिपालिताः । त्वां विनानप्रवेक्ष्यामःपुरींदेवपुरोपमाम्
हव्यवाहं प्रवेक्ष्यामो महाकाष्ठसमेधितम् । तेषांप्रलपितंश्रुत्वापाण्ड्यःशङ्करभूपतिः

प्रोवाच मन्त्रिणः सर्वान्वचनं सान्त्वपूर्वकम् ।

शङ्कर उवाच

किं करिष्यथ भोऽमात्या महापातकिना मया ॥ ७० ॥

सिंहासनं समारुह्य न कर्तुं युज्यते बत । चतुरर्णवपर्यन्तधरापालनमञ्जसा ॥ ७१ ॥

मत्पुत्रं सुरुचिं शीघ्रमतः स्थापयतासने । काष्ठान्यानयत क्षिप्रं प्रवेष्टुं हव्यवाहनम्
मम मन्त्रिवरा यूयंविलम्बन्त्यजताधुना । इत्युक्ता मन्त्रिणः काष्ठंसमानिन्युःक्षणेनते
अग्निप्रज्वलितंकाष्ठैर्दृष्ट्वाशङ्करभूपतिः । स्नात्वाऽऽचम्यविशुद्धात्मामुनीनांसन्निधौतदा

अग्निं प्रदक्षिणीकृत्य तान्मुनीनपि सत्वरम् ।
अग्निं मुनीन्नमस्कृत्य ध्यात्वा देवमुमापतिम् ॥ ७५ ॥

अग्नौ पतितुमारेभे धैर्यमालम्ब्य भूपतिः । तस्मिन्नवसरेविप्रामुनीनामपिश्रृण्वताम्
अशरीरासमुद्भूद्वाणी भैरवनादिनी । भोः ! शङ्करमहीपाल!माऽनलं प्रविशाधुना ॥
ब्रह्महत्या निमित्तन्ते भयं माभून्महामते! । तवोपदेशं वक्ष्यामि रहस्यंवेदसम्मितम्
श्रृणुष्वावहितो राजान्मदुक्तं क्रियातान्त्वया । दक्षिणाम्बुनिधेस्तीरेगन्धमादनपर्वते
रामसेतौ महापुण्ये महापातकनाशने । रामप्रतिष्ठितं लिङ्गं रामनाथं महेश्वरम् ॥
सेवस्व वर्षमेकं त्वं त्रिकालं भक्तिपूर्वकम् । प्रदक्षिणप्रक्रमणं नमस्कारं चवै कुरु
महाभिषेकः क्रियतां रामनाथस्यवैत्वया । नैवेद्यं विविधं राजन् क्रियतांचदिनेदिने
चन्दनागरुकर्पूरै रामलिङ्गं प्रपूजय । भारद्वयेन गव्येन ह्याज्येन त्वभिषेचय ॥ ८३ ॥
प्रत्यहं च गवांक्षीरैर्द्विभारपरिसम्मितैः । मधुद्रोणेन तल्लिङ्गं प्रत्यहं स्नापय प्रभो!
प्रत्यहं पायसान्नेन नैवेद्यं कुरु भूपते! । प्रत्यहं तिलतैलेन दीपाराधनमाचर ॥ ८५ ॥
एतेनतवराजेन्द्र! रामनाथस्य शूलिनः । स्त्रीहत्याब्रह्महत्याच्च तत्क्षणादेव नश्यतः ॥
दर्शनाद्रामनाथस्य भ्रूणहत्याशतानि च । अयुतंब्रह्महत्यानां सुरापानायुतं तथा ॥

स्वर्णस्तेयायुतं राजन्! गुरुस्त्रीगमनायुतम् ।
एतत्संसर्गदोषाश्च विनश्यन्ति क्षणाद्विभो! ॥ ८८ ॥

महापातकतुल्यानियानिपापानिसन्तिवै । तानिसर्वाणि नश्यन्तिरामनाथस्यसेवया
महती रामनाथस्य सेवा लभ्येतचेन्नृणाम् । किंगङ्गया च गययाप्रयागेणाध्वरेणवा
तद्गच्छ रामसेतुं त्वं रामनाथं भजाऽनिशम् । विलम्बं माकुरुविभो!गमनेचत्वरांकुरु
इत्युक्त्वा विरराामाथसापि वागशरीरिणी । तच्छ्रुत्वामुनयःसत्वरयन्तिस्मभूपतिम्

गच्छ शीघ्रं महाराज ! रामसेतुं विमुक्तिदम् ।

रामनाथस्य माहात्म्यमज्ञात्वाऽस्माभिरीरितम् ॥ ६३ ॥
देहत्यागं कुरुष्वेति वह्नौप्रज्वलितेऽधुना । अनुज्ञातो मुनिवरैरिति राजा सशङ्करः ॥
चतुरङ्गबलंपुर्यां प्रापयित्वा त्वरान्वितः । नमस्कृत्य मुनीन्सर्वान्प्रहृष्टेनान्तरात्मना
वृतः कतिपयैः सैन्यैः समादाय धनंबहु । रामनाथस्य सेवार्थमायासीद्गन्धमादनम्
उवासवर्षमेकं च रामसेतौ विशुद्धिदे । एवमुक्तो जितक्रोधो विजितेन्द्रियसञ्चयः ॥
त्रिसन्ध्यं रामनाथं च सेवमानः सभक्तिकम् । प्रददौ रामनाथाय दशभारं धनंमुदा
प्रत्यहं रामनाथस्य महापूजामकारयत् । अकरोच्च धनुष्कोटौ प्रत्यहं भक्तिपूर्वकम्
स्नानं प्रतिदिनं चान्नं ब्राह्मणेभ्यो ददौमुदा । अशरीरावचः प्रोक्तमखिलं पूजनं तथा
एवं कृतवतस्तस्य वर्षमेकं गतं द्विजाः । वर्षान्ते स शुचिर्भूत्वा शङ्करस्तुष्टमानसः
तुष्टाव परमेशानं रामनाथं कृपानिधिम् ।

शङ्कर उवाच

नमामि रुद्रमीशानं रामनाथमुमापतिम् ॥ १०२ ॥
पाहिमांकृपयादेव! ब्रह्महत्यां दहाशु मे । त्रिपुरघ्न महादेव! कालकूटविषादन ! ॥
रक्ष मां त्वं दयासिन्धो ! स्त्रीहत्यां मे विमोचय ।
गङ्गाधर! विरूपाक्ष ! रामनाथ! त्रिलोचन !॥ १०४ ॥
मांपालयकृपादृष्ट्याछिन्धिमत्पातकंविभो !। कामारे!कामसंदायिन्भक्तानांराघवेश्वर!
कटाक्षं पातय मयि शुद्धं मांकुरु धूर्जटे! । मार्कण्डेयभयत्राण! मृत्युञ्जयशिवाव्यय !
नमस्ते गिरिजाधीय निष्पापं कुरुमां सदा । रुद्राक्षमालाभरण! चन्द्रशेखरशङ्कर!
वेदोक्तसम्यगाचारयोग्यं मां कुरु ते नमः । सूर्यदन्तभिदे तुभ्यं भारतीनासिकाछिदे
रामेश्वरायदेवाय नमो मे शुद्धिदो भव । आनन्दं सच्चिदानन्दं रामनाथवृषध्वजम् ॥
भूयोभूयोनमस्यामि पातकं मे विनश्यतु । भक्त्यैवं स्तुवतस्तस्यरामनाथंमहेश्वरम्
निर्जगाम मुखाद्राज्ञो ब्रह्महत्यातिभीषणा । नीलवस्त्रधराक्रूरा महारक्तशिरोरुहा ॥
तां ब्रह्महत्यां बीभत्सां नृपवक्त्राद्विनिर्गताम् ।
निजघान त्रिशूलेन भैरवो रुद्रशासनात् ॥ ११२ ॥

हतायां ब्रह्महत्यायां भैरवेण शिवाज्ञया । रामनाथो नृपंप्राहस्तुत्या तस्य प्रसन्नधीः

श्रीरामनाथ उवाच

पाण्ड्यभूपमहाराज! स्तोत्रेणानेन तेऽनघ !। प्रसन्नोऽहंवरंदास्ये तुभ्यंवरयचेप्सितम्
स्त्रीहत्याब्रह्महत्याभ्यांयस्तेदोषःसनिर्गतः । शुद्धोविधूतपापोऽसिराज्यंपालयपूर्ववत्
येमामत्र निषेवन्ते भक्तियुक्तेन चेतसा । नाशयामिनृणांतेषां ब्रह्महत्यायुतान्यपि
सुरापानायुतंभूप! गुरुस्त्रीगमनायुतम् । स्वर्णस्तेयायुतमपि तत्संसर्गायुतं तथा ॥
अन्यान्यपि च पापानि नाशयामि न संशयः । मत्सेविनोनराराजन्नभूयःसंसरन्ति ते
किन्तु सायुज्यरूपां मे मुक्तिं यास्यन्त्यसंशयम् ।
स्तुवन्त्यनेन स्तोत्रेण ये मां भक्तिपुरःसरम् ॥ ११६ ॥
नाशयाम्यहमेतेषां महापातकसञ्चयम् । प्रीतोऽहं तव भक्त्याच स्तोत्रेण मनुजेश्वर!
यथेष्टं प्रार्थयवरं मत्तस्त्वं वरदान्नृप! । एवमुक्तःशिवेनाऽथ शङ्करो नृपपुङ्गवः ॥१२१
रामनाथं बभाषेतं शङ्करं करुणानिधिम् ।

नृप उवाच

तव संदर्शनेनाहं कृतार्थोऽस्मि महेश्वर! ॥ १२२ ॥
इतःपरंप्रार्थनीयं ममनास्त्यऽधुनाधिकम् । मृकण्डुभयसन्तापहारिपादयुगं तव ॥
दृष्टं मया महादेव! नातःप्रार्थ्यंविभोऽस्ति वै । त्वत्पादपद्मयुगलेनिश्चलाभक्तिरस्तुमे
न पुनर्जन्म मे भूयान्मातॄणामुदरेऽशुचौ । ये मत्कृतमिदं स्तोत्रं कीर्तयन्तितव प्रभो!
ते नराःपापनिर्मुक्तास्त्वत्सेवाफलमाप्नुयुः ।

श्रीसूत उवाच

तथास्त्वित्यनुगृह्यैनं रामनाथो द्विजोत्तमाः !॥ १२६ ॥
नीलकण्ठो विरूपाक्षो लिङ्गरूपेतिरोहितः । राजापिरामनाथेन विहितानुग्रहस्ततः
रामनाथं नमस्कृत्य कृतार्थेनान्तरात्मना । स्वसेनासम्भृतःप्रीतः प्रययावात्मनःपुरीम्
वृत्तान्तमेतद्वदन्मुनीनां वनवासिनाम् । तेऽभ्यषिञ्चन्नृपं राज्ये मुनयःप्रीतमानसाः
पुत्रदारयुतो राजा प्राप्यराज्यमकण्टकम् । मन्त्रिभिःसहितोविप्रारक्षपृथिवींचिरम्

ततोऽन्तकालेसम्प्राप्तेध्यायन्रामेश्वरं शिवम् । देहान्तेरामनाथस्यसायुज्यंप्रययौशुभम्
एवम्वःकथितंविप्रा रामनाथस्यवैभवम् । चरितं पुण्यमाख्यानं शङ्कराख्य नृपस्य च
श्रृण्वन्पठन्वामनुजस्त्विममध्यायमादरात् । सर्वपापविनिर्मुक्तो रामनाथं समश्नुते

इतिश्रीस्कान्दे महापुराण एकाशीतिसाहस्र्यां संहितायां तृतीयेब्रह्मखण्डे
सेतुमाहात्म्ये रामनाथप्रसंशायांशाकल्यदुर्मरणदोषशान्तिशङ्करस्त्री-
हत्याब्रह्महत्यादोषशान्तिर्नामाष्टचत्वारिंशोऽध्यायः ॥ ४८ ॥

एकोनपञ्चाशत्तमोऽध्यायः

रामादिभीरामनाथस्तोत्रकथनम्

श्रीसूत उवाच

अथातः सम्प्रवक्ष्यामि रामनाथस्य शूलिनः ।
स्तोत्राध्यायं महापुण्यं श्रृणुत श्रद्धया द्विजाः ! ॥ १ ॥

रामःप्रतिष्ठते लिङ्गे तुष्टावपरमेश्वरम् । लक्ष्मणोजानकीसीता सुग्रीवाद्याःकपीश्वराः
ब्रह्मप्रभृतयो देवाः कुम्भजाद्या महर्षयः । अस्तुवन्भक्तिसंयुक्ताः प्रत्येकं राघवेश्वरम्
तद्वक्ष्याम्यानुपूर्व्येण श्रृणुतादरपूर्वकम् । एतच्छ्रवणमात्रेण मुक्तःस्यान्मानवो द्विजाः

श्रीराम उवाच

नमो महात्मने तुभ्यं महाभागायशूलिने । स्वपदाम्बुजभक्तार्तिहारिणे सर्पहारिणे ॥
नमोदेवादिदेवाय रामनाथाय साक्षिणे । नमो वेदान्तवेद्याय योगिनां तत्त्वदायिने
सर्वदानन्दपूर्णाय विश्वनाथाय शम्भवे । नमो भक्तभयच्छेदहेतुपादाब्जरेणवे ॥ ७ ॥
नमस्तेऽखिलनाथाय नमःसाक्षात्परात्मने । नमस्तेऽद्भुतवीर्याय महापातकनाशिने
कालकालायकालाय कालातीताय ते नमः । नमोविद्यानिहन्त्रे ते नमःपापहराय च
नमःसंसारतप्तानां तापनाशैकहेतवे । नमो मद्ब्रह्महत्याविनाशिने च विषाशिने ॥

नमस्ते पार्वतीनाथ! कैलासनिलयाव्यय ! । गङ्गाधरविरूपाक्ष ! मां रक्ष सकलापदः
तुभ्यं पिनाकहस्ताय नमोमदनहारिणे । भूयोभूयोनमस्तुभ्यं सर्वावस्थासु सर्वदा

लक्ष्मण उवाच

नमस्ते रामनाथाय त्रिपुरघ्नाय शम्भवे । पार्वतीजीवितेशाय गणेशस्कन्दसूनवे ॥
नमस्ते सूर्यचन्द्राग्निलोचनाय कपर्दिने । नमःशिवायसोमाय मार्कण्डेयभयच्छिदे ॥
नमःसर्वप्रपञ्चस्य सृष्टिस्थित्यन्तहेतवे । नमउग्राय भीमाय महादेवाय साक्षिणे ॥
सर्वज्ञायवरेण्याय वरदाय वराय ते । श्रीकण्ठाय नमस्तुभ्यं पक्षपातकभेदिने ॥
नमस्तेऽस्तु परानन्दसत्यविज्ञानरूपिणे । नमस्तेभवरोगघ्न ! स्तायूनांपतयेनमः ॥
पतये तस्कराणान्ते वनानांपतयेनमः । गणानां पतयेतुभ्यं विश्वरूपाय साक्षिणे ॥
कर्मणाप्रेरितःशम्भो! जनिष्ये यत्र यत्र तु । तत्रतत्रपदद्वन्द्वे भवतोभक्तिरस्तु मे ॥
असन्मार्गेरतिर्माभूद्भवतः कृपया मम । वैदिकाचारमार्गे च रतिःस्याद्भवते नमः ॥२०

सीतोवाच

परमकारण! शङ्कर! धूर्जटे! गिरिसुतास्तनकुङ्कुमशोभित! ।
मम पतौ परिदेहि मतिं सदा न विषमां परपूरुषगोचराम् ॥ २१ ॥

गङ्गाधर! विरूपाक्ष! नीललोहित ! शङ्कर! । रामनाथ नमस्तुभ्यं रक्ष मां करुणाकर!
नमस्तेदेवदेवेश! नमस्तेकरुणालय! । नमस्तेभवभीतानां भवभीतिविमर्दन! ॥ २३ ॥

नाथ! त्वदीयचरणाम्बुजचिन्तनेन निर्द्धूय भास्करसुताद्भयमाशु शम्भो! ।
नित्यत्वमाशुगतवान्सम्मृमण्डुपुत्रः किं वा न सिद्ध्यति तवाश्रयणात्परेश!

परेशपरमानन्द! शरणागतपालक! । पातिव्रत्यं मम सदा देहि तुभ्यं नमोनमः ॥ २५

हनूमानुवाच

देवदेवजगन्नाथ! रामनाथ! कृपानिधे! । त्वत्पादाम्भोरुहगता निश्चलाभक्तिरस्तु मे ॥
यं विना न जगत्सत्ता तद्भानमपि नो भवेत् । नमःसद्भानरूपाय रामनाथाय शम्भवे ॥

अङ्गद उवाच

यस्य भासाजगद्भानं यत्प्रकाशं विना जगत् । नभासते नमस्तस्मै रामनाथायशम्भवे

जाम्बवानुवाच

सर्वानन्दो यदानन्दो भासते परमार्थतः । नमो रामेश्वरायाऽस्मै परमानन्दरूपिणे ॥

नील उवाच

यद्देशकालदिग्भेदैरभिन्नं सर्वदाद्वयम् । तस्मै रामेश्वरायास्मै नमोऽभिन्नस्वरूपिणे ॥

नल उवाच

ब्रह्मविष्णुमहेशाना यदविद्याविजृम्भिताः । नमोऽविद्याविहीनाय तस्मै रामेश्वरायते

कुमुद उवाच

यत्स्वरूपापरिज्ञानात्प्रधानं कारणत्वतः । कल्पितं कारणायास्मै रामनाथाय शम्भवे

पनस उवाच

जाग्रत्स्वप्नसुषुप्त्यादि यदविद्याविजृम्भितम् ।
जागृतादिविहीनाय नमोऽस्मै ज्ञानरूपिणे ॥ ३३ ॥

गज उवाच

यत्स्वरूपापरिज्ञानात्कार्याणां परमाणवः ।
कल्पिताःकारणत्वेन तार्किकापसदैर्वृथा ॥ ३४ ॥

तमहं परमानन्दंरामनाथंमहेश्वरम् । आत्मरूपतया नित्यमुपास्ये सर्वसाक्षिणम् ॥

गवाक्ष उवाच

अज्ञानपाशबद्धानां पशूनां पाशमोचकम् । रामेश्वरं शिवं शान्तमुपैमि शरणं सदा ॥

गवय उवाच

स्वाध्यस्तं जगदाधारं चन्द्रचूडमुमापतिम् । रामनाथशिवंवन्दे संसारामयभेषजम्

शरभ उवाच

अन्तःकरणमात्मेति यदज्ञानाद्विमोहितैः । भण्यते रामनाथं तमात्मानं प्रणमाम्यहम्

गन्धमादन उवाच

रामनाथमुमानाथं गणनाथं च त्र्यम्बकम् । सर्वपातकशुद्ध्यर्थमुपास्ये जगदीश्वरम्

सुग्रीव उवाच

संसाराम्भोधिमध्ये मां जन्ममृत्युजलेभये । पुत्रदारधनक्षेत्रवीचिमालासमाकुले ॥
मज्जद्ब्रह्माण्डखण्डेच पतितं नाप्तपारकम् । क्रोशन्तमवशं दीनं विषयव्यालकातरम्
व्याधिनक्रसमुद्विग्नंतापत्रयझषार्दितम् । मां रक्ष गिरिजानाथ! रामनाथनमोऽस्तुते

विभीषण उवाच

संसारवनमध्येमां विनष्टनिजमार्गके । व्याधिचौरेऽवसिंहे च जन्मव्याघ्रे लयोरगे ॥
बाल्ययौवनवार्धक्यमहाभीमान्धकूपके । क्रोधेर्ष्यालोभवह्नौच विषयक्रूरपर्वते ॥ ४४
त्रासभूमण्टकाढ्येच सीदन्तं रामनाथक! । शोभनां पदवीं शम्भो! नय रामेश्वराधुना

सर्वे वानरा ऊचुः

निन्द्यानिन्द्येषुसर्वत्रजनित्वायोनिषुप्रभो! । कुम्भीपाकादिनरके पतित्वाचपुनस्तथा
जनित्वा चपुनर्योनौ कर्मशेषेण कुत्सिते । संसारे पतितानस्मान् रामनाथदयानिधे!
अनाथान्विवशान्दीनान्क्रोशतः पाहि शङ्कर ! ।
नमस्तेऽस्तु दयासिन्धो! रामनाथ! महेश्वर !॥ ४८ ॥

ब्रह्मोवाच

नमस्ते लोकनाथाय रामनाथायशम्भवे । प्रसीद मम सर्वेश! मदविद्यांविनाशय ॥

इन्द्र उवाच

यस्यशक्तिरुमादेवी जगन्मातात्रयीमयी । तमहं शङ्करं वन्दे रामनाथमुमापतिम् ॥

यम उवाच

पुत्रौगणेश्वरस्कन्दौवृषो यस्य च वाहनम् । तं वै रामेश्वरं सेवे सर्वाज्ञाननिवृत्तये ॥

वरुण उवाच

यस्य पूजाप्रभावेण जितमृत्युर्मृकण्डुजः । मृत्युञ्जयमुपास्येऽहंरामनाथं हृदातु तम्

कुबेर उवाच

ईश्वराय लसत्कर्णकुण्डलाभरणाय ते । लाक्षारुणशरीराय नमो रामेश्वराय वै ॥५३॥

आदित्य उवाच

नमस्तेऽस्तुमहादेव! रामनाथत्रियम्बक! । दक्षाध्वरविनाशायनमस्ते पाहि मां शिव!

सोम उवाच

नमस्तेभस्मदिग्धाय शूलिनेसर्पमालिने । रामनाथदयाम्भोधे! श्मशाननिलयाय ते ॥

अग्निरुवाच

इन्द्राद्यखिलदिक्पालसंसेवितपदाम्वुज ! । रामनाथायशुद्धाय नमोदिग्वाससेसदा ॥

वायुरुवाच

हराय हरिरूपाय व्याघ्रचर्माम्बरायच । रामनाथ! नमस्तुभ्यं ममाभीष्टप्रदो भव ॥५७

बृहस्पतिरुवाच

अहन्तासाक्षिणे नित्यं प्रत्यगद्वयवस्तुने । रामनाथ ! ममाज्ञानमाशु नाशय ते नमः ॥

शुक्र उवाच

वञ्चकानामलभ्याय महामन्त्रार्थरूपिणे । नमोद्वैतविहीनाय रामनाथाय शम्भवे ॥५६

अश्विनावूचतुः

आत्मरूपतयानित्यं योगिनां भासतेहृदि । अनन्यभानवेद्याय नमस्तेराघवेश्वर! ॥

अगस्त्य उवाच

आदिदेवमहादेव! विश्वेश्वरशिवाव्यय! । रामनाथाम्बिका नाथ! प्रसीद वृषभध्वज!॥

अपराधसहस्रंमे क्षमस्व विधुशेखर! । ममाहमितिपुत्रादावहन्तां मम मोचय ॥६२॥

सुतीक्ष्ण उवाच

क्षेत्राणि रत्नानि धनानि दारामित्राणि वस्त्राणि गवाश्वपुत्राः ।
नैवोपकाराय हि रामनाथ! मह्यं प्रयच्छत्वमतो विरक्तिम् ॥ ६३ ॥

विश्वामित्र उवाच

श्रुतानि शास्त्राण्यपि निष्फलानि त्रय्यप्यधीताविफलैव नूनम् ।
त्वयीश्वरे चेन्न भवेद्धि भक्तिः श्रीरामनाथे शिवमानुषस्य ॥ ६४ ॥

गालव उवाच

दानानि यज्ञानि यमास्तपांसि गङ्गादितीर्थेषु निमज्जनानि ।
रामेश्वरं त्वां न नमन्ति ये तु व्यर्थानि तेषामिति निश्चयोऽत्र ॥ ६५ ॥

वसिष्ठ उवाच

कृत्वाऽपि पापान्यखिलानि लोकस्त्वामेत्य रामेश्वर! भक्तियुक्तः ।
नमेत चेत्तानि लयं व्रजेयुर्यथान्धकारा रवितेजसाऽद्धा ॥ ६६ ॥

अत्रिरुवाच

दृष्ट्वा तु रामेश्वरमेकदाऽपि स्पृष्ट्वा नमस्कृत्य भवन्तमीशत् ।
पुनर्न गर्भं स नरः प्रयायात्किन्त्वद्वयन्ते लभते स्वरूपम् ॥ ६७ ॥

अङ्गिरा उवाच

यो रामनाथं मनुजो भवन्तमुपेत्य वन्द्यंप्रणमन्स्मरेत ।
सन्तारयेत्तानपि सर्वपापात्किमद्भुतं तस्य कृतार्थतायाम् ॥ ६८ ॥

गौतम उवाच

श्रीरामनाथेश्वरगूढमेतद्रहस्यभूतं परमं विशोकम् ।
त्वत्पादमूलं भजतां नृणां ये सेवां प्रकुर्वन्ति हि तेऽपि धन्याः ॥ ६६ ॥

शतानन्द उवाच

वेदान्तविज्ञानरहस्यविद्भिर्विज्ञेयमेतद्धि मुमुक्षुभिस्तु ।
शास्त्राणि सर्वाणि विहाय देव! त्वत्सेवनं यद्रघुवीरनाथ! ॥ ७० ॥

भृगुरुवाच

रामनाथ! तवपादपङ्कजद्वन्द्वचिन्तनविधूतकल्मषः ।
निर्भयं व्रजति सत्सुखाद्वयं त्वां स्वयं प्रथममोहचिद्वनम् ॥ ७१ ॥

कुत्स उवाच

रामनाथ! तवपादसेवनं भोगमोक्षवरदं नृणां सदा ।
रौरवादिनरकप्रणाशनं कःपुमान्न भजते रसग्रहः ॥ ७२ ॥

काश्यप उवाच

रामनाथ! तव पादसेविनां किं व्रतैरुत तपोभिरध्वरैः ।
वेदशास्त्रजपचिन्तया च किं स्वर्गसिन्धुपयसाऽपि किम्फलम् ॥ ७३ ॥

श्रीरामनाथ!त्वमागत्यशीघ्रं ममोत्क्रान्तिकाले भवान्या च साकम् ।
मां प्रापयस्वात्मपादारविन्दं विशोकं विमोहं सुखं चित्स्वरूपम् ॥ ७४ ॥

गन्धर्वा ऊचुः

रामनाथ! त्वमस्माकं मज्जतांभवसागरे । अपारदुःखकल्लोले नत्वत्तोऽन्यागतिर्हिनः

किन्नरा ऊचुः

रामनाथ! भवारण्ये व्याधिव्याघ्रभयानके । त्वामन्तरेणनास्माकं पदवीदर्शकोभवेत्

यक्षा ऊचुः

रामनाथेन्द्रियारातिबाधानोदुःसहा सदा । तान्विजेतुंसहायस्त्वमस्माकं भव धूर्जटे!

नागा ऊचुः

अचिन्त्यमहिमानं त्वां रामनाथ! वयं कथम् ।
स्तोतुमल्पधियःशक्ता भविष्यामोऽम्बिकापते! ॥ ७८ ॥

किम्पुरुषा ऊचुः

नानायोनौ च जननं मरणं चाप्यनेकशः । विनाशय तथाऽज्ञानं रामनाथनमोऽस्तुते

विद्याधरा ऊचुः

अम्बिकापतये तुभ्यमसङ्गाय महात्मने । नमस्ते रामनाथाय प्रसीद वृषभध्वज!॥८०

वसव ऊचुः

रामनाथगणेशाय गणवृन्दार्चिताङ्घ्रये । गङ्गाधरायगुह्याय नमस्ते पाहि नःसदा ॥

विश्वेदेवा ऊचुः

ज्ञप्तिमात्रैकनिष्ठानांमुक्तिदायसुयोगिनाम् । रामनाथायसाम्बायनमोऽस्मान्रक्षशङ्कर

मरुत ऊचुः

परतत्त्वायतत्त्वानां तत्त्वभूतायवस्तुतः । नमस्ते रामनाथाय स्वयंभानायशम्भवे ॥

साध्या ऊचुः

स्वातिरिक्तविहीनाय जगत्सत्ताप्रदायिने । रामेश्वरायदेवाय नमो विद्याविभेदिने ॥

सर्वे देवा ऊचुः

सच्चिदानन्दसम्पूर्णद्वैतवस्तुविवर्जितम् । ब्रह्मात्मानंस्वयंभानमादिमध्यान्तवर्जितम्
अविक्रियमसङ्गञ्च परिशुद्धं सनातनम् । आकाशादिप्रपञ्चानां साक्षिभूतं परामृतम् ॥
प्रमातीतं प्रमाणानामपि बोधप्रदायिनम् । आविर्भावतिरोभवसंकोचरहितंसदा ॥
स्वस्मिन्नध्यस्तरूपस्य प्रपञ्चास्यस्यसाक्षिणम् ।
निर्लेपं परमानन्दं निरस्तसकलक्रियम् ॥ ८८ ॥
भूमानन्दं महात्मानं चिद्रूपं भोगवर्जितम् । रामनाथं वयं सर्वे स्वपातकविशुद्धये ॥
चिन्तयामःसदाचित्ते स्वात्मानन्दबुभुत्सवः ।
रक्षाऽस्मान्करुणासिन्धो! रामनाथ! नमोऽस्तुते ॥ ९० ॥
रामनाथायरुद्राय नमःसंसारहारिणे । ब्रह्मविष्ण्वादिरूपेण विभिन्नायस्वमायया

विभीषणसचिवा ऊचुः

वरदाय वरेण्याय त्रिनेत्रायत्रिशूलिने । योगिध्येयाय नित्याय रामनाथाय ते नमः
इति रामादिभिः सर्वैः स्तुतो रामेश्वरः शिवः ।
प्राह सर्वान्समाहूय रामादीन्द्विजसत्तमाः ॥ ९३ ॥
रामराममहाभाग! जानकीरमणप्रभो! । सौमित्रेजानकिशुभे! हेसुग्रीवमुखास्तदा ॥
अन्ये ब्रह्ममुखा यूयं शृणुध्वं सुसमास्थिताः ।
स्तोत्राध्यायमिमं पुण्यं युष्माभिःकृतमादरात् ॥ ९५ ॥
येपठन्ति च शृण्वन्ति श्रावयन्ति च मानवाः । मदर्चनफलंतेषां भविष्यतिनसंशयः
रामचन्द्रधनुष्कोटिस्नानपुण्यं च वैभवेत् । वर्षमेकंरामसेतौ वासपुण्यं भविष्यति
गन्धमादनमध्यस्थसर्वतीर्थाभिमज्जनात् । यत्पुण्यं तद्भवेत्तेननात्रसंशयकारणम् ॥
उक्त्वैवंरामनाथोऽपिस्वात्मलिङ्गेतिरोदधे । स्तोत्राध्यायमिमंपुण्यंनित्यंसङ्कीर्तयन्नरः
जरामरणनिर्मुक्तो जन्मदुःखविवर्जितः । रामनाथस्यसायुज्यमुक्तिप्राप्नोत्यसंशयः

इति श्रीस्कान्देमहापुराणएकाशीतिसाहस्र्यांसंहितायां तृतीयेब्रह्मखण्डे
सेतुमाहात्म्येरामादिभीरामनाथस्तोत्रकथनन्नामैकोन-
पञ्चाशत्तमोऽध्यायः ॥ ४९ ॥

पञ्चाशत्तमोऽध्यायः

सेतुमाधवप्रशंसायांपुण्यनिधिचरितवर्णनम्

श्रीसूत उवाच

अथातःसम्प्रवक्ष्यामि सेतुमाधववैभवम् । श्रृणुध्वंमुनयोभक्त्यापुण्यंपापहरंशुभम्

पुरापुण्यनिधिर्नामराजासोमकुलोद्भवः । मथुरांपालयामास हालास्येश्वरभूषिताम्

कदाचित्समहीपालश्चतुरङ्गबलान्वितः । सोऽन्तःपुरपरीवारो मथुरायां निजंसुतम्

स्थापयित्वा रामसेतुं प्रययौ स्नानकौतुकी ।

तत्र गत्वा धनुष्कोटौ स्नात्वा सङ्कल्पपूर्वकम् ॥ ४ ॥

अन्येष्वपि च तीर्थेषु तत्रत्येषु नृपोत्तमः । सस्नौ रामेश्वरंदेवं सिषेवेच सभक्तिकम्

एवं स बहुकालं वै तत्रैवन्यवसत्सुखम् । रामसेतौ वसन्पुण्ये गन्धमादनपर्वते ॥६॥

विष्णुप्रीतिकरंयज्ञं कदाचिदकरोन्नृपः । यज्ञावसाने राजाऽसौमुदावभृथकौतुकी

सस्नौरामधनुष्कोटौसदारःसपरिच्छदः । सेवित्वारामनाथंचसवेश्मप्रययौद्विजाः

एवं निवसमानेऽस्मिन् राज्ञि पुण्यनिधौ तदा ।

कदाचिद्धरिणा लक्ष्मीर्विनोदकलहाकुलात् ॥ ६ ॥

हरिणा समयंकृत्वा नृपभक्तिं परीक्षितुम् ।

विष्णुना प्रेषिता लक्ष्मीर्वैकुण्ठात्कमलालया ॥ १० ॥

अष्टवर्षवयोरूपा प्रययौ गन्धमादने । तत्रागत्य धनुष्कोटौ तस्थौसाकमलालया

तस्मिन्नवसरेराजाययौपुण्यनिधिर्द्विजाः । स्नातुंरामधनुष्कोटौसदारःसहसैनिकः

तत्र गत्वा स राजाऽयं स्नात्वा नियमपूर्वकम् ।

तुलापुरुषमुख्यानि कृत्वा दानानि कृत्स्नशः ॥ १३ ॥

प्रयातुकामोभवनं कन्यांकाञ्चिद्ददर्शसः । अतीवरूपसम्पन्नामष्टवर्षां शुचिस्मिताम्

दृष्ट्वा नृपस्तां पप्रच्छ कन्यां चारुविलोचनाम् ।

चारुस्मितां चारुदतीं बिम्बोष्ठीं तनुमध्यमाम् ॥ १५ ॥

पुण्यनिधिरुवाच

कात्वंकन्येसुताकस्यकुतोवात्वमिहागता । अत्रागमेनकिंकार्यं तववत्से'शुचिस्मिते!

एवं नृपस्तां पप्रच्छ कन्यामुत्पललोचनाम् । एवं पृष्टातदाकन्या नृपं तमवदद्द्विजाः

नमेमातापितानास्ति नचमेबान्धवास्तथा । अनाथाऽहंमहाराज! भविष्यामिचतेसुता

त्वद्गृहेऽहं निवत्स्यामि तात! त्वां पश्यती सदा ।

हठात्कृष्यति यो वा मां ग्रहीष्यति करेण तम् ॥ १६ ॥

यदिशासिष्यसेभूप!तदाऽहंतवमन्दिरे । वत्स्यामितेसुताभूत्वापितुर्गुणनिधे!चिरम्

एवमुक्तस्तदा प्राह कन्यां पुण्यनिधिर्नृपः । अहंसर्वं करिष्यामित्वदुक्तंकन्यकेशुभे!

ममापि दुहिता नास्ति पुत्रोऽस्त्येकःकुलोद्वहः ।

तव यस्मिन्रुचिर्भद्रे! त्वां तस्मै प्रददाम्यहम् ॥ २२ ॥

आगच्छमद्गृहं कन्ये! ममचान्तःपुरेवस । मद्भार्यायाःसुताभूत्वा यथाकाममनिन्दिते!

इत्युक्तासानृपेणाथकन्या कमललोचना । तथास्त्वितिनृपंप्रोच्य तेनसाकंययौगृहम्

राजा स्वभार्याहस्ते तां प्रददौ कन्यकां शुभाम् ।

अब्रवीच्च स्वकां भार्यां राजा विन्ध्यावलिं तदा ॥ २५ ॥

आवयोःकन्यका चेयं राज्ञिविन्ध्यावलेशुभे! । रक्षेमां सर्वथात्वं वै पुरुषान्तरतःप्रिये

इतीरिता नृपेणाऽसौ भार्या विन्ध्यवलिस्तदा ।

ओमित्युक्त्वाथ तां कन्यां पुत्रीं जग्राह पाणिना ॥ २७ ॥

पोषिता पालिता राज्ञा सुतवत्कन्यका च सा ।

न्यवात्सीत्ससुखं राज्ञो भवने लालितासदा ॥ २८ ॥

अथ विष्णुर्जगन्नाथो लक्ष्मीमन्वेष्टुमादरात् ।

आरूढविनतानन्दो वैकुण्ठान्निर्ययौ द्विजाः ॥ २६ ॥

विनिर्गत्य सवैकुण्ठाद्विलङ्घितवियत्पथः । बभ्राम च बहून्देशाँल्लक्ष्मीं तत्रनदृष्टवान्

रामसेतुमथागच्छद्गन्धमादन पर्वते । अन्विष्य सर्वतो रामसेतुं बभ्राम चेन्दिराम् ॥

एतस्मिन्नेव काले सा पुष्पावचयकौतुकात् ।
सखीभिः कन्यकाऽयासीद्भवनोद्यानपादपान् ॥ ३२ ॥

पुष्पाण्यवचिनोति स्मसखीभिःसहकानने । तत्रागत्यततोविष्णुर्विप्ररुपधरोद्विजाः गङ्गाम्भो विदधन्स्कन्धेवहञ्छत्रं करेण च । गङ्गास्नायीद्विजस्यैवरचयन्वेषमात्मनः

धारयन्दक्षिणे पाणौ कुशग्रन्थिपवित्रकम् ।
भस्मोद्धूलितसर्वाङ्गस्त्रिपुण्ड्रावलिशोभितः ॥ ३५ ॥

प्रजपञ्छिवनामानि धृतरुद्राक्षमालिकः । सोत्तरीयः शुचिर्विप्राः समायातो जनार्दनः तमागतं द्विजं दृष्ट्वास्तब्धाऽतिष्ठत कन्यका । अपश्यदष्टवर्षान्तांवल्लभांपुष्पहारिणीम् दृष्ट्वा स त्वरया विप्रःकन्यांमधुरभाषिणीम् । हठात्कृष्यकरेणासौ जग्राहगरुडध्वजः तदा चुक्रोश सा कन्या सखीभिः सहकानने । तमाक्रोशंसमाकर्ण्यराजास्तुसमागतः प्रययौ भवनोद्यानं वृतः कतिपयैर्भटैः । गत्वा पप्रच्छ तांकन्यांतत्सखीरपिभूपतिः किमर्थमधुनाकुष्टंसखीभिः सहकन्यके !। त्वया तु भवनोद्याने तत्र कारणमुच्यताम् केनत्वं परिभूतासि हठात्कृष्य सुते!मम । इति पृष्टा तमाचष्टकन्या गुणनिधिं नृपम्

बाष्पपूर्णानना खिन्ना रुषिता भृशकातरा ।

कन्योवाच

अयं विप्रो हठात्कृष्य जगृहे पाण्ड्यनाथ! माम् ॥ ४३ ॥

तातात्रवृक्षमूलेऽसौसतिष्ठत्यकुतोभयः । तदाकर्ण्यवचस्तस्याराजागुणनिधिःसुधीः जग्राहतरसा विप्रमविद्वांस्तद्बलं हठात् । रामनाथालयं नीत्वा निगृह्य च हठात्तदा बद्ध्वानिगडपाशाभ्यामनयन्मण्डपंचतम् । आत्मपुत्रींसमाश्वास्यशुद्धान्तमनयन्नृपः स्वयं च प्रययौ रम्यं भवनं नृपपुङ्गवः । ततो रात्रौ स्वपन् राजास्वप्नेविप्रंददर्शतम् शङ्खचक्रगदापद्मवनमालाविभूषितम् । कौस्तुभालंकृतोरस्कं पीताम्बरधरं हरिम् ॥ कालमेघच्छविंकान्तंगरुडोपरिसंस्थितम् । चारुस्मितंचारुदन्तंलसन्मकरकुण्डलम् विष्वक्सेनप्रभृतिभिः किङ्करैरुपसेवितम् । शेषपर्यङ्कशयनं नारदादि मुनिस्तुतम् ॥ ददर्शचस्वकांकन्यांविकासिकमलस्थिताम् ।धृतपङ्कजहस्तांतांनीलकुञ्चितमूर्धजाम्

विष्णुवक्षस्थलावासां समुन्नतपयोधराम् ।
दिग्गजैरभिषिक्ताङ्गीं श्यामां पीताम्बरावृताम् ॥ ५२ ॥
स्वर्णपङ्कजसंक्लृप्तमालालङ्कृतमूर्धजाम् ।
दिव्याभरणशोभाढ्यां चारुहारविभूषिताम् ॥ ५३ ॥

अनर्घरत्नसंक्लृप्तनासाभरणशोभिताम् । सुवर्णनिष्काभरणांकाञ्चीनूपुरराजिताम् महालक्ष्मींददर्शासौराजारात्रौस्वकां सुताम् । एवं दृष्ट्वानृपःस्वप्नेविप्रंतंस्वसुतामपि उत्थितः सहसातल्पात्कन्यागृहमवाप च । तथैव दृष्ट्वाकन्यां यथास्वप्नेददर्शताम् अथोदिते सवितरि कन्यामादाय भूमिपः । रामनाथालयं प्राप ब्राह्मणंन्यस्तवान्यतः समण्डपवरे विप्रं ददर्श हरिरूपिणम् । यथा ददर्श स्वप्ने तं वनमालादिचिह्नितम्

विष्णुं विज्ञाय तुष्टाव नृपतिर्नृपतिं हरिम् (हरिमीश्वरम्) ।

पुण्यनिधिरुवाच

नमस्ते कमलाकान्त!प्रसीद गरुडध्वज! ॥ ५६ ॥

शाङ्र्गपाणे नमस्तुभ्यमपराधं क्षमस्वमे । नमस्ते पुण्डरीकाक्ष! चक्रवाणेश्रियःपते! कौस्तुभालङ्कृताङ्गाय नमः श्रीवत्सलक्ष्मणे । नमस्ते ब्रह्मपुत्रायदैत्यसंघविदारिणे अशेषभुवनावास नाभिपङ्कज शालिने । मधुकैटभसंहर्त्रे रावणान्तकराय ते ॥ ६२ ॥ प्रह्लादरक्षिणे तुभ्यं धरित्रीपतये नमः । निर्गुणायाप्रमेयाय विष्णवे बुद्धिसाक्षिणे नमस्ते श्रीनिवासाय जगद्धात्रेपरात्मने !। नारायणायदेवाय कृष्णायमधुविद्विषे ॥ नमःपङ्कजनाभाय नमः पङ्कजचक्षुषे । नमः पङ्कजहस्तायाः पतयेपङ्कजाङ्घ्रये ॥ भूयोभूयो जगन्नाथ! नमः पङ्कजमालिने । दयामूर्ते नमस्तुभ्यमपराधं क्षमस्व मे ॥ मया निगडपाशाभ्यांयः कृतोमधुसूदन! । अनयस्त्वंस्वरूपन्ते दैत्यांस्त्वदपराधिनः अतोमदपराधोऽयंक्षन्तव्योमधुसूदन! । एवंस्तुत्वामहाविष्णुं राजापुण्यनिधिर्द्विजाः लक्ष्मीं तुष्टावजननीं सर्वेषांप्राणिनांमुदा । नमोदेविजगद्धात्रि! विष्णुवक्षस्थलालये नमोऽब्धिसंभवेतुभ्यंमहालक्ष्मिहरिप्रिये । सिद्ध्यैपुष्ट्यै स्वधायैचस्वाहायैसततंनमः सन्ध्यायै च प्रभायै च धात्र्यै भूत्यैनमोनमः । श्रद्धायैचैवमेधायै सरस्वत्यैनमोनमः

यज्ञविद्ये! महाविद्ये! गुह्यविद्येतिशोभने। आत्मविद्ये च देवेशि मुक्तिदे सर्वदेहिनाम्
त्रयीरूपे!जगन्मातर्जगद्रक्षाविधायिनि। रक्षमांत्वंकृपादृष्ट्यासृष्टिस्थित्यंतकारिणि
भूयोभूयो नमस्तुभ्यं ब्रह्ममात्रेमहेश्वरि। इति स्तुत्वामहालक्ष्मींप्रार्थयामाससमाधवम्
यदज्ञानान्मया विष्णोत्वयिदोषःकृतोऽधुना। पादेनिगडबन्धेनसद्द्रोहःक्षम्यतांत्वया
लोकास्ते शिशवःसर्वे त्वंपिताजगतांहरे!। सुताऽपराधःपितृभिःक्षन्यव्योमधुसूदन!
अपराधिनां चदैत्यानांस्वरूपममपिदत्तवान्। भवान्विष्णो!ममापीममपराधंक्षमस्ववै
जिघांसयापि भगवन्नागतां पूतनांभवेत्। अनयत्स्वपदाम्भोजं तन्मां रक्षकृपानिधे!
लक्ष्मीकान्त! कृपादृष्टिं मयि पातय केशव!।

श्रीसूत उवाच

इति सम्प्रार्थितो विष्णू राज्ञा तेन द्विजोत्तमाः॥ ७९॥
प्राह गम्भीरया वाचा नृपं पुण्यनिधिं ततः।

विष्णुरुवाच

राजन्न भीस्त्वया कार्या मद्बन्धननिमित्तजा॥ ८०॥
भक्तवश्यत्वमधुना तव प्रतिहितम्मया। ममप्रीतिकरं यज्ञमकरोद्यद्भवानिह॥
अतस्त्वंममभक्तोऽसिराजन्पुण्यनिधेधुना। तेनाहंतववश्योऽस्मिभक्तिपाशेनयन्त्रितः
भक्तापराधं सततं क्षमाम्यहमरिन्दम!। त्वद्भक्तिंज्ञातुकामेन मया संप्रेरितात्वियम्॥
लक्ष्मीर्ममप्रिया राजंस्त्वया संरक्षिताऽधुना।
तेनाहं तव तुष्टोऽस्मि मत्स्वरूपा त्वियं सदा॥ ८४॥
अस्यां यो भक्तिमाँल्लोके स मद्भक्तोऽभिधीयते।
अस्यां यो विमुखो राजन्स मद्द्वेषी स्मृतःसदा॥ ८५॥
त्वमिमां भक्तिसंयुक्तो यस्मात्पूजितवानसि।
मत्पूजापि कृता तस्मान्मदभिन्ना त्वियं यतः॥ ८६॥
अतस्त्वया नापराधः कृतो मयिनरेश्वर!। किन्तुपूजैव विहिता तांत्वयाऽर्चयता मम
त्वयामद्धार्ययासाकं सङ्केतोऽकारियतपुरा। तत्सङ्केताभिगुप्तार्थंमांयद्बन्धितवानसि

तेन प्रीतोऽस्मि ते राजँल्लक्ष्मीःसंरक्षिताऽधुना।
मत्स्वरूपा च सा लक्ष्मीर्जगन्माता त्रयीमयी॥ ८९॥
तद्रक्षां कुर्वताभूप! त्वया यद्बन्धनंमम। तत्प्रियं ममराजेन्द्र! मा भयंक्रियतां त्वया
इयंलक्ष्मीस्तवसुता सत्यमेवनसंशयः। इतीरितेऽथ हरिणा लक्ष्मीःप्रोवाचभूपतिम्

लक्ष्मीरुवाच

राजन्प्रीताऽस्मिते चाहंरक्षितायद्गृहेत्वया। त्वद्भक्तिशोधनार्थंवै अहंविष्णुरुभावपि
विनोदकलहव्याजादागताविह भूपते!। तवयोगेन भक्त्याच तुष्टावावां परंतप!॥
आवयोःकृपया राजन्सुखन्ते भवतात्सदा। सर्वभूमण्डलैश्वर्यं सदा ते भवतु ध्रुवम्॥
आवयोःपादयुगले भक्तिर्भवतु ते ध्रुवा। देहान्ते मम सायुज्यं पुनरावृत्तिवर्जितम्॥
नित्यं भवतु ते राजन्माभूत्ते पापधीस्तथा।
सदा धर्मे भवतु धीर्विष्णुभक्तियुता तव॥ ९६॥
एवमुक्त्वा नृपंलक्ष्मीर्विष्णोर्वक्षस्थलं ययौ। अथविष्णुरुवाचेदं राजानं द्विजपुङ्गवाः
यथात्वयात्रबद्धोऽहं निगडेन नृपोत्तम!। तद्रूपेणैव वत्स्यामि सेतुमाधवसञ्ज्ञितः॥
मयैव कारितःसेतुस्तद्रक्षार्थमहं नृप!। भूतराक्षससङ्घेभ्यो भयानामुपशान्तये॥
ब्रह्मापिसेतुरक्षार्थं वसत्यत्रदिवानिशम्। शङ्करो रामनाथाख्यो नित्यंसेतौ वसत्यथ
इन्द्रादिलोकपालाश्च वसन्त्यत्र मुदान्विताः।
अतोऽहमत्र वत्स्यामि सेतुमाधवसञ्ज्ञया॥ १०१॥
सेतुसंरक्षणार्थंवै सर्वोपद्रवशान्तये। सर्वेषामिष्टसिद्ध्यर्थं सर्वपापोपशान्तये॥१०२
त्वयानिगडबद्धं मां सेवन्ते येऽत्रमानवाः। तेयान्तिममसायुज्यं सर्वाभीष्टंतथा नृप!
मम लक्ष्म्यास्तव तथा चरितं ये पठन्ति वै।
न ते यास्यन्ति दारिद्र्यं किंत्वैश्वर्यं व्रजन्ति ते॥ १०४॥
त्वत्कृतं यदिदं स्तोत्रं मम लक्ष्म्या विशाम्पते!।
ये पठन्ति च शृण्वन्ति लिखन्ति च मुदान्विताः॥ १०५॥
न तेषां पुनरावृत्तिर्ममलोकात्कदाचन। इत्युक्त्वा सहरिस्तत्र नृपं पुण्यनिधिंतदा

तत्रैव पूर्णरूपेण संनिधत्तेस्मसर्वदा । नृपःपुण्यनिधिर्विप्राः सेतुमाधवरूपिणम् ॥
विष्णुं प्रणम्यभक्त्यातु महापूजांविधायच । सेवित्वा रामनाथञ्च स्वमेवभवनंययौ
यावज्जीवमसौ तत्र सेतौ न्यवसदुत्तमे । मधुरायां निजं पुत्रंस्थापयामास पालकम्
तत्रैव निवसन्राजादेहान्ते मुक्तिमाप्तवान् । विन्ध्यावलिश्च तत्पत्नी तमेवानुममारसा
पतिव्रता पतिप्राणा प्रययौ सापि सद्गतिम् ॥ ११० ॥

श्रीसूत उवाच

येऽत्र भक्तियुता नित्यं सेवन्ते सेतुमाधवम् ॥ १११ ॥
न तेषां पुनरावृत्तिः कैलासाज्जातु जायते । सेतुमाधवसेवां ये न कुर्वन्त्यत्र मानवाः
नतेषां रामनाथस्य सेवा फलवतीभवेत् । गृहीत्वासैकतं सेतोर्गङ्गायां निक्षिपेद्यदि
प्रेत्य वै माधवपुरे वैकुण्ठे स वसेन्नरः । गङ्गां जिगमिषुर्विप्राः सेतुमाधवसन्निधौ ॥
संकल्प्य गङ्गां निर्गच्छेत्सा यात्रा सफला भवेत् ।
आनीय गङ्गासलिलं रामेशमभिषिच्य च ॥ ११५ ॥
सेतौनिक्षिप्य तद्भारं ब्रह्मप्राप्नोत्यसंशयः । इतिवःकथितं विप्राः सेतुमाधववैभवम्
एतत्पठन्वा शृण्वन्वावैकुण्ठे लभते गतिम् ॥ ११७ ॥
इतिश्रीस्कान्देमहापुराणएकाशीतिसाहस्र्यांसंहितायां तृतीयेब्रह्मखण्डे
सेतुमाहात्म्ये सेतुमाधवप्रशंसायां पुण्यनिधिचरितकथनंनाम
पञ्चाशत्तमोऽध्यायः ॥ ५० ॥

एकपञ्चाशत्तमोऽध्यायः

सेतुयात्राक्रमविधिवर्णनम्

श्रीसूत उवाच

अथातःसंप्रवक्ष्यामिसेतुयात्राक्रमंद्विजाः । यंश्रुत्वासर्वपापेभ्यो मुच्यतेमानवःक्षणात्
स्नात्वाऽऽचम्य विशुद्धात्मा कृतनित्यविधिः सुधीः ।
रामनाथस्य तुष्ट्यर्थं प्रीत्यर्थं राघवस्य च ॥ २ ॥
भोजयित्वा यथाशक्ति ब्राह्मणान्वेदपारगान् ।
भस्मोद्धूलितसर्वाङ्गस्त्रिपुण्ड्राङ्कितमस्तकः ॥ ३ ॥
गोपीचन्दनलिप्तो वा स्वभालेऽप्यूर्ध्वपुण्ड्रकः । रुद्राक्षमालाभरणःसपवित्रकरःशुचिः
सेतुयात्रांकरिष्येऽहमिति संकल्प्यभक्तितः । स्वगृहात्प्रव्रजेन्मौनीजपन्नष्टाक्षरंमनुम्
पञ्चाक्षरंनाममन्त्रं जपेन्नियतमानसः । एकवारं हविष्याशी जितक्रोधो जितेन्द्रियः
पादुकाछत्ररहितस्ताम्बूलपरिवर्जितः । तैलाभ्यङ्गविहीनश्चस्त्रीसङ्गादिविवर्जितः ॥
शौचाद्याचारसंयुक्तः सन्ध्योपास्तिपरायणः ।
गायत्र्युपास्तिं कुर्वाणस्त्रिसन्ध्यं रामचिन्तकः ॥ ८ ॥
मध्येमार्गं पठन्नित्यं सेतुमाहात्म्यमादरात् । पठन्नामायणं वापि पुराणान्तरमेव वा ॥
व्यर्थवाक्यानि सन्त्यज्य सेतुंगच्छेद्विशुद्धये । प्रतिग्रहंनगृह्णीयान्नाचारांश्चपरित्यजेत्
कुर्यान्मार्गे यथाशक्ति शिवविष्णवादिपूजनम् ।
वैश्वदेवादिकर्माणि यथाशक्ति समाचरेत् ॥ ११ ॥
ब्रह्मयज्ञमुखान्धर्मान्प्रकुर्याच्चाग्निपूजनम् । अतिथिभ्योऽन्नपानादिसम्प्रदद्याद्यथाबलम्
दद्याद्भिक्षां यतिभ्योऽपि वित्तशाठ्यं परित्यजन् ।
शिवविष्णवादि नामानि स्तोत्राणि च पठेत्पथि ॥ १३ ॥
धर्ममेव सदा कुर्यान्निषिद्धानिपरित्यजेत् । इत्यादिनियमोपेतः सेतुमूलं ततो व्रजेत्

पाषाणं प्रथमं दद्यात्तत्र गत्वा समाहितः । तत्रावाह्य समुद्रं च प्रणमेत्तदनन्तरम् ॥
अर्घ्यं दद्यात्समुद्राय प्रार्थयेत्तदनन्तरम् । अनुज्ञां च ततः कुर्यात्ततःस्नायान्महोदधौ
मुनीनामथ देवानां कपीनां पितॄणां तथा । प्रकुर्यात्तर्पणं विप्रा मनसा संस्मरन्हरिम्
पाषाणसप्तकं दद्यादेकं वा विप्रपुङ्गवाः । पाषाणंदानात्सफलं स्नानं भवति नान्यथा
पिप्लादसमुत्पन्ने कृत्ये लोकभयंकरे । पषाण ते मया दत्तमाहारार्थं प्रकल्प्यताम् ॥
विश्वाचि! त्वंघृताचि!त्वंविश्वयोनेविशांपते । सान्निध्यंकुरुमेदेवसागरेलवणाम्भसि
नमस्ते विश्वगुप्ताय नमो विष्णो ह्यपाम्पते । नमो हिरण्यशृङ्गाय नदीनां पतये नमः

समुद्राय वयूनाय प्रोच्चार्य प्रणमेत्तथा ॥ २१ ॥

सर्वरत्नमय श्रीमन्सर्वरत्नाकराकर । सर्वरत्नप्रधानस्त्वं गृहाणार्घ्यं महोदधे !॥ २२ ॥
अशेषजगदाधार! शङ्खचक्रगदाधर !। देहि देव! ममानुज्ञां युष्मत्तीर्थनिषेवणे ॥ २३ ॥

प्राच्यां दिशि च सुग्रीवं दक्षिणस्यां नलं स्मरेत् ॥ २४ ॥

प्रतीच्यां मैंदनामानमुदीच्यांद्विविदंतथा । रामंचलक्ष्मणंचैवसीतामपियशस्विनीम्
अङ्गदं वायुतनयंस्मरेन्मध्येबिभीषणम् । पृथिव्यांयानितीर्थानिप्राविशंस्त्वामहोदधे

स्नानस्य मे फलं देहि सर्वस्मात्त्राहि मांऽहसः ।

हिरण्यशृङ्गमित्याभ्यां नाभ्यां नारायणं स्मरेत् ॥ २७ ॥

ध्यायन्नारायणं देवं स्नानादिषु च कर्मसु । ब्रह्मलोकमवाप्नोति जायते नेह वै पुनः ॥
सर्वेषामपि पापानां प्रायश्चित्तं भवेत्ततः । प्रह्लादं नारदं व्यासमम्बरीषं शुकं तथा

अन्यांश्च भगवद्भक्तांश्चिन्तयेदेकमानसः ॥ २६ ॥

वेदादिर्यो वेदवसिष्ठयोनिः सरित्पतिः सागररत्नयोनिः ।

अग्निश्च तेजश्च इला च तेजो रेतोधा विष्णुरमृतस्य नाभिः ॥ ३० ॥

इदं ते अन्याभिरसमानमद्भिर्याः काश्च सिन्धुं प्रविशन्त्यापः ।

सर्पो जीर्णामिव त्वचं जहामि पापं शरीरात्सशिरस्कोऽभ्युपेत्य ॥ ३१ ॥

समुद्राय वयूनाय नमस्कुर्यात्पुनर्द्विजाः । सर्वतीर्थमयं शुद्धं नदीनां पतिमम्बुधिम्
द्वौ समुद्राविति पुनः प्रोच्चार्यस्नानमाचरेत् । ब्रह्माण्डोदरतीर्थानि करम्पृष्टानितेरवे!

तेन सत्येन मे सेतौतीर्थंदेहिदिवाकर !। प्राच्यां दिशिचसुग्रीवमित्यादिक्रमयोगतः
स्मृत्वा भूयो द्विजाः सेतौतृतीयं स्नानमाचरेत्। देवीपत्तनमारभ्य प्रव्रजेद्यदिमानवः
तदा तु नवपाषाणमध्ये सेतौ विमुक्तिदे । स्नानमम्बुनिधौ कुर्यात्स्वपापौघापनुत्तये
दर्भशय्यापदव्या चेद्गच्छेत्सेतुं विमुक्तिदम् । तदा तत्रोदधावेव स्नानं कुर्याद्विमुक्तये
पिप्पलादंकविकण्वंकृतान्तंजीवितेश्वरम् । मन्युश्च कालरात्रिश्चविद्याश्चाहर्गणेश्वरम्
वसिष्ठं वामदेवं चपराशरमुमापतिम् । वालमीकिंनारदं चैववालखिल्यान्मुनींस्तथा
नलं नीलं गवाक्षं च गवयं गन्धमादनम् । मैन्दं च द्विविदं चैव शरभं चर्षभं तथा ॥
सुग्रीवश्चहनूमन्तं वेगदर्शनमेव च । रामं च लक्ष्मणं सीतां महाभागां यशस्विनीम्

त्रिः कृत्वा तर्पयेदेतान्मन्त्रानुक्त्वा यथाक्रमम् ।

विभोश्च तत्तन्नामानि चतुर्थ्यन्तानि वै द्विजाः ॥ ४२ ॥

देवानृषीन्पितॄंश्चैवविधिवच्चतिलोदकैः । द्वितीयांतानिनामानिचोक्त्वावातर्पयेद्द्विजाः
तर्पयेत्सपवित्रस्तु जलेस्थित्वाप्रसन्नधीः । तर्पणात्सर्वतीर्थेषु स्नानस्यफलमाप्नुयात्
एवमेतांस्तर्पयित्वा नमस्कृत्योत्तरेज्जलात् । आर्द्रवस्त्रंपरित्यज्यशुष्कवासःसमावृतः

आचम्य सपवित्रश्च विधिवच्छ्राद्धमाचरेत् ।

पिण्डान्पितृभ्यो दद्याच्च तिलतण्डुलकैस्तथा ॥ ४६ ॥

एतच्छ्राद्धमशक्तस्यमयाप्रोक्तं द्विजोत्तमाः । धनाढ्योऽन्नेन वै श्राद्धंषड्रसेनसमाचरेत्
गोभूतिलहिरण्यादिदानं कुर्यात्समृद्धिमान् । रामचन्द्रधनुष्कोटावेवमेव समाचरेत्
पाषाणदानपूर्वाणितर्पणांतानिवैद्विजाः । सेतुमूलेयथैतानि विधिवद्व्यतनोद्द्विजाः
चक्रतीर्थं ततो गत्वा तत्रापि स्नानमाचरेत् । पश्येच्च सेत्वधिपतिंदेवंनारायणंहरिम्
गच्छन्पश्चिममार्गेण तत्रत्ये चक्रतीर्थके । स्नात्वा दर्भशयं देवं प्रपश्येद्भक्तिपूर्वकम् ॥
कपितीर्थं ततःप्राप्यतत्रापिस्नानमाचरेत् । सीताकुण्डं ततःप्राप्यतत्रापिस्नानमाचरेत्
ऋणमोचनतीर्थं तु ततः प्राप्यमहाफलम् । स्नात्वा प्रणम्य रामंचजानकीरमणंप्रभुम्

गच्छेल्लक्ष्मणतीर्थं तु कण्ठादुपरि वापनम् ।

कृत्वा स्नायाच्च तत्राऽपि दुष्कृतान्यपि चिन्तयन् ॥५४ ॥

ततःस्नात्वारामतीर्थेततोदेवालयंव्रजेत् । स्नात्वापापविनाशेनचगङ्गायमुनायोस्तथा
सावित्र्यां च सरस्वत्यां गायत्र्यां च द्विजोत्तमाः !।
स्नात्वा च हनुमत्कुण्डे ततः स्नायान्महाफले ॥
ब्रह्मकुण्डं ततः प्राप्य स्नायाद्विधिपुरः सरम् ॥ ५६ ॥
नागकुण्डं ततः प्राप्य सर्वपापविनाशनम् । स्नानं कुर्यान्नरो विप्रानरककलेशनाशनम्
गंगाद्याः सरितः सर्वास्तीर्थानि सकलान्यपि ॥ ५७ ॥
सर्वदा नागकुण्डेतु वसन्ति स्वाघशान्तये । अनंतादिमहानागैरक्षाभिरिदमुत्तमम् ॥
कल्पितं मुक्तिदंतीर्थंरामसेतौशिवङ्करम् । अगस्त्यकुण्डंसंप्राप्यततःस्नायादनुत्तमम्
अथाग्नितीर्थमासाद्य सर्वदुष्कर्मनाशनम् ।
स्नात्वा सन्तर्प्य विधिवच्छ्राद्धं कुर्यात्पितृन्स्मरन् ॥ ६० ॥
गोभूहिरण्यधान्यानिब्राह्मणेभ्यःस्वशक्तितः । दत्त्वाग्नितीर्थतीरेतुसर्वपापैःप्रमुच्यते
अथवा यानि तीर्थानि चक्रतीर्थमुखानि वै । अनुक्रान्तानि विप्रेन्द्राःसर्वपापहराणितु
स्नायात्तदनुपूर्वेणस्नायाद्वापि यथारुचि । स्नात्वैवंसर्वतीर्थेषु श्राद्धादीनिसमाचरेत्
पश्चाद्रामेश्वरं प्राप्य निषेव्य परमेश्वरम् । सेतुमाधवमागम्य तथा रामं च लक्ष्मणम्
सीतां प्रभञ्जनसुतं तथान्यान्कपिसत्तमान् । तत्रत्यसर्वतीर्थेषु स्नात्वा नियमपूर्वकम्
प्रणम्य रामनाथं च रामचन्द्रं तथापरान् । नमस्कृत्यधनुष्कोटिं ततः स्नातुम्व्रजेन्नरः
तत्र पाषाणदानादिपूर्वोक्तनियमं चरेत् । धनुष्कोटौ च दानानिदद्याद्वित्तानुसारतः
क्षेत्रं गाश्च तथाऽन्यानि वस्त्राण्यन्यानि चादरात् ।
ब्राह्मणेभ्यो वेदविद्भ्यो दद्याद्वित्तानुसारतः ॥ ६८ ॥
कोटितीर्थं ततः प्राप्य स्नायान्नियमपूर्वकम् । ततोरामेश्वरंदेवं प्रणमेद्वृषभध्वजम्
विभवे सति विप्रेभ्यो दद्यात्सौवर्णदक्षिणाम् ।
तिलान्धान्यं च गां क्षेत्रं वस्त्राण्यन्यानि तण्डुलान् ॥ ७० ॥
दद्याद्वित्तानुसारेण वित्तलोभविवर्जितः । धूपं दीपं च नैवेद्यं पूजोपकरणानि च
रामेश्वराय देवाय दद्याद्वित्तानुसारतः । स्तुत्वा रामेश्वरं देवं प्रणम्य च सभक्तिकम्

अनुज्ञाप्य ततो गच्छेत्सेतुमाधवसन्निधिम् । तस्मैदत्त्वाचधूपादीननुज्ञाप्यच माधवम्
पूर्वोक्तनियमोपेतः पुनरायात्स्वकं गृहम् । ब्राह्मणान्भोजयेदन्नैः षड्रसैः परिपूरितैः
तेनैव रामनाथोऽस्मै प्रीतोऽभीष्टं प्रयच्छति ।
नारकं चास्य नास्त्येव दारिद्र्यं च विनश्यति ॥ ७५ ॥
सन्ततिर्वर्धते तस्य पुरुषस्य द्विजोत्तमाः । संसारमवधूयाशु सायुज्यमपि यास्यति
अत्रागन्तुमशक्तश्चेच्छ्रुतिस्मृत्यागमेषु यत् । ग्रन्थजातंमहापुण्यं सेतुमाहात्म्यसूचकम्
तं ग्रन्थं पाठयेद्विप्रा महापातकनाशनम् । इदं वा सेतुमाहात्म्यं पठेद्भक्तिपुरःसरम्
सेतुस्नानफलं पुण्यं तेनाप्नोतिनसंशयः । अन्धपङ्ग्वादिविषयमेतत्प्रोक्तं मनीषिभिः

श्रीसूत उवाच

एवं वःकथितोविप्राःसेतुयात्राक्रमोद्विजाः । एतत्पठन्वाश्रृण्वन्वासर्वदुःखाद्विमुच्यते
इतिश्रीस्कान्देमहापुराणएकाशीतिसाहस्त्र्यांसंहितायां तृतीयेब्रह्मखण्डे
सेतुमाहात्म्ये यात्राक्रमवर्णनंनामैकपञ्चाशत्तमोऽध्यायः ॥ ५१ ॥

द्विपञ्चाशत्तमोऽध्यायः

सेतुवैभववर्णनम्

श्रीसूत उवाच

भूयोऽप्यहं प्रवक्ष्यामि सेतुमुद्दिश्य वैभवम् । युष्माकमादरेणाहंश्रृणुध्वं मुनिपुङ्गवाः
स्थानानामपि सर्वेषामेतत्स्थानं महत्तरम् । अत्र जप्तं हुतं तप्तं दत्तं चाऽक्षयमुच्यते ॥
अस्मिन्नेव महास्थाने धनुष्कोटौ निमज्जनात् ।
वाराणस्यां दशसमावासपुण्यफलं भवेत् ॥ ३ ॥
तस्मिंस्थले धनुष्कोटौ स्नात्वा रामेश्वरं शिवम् ।
दृष्ट्वा नरो भक्तियुक्तस्त्रिदिनानि वसेद् द्विजाः !॥ ४ ॥

पुण्डरीकपुरे तेन दशवत्सरवासजम् । पुण्यंभवतिविप्रेन्द्रा महापातकनाशनम् ॥
अष्टोत्तरसहस्रं तु मन्त्रमाद्यं षडक्षरम् । अत्रजप्त्वानरोभक्तयाशिवसायुज्यमाप्नुयात्
मध्यार्जुने कुम्भकोणे मायूरे श्वेतकानने । हालास्ये च गजारण्येवेदारण्ये च नैमिषे
श्रीपर्वते च श्रीरङ्गे श्रीमद्वृद्धगिरौ तथा । चिदम्बरे चवल्मीके शेषाद्रावरुणाचले
श्रीमद्दक्षिणकैलासे वेङ्कटाद्रौ हरिस्थले । काञ्चीपुरे ब्रह्मपुरे वैद्येश्वरपुरे तथा ॥ ६॥
अन्यत्रापि शिवस्थाने विष्णुस्थानेच सत्तमाः । वर्षवासभवंपुण्यंधनुष्कोटौनरोमुदा
माघमासे यदिस्नायादाप्नोत्येव न संशयः । इमं सेतुं समुद्दश्य द्वौसमुद्रावितिश्रुतिः
विद्यते ब्राह्मणश्रेष्ठा मातृभूता सनातनी । अदोयद्दारुरित्यन्या यत्रास्ति मुनिपुङ्गवाः

विष्णोःकर्माणि पश्यन्ती सेतुवैभवशंसिनी ।
श्रुतिरस्ति तथाऽन्याऽपि तद्विष्णोरिति चापरा ॥ १३ ॥

इतिहासपुराणानि स्मृतयश्च तपोधनाः । एकवाक्यतया सेतुमाहात्म्यंप्रब्रुवन्ति हि
चन्द्रसूर्योपरागेषु कुर्वन्सेत्ववगाहनम् । अविमुक्ते दशाब्दं तु गङ्गास्नानफलं लभेत्
कोटिजन्मकृतंपापं तत्क्षणेनैव नश्यति । अश्वमेधसहस्रस्य फलमाप्नोत्यनुत्तमम्
विषुवायनसङ्क्रान्तौ शशिवारे च पर्वणि । सेतुदर्शनमात्रेण सप्तजन्मार्जितंशुभम्
नश्यते स्वर्गतिं चैव प्रयाति द्विजपुङ्गवाः । मकरस्थे रवौमाघे किञ्चिदभ्युदिते रवौ

स्नात्वा दिनत्रयं मर्त्यो धनुष्कोटौ विपातकः ।
गङ्गादिसर्वतीर्थेषु स्नानपुण्यमवाप्नुयात् ॥ १६ ॥
धनुष्कोटौ नरः कुर्यात्स्नानं पञ्चदिनेषु यः ।
अश्वमेधादिपुण्यं च प्राप्नुयाद् ब्राह्मणोत्तमाः ॥ २० ॥

चान्द्रायणादिकृच्छ्राणामनुष्ठानफलं लभेत् । चतुर्णामपिवेदानां पारायणफलं तथा
माघमासे दशाहःसु धनुष्कोटौ निमज्जनात् । ब्रह्महत्यायुतंनश्येन्नात्रकार्याविचारणा
माघमासे धनुष्कोटौ दशपञ्चदिनानि यः । स्नानं करोतिमनुजःसवैकुण्ठमवाप्नुयात्
माघमासे रामसेतौ स्नानंविंशद्दिनं चरन् । शिवसामीप्यमाप्नोति शिवेनसह मोदते

पञ्चविंशद्दिनं स्नानं कुर्वन्सारूप्यमाप्नुयात् ।

स्नानं त्रिंशद्दिनं कुर्वन्सायुज्यं लभते ध्रुवम् ॥ २५ ॥

अतोऽवश्यं रामसेतौमाघमासेद्विजोत्तमाः । स्नानंसमाचरेद्विद्वान्किञ्चिदभ्युदितेरवौ
चन्द्रसूर्योपरागे च तथैवार्द्धोदये द्विजाः । महोदये रामसेतौ स्नानं कुर्वन्द्विजोत्तमाः
अनेकक्लेशसंयुक्तं गर्भवासं न पश्यति । ब्रह्महत्यादिपापानां नाशकं च प्रकीर्तितम्
सर्वेषां नरकाणां च बाधकं परिकीर्तितम् । सम्पदामपिसर्वासांनिदानंपरिकीर्तितम्

इन्द्रादिसर्वलोकानां सालोक्यादिप्रदं तथा ।
चन्द्रसूर्योपरागे च तथैवार्द्धोदये द्विजाः ॥ ३० ॥

महोदये धनुष्कोटौ मज्जनं त्वतिनिश्चितम् । रावणस्यविनाशार्थंपुरारामेणनिर्मितम्
सिद्धचारणगन्धर्वकिन्नरोरगसेवितम् । ब्रह्मदेवर्षिराजर्षिपितृसङ्घनिषेवितम् ॥ ३२
ब्रह्मादिदेवतावृन्दैस्सेवितं भक्तिपूर्वकम् । पुण्यं यो रामसेतुं वै संस्मरन्पुरुषोद्विजाः
स्नायाच्च यत्र कुत्रापि तटाकादौ जलाशये । न तस्यदुष्कृतंकिञ्चिद्भविष्यतिकदाचन
सेतुमध्यस्थतीर्थेषु मुष्टिमात्रप्रदानतः । नश्यन्ति सकला रोगा भ्रूणहत्यादयस्तथा

रामेण धनुषः पुण्यां यो रेखां पश्यते कृताम् ।
न तस्य पुनरावृत्तिर्वैकुण्ठात्स्यात्कदाचन ॥ ३६ ॥
धनुष्कोटिरिति ख्याता या लोके पापनाशिनी ।
विभीषणप्रार्थनया कृता रामेण धीमता ॥ ३७ ॥
धनुष्कोटिर्महापुण्या तस्यांस्नात्वा सभक्तिकम् ।
दद्याद्दानानि वित्तानां क्षेत्राणां च गवां तथा ॥ ३८ ॥

तिलानांतण्डुलानांचधान्यानांपयसांतथा । वस्त्राणांभूषणानांत्रमाषाणामोदनस्यच

दध्नां घृतानां वारीणां शाकानामप्युदश्वितम् ।
शुद्धानां शर्कराणां च सस्यानां मधुनां तथा ॥ ४० ॥

मोदकानामपूपानामन्येषां दानमेव च । रामसेतौद्विजाः प्रोक्तं सर्वाभीष्टप्रदायकम्
अतोदद्याद्रामसेतौ वित्तलोभविवर्जितः । दत्तं हुतं च तप्तंच जपश्च नियमादिकम्
श्रीरामधनुषः कोटावनन्तफलदं भवेत् । तेन देवाश्चतुष्यन्ति तुष्यन्तिपितरस्तथा

तुष्यन्ति मुनयः सर्वे ब्रह्मा विष्णुः शिवस्तथा।
नागाः किम्पुरुषाः यक्षाः सर्वे तुष्यन्ति निश्चितम् ॥ ४४ ॥
स्वयं च पूतो भवति धनुष्कोट्यऽवलोकनात्।
स्ववंशजान्नरान्सर्वान्पावयेच्च पितामहान् ॥ ४५ ॥

तारयेच्च कुलं सर्वं धनुष्कोट्यवलोकनात्। रामस्यधनुषःकोट्याकृतरेखावगाहनात्

पञ्चपातककोटीनां नाशः स्यात्तत्क्षणे ध्रुवम्।
श्रीरामधनुषः कोट्या रेखां यः पश्यते कृताम् ॥ ४७ ॥

अनेकक्लेशसम्पूर्णगर्भवासंन पश्यति। यत्रसीताऽनलंप्राप्तातस्मिन्कुण्डेनिमज्जनात् भ्रूणहत्याशतं विप्रा नश्यन्ति क्षणमात्रतः। यथारामस्तथासेतुर्यथा गङ्गातथाहरिः गङ्गे! हरे! रामसेतो!त्विति सङ्कीर्तयन्नरः। यत्रक्वापिबहिःस्नायात्तेनयातिपरांगतिम् सेतावर्धोदये स्नात्वा गन्धमादनपर्वते। पितृनुद्दिश्ययःपिण्डान्दद्यात्सर्षपमात्रकान् पितरस्तृप्तिमायान्ति यावच्चन्द्रदिवाकरौ। शमीपत्रप्रमाणं तुपितृनुद्दिश्य भक्तितः

द्विजेन पिण्डं दत्तं चेत्सर्वपापविमोचितः।
स्वर्गस्थो मुक्तिमायाति नरकस्थो दिवं व्रजेत् ॥ ५३ ॥

सेतौ च पद्मनाभे चगोकर्णेपुरुषोत्तमे। उदन्वदम्भसिस्नानं सार्वकालिकमीप्सितम्

शुक्राङ्गारकसौरीणां वारेषु लवणाम्भसि।
सन्तानकामी न स्नायात्सेतोरन्यत्र कर्हिचित् ॥ ५५ ॥

अकृतप्रेतकार्योवा गर्भिणीपतिरेव वा। न स्नायादुदधौविद्वान्सेतोरन्यत्रकर्हिचित् नकालापेक्षणंसेतोर्नित्यस्नानं प्रशस्यते। वारतिथ्यृक्षनियमाःसेतोरन्यत्र हि द्विजाः

उद्दिश्य जीवतः स्नायान्न तु स्नायान्मृतान्प्रति।
कुशैः प्रतिकृतिं कृत्वा स्नापयेत्तीर्थवारिभिः ॥ ५८ ॥

इमं मन्त्रं समुच्चार्यप्रसन्नेन्द्रियमानसः।कुशोऽसित्वंपवित्रोऽसिविष्णुनाविधृतःपुरा

त्वयि स्नाते स च स्नातो यस्यैतद् ग्रन्थिबन्धनम्।
सर्वत्र सागरः पुण्यः सदा पर्वणि पर्वणि ॥ ६० ॥

सेतौ सिन्धवब्धिसंयोगे गङ्गासागरसङ्गमे। नित्यस्नानंहिनिर्दिष्टंगोकर्णेपुरुषोत्तमे नाऽपर्वणिसरिन्नाथंस्पृशेदन्यत्रकर्हिचित्। पितृणांसर्वदेवानांमुनीनामपिशृण्वताम् प्रतिज्ञामकरोद्रामः सीतालक्ष्मणसंयुतः। मयाह्यत्रकृते सेतौ स्नानंकुर्वन्ति ये नराः मत्प्रसादेन ते सर्वे नयास्यन्ति पुनर्भवम्। नश्यन्तिसर्वपापानिमत्सेतोरवलोकनात्

रामनाथस्य माहात्म्यं मत्सेतोरपि वैभवम्।
नाऽहं वर्णयितुं शक्तो वर्षकोटिशतैरपि ॥ ६५ ॥

इति रामस्य वचनं श्रुत्वा देवमहर्षयः। साधुसाध्विति सन्तुष्टाः प्रशशंसुश्च तद्वचः सेतुमध्ये चतुर्वक्त्रः सर्वदेवसमन्वितः। अध्यास्ते तस्य रक्षार्थमीश्वरस्याज्ञयासदा रक्षार्थं रामसेतौ हि सेतुमाधवसञ्ज्ञया। महाविष्णुः समध्यास्ते निबद्धोनिगडेनवै महर्षयश्च पितरो धर्मशास्त्रप्रवर्तकाः। देवाश्च सहगन्धर्वाः सकिन्नरमहोरगाः ॥ विद्याधराश्चारणाश्चयक्षाःकिंपुरुषास्तथा। अन्यानिसर्वभूतानिवसन्त्यस्मिन्नहर्निशम्

सोऽयं दृष्टः श्रुतो वापि स्मृतःस्पृष्टोऽवगाहितः।
सर्वस्माद् दुरितात्पाति रामसेतुर्द्विजोत्तमाः ॥ ७१ ॥

सेतावर्धोदये स्नानमानन्दप्राप्तिकारणम्। मुक्तिप्रदं महापुण्यं महानरकनाशनम् ॥

पौषे मासे विष्णुभस्थे दिनेशे भानोर्वारे किञ्चिदुद्यद्दिनेशे।
युक्ताऽमा चेन्नागहीना तु पाते विष्णोर्ऋक्षे पुण्यमर्धोदयं स्यात् ॥ ७३ ॥

तस्मिन्नर्धोदयेसेतौ स्नानंसायुज्यकारणम्। व्यतीपातसहस्रेण दर्शमेकंसमंस्मृतम् दर्शायुतसमं पुण्यं भानुवारो भवेद्यदि। श्रवणर्क्षं यदि भवेद्भानुवारेण संयुतम् ॥ पुण्यमेव तु विज्ञेयमन्योन्यस्यैव योगतः। एकैकमप्यमृतदं स्नानदानजपार्चनात् ॥ पञ्चस्वपि चयुक्तेषु किमुवक्तव्यमत्रहि। श्रवणंज्योतिषां श्रेष्ठममा श्रेष्ठातिथिष्वपि व्यतीपातं तुयोगानां वारंवारेषु वै रवेः। चतुर्णामपि यो योगो मकरस्थेरवौभवेत्

तस्मिन्काले रामसेतौ यदि स्नायात्तु मानवः।
गर्भं न मातुराप्नोति किन्तु सायुज्यमाप्नुयात् ॥ ७६ ॥

अर्धोदयसमः कालो न भूतो न भविष्यति। एवंमहोदयः कालो धर्मकालःप्रकीर्तितः

एतेषु पुण्यकालेषु सेतौ दानं प्रकीर्तितम् । आचारश्च तपो वेदो वेदान्तश्रवणं तथा
शिवविष्णवादिपूजापि पुराणार्थप्रवक्तृता । यस्मिन्विप्रे तु विद्येते दानपात्रंतदुच्यते
पात्राय तस्मै दानानिसेतौ दद्याद्द्विजातये । यदि पात्रंनलभ्येत सेतावाचारसंयुतम्
संकल्प्योद्दिश्यसत्पात्रंप्रदद्याद्ग्राममागतः । अतोनाधमपात्रायदातव्यंफलकांक्षिभिः

उत्तमं सेतुमाहात्म्यं वक्तुर्देयं न चान्यतः ॥ ८४ ॥

अत्रेतिहासं वक्ष्यामि वसिष्ठोक्तमनुत्तमम् । दिलीपायमहाराज्ञे दानपात्रविवित्सवे

दिलीप उवाच

दानानि कस्मै देयानि ब्रह्मपुत्रपुरोहित !। एतन्मे तत्त्वतो ब्रूहित्वच्छिष्यस्यमहामुने!

वसिष्ठ उवाच

पात्राणामुत्तमं पात्रं वेदाचारपरायण ! । तस्मादप्यधिकं पात्रं शूद्रान्नं यस्य नोदरे ॥
वेदाः पुराणमन्त्राश्चशिवविष्णवादिपूजनम् । वर्णाश्रमाद्यनुष्ठानं वर्तते यस्यसंततम्
दरिद्रश्च कुटुम्बी च तत्पात्रं श्रेष्ठमुच्यते । तस्मिन्पात्रे प्रदत्तं वै धर्मकामार्थमोक्षदम्
पुण्यस्थले विशेषेण दानंसत्पात्रगर्हितम् । अन्यथादशजन्मानिकृकलासोभविष्यति
जन्मत्रयंरासभःस्यान्मण्डूकश्चद्विजन्मनि । एकजन्मनिचण्डालस्ततः शूद्रोभविष्यति
ततश्च क्षत्रियो वैश्यः क्रमाद्विप्रश्च जायते । दरिद्रश्च भवेत्तत्र बहुरोगसमन्वितः ॥
एवं बहुविधा दोषा दुष्टपात्रप्रदानतः । तस्मात्सर्वप्रयत्नेन सत्पात्रेषु प्रदापयेत् ॥
न लभ्यते चेत्सत्पात्रं तदासंकल्पपूर्वकम् । एकं सत्पात्रमुद्दिश्य प्रक्षिपेदुदकं भुवि
उद्दिष्टपात्रस्य मृतौ तत्पुत्राय समर्पयेत् । तस्यापि मरणे प्राप्ते महादेवे समर्पयेत् ॥

अतो नाधमपात्राय दद्यात्तीर्थे विशेषतः ॥ ६५ ॥

श्रीसूत उवाच

एवमुक्तो वसिष्ठेन दिलीपः स द्विजोत्तमाः ॥ ६६ ॥

तदाप्रभृतिसत्पात्रे प्रायच्छद्दानमुत्तमम् । अतःपुण्यस्थले सेतावत्रापि मुनिपुङ्गवाः
यदिलभ्येत सत्पात्रं तदादद्याद्धनादिकम् । नोचेत्सङ्कल्पपूर्वं तु विशिष्टं पात्रमुत्तमम्
समुद्दिश्य जलंभूमौ प्रक्षिपेद्भक्तिसंयुतः । स्वग्राममागतः पश्चात्तस्मिन्पात्रे समर्पयेत्

पूर्वं संकल्पितं वित्तं धर्मलोपोऽन्यथा भवेत् ।

न दुःखं पुनराप्नोति किं तु सायुज्यमाप्नुयात् ॥ १०० ॥

अर्धोदयसमः कालो न भूतो न भविष्यति । कुम्भकोणं सेतुमूलं गोकर्णं नैमिषंतथा
अयोध्यादण्डकारण्यं विरूपाक्षं च वेङ्कटम् । शालिग्रामंप्रयागं चकाञ्चीद्वारावतीतथा
मधुरापद्मनाभं च काशी विश्वेश्वरालया । नद्यःसर्वाःसमुद्राश्च पर्वतंभास्करं स्मृतम्
मुण्डनंचोपवासश्च क्षेत्रेष्वेषुप्रकीर्तितम् । लोभान्मोहादकृत्वायःस्वगृहंयाति मानवः
सहैव यान्ति तद्गेहे पातकानि च तेनवै । चतुर्विंशतितीर्थानि पर्वते गन्धमादने ॥
तत्रलक्ष्मणतीर्थे तु वपनंमुनिभिःस्मृतम् । तीरेलक्ष्मणतीर्थस्य लोमवर्ज्यंशिवाज्ञया

शिरोमात्रस्य वपनं कृत्वा दत्त्वा च दक्षिणाम् ।

स्नात्वा लक्ष्मणतीर्थे च दृष्ट्वा लक्ष्मणशङ्करम् ॥ १०७ ॥

सर्वपापविनिर्मुक्तः शङ्करं याति मानवः । अर्धोदये सदा स्नानं सेतावेवं समाचरेत्
नास्तिसेतुसमंतीर्थं नास्तिसेतुसमंतपः । नास्तिसेतुसमंपुण्यं नास्तिसेतुसमागतिः
उपरागसहस्रेण सममर्धोदयं स्मृतम् । अर्धोदयसमः कालो नास्ति संसारमोचकः
तस्मिन्नर्धोदये रामसेतौ स्नानं तु यद्भवेत् । न तत्तुल्यं भवेत्पुण्यं सर्वशास्त्रेषु सर्वदा
षष्टिवर्षसहस्राणि भागीरथ्यवगाहनात् । यत्पुण्यमृषिनिर्दिष्टं तत्पुण्यं मुनिपुङ्गवाः ॥
एकवारं रामसेतौ स्नानात्सिध्यति निश्चितम् । अर्द्धोदये विशेषेण तथैवच महोदये
मकरस्थे रवौ माघे प्रयागे पापमोचने । माघस्नानसहस्रेण यत्पुण्यं लभते नरः ॥
तस्मिन्नर्धोदये विप्रा रामसेतौ निमज्जनात् । एकवारेण तत्पुण्यं लभते नात्र संशयः

त्रैलोक्यस्थेषु तीर्थेषु स्नातानां यत्फलं भवेत् ।

सकृदर्द्धोदये सेतौ स्नात्वा तत्पुण्यभाग्भवेत् ॥ ११६ ॥

ब्रह्मज्ञानविहीनानां कृतघ्नानां दुरात्मनाम् । पापिनामितरेषां च महापातकिनां तथा

सेतावर्द्धोदये स्नानाद्विशुद्धिरिति निश्चिता ।

स्थलान्तरे कृतघ्नानां निष्कृतिर्नास्ति कर्हिचित् ॥ ११८ ॥

सेतावर्द्धोदये स्नानात्तेषामपि हि निष्कृतिः । सेतावर्द्धोदये स्नानंये नकुर्वन्तिमोहतः

संसारेषु निमज्जन्ति ते यथान्धाः पतन्त्यधः ।
सेतावर्धोदये स्नात्वा भित्त्वा भास्करमण्डलम् ॥ १२० ॥

ब्रह्मलोकंप्रयास्यंतिनात्र कार्याविचारणा । अर्द्धोदयेतुसम्प्राप्तेस्नात्वा सेतौविमुक्तिदे
स्नात्वासम्यग्जगन्नाथं राघवं सीतया सह । रामेश्वरं महादेवं सुग्रीवादिमुखान्कपीन्
ध्यात्वा देवानृषींश्चापितथापितृगणानपि । तर्पयेदपि तान्सर्वान्स्वदारिद्र्यविमुक्तये
अर्द्धोदयाख्यममलं जगन्नाथंसमर्चयेत् । सेतावर्द्धोदये काले तेन प्रीणाति केशवः ॥
दिवाकर! नमस्तेऽस्तु तेजोराशे जगत्पते !। अत्रिगोत्रसमुपन्नलक्ष्मीदेव्याः सहोदर
अर्घंगृहाणभगवन्सुधाकुम्भ! नमोऽस्तु ते । व्यतीपात! महायोगिन्महापातकनाशन
सहस्रबाहो सर्वात्मन्गृहाणार्घ्यं नमस्तु ते । तिथिनक्षत्रवाराणामधीश! परमेश्वर !॥
मासरूप! गृहाणार्घ्यंकालरूपनमोऽस्तु ते । इति दत्त्वा पृथङ्मन्त्रैरर्घ्यमर्द्धोदयेनरः
उपायनानिविप्रेभ्योदद्याद्वित्तानुसारतः । चतुर्दशद्वादशाष्टौसप्तषट् पञ्च वा द्विजान्
यथाशक्त्यन्नपानाद्यैः पृथङ्मन्त्रैः समर्चयेत् । कांस्यपात्रं समादायनूतनं दारवं तु वा
विप्राणांपुरतःस्थाप्य पयसापरिपूरितम् । सफलंसगुडंसाज्यं सताम्बूलंसदक्षिणम्
दद्याद्यज्ञोपवीतंचगांसवत्सांपयस्विनीम् । अलंकृतेभ्योविप्रेभ्यो यथाशक्तिवदेदिदम्
श्रवणर्क्षे जगन्नाथ! जन्मर्क्षे तव केशव । यन्मया दत्तमर्थिभ्यस्तदक्षयमिहास्तु मे
नक्षत्राणामधिपतेदेवानाममृतप्रद । त्राहि मां रोहिणीकान्त! कलाशेष! नमोऽस्तु ते
दीननाथ! जगन्नाथ! कलानाथ! कृपाकर !। त्वत्पादपद्मयुगलभक्तिरस्त्वचला मम ॥
व्यतीपातनमस्तेऽस्तु सोमसूर्याग्निसंनिभ । यद्दानादिकृतं किञ्चित्तदक्षयमिहास्तु ते
अर्थिनां कल्पवृक्षोऽसि वासुदेव! जनार्दन !। मासर्त्वयनकालेश पापं शमय मे हरे
इत्यर्चयित्वा विप्रेन्द्रास्ततःश्राद्धं समाचरेत् । हिरण्यश्राद्धमामंवापाकश्राद्धमथापिवा
पार्वणं च ततः कुर्याद्वित्तशाठ्यं नकारयेत् । आचार्यंपूजयेत्पश्चाद्वस्त्रभूषणकुण्डलैः
प्रतिमामर्पयेत्तस्मै गां च छत्रमुपानहम् । एवमर्द्धोदये सेतौ व्रतं कुर्याद् द्विजोत्तमः
तेनैव कृतकृत्यः स्यात्कर्तव्यं नास्तिकिञ्चन । स्थलान्तरेऽप्येवमेतद्व्रतमर्धोदयेचरेत्
सेतुः समुद्रे रामेण निर्मितोगन्धमादने । सेतुःसेतुरितिप्रोच्चैस्तस्य नाम्नःप्रकीर्तनात्

स्नानकालेमनुष्याणांपातकानांतुकोटयः । तत्क्षणादेवनश्यंतियास्यंत्यप्यच्युतंपदम्
निमिषं निमिषार्द्धंवासेतौतिष्ठति यो नरः । तद्दृष्टिगोचरं गन्तुं न शक्तायमकिङ्कराः
रामसेतुं धनुष्कोटिंरामंसीतां चलक्ष्मणम् । रामनाथं हनूमन्तंसुग्रीवादिमुखान्कपीन्
विभीषणंनारदंच विश्वामित्रं घटोद्भवम् । वसिष्ठंवामदेवंचजाबालिमथकाश्यपम्
रामभक्तांस्तथा चान्यांश्चिन्तयन्मनसा तदा । सर्वदुःखाद्विमुच्येत प्रयातिपरमंपदम्
सत्यक्षेत्रे हरिक्षेत्रे कृष्णक्षेत्रे च नैमिषे । शालग्रामे बदर्यां च हस्तिशैले वृषाचले
शेषाद्रौ चित्रकूटे च लक्ष्मीक्षेत्रे कुरङ्गके । काञ्चिके कुम्भकोणे च मोहिनीपुरएवच
ऐन्द्रे श्वेताचले पुण्ये पद्मनाभे महास्थले । फुल्लाख्येघटिकाद्रौच सारक्षेत्रेहरिस्थले
श्रीनिवासे महाक्षेत्रे भक्तनाथमहास्थले । अलिन्दाख्ये महाक्षेत्रे शुकक्षेत्रे च वारुणे
मधुरायांहरिक्षेत्रे श्रीगोष्ठ्यां पुरुषोत्तमे । श्रीरङ्गे पुण्डरीकाक्षे तथान्यत्र हरिस्थले
स्नानेन यानि पापानि विनश्यन्ति द्विजोत्तमाः !।
तानि सर्वाणि नश्यन्ति सेतुस्नानेन निश्चितम् ॥ १५३ ॥

रघुनाथकृते सेतौ महामुनिनिषेविते । न स्नान्ति ये नरास्तेषां न संसारनिवर्तनम्
येवानमःशिवायेतिमन्त्रं पञ्चाक्षरं शुभम् । नवदन्तिनशृण्वन्ति न स्मरन्ति मुनीश्वराः
नमो नारायणायेति प्रणवेन समन्वितम् । मन्त्रमष्टाक्षरंवापिन जपन्ति स्मरन्ति वा
एवं श्रीरामचन्द्रस्य षडक्षरमनुं तथा । न जपन्ति न शृण्वन्तिनस्मरंति च सत्तमाः
तेषां पापानि नश्यन्ति रामसेतौ निमज्जनात् । उपोषणंनकुर्वन्ति ये वा हरिदिनेशुभे
नधारयन्तियेभस्मत्रिपुण्ड्रोद्धूलनादिना । जाबालोपनिषन्मन्त्रैस्सप्तभिर्मस्तकादिके
शिवं वा केशवं वापि तथान्यानपिवै सुरान् । न पूजयन्ति वेदोक्तमार्गेणद्विजपुङ्गवाः
तेषांपापानिनश्यन्तिरामसेतौनिमज्जनात् । शिवविष्ण्वादिदेवेभ्योधूपंदीपंचचन्दनम्
पुष्पाणि न प्रयच्छन्ति भक्तिपूर्वं द्विजोत्तमाः ।
शिवविष्ण्वादिदेवानां श्रीरुद्रैश्चमकैस्तथा ॥ १६२ ॥

श्रीमत्पुरुषसूक्तेन पावमान्यादिसूक्तकैः । त्रिमधुत्रिसुपर्णैश्च पञ्चशान्त्यादिना तथा॥
नाभिषेकं प्रकुर्वंति येनराःपापचेतसः । तेषां पापानि नश्यन्तिधनुष्कोटौनिमज्जनात्

शिवविष्ण्वादिदेवानां नमस्कारप्रदक्षिणे । न प्रकुर्वन्ति भक्त्या ये पापोपहतबुद्धयः
धनुर्मासेऽप्युषः काले न पूजां च प्रकुर्वते । शिवविष्ण्वादिदेवानांमहानैवेद्यपूर्वकम्
तेषांपापानिनश्यन्तिरामसेतौनिमज्जनात् । कीर्तयन्तिनयेविष्णोर्नामानितु हरस्यवा
शालिग्रामशिलाचक्रं शिवनाभं च ये नराः । न पूजयन्ति मोहेन द्वारकाचक्रमेव वा
गङ्गा मृदंचतुलसीमृत्तिकां गोपिचंदनम् । न धारयन्तियेमूढाललाटे चोरसि द्विजाः
दोर्द्वंद्वे च गले सम्यक्सर्वपापौघशान्तये । रुद्राक्षं तुलसीकाष्ठं यो न धारयते नरः

तस्य पापानि नश्यन्ति धनुष्कोटौ निमज्जनात् ।
ब्राह्मे मुहूर्ते सम्प्राप्ते निद्रां त्यक्त्वा प्रसन्नधीः ॥ १७१ ॥

हरिशंकरनामानितत्स्तोत्राण्यथवाद्विजाः । योहिचिन्तयतेनित्यं विशिष्टंमन्त्रमेववा

तस्य पापानि नश्यन्ति धनुष्कोटौ निमज्जनात् ।
प्रातर्जलाशयं गत्वा स्नात्वाऽऽचम्य विशुद्धधीः ॥ १७३ ॥

प्रसन्नात्मा मुनिश्रेष्ठाः सन्ध्योपासनपूर्वकम् । नोपास्तेचनरोयस्तुगायत्रीवेदमातरम्
नोपासनं वाकुर्वन्ति सायंप्रातरतन्द्रिताः । माध्याह्निकं न कुर्वन्तियेवापापहताशयाः
ब्रह्मयज्ञं वैश्वदेवं मध्याह्नेऽतिथिपूजनम् । नाचरन्ति च सायंयेपूजामतिथिसम्मताम्

तेषां पापानि नश्यन्ति धनुष्कोटौनिमज्जनात् ।
भिक्षां यतीनां मध्याह्ने न प्रयच्छन्ति ये नराः ॥ १७७ ॥

येऽप्यधीतां त्रयींविप्रा विस्मरन्तिकुबुद्धयः । नाधीयतेत्रयींवापिवेदाङ्गानितथापुनः

प्रत्याब्दिकं मातृपित्रोः श्राद्धं ये नाचरन्ति वै ।
श्राद्धं महालयं नित्यमष्टकाश्राद्धमेव वा ॥ १७९ ॥

अन्यन्नैमित्तिकं श्राद्धं ये न कुर्वन्तिलोभतः । येचैत्रेतुपौर्णमास्यांचित्रगुप्तस्यतुष्टये
पानकंकदलीपक्वं पायसान्नं सशर्करम् । सगुडं साम्रफलकं पनसादिफलैर्युतम्
ताम्बूलं पादुके छत्रं वस्त्रपुष्पाणि चन्दनम् । विप्रेभ्योनप्रयच्छन्तिलोभोपहतबुद्धयः

तेषां पापानि नश्यन्यि धनुष्कोटौ निमज्जनात् ।
दुर्वृत्तो वा सुवृत्तो वा यो धनुष्कोटिसेवकः ॥ १८३ ॥

तस्यसंसारविच्छित्तिः पुनर्जन्म विना भवेत् । संसारसागरंतर्तुं यदिच्छेन्मुनिपुङ्गवाः

रामचन्द्रधनुष्कोटिं सगच्छेदविलम्बितम् ।
सत्यं वच्मि हितं वच्मि सारं वच्मि हितं पुनः ॥ १८५ ॥

रामचन्द्रधनुष्कोटिंगच्छध्वंमुक्तिसिद्धये । रामचन्द्रधनुष्कोटौकुर्यात्स्नानंविमुक्तये

नास्त्युपायान्तरं विप्रा भूयोभूयो वदाम्यहम् ।
रामचन्द्रधनुष्कोटौ स्नानं कुर्वन्ति ये नराः ॥ १८७ ॥

तेषामयत्नतः सिद्ध्येत्संसारभयनाशनम् । सत्यंज्ञानमनन्तं यत्पूर्णं ब्रह्मसनातनम्

तत्प्राप्तिः स्याद्धनुष्कोटौ मज्जनान्नात्र संशयः ।

श्रीसूत उवाच

एवं वः कथितं विप्राः सेतुमाहात्म्यमुत्तमम् ॥ १८९ ॥

महादुःखप्रशमनं महारोगनिबर्हणम् । दुःस्वप्ननाशनं पुण्यमपमृत्युनिवारणम् ॥
महाशान्तिकरं पुंसां पठतांशृण्वतामपि । स्वर्गापवर्गदंपुण्यं सर्वतीर्थफलप्रदम् ॥

कीर्तयेद्य इदं पुण्यं शृणुयाद्वा समाहितः ।
सोऽग्निष्टोमादियज्ञानां फलमाप्नोति पुष्कलम् ॥ १९२ ॥
चतुर्णां साङ्गवेदानां शतावृत्त्या तु यत्फलम् ।
तत्फलं समवाप्नोति ह्येतन्माहात्म्यकीर्तनात् ॥ १९३ ॥

अत्रैकाध्यायपठनाच्छ्रवणाद्वामुनीश्वराः । अश्वमेधस्य यज्ञस्यप्राप्नोत्यविकलं फलम्
अध्यायद्वयपाठेन श्रवणेन तथैव च । गोमेधाख्यस्य यज्ञस्य फलमाप्नोत्यनुत्तमम्
दशाध्यायान्पठेद्यस्तु शृणुयाद्वा सभक्तिकम् । स्वर्गलोकमवाप्नोति शक्रेणसहमोदते
विंशत्यध्यायपठनाच्छ्रवणाच्च मुनीश्वराः । ब्रह्मलोकमवाप्नोति ब्रह्मणा सह मोदते
त्रिंशदध्यायपठनाच्छ्रवणाच्चमुनीश्वराः । विष्णुलोकमवाप्नोति विष्णुनासह मोदते
चत्वारिंशत्तमाध्यायान्पठेद्वा शृणुयादपि । रुद्रलोकमवाप्नोति रुद्रेण सह मोदते ॥
यः पञ्चाशत्तमाध्यायान्पठते शृणुतेऽपिवा । ससाम्बंहरमाप्नोतिशिवंचन्द्रार्धशेखरम्

यः पठेच्छृणुयाच्चेदं कृत्स्नं माहात्म्यमुत्तमम् ।

स साम्बशिवसालोक्यमाप्नोत्येव न संशयः ॥ २०१ ॥
यः पठेच्छृणुयाच्चेदंद्विवारंमुनिसत्तमाः । सयातिशिवसामीप्यंविमानवरसंस्थितः
यस्त्रिवारं पठेदेतच्छृणुयाद्वासमाहितः । शिवसारूप्यमाप्नोति शिवस्यप्रीतिमावहन्
चतुर्वारं पठेद्यस्तुश्रृणुयाद्वेदमुत्तमम् । ससायुज्यमवाप्नोतिशिवस्यगिरिजापतेः
दिने दिने पठेन्मर्त्यः श्लोकं श्लोकार्धमेव वा ।
पादं वा पादमात्रं वा अक्षरं वर्णमेव वा ॥ २०५ ॥
तत्तद्दिनकृतं पापं तत्क्षणादेव नश्यति ।
कृत्स्नेऽस्मिन्सेतुमाहात्म्ये पठितेऽपि श्रुतेऽपि वा ॥ १०६ ॥
श्लोकेष्वत्रैव वर्तन्ते वर्णायावन्त एव हि । तावन्त्यो ब्रह्महत्याश्चतावन्मद्यनिषेवणम्
तावत्सुवर्णस्तेयं च तावान्गुर्वङ्गनागमः । तावत्संसर्गदोषाश्चनश्यंत्येवहितत्क्षणात्
यावन्तोऽस्मिन्महापुण्ये वर्तन्तेवर्णराशयः । तावत्कृत्वश्चतुर्विंशत्तीर्थेषुस्नानजंफलम्
तथान्येष्वपि तीर्थेषु सेतुमध्यगतेषु वै । तत्फलं समवाप्नोति पाठेन श्रवणेन वा
येनेदं लिखितं भक्त्या सेतुमाहात्म्यमुत्तमम् ।
विनष्टाज्ञानसन्तानः शिवसायुज्यमाप्नुयात् ॥ २११ ॥
यस्येदं वर्ततेगेहे माहात्म्यं लिखितंशुभम् । भूतवेतालकादिभ्योभीतिस्तत्रनविद्यते
व्याधिर्पीडा न तत्रास्ति नास्ति चोरभयं तथा ।
शन्यङ्गारकमुख्यानां ग्रहाणां नास्ति पीडनम् ॥ २१३ ॥
यद्गृहे वर्ततेपुण्यमिदं माहात्म्यमुत्तमम् । रामसेतुं विजानीत तद्गृहं मुनिपुङ्गवाः
चतुर्विंशतितीर्थानि तत्रैव निवसन्ति हि । तत्रैव वर्ततेपुण्यो गन्धमादनपर्वतः ॥
ब्रह्मविष्णुमहेशाश्च वर्तन्ते तत्र सादरम् । लिखित्वासेतुमाहात्म्यंब्राह्मणायनिवेदयेत्
चतुःसागरपर्यन्ता तेन दत्ता वसुन्धरा ॥ २१६ ॥

सेतुमाहात्म्यदानमन्त्रः

सेतुमाहात्म्यदानस्य कलां नार्हन्ति षोडशीम् ।
दानान्यन्यानि सर्वाणि ह्यतः शान्ति प्रयच्छ मे ।

किं पुनर्बहुनोक्तेन वसत्यत्र जगत्त्रयम् ॥ २१७ ॥
श्रावयेच्छ्राद्धकालेयोह्येकमध्यायमत्रवै । नश्येच्छ्राद्धस्यवैकल्यं पितरोऽप्यतिहर्षिताः
यः पर्वकाले सम्प्राप्तेब्राह्मणाच्छ्रावयेदिदम् । अध्यायमेकंश्लोकंवागावोस्यनिरुपद्रवाः
बहुक्षीराः सवत्साश्च महिष्योऽस्यभवन्ति हि । पठनीयमिदंपुण्यंमठेदेवालयेऽपिवा
नदीतटाकतीरेषु पुण्ये वारण्यभूतले । श्रोत्रियाणांगृहेवापि नैवान्यत्र तु कर्हिचित्
विषुवायनकालेषु पुण्ये च हरिवासरे । अष्टम्यां च चतुर्दश्यां पठनीयं विशेषतः ॥
इदं हिपाठ्यं श्रावण्यांमासिभाद्रपदेतथा । धनुर्मासे चपाठ्यं स्यात्पाठ्यं चैवोत्तरायणे
नियमेनैव माहात्म्यं पठनीयमिदं द्विजाः । श्रोतारो नियमैर्युक्ताःश्रृणुयुश्चेदमुत्तमम्
कीर्त्यन्ते पुण्यतीर्थानि माहात्म्येऽस्मिन्बहूनि वै ।
कीर्त्यन्ते पुण्यशीलाश्च तथा राजर्षिसत्तमाः ॥ २२५ ॥
ऋषयश्च महाभागाः कीर्त्यन्तेऽस्मिन्ननुत्तमे ।
धर्माधर्मौ च कीर्त्येते पुण्येऽस्मिन्द्विजपुङ्गवाः ॥ २२६ ॥
ब्रह्माविष्णुश्चरुद्रश्च कीर्त्यन्तेऽत्रत्रिमूर्तयः । इदं पवित्रं पापघ्नं श्रुत्यर्थैरुपबृंहितम् ॥
सम्मतं स्मृतिकर्तॄणांद्वैपायनमुनिप्रियम् । श्रोतव्यं पठितव्यंच आत्मनःश्रेयइच्छता
श्रावकाय च दातव्यं यत्किञ्चित्काञ्चनादिकम् ।
स्वस्वशक्त्यनुरोधेन वित्तशाठ्यं न कारयेत् ॥ २२९ ॥
वस्त्रंहिरण्यंधान्यंवाभूमिंगांचयथाबलम् । दत्त्वासम्भावनीयोऽयंश्रावकः श्रोतृभिर्जनैः
पूजिते श्रावकेतस्मिन्पूजिताःस्युस्त्रिमूर्तयः । जगत्त्रयंपूजितंस्यात्पूजितासुत्रिमूर्तिषु
अवतीर्णोमहीं साक्षाद्रामोदाशरथिर्हरिः । ससीतालक्ष्मणोनित्यंश्रोतृभ्यःश्रावकायच्च
दत्त्वेहलोके भोगांश्च मुक्तिचान्ते प्रयच्छति । द्वैपायनमुखाम्भोजान्निःसृतं शुभदंपरम्
इदं वै सेतुमाहात्म्यं धर्मराजो युधिष्ठिरः । भीमसेनादिभिः सर्वैरनुजैरपिसंवृतः
नियताचारसंयुक्तः ससैन्यश्च दिनेदिने । श्रृणोतिपठतो धौम्यमहर्षेःस्वपुरोधसः

श्रीसूत उवाच

भोभोस्तपोधनाः सर्वे नैमिषारण्यवासिनः । ।

मत्सकाशादिदं गुह्यं माहात्म्यं श्रुतिसम्मितम् ॥ २३६ ॥
श्रुतंभवद्भिर्नियतैर्नित्यं पठतसादरम् । पाठयध्वं स्वशिष्येभ्यो नियतेभ्योनिरन्तरम्
इत्युक्त्वा तान्मुनीन्सूतो रोमाञ्चितकलेवरः । गुरुंहृदास्मरन्व्यासं ननर्ताश्रूणिवर्तयन्
अत्रान्तरे महाविद्वान्पाराशर्यो महामुनिः । आशुप्रादुरभूत्तत्र शिष्यानुग्रहकाङ्क्षया
तमागतं विलोक्याथमुनिंसत्यवतीसुतम् । सूतःसर्वैश्चसहितो नैमिषारण्यवासिभिः
व्यासस्य चरणाम्भोजे दण्डवत्प्रणिपत्यतु । जलमानन्दजंतत्रनेत्राभ्यांपर्यवर्तयत्
प्रणतं प्रियशिष्यं तं दोर्भ्यामुत्थाप्य वै मुनिः ।
आशीर्भिरभिनन्द्यैनमालिङ्ग्य च मुहुर्मुहुः ॥ २४२ ॥
नैमिषारण्यमुनिभिरानीते परमासने । द्वैपायनोमहातेजा निषसाद तपोधनः ॥ २४३
मुनिष्वप्युपविष्टेषु सूतेऽपि च निजाज्ञया ।
शौनकादीन्मुनीन्सर्वाञ्छक्तेः पौत्रोऽभ्यभाषत ॥ २४४ ॥
मयाज्ञातमिदं सर्वं नैमिषारण्यवासिनः । ममशिष्येणसूतेन सेतुमाहात्म्यमुत्तमम् ॥
कथितं भवतामद्य महापातकनाशनम् ॥ २४५ ॥
श्रुतीनां च स्मृतीनां च पुराणानां तथैव च ।
शास्त्राणां चेतिहासानामन्येषामपि कृत्स्नशः ॥ २४६ ॥
एष पर्यवसन्नोऽर्थो माहात्म्यं यत्त्विदं महत् । सर्वेष्वपिपुराणेषुइदं बहुमतं मम
शृणोति धर्मजो धौम्यादिदं नित्यं ममाज्ञया ।
अतो भवन्तोऽपि सदा सेतुमाहात्म्यमुत्तमम् ॥ १४७ ॥
पठन्तु शृण्वन्तु तथा शिष्याणांपाठयन्तु च । तच्छ्रुत्वावचनंतस्यतेप्राहुर्बाढमित्यपि
ततो व्यासोऽपि सूतेन शिष्येणचसमन्वितः । अनुज्ञाप्यमुनीन्सर्वान्कैलासंपर्वतंययौ
ऋषयो नैमिषारण्यनिलयास्तुष्टिमागताः । प्रत्यहं सेतुमाहात्म्यंशृण्वन्तिचपठन्तिच

श्रीस्कान्देमहापुराण एकाशीतिसाहस्र्यां संहितायां तृतीयेब्रह्मखण्डे
सेतुमाहात्म्ये सेतुवैभववर्णनंनामद्विपञ्चाशत्तमोऽध्यायः ॥ ५२ ॥

श्रीरामेश्वरार्पणमस्तु ॥